Downloaded from https:// www.studiestoday.com

कक्षा 12

# काव्यशास्त्रालोकः

## (द्वितीयो भागः)

वरिष्ठोपाध्यायः

कक्षा 12
काव्यशास्त्रालोकः (द्वितीयो भागः)

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# काव्यशास्त्रालोकः ( द्वितीयो भागः )

[वरिष्ठ-उपाध्याय-कक्षायै स्वीकृतं पाठ्यपुस्तकम्]

माध्यमिक-शिक्षा-बोर्ड, राजस्थान, अजमेर

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# पाठ्यपुस्तक–निर्माण–समितिः

## काव्यशास्त्रालोकः ( द्वितीयो भागः )

[वरिष्ठ–उपाध्याय–कक्षायै स्वीकृतं पाठ्यपुस्तकम्]

**संयोजकः**

**डॉ. सत्यनारायण शर्मा**

संयुक्त–निदेशकः

संस्कृत–शिक्षा–विभागः, राजस्थानम्

जयपुरम्

**व्याख्याकर्तारः**

**डॉ. चन्द्रप्रकाश शर्मा**

प्राचार्यः

राजकीय–महाराज–वरिष्ठोपाध्याय–संस्कृत–विद्यालयः

जयपुरम्

**डॉ. अञ्जनापाण्डेय**

प्राध्यापकः (साहित्यशास्त्रम्)

राजकीय–वरिष्ठोपाध्याय–संस्कृत–विद्यालयः

कुण्डगेट, सावर, अजयमेरुः

**डॉ. रचना तिवारी**

सहायक–निदेशकः

राजस्थान–स्टेट–ओपन स्कूल

जयपुरम्

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# पाठ्यक्रम–निर्माण–समितिः

## काव्यकौमुदी (द्वितीयो भागः)

(कक्षा प्रवेशिका )

संयोजक– श्री विमल कुमार जैन (आई.ए.एस.)
निदेशक संस्कृत शिक्षा, राजस्थान, जयपुर

सदस्य–

1. श्री बहादुर सिंह गुर्जर
   सहायक निदेशक, संस्कृत शिक्षा, राजस्थान, जयपुर
2. श्री नाथूलाल सुमन, संयुक्त सचिव
   उच्च शिक्षा शासन सचिवालय, जयपुर
3. योगेन्द्र धामा, व्याख्याता
   राजकीय महाविद्यालय, अलवर
4. डॉ. हरि सिंह राजपुरोहित, व्याख्याता,
   राजकीय महाविद्यालय, ओसियां, जोधपुर
5. श्री हरिओम गौतम, व्याख्याता
   राजकीय शास्त्री संस्कृत महाविद्यालय, भरतपुर
6. श्री रामावतार सिंह, प्रधानाध्यापक,
   आदर्श राजकीय प्रवेशिका संस्कृत विद्यालय, धौलपुर
7. श्री प्रदीप कुमार भट्ट, प्रधानाध्यापक,
   आदर्श राजकीय प्रवेशिका संस्कृत विद्यालय, डूंगरपुर
8. श्री महेश चन्द्र शर्मा, वरि. अध्यापक,
   राजकीय वरि.उपाध्याय संस्कृत विद्यालय, सावर, अजमेर

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## प्रस्तावना

''संस्कृतभाषा'' न केवलं सर्वासां भाषाणां जननी अस्ति, अपि तु जननी इव सर्वेषां जनानां कृते संस्कारान् प्रदाय पालनं पोषणञ्चापि करोति। वस्तुत: इयमेव तादृशी भाषा अस्ति या मानवानां कृते षोडशसंस्काराणां माध्यमेन सर्वविधगुणान् प्रदाय संस्कृतिमपि शिक्षयति । इयं संस्कृतभाषा न केवलं देवानां भाषा आसीत् अस्ति च, अपि तु सामान्यजनानां भाषा अपि आसीत् अस्ति च । वैदिकसंस्कृतेन सह लौकिकसंस्कृतस्य अपि विशालसंस्कृतवाङ्मयम् इदानीमपि संसारस्य अन्यभाषाणाम् अपेक्षया विशालमस्ति। यद्यपि भारतदेशे आक्रमणकारिणाम् आक्रमणेन संस्कृतसाहित्यस्य विशाल: ग्रन्थराशि: नष्ट: सञ्जात:, तथापि अवशिष्टग्रन्थानां विषये कवि: रामधारी सिंहदिनकर: वदति यत् संस्कृतग्रन्थानां यद्यपि ६०प्रतिशतं भाग: आक्रमणकारिभि: नाशित: तथापि अवशिष्टभाग: अपि अन्यभाषाभण्डारम् अतिशेते।

न केवलं सङ्ख्यादृष्ट्या ज्ञानदृष्ट्या च, अपि तु सङ्गणकादियन्त्रेषु एतस्या: भाषाया: उपयोगितादृष्ट्या तु इत्थं प्रतीयते यत् वैज्ञानिकरीत्या प्रारम्भत एव एतस्या: भाषाया: सृजनं कृतमस्ति। एतदपि आश्चर्यजनकमेव प्रतीयते यत् अस्यां भाषायां यावन्तोऽपि ग्रन्था: सन्ति, तावन्तोऽपि कवय:, महाकवय:, लेखका: विद्वांसश्च सन्ति। न केवलं संयोगोऽयमपि तु ईश्वरीययोजनानुसारमेव सर्वं सञ्जातमिति अनुभूयते ।

संस्कृतं न केवलं वाङ्मयस्य अपि तु सामान्यजनानामपि प्रारम्भत एव व्यावहारिकी भाषाऽऽसीत् इत्यस्मात् कारणादेव ''साहित्यं समाजस्य दर्पण:'' इति उच्यते। अर्थात् समाजस्य सर्वविधकार्याणां प्रतिबिम्बवत् दिग्दर्शनं साहित्यरूपिदर्पणे एव जायते। अर्थात् यदा संस्कृतभाषायां ग्रन्थानां रचना भवति स्म तदा सम्पूर्णसमाजस्य व्यवहार- भाषाऽपि संस्कृतमेव आसीत्। वर्त्तमानेऽपि संस्कृतस्य व्यावहारिकरूपं सार्वत्रिकरूपेण दृश्यमानमस्ति। न केवलं व्यावहारिकभाषारूपेण अपि तु मातृभाषारूपेणापि संस्कृतभाषाया: पुनर्नवप्रतिष्ठा जायमाना अस्ति। ''नासा'' इति अन्तरिक्ष-अनुसंधानकेन्द्रेणापि संस्कृतभाषां प्रति स्वीय-विचारा: प्रकटिता: यत् संस्कृतमेव भविष्यत्काले वैज्ञानिकानां विज्ञानभाषा भविता।

मीमांसाशब्दै: अस्माभि: सर्वै: संस्कृतस्य अध्ययनमध्यापनञ्च विधाय भविष्यकालार्थं पूर्वसिद्धतां कृत्वा सज्जितै: भवितव्यम्। संस्कृतेनैव संस्कृते: संरक्षणं संस्काराणाञ्च प्रबलतया जागरणं कर्त्तुं शक्यते।

## उद्देशकथनम्

''साहित्यशास्त्रम्'' इत्यस्य ''काव्यशास्त्रालोक:'' इति नाम्ना प्रस्तूयमानेऽस्मिन् पाठ्यपुस्तके वरिष्ठ-उपाध्यायकक्षाया: विद्यार्थिनां कृते काव्यविधात्मकं ज्ञानं सुलभतया सरलतया च प्राप्तं भवेत्, एतदर्थमेव पण्डितजयदेवविरचित: ''चन्द्रालोक:'' इत्यस्य पञ्चममयूखस्य एकपञ्चाशत् कारिकात: दशममयूखपर्यन्तं भाग: सङ्कलितो वर्त्तते। एतस्य अध्ययनेन काव्यतत्त्वानां ज्ञानं छात्रै: सुगमतया प्राप्तं भवेत् । एतदर्थमेव प्रत्येकमपि कारिकामवलम्ब्य प्रसङ्ग-अन्वयस्य समावेश: कृतो विद्यते। सहैव व्याख्यान्तर्गतं पर्यायपदानि, भावार्थ: विशेषांशाश्च प्रदत्ता:। न केवलमेतावदेव अपि तु आवश्यकतानुसारं छात्राणां बोधनाय यथास्थानं विशेषव्याख्यानमपि प्रदत्तमस्ति।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

अस्मिन्नेव पाठ्यपुस्तके विद्यार्थिभ्यः काव्यपरिचयदृष्ट्या कविकुलगुरुमहाकविकालिदासस्य 'मेघदूतम्' इति खण्डकाव्यस्य पूर्वार्द्धभागः सङ्कलितः विद्यते। अत्र च प्रारम्भे महाकविकालिदासस्य तस्य कृतित्वस्य च संक्षिप्तपरिचयेन सह मेघदूतस्य पूर्वार्द्धस्य कथासारोऽपि लिखितः अस्ति। पुनश्च मेघदूतस्थानां श्लोकानां सम्यक्तया ज्ञानाय प्रसङ्गः, मूलश्लोकः, अन्वयादयः विषयाः प्रदत्ताः विद्यन्ते । एतदतिरिच्य व्याख्याभागे पर्यायपदानि, भावार्थः, छन्दः अलङ्कारश्चेति बिन्दवः समाविष्टाः सन्ति। आवश्यकतानुसारं यथास्थानं विशेषांशाश्चापि प्रदत्ताः सन्ति।

अन्ते चास्मिन् पाठ्यपुस्तके विद्यार्थिभ्यः नाट्यविधानां सहजतया ज्ञानप्राप्तये महाकविभासविरचितं ''प्रतिमानाटकम्'' इति प्रसिद्धं नाटकं सङ्कलितमस्ति। अत्र च प्रत्येकमपि श्लोकः प्रसङ्ग-अन्वय सहितश्च सुसज्जितः कृतो विद्यते। पुनश्च व्याख्याभागेऽपि पर्यायपदानि-भावार्थ-छन्द-अलङ्कार-विशेषांशाश्च प्रदत्ताः सन्ति। नाटकस्य महाकविभासस्य तस्य कृतित्वस्य च परिचयोऽपि प्रदत्तः।

एवं प्रकारेण सरलसंस्कृतभाषया लिखितं पाठ्यपुस्तकमिदं राजस्थान-माध्यमिक-शिक्षामण्डलस्य नूतन -पाठ्यक्रमम् अनुसृत्य संसाधितम् अस्माभिः। अस्मिन्नुपक्रमे माध्यमिक-शिक्षामण्डलस्य सर्वानपि निर्देशान् तदन्तर्गतानि उद्देश्यानि च परिपूरयितुं प्रयासः कृतः अस्ति।

**संयोजकः**

**डॉ. सत्यनारायण शर्मा**

संयुक्त-निदेशकः

संस्कृत-शिक्षा-विभागः, राजस्थानम्

जयपुरम्

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

कक्षा: वरिष्ठोपाध्याय:
विषय: साहित्यशास्त्रम्

समय—3:15 होरा　　　　　　　　　　पूर्णांका: 80+20=100

| क्र.सं | अधिगम—क्षेत्रम् | अंकभार: |
|---|---|---|
| 1. | चन्द्रालोक: (पंचममयूखस्य 51 श्लोकात् दशमयूखपर्यन्तम्) | 40 |
| 2. | मेघदूतम् (पूर्वार्द्ध:) | 20 |
| 3. | प्रतिमानाटकम्—सम्पूर्णम् | 20 |

| क्र.सं | पाठ्य—वस्तु | अंकभार: |
|---|---|---|
| 1. | चन्द्रालोक: (पंचममयूखस्य 51 श्लोकात् दशमयूखपर्यन्तम्)<br>कारिकाव्याख्या—विषयवस्तुप्रश्न—संगतिकरण—प्रश्ना:— 10+20+10<br>पंचम—मयूख: 10<br>षष्ठ—मयूख: 10<br>सप्तम—मयूख: 07<br>अष्टम—मयूख: 05<br>नवम—मयूख: 05<br>दशम—मयूख: 03 | 40 |
| 2. | मेघदूतम् (पूर्वार्द्ध:)<br>(क) सन्दर्भ—अन्वय—प्रसंग—व्याख्या—भावार्था: 10<br>(ख) विषयवस्तुप्रश्ना: 08<br>(ग) कविपरिचय: ग्रन्थपरिचयश्च 02 | 20 |
| 3. | प्रतिमानाटकम्—सम्पूर्णम्<br>(क) सन्दर्भ—अन्वय—प्रसंग—व्याख्या—भावार्था: 08<br>(ख) विषयवस्तुप्रश्ना: 04<br>(ग) अंकसार: चरित्रचित्रणं च 04<br>(घ) प्रयुक्तछन्दांसि 04<br>निर्धारित—पुस्तकम्<br>काव्याशास्त्रालोक: (द्वितीयो भाग:) | 20 |

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# विषयानुक्रमाणिका

प्रस्तावना

उद्देश्यकथनम्

चन्द्रालोकः 1–85

**पञ्चमो मयूखः –** 1–37

तुल्ययोगिता, दीपकालङ्कारः, आवृत्तिदीपकं, प्रतिवस्तूपमा, दृष्टान्तः, निदर्शना, व्यतिरेकः, सहोक्तिः, विनोक्तिः, समासोक्तिः, खण्डश्लेषः, भङ्गश्लेषः, अर्थश्लेषः, अप्रस्तुतप्रशंसा, अर्थान्तरन्यासः, विकस्वरः, पर्यायोक्तिः, व्याजस्तुतिः, आक्षेपालङ्कारः, गूढाक्षेपालङ्कारः, विरोधालङ्कारः, विरोधाभासः, असम्भवालङ्कारः, विभावना, विशेषोक्तिः, असङ्गतिः, विषमालङ्कारः, समानालङ्कारः, विचित्रालङ्कारः, अधिकालङ्कारः, अन्योयन्यालङ्कारः, विशेषालङ्कारः, व्यााघातालङ्कारः, कारणमालालङ्कारः, एकावल्यलङ्कारः, मालादीपकालङ्कारः, सारालङ्कारः, उदारसारालङ्काराः, यथासंख्यालङ्कारः, पर्यायालङ्कारः, परिवृत्तिनामालङ्कारः, परिसंख्यालङ्कारः, विकल्पालङ्कारः, समुच्चयालङ्कारः, समाधिः, प्रत्यनीकालङ्कारः, प्रतीपालङ्कारः, उल्लासालङ्कारः, तद्गुणालङ्कारः, पूर्वरूपालङ्कारः, प्रकारान्तरेण पूर्वरूपम्, अतद्गुणालङ्कारः, अनुगुणालङ्कारः, अवज्ञालङ्कारः, उत्तरालङ्कारः, पिहितालङ्कारः, व्याजोक्तिः, वक्रोक्तिः, स्वभावोक्तिः, भाविकालङ्कारः, भाविकच्छविः, उदात्तालङ्कारः, अत्युक्तिः, केषाञ्चितमते रसवदादयः सप्तालङ्काराः, शुद्ध्यादीनां चतुर्णामलङ्कारान्तरत्वनिरासः, मालोपमादीनामतिशयोक्त्यन्तर्भावकथनं निजकल्पितालङ्कारेष्वलङ्कारत्वसमर्थनं, मयूख–सम्पन्नता।
अभ्यास–प्रश्नाश्च।

**षष्ठो मयूखः –** 38–52

विभावादीनां रसे सहायकत्वकथनं, रसस्वरूपं, शृङ्गाररसः, हास्यरसः, करुणरसः, रौद्ररसः, वीररसः, भयानकरसः, वीभत्सरसः, अद्भुतरसः, शान्तरसः, भावस्वरूपं, व्यभिचारिभावाः, रसाभासभावाभासादयः, भावशान्तिभावोदय–भावसन्धिः भावशबलता, रीतिभेदनिरुपणं, मधुरादिवृत्तिभेदाः, मधुरादीनामुदाहरणानि, मयूख–सम्पन्नता।
अभ्यास–प्रश्नाश्च।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**सप्तमो मयूखः –** 53–63

भारत्या व्यञ्जनालक्षणाशक्तिभेदेन त्रैविध्यं कथनं, व्यञ्जनास्वरूपं, ध्वनेरेकपञ्चाशद्भेदकथनं, व्यङ्ग्यस्य विभागान्तरनिरुपणं, मयूख–सम्पन्नता।

अभ्यास–प्रश्नाश्च।

**अष्टमो मयूखः –** 64–69

ध्वनिगुणीभूतव्यङ्ग्ययोर्भेदः, गुणीभूतव्यङ्ग्यस्य त्रैविध्यम्, अगूढाख्यगुणीभूतव्यङ्ग्यम्, अपराङ्गं, वाच्यसिद्ध्यङ्गम्, अस्फुटं, तुल्यप्राधान्यम्, असुन्दरम्, काक्वाक्षिप्तं, मयूख–सम्पन्नता।

अभ्यास–प्रश्नाश्च।

**नवमो मयूखः –** 70–81

लक्षणास्वरूपं, लक्षणाभेद–प्रभेदाः, मतान्तरेण लक्षणायाश्चातुर्विध्यकथनं, लक्ष्यलक्षकस्थ–स्फुटप्रयोजनायाः उदाहरणं, तटस्थनिष्ठस्फुटप्रयोजनायाः उदाहरणं, लक्षकस्थास्फुटप्रयोजनायाः उदाहरणं, लक्ष्यस्थास्फुट–प्रयोजनायाः उदारहरणं, लक्षणाप्रयोजकसम्बन्धाः, काव्यप्रकाशमतेन लक्षणायाः षड्भेदाः, लक्षणाभेदान्तराणि, लक्षणायाः पदादिनिष्ठता, मयूख–सम्पन्नता।

अभ्यास–प्रश्नाश्च।

**दशमो मयूखः –** 82–85

अभिधालक्षणम्, अभिधायाः षड्विधात्वं, षड्भेदोदाहरणानि, निर्देशवाचकशब्दोदाहरणं, निर्देशवाचकशब्दे–योगादिनिरासः, ग्रन्थफलनिर्देशः, ग्रन्थसमाप्तिः।

अभ्यास–प्रश्नाश्च।

मेघदूतम् (पूर्वार्द्धः) 86–153

प्रतिमानाटकम् 154–261

परिशिष्टम् 262–269

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# भूमिका

भारतवर्षस्य गौरवस्य मुख्याधारा वर्ततेऽस्य सुसमृद्धाः संस्कृतिः। भारतीयसंस्कृतिः स्वोदात्तादर्शैः सार्वभौमिकसिद्धान्तैः समस्त-विश्वस्य मार्गदर्शनं प्राचीनकालादेव करोति। किंवा भारतराष्ट्रं विश्वगुरुरिति उपाधिना विभूषितकर्त्री, संस्कृतेः संरक्षिका च संस्कृतभाषा एव विद्यते। उक्तञ्चापि "संस्कृतिः संस्कृताश्रिता" इति।

संस्कृतभाषायामेव प्रणीतानाम् अखिलज्ञानराशिवेद-पुराण-उपनिषद्-दर्शन-रामायण-महाभारत-श्रीमद्भगवद्गीतादिग्रन्थानां सिद्धान्ताः साम्प्रतमपि अस्मिन् विज्ञानप्रौद्योगिकीयुगे जगतीतलस्य पथप्रदर्शनं कुर्वन्तः सन्ति।

व्यक्ति-समाज-राष्ट्रस्य चरित्रोत्थानकर्त्री, आदर्शरुपस्थापयित्री, धार्मिक-नैतिक-आध्यात्मिकशिक्षाप्रदात्री संस्कृतभाषामयी सूक्तिः सम्पूर्णभारतस्य कृते समानरूपेण ग्राह्या, प्रभावोत्पादिका श्लाघनीया च वर्तते।

संस्कृतशिक्षया एव विद्यार्थिषु स्वाभाविकविनयः, गुरुजनान् प्रति श्रद्धा, मातृपितृन् प्रति भक्तिः, दुर्व्यसनेभ्यः असूया, सदाचाररक्षा, कर्त्तव्यनिष्ठा, उच्चादर्शेषु आस्था इत्यादीनां विकासो जायते।

संस्कृतस्य साहित्यं सुविपुलं विद्यते। अलङ्कारशास्त्रमपि संस्कृतवाङ्मयस्य एका सरणि वर्तते, यस्यां काव्यस्य समीक्षा, तत्स्वरूपं काव्यनिर्माणे च मूलभूततत्त्वानां विचारः क्रियते। अस्यामेव सरण्यामलङ्कारशास्त्रान्तर्गतः आचार्यजयदेवविरचितः चन्द्रालोकाख्यलक्षणग्रन्थः महत्त्वपूर्णः अस्ति। ग्रन्थेऽस्मिन् आचार्येणानेन लक्ष्यलक्षणयोरेकस्यामेव कारिकायां निबन्धनं कृत्वा न केवलं स्वबुद्धेः कौशलं प्रदर्शितमपितु शास्त्रप्रविवक्षूणां छात्राणां कृते महत्सारल्यमुपस्थापितम्।

### चन्द्रलोककारस्य सुकवेराचार्यस्य जयदेवस्य व्यक्तित्वं कृतित्वञ्च

पीयूषवर्षापरनामधेयस्य सुकवेः आचार्यजयदेवस्य नाम संस्कृतसाहित्ये सश्रद्धं स्वीक्रियते। एतस्य मातुः नाम पतिभक्तिपरायणा सुमित्राऽऽसीत्। अनेकदिनसाध्यसत्रविद्याप्रवीणः परमयाज्ञिको महादेवः च पिता आसीत्। स्वयं जयदेवेन चन्द्रालोकग्रन्थस्य प्रत्येकमयूखान्ते एतदुल्लिखितं – 'महादेवः सत्रप्रमुखविद्यैकचतुरः सुमित्रातद्भक्तिप्रणिहितमतिर्यस्य पितरौ' इति।

### जन्मस्थानम्

सुकवेः जयदेवस्य जन्मस्थानविषये किमपि सुनिश्चितरूपेण कथयितुं न पारयामः। यतोहि अनेन स्वकीयरचनासु कुत्रापि स्वजन्मस्थानविषये किमपि नैव लिखितम्। पुनरपि 'प्रसन्नराघवे' स्वयमेवात्मानं कौण्डिन्य इति निर्दिशति। यथा – "कवीन्द्रः कौण्डिन्यः स तव जयदेवः श्रवणयो" इति। अनेन ज्ञायते यदसौ कुण्डिनपुरवास्तव्यः आसीत्। कुण्डिनपुरं हि दक्षिणदेशे वैदर्भमण्डले वरदानदीतीरालङ्कारभूतमेकं स्थानं विद्यते।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## स्थितिकाल:

चन्द्रालोककारस्य आचार्यजयदेवस्य समयोऽपि साधक-बाधकै: अन्तरङ्ग-बहिरङ्गै: कैश्चित् प्रमाणै: किं वा केवलं तर्केण युक्त्या वा निश्चेतुं शक्यते। तदनुसारमस्य स्थितिकाल: द्वादशशताब्दी इति अङ्गीक्रियते।

## रचना

१. **प्रसन्नराघवम्** - रामायणकथामाधारीकृत्य सप्ताङ्कात्मकं नाटकमिदं वर्तते। नाटकेऽस्मिन् सीतास्वयम्वरादारभ्य युद्धकाण्डपर्यन्ता कथा अत्यन्तसरसतया वर्णिता। नाटकस्यास्य भाषा अत्यन्तमनोरमा सरला चास्ति।

२. **चन्द्रालोक:** - प्रस्तूयमानोऽयं चन्द्रालोक इति ग्रन्थ: वस्तुत: अद्वितीयमलङ्कारशास्त्रं वर्तते। चन्द्रस्य आलोक इव काव्योपयोगिनां तत्त्वानां विषयाणां च प्रकाश: यस्मिन्निति चन्द्रालोक:। चन्द्रालोकस्य कथावस्तु दशसु मयूखेषु विभक्तमस्ति। मयूखो नाम मरीचि: किरणो वा। इत्थं चन्द्रालोके इति ग्रन्थे विषयवस्तु-विभाजनं मयूखनाम्ना सर्वथाऽन्वर्थकसञ्ज्ञा खलु।

## विषयवस्तु-विभाजनम्

प्रस्तूयमानेऽस्मिन् चन्द्रालोकाख्ये ग्रन्थेऽत्र पञ्चममयूखस्यैकपञ्चाशत् कारिकात: आरभ्य दशममयूखपर्यन्तं विषयवस्तुन: विभाजनम् एवं कृतमस्ति - अलङ्कारनिरुपणात्मके पञ्चमे मयूखे सप्रपञ्चमलङ्कारनिरूपणं कृतम्। रसनिरूपणाभिधाने षष्ठे मयूखे रसभावादिकं निरूपितम्। ध्वनि-व्यञ्जना-निरुपणात्मके सप्तमे मयूखे वृत्तित्रयीं निर्दिश्य व्यञ्जनानिरूपणव्यपदेशेन ध्वनिभेदा: निरूपिता:। सभेदं गुणीभूतव्यङ्ग्यं निरूपितमष्टमे मयूखे। लक्षणा निरूपणाख्ये नवमे मयूखे स्वमतेन मतान्तरेण च लक्षणावृत्ते: भेदा: प्रदर्शिता: सन्ति। अभिधानिरूपणात्मके दशमेऽन्तिमे च मयूखे अभिधाशक्ति: निरूपिता वर्तते।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# आचार्यजयदेवप्रणीतः
# चन्द्रालोकः
## पञ्चमो मयूखः
## (अथालङ्काराः)

पीयूषवर्षजयदेवेन विरचितः 'चन्द्रालोकः' इत्ययं लक्षणग्रन्थः दशसु मयूखेषु विभक्तः अस्ति। क्रमानुसारेणास्य पञ्चमे मयूखे अलङ्काराणां वर्णनं कृतमस्ति। अलङ्कारस्वरूपभेदादिकञ्च पञ्चममयूखस्य एकतः पञ्चाशत्कारिकापर्यन्तं कनिष्ठोपाध्याय (एकादश) कक्षायै स्वीकृते "काव्यशास्त्रालोकः (प्रथमो भागः)" इति पुस्तके वर्णितं पठितञ्च वर्तते। अतः पञ्चमे मयूखेऽत्र एकपञ्चाशत् कारिकातः अर्थालङ्काराणां वर्णनं क्रियते –

**प्रसङ्गः** – अथ तुल्ययोगितालङ्कारं निरूपयन्नाह जयदेवः –

**क्रियादिभिरनेकस्य तुल्यता तुल्ययोगिता ॥५१॥**
**सङ्कुचन्ति सरोजानि स्वैरिणीवदनानि च।**
**प्राचीनाचलचूडाग्रचुम्बिबिम्बे सुधाकरे ॥५२॥**

**अन्वयः** – क्रियादिभिः अनेकस्य तुल्यता–तुल्ययोगिता। (यथा) – सुधाकरे प्राचीनाचलचूडाग्रचुम्बिबिम्बे सति सरोजानि स्वैरिणीवदनानि च सङ्कुचन्ति।

**व्याख्या** – तुल्ययोगितामाह – **क्रियादिभिरिति**। क्रियादिभिः = क्रियाभिः गुणैश्च, अनेकस्य = प्रस्तुतस्य अप्रस्तुतस्य वा, तुल्यता = समानता, साम्यं, तुल्ययोगिता = एतन्नामालङ्कारो भवति।

**उदाहरति** – सङ्कुचन्तीति। सुधाकरे = चन्द्रे (चन्द्रमसि) प्राच्यां भवः प्राचीनः, प्राचीनश्चासौ अचलः = पर्वतः उदयाचलः इत्यर्थः, तस्य चूडायाः = शिखरस्य, अग्रम् = उपरितनं भागं, चुम्बति = स्पृशतीति प्राचीनाचल–चूडाग्रचुम्बि, तादृशं बिम्बं = मण्डलं यस्य तस्मिन्, पूर्वस्यां दिशि चन्द्र उदिते सति, सरोजानि = कमलानि, स्वैरिणीनां = व्यभिचारिणीनां, वदनानि = मुखानि च, सङ्कुचन्ति = सङ्कोचं यान्ति, मलिनतां भजन्ते ॥५१,५२॥

**भावार्थः** – यत्र अनेकेषां प्रस्तुताप्रस्तुतानां (वर्ण्यपदार्थानां) क्रियया गुणेन वा तुल्यता वर्ण्यते तत्र तुल्ययोगिताऽलङ्कारो भवति। उदाहरणेऽस्मिन् चन्द्रोदयवर्णन – प्रसङ्गे सरोजानां स्वैरिणीवदनानाञ्च सङ्कोचरूपैकया क्रियया सह तुल्यतायाः सम्बन्धप्रतिपादनात् तुल्ययोगितालङ्कारोऽस्ति। चन्द्रप्रकाशे यथा कमलानां सङ्कोचः प्रसिद्धः तथैव गमनभीरुणां स्वैरिणीं वदनानामिति। प्रस्तुतमिदमुदाहरणं प्रस्तुतानां पदार्थानामेकक्रियाभिसम्बन्धरूपायाः तुल्ययोगितायाः वर्तते।

**विशेषः** – अत्र हि प्राचीन इत्यस्यार्थो पुरातनं नास्ति अपितु प्राचीदिगर्थेऽस्ति। क्रियादि पदेऽपि आदि पदं क्रियया सहैव गुणविशेषणयोः कृते प्रयुक्तमस्ति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**प्रसङ्गः** – अथ दीपकालङ्कारं निरूपयन्नाह जयदेवः –

**प्रस्तुताप्रस्तुतानां च तुल्यत्वे दीपकं मतम्।**
**मेधां बुधः सुधामिन्दुर्बिभर्त्ति वसुधां भवान्॥५३॥**

**अन्वयः** – प्रस्तुताऽप्रस्तुतानां च तुल्यत्वे दीपकम्। (यथा) – बुधः मेधाम्, इन्दुः सुधां, भवान् वसुधां बिभर्त्ति।

**व्याख्या** – दीपकालङ्कारलक्षणं वर्णयति – **प्रस्तुतेति।** प्रस्तुतानां = प्रकृतानाम् (वर्णनीयानाम्) अप्रस्तुतानाम् = अप्रकृतानाम् (अवर्णनीयानां) पदार्थानां गुणेन क्रियया च तुल्यत्वे = साम्ये, समानतायां, दीपकं = दीपकालङ्कारः, मतम् = इष्टं, स्वीकृतम्। अर्थात् प्रस्तुताप्रस्तुतनिष्ठसाधारणधर्मकथनत्वं दीपकत्वम्।

**उदाहरति** – मेधामिति। बुधः = पण्डितः, विद्वान्, मेधां = मतिम्, इन्दुः = चन्द्रः, सुधाम् = अमृतं, भवान् = (त्वं) नृपः, वसुधां = पृथिवीं, बिभर्ति = धारयति।

**भावार्थः** – यत्र प्रस्तुताप्रस्तुतपदार्थानां समानगुणेन क्रियया वा सम्बन्धः वर्ण्यते तत्र दीपकालङ्कारो भवति। उदाहरणेऽस्मिन् राजा प्रस्तुतः वर्णनीयत्वाद्, बुधः इन्दुश्च इत्युभौ अप्रस्तुतौ। 'बिभर्ति' इति धारणरूपा क्रिया प्रस्तुताप्रस्तुतयोः मध्ये स्थिता सति अर्थद्वयसम्बन्धकारणादत्र दीपकालङ्कारो ज्ञेयः।

**विशेषः** – दीपकालङ्कारो हि 'देहलीदीपन्यायेन' बोधनीयोऽस्ति। यथा देहलीस्थो दीपः अन्तर्बहिः च उभयत्रापि प्रकाशं करोति तद्वदेव दीपकालङ्कारेऽपि गुणक्रिययोः तुल्यसम्बन्धः प्रकृतम् अप्रकृतञ्च प्रकाशयति इत्यवधेयम्।

**भेदः** – तुल्ययोगितालङ्कारे प्रस्तुतानां प्रस्तुतैः अप्रस्तुतानाम् अप्रस्तुतैः सह धर्मैक्यं वर्ण्यते, किन्तु दीपकालङ्कारे तु प्रस्तुताप्रस्तुतानां पदार्थानां तुल्यत्वे गुणक्रियारूपैकधर्माऽभिसम्बन्धो दृश्यते इत्येवानयोर्भेदः।

**प्रसङ्गः** – अथावृत्तिदीपकालङ्कारं निरूपयन्नाह जयदेवः –

**आवृत्ते दीपकपदे भवेदावृत्तिदीपकम्।**
**दीप्त्याग्निर्भाति भातीन्दुः कान्त्या भाति रविस्त्विषा॥५४॥**

**अन्वयः** – दीपकपदे आवृत्ते – आवृत्तिदीपकं भवेत्। (यथा) – अग्निः दीप्त्या भाति, इन्दुः कान्त्या भाति, रविः त्विषा भाति।

**व्याख्या** – आवृत्त इति। अत्र दीपकपदे = दीपकं च तत् पदमिति दीपकपदं तस्मिन्निति, पद्यते = ज्ञायतेऽर्थो येनेति कर्मव्युत्पत्या पदशब्देन अर्थस्यापि ग्रहणं भवति, तेन पदस्थानीये पदे, अर्थे पदार्थयोर्वा, आवृते = पौनः पुन्येन, असत्कृत्पठिते सति, आवृत्तिदीपकम् = एतन्नामालङ्कारो भवति। एतेन पदावृत्तिदीपकम्, अर्थावृत्तिदीपकं पदार्थोभयावृत्तिदीपकं चेति त्रयो भेदाः दीपकालङ्कारस्य भवन्ति। यथोक्तं दण्डिना –

अर्थावृत्तिः पदावृत्तिरुभयावृत्तिरित्यपि।
दीपकस्थानमेवेष्टमलङ्कारत्रयं बुधाः॥

**उदाहरति** – दीप्त्येति। अग्निः = वह्निः, दीप्त्या = प्रकाशेन, भाति = शोभते। इन्दुः = चन्द्रः, कान्त्या = आभया, प्रभामण्डलेन, भाति = शोभते। रविः = सूर्यः, त्विषा = तेजसा, भाति = शोभते।

**भावार्थः** – येन पदेन क्रियारूपेण गुणरूपेण वा दीपकालङ्कारो जायते तत्पदं दीपकपदं तस्मिन् पदे पुनः पुनः प्रयुक्ते सति आवृत्तिदीपकनामालङ्कारो भवति। उदाहरणेऽस्मिन् अग्नौ वर्णनीये इन्दुरवी अवर्णनीयौ तथैव रात्रिवर्णने इन्दुः वर्णनीयः दिनवर्णने च रविः वर्णनीय अन्यौ चौभौ अवर्णनीयौ इति प्रस्तुताप्रस्तुतपदार्थयोः भातीति क्रिययाऽभिसम्बन्धात् भातिपदं दीपकालङ्कार-सम्पादकं दीपकपदमुच्यते। तस्मिन् दीपकपदे आवृत्ते सति आवृत्तिदीपकालङ्कारो बोध्यः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**विशेषः** – अलङ्कारेऽस्मिन् प्रायेण त्रिविधा आवृत्तिः भवितुं शक्यते – पदावृत्तिः, अर्थावृत्तिः उभयावृत्तिश्चेति। प्रकृतेऽस्मिनुदाहरणे उभयावृत्तिरवबोध्या।

**प्रसङ्गः** – अथ प्रतिवस्तूपमालङ्कारं निरूपयन्नाह जयदेवः –

**वाक्ययोरर्थसामान्ये प्रतिवस्तूपमा मता।**
**तापेन भ्राजते सूर्यः शूरश्चापेन राजते॥५५॥**

**अन्वयः** – वाक्ययोः अर्थसामान्ये (सति) प्रतिवस्तूपमा मता। (यथा) – सूर्यः तापेन भ्राजते, शूरः चापेन राजते।

**व्याख्या** – वाक्ययोरिति। वाक्ययोः = उपमेयवाक्यस्य उपमानवाक्यस्य च, अर्थस्य = वाच्यस्य, सामान्ये = समानतायां, प्रतिवस्तूपमा = प्रतिवस्तूपमानामालङ्कारः, मता = इष्टा, विद्वद्भिरालङ्कारिकैः। यत्र उपमेयोपमानवाक्ययोरेकः समानः धर्मो पृथक् पदेन निर्दिश्यते सा प्रतिवस्तूपमा भवति।

**उदाहरति** – तापेनेति। सूर्यः = भास्करः, तापेन = तेजसा, भ्राजते = शोभते, शूरश्च = वीरश्च, चापेन = धनुषा, राजते = शोभते। अथ भ्राजते – राजते इत्येक एव धर्मः उपमानोपमेयवाक्ययोर्भिन्नपदाभ्यां निर्दिष्टः। अतः प्रतिवस्तूपमालङ्कारोऽस्ति।

**भावार्थः** – यत्र उपमानोपमेयवाक्ययोः वस्तु प्रतिवस्तु भावो भवति तत्र प्रतिवस्तूपमालङ्कारो भवति। अर्थात् यत्र उपमानोपमेयवाक्ययोरेकोऽपि समानो धर्मः पुनरुक्तिभयकारणात् पृथगुच्यते तत्र वस्तु प्रतिवस्तुभावो भवति। अयमेव वस्तुप्रतिवस्तुभावः अर्थसामान्येनोक्तोऽस्ति। उदाहरणेऽस्मिन् 'सूर्यस्तापेनभ्राजते' इत्युपमानवाक्यम्, 'शूरश्चापेन राजते' इत्युपमेयवाक्यम्। अनयोरुभयोरपि वाक्ययोः शोभनत्वं साधारणो धर्मोऽस्ति। एकोऽप्ययं धर्मः पुनरुक्तिभिया 'भ्राजते–राजते' इति पृथक्पदेन प्रतिपादितोऽस्तीति वस्तुप्रतिवस्तुभावात् प्रतिवस्तूपमालङ्कारो मन्तव्यः।

**प्रसङ्गः** – अथ दृष्टान्तालङ्कारं निरूपयन्नाह जयदेवः –

**चेद्बिम्बप्रतिबिम्बत्वं दृष्टान्तस्तदलङ्कृतिः।**
**स्यान्मल्लप्रतिमल्लत्वे सङ्ग्रामोद्दामहुङ्कृतिः॥५६॥**

**अन्वयः** – बिम्बप्रतिबिम्बत्वं चेत् तत् दृष्टान्तः अलङ्कृतिः। मल्ल – प्रतिमल्लत्वे सङ्ग्रामोद्दामहुङ्कृतिः स्यात्।

**व्याख्या** – दृष्टान्तं वर्णयति –चेदिति। बिम्बश्च प्रतिबिम्बश्च बिम्बप्रतिबिम्बौ तयोर्भावः बिम्बप्रतिबिम्बत्वं चेत् = यदि स्यात्तदा दृष्टान्तः = दृष्टान्तनामा, अलङ्कृतिः = अलङ्कारः स्यात्। अर्थात् यत्रोपमानोपमेयवाक्ययोः भिन्नौ एव धर्मो बिम्बप्रतिबिम्बभावेन निर्दिष्टौ, तत्र दृष्टान्तालङ्कारो भवति। उदाहरणेन दृष्टः सम्यगवलोकितः अन्तो निश्चयो यस्य स दृष्टान्त इति व्युत्पत्या अर्थावगमनान्तरं दृष्टान्तनाम अन्वर्थक एव।

**उदाहरति** – स्यादिति। मल्लः = भटश्च प्रतिमल्लः = प्रतिभटश्चेति मल्लप्रतिमल्लौ तयोर्भावः मल्लप्रतिमल्लत्वं तस्मिन् सति, सङ्ग्रामे = रणे, उद्दाम्नी = निरर्गला, उत्कटा, हुङ्कृतिः = गर्जना चेति उद्दामहुङ्कृतिः, स्यात् = भवेत्। अत्र पूर्ववाक्यार्थोत्तरवाक्यार्थयोः बिम्बप्रतिबिम्बभावात् इदमेव पद्यमुदाहरणमप्यस्ति।

**भावार्थः** – यत्र उपमानोपमेय वाक्ययोः बिम्बप्रतिबिम्बभावः स्यात्तदा दृष्टान्तनामालङ्कारो भवति। अर्थात् यत्र उपमेयवाक्यगतो धर्मो भिन्न उपमानवाक्यगतश्च धर्मो भिन्नो भवति तथापि परस्परसादृश्याद् उभयोः अभिन्नता दृश्यते तथापि तयोः पृथक् पृथगुपादानं क्रियते तत्र बिम्बप्रतिबिम्बभावो भवति। एवं बिम्बप्रतिबिम्बभावत्वे सति च



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

दृष्टान्तालङ्कारो जायते। कारिकायामस्यामेव दृष्टान्तसहितस्य, बिम्बप्रतिबिम्बत्वस्य हुङ्कृतिसहितस्य मल्लप्रतिमल्लस्य बिम्बप्रतिबिम्बभावादत्र दृष्टान्तालङ्कारो ज्ञेयः।

**प्रसङ्गः** – अथ दृष्टान्तालङ्कारस्य अपरं स्पष्टमुदाहरणं प्रस्तौति –

**दृष्टान्तश्चेद्भवन्मूर्तिस्तन्मृष्टा दैवदुर्लिपिः।**
**जाता चेत्प्राक् प्रभा भानोस्तर्हि याता विभावरी ॥५७॥**

**अन्वयः** – अन्तः चेत् भवन्मूर्तिः दृष्टा तत् दैवदुर्लिपिः मृष्टा। प्राक् चेत् भानोः प्रभा जाता तर्हि विभावरी याता।

**व्याख्या** – पूर्वोदाहरणस्यास्पष्टत्वाद् दृष्टान्तालङ्कारस्य स्पष्टमुदाहरणमाह – दृष्टान्त इति। कस्यचिद् भगवद्भक्तस्य उक्तिरियं भगवन्तं प्रति यद् अन्तः = हृदि, चेतसि, चेत् = यदि, भवन्मूर्तिः = त्वत्स्वरूपं, दृष्टा = अवलोकिता, साक्षात्कृता वा, तत् = तदा, दैवदुर्लिपिः = दुर्भाग्यलेखः, मृष्टा = नष्टा। चेत् = यदि, भानोः = सूर्यस्य, प्रभा = तेजः, प्रकाशः, प्राक् = प्राच्यां, पूर्वस्यां दिशि, जाता = प्रादुर्भूता, तर्हि विभावरी = रात्रिः, याता = विनष्टा, व्यपगता इति।

**भावार्थः** – हे प्रभो मम हृदये भवतः मूर्तिः स्वरूपमिति यदि साक्षात्कृता स्यात्तर्हि दुर्भाग्यं स्वयमेव नष्टं जायेत। पूर्वस्यां दिशि यदि सूर्यप्रकाशः प्रकटितो भवति तर्हि रात्रिः नष्टा भवत्येव। अर्थात् सूर्योदये जाते सति रात्रिः स्वयमेव विनश्यति। अत्र साधारणधर्मादीनां (दैवदुर्लिपिः – मृष्टेति, विभावरी – यातेति) बिम्बप्रतिबिम्बभावः स्पष्टतया प्रतिपादितः। अतोऽत्र दृष्टान्तालङ्कारो वेदितव्यः।

**प्रसङ्गः** – अथ निदर्शनालङ्कारं निरूपयन्नाह जयदेवः –

**वाक्यार्थयोः सदृशयोरैक्यारोपो निदर्शना।**
**या दातुः सौम्यता सेयं सुधांशोरकलङ्कता ॥५८॥**

**अन्वयः** – सदृशयोः वाक्यार्थयोः ऐक्यारोपः – निदर्शना। यथा – या दातुः सौम्यता सा इयं सुधांशोः अकलङ्कता।

**व्याख्या** – निदर्शनां कथयति – वाक्यार्थयोरिति। सदृशयोः, वाक्यार्थयोः = वाच्यवाचकयोः, ऐक्यारोपः = एकतारोपणं, निदर्शना = निदर्शनानामकोऽलङ्कारः भवति। अयं भावः – द्वयोः पदार्थयोः धर्मौ अपि यत्र भिन्नौ भवतस्तथापि एकस्य धर्मस्य अन्यस्मिन् आरोपौ वर्ण्यते तत्र निदर्शनालङ्कारो भवति। यदुक्तं मम्मटाचार्येण – 'अभवन् वस्तुसम्बन्धः उपमापरिकल्पकः'।

**उदाहरति** – या दातु इति। दातुः = दानशीलस्य जनस्य या सौम्यता = यत् सौमनस्यं, सा इयम् = असौ, एषा, सुधांशो = चन्द्रस्य, अकलङ्कता = कलङ्कशून्यता, निष्कलङ्कता वा। अत्र दातुः सौम्यता चन्द्रस्य कलङ्कशून्यता च यत्तत्पदाभ्याम् (यत्तदोर्नित्यम्) एकभावेन उपकल्पितो वर्तते। सहैव उभयोः वाक्यार्थयोः सादृश्यवशाद् ऐक्यम् आरोपितमिति, तस्मादिह निदर्शनालङ्कारोऽस्ति।

**भावार्थः** – यत्र सादृश्यवशाद् द्वयोः भिन्नयोः वाक्यार्थयोः ऐक्यस्याभावेऽपि ऐक्यस्य प्रतिपादनं क्रियते, तत्र निदर्शनानामाऽलङ्कारो भवति। उदाहरणेऽस्मिन् दातुः सौम्यता दातर्येव भवितुमर्हति सा सुधांशौ नैव यास्यति, सुधांशोश्चाकलङ्कता सुधांशावेव भवति तथापि सादृश्यात् दातुः सौम्यतायाः 'सा इयम्' इति पदेन सुधांशौ आरोपत्वेन प्रतिपादनं कृतमस्ति। तस्मादिह निदर्शनानामकोऽलङ्कारो वर्तते।

**भेदः** – रूपकालङ्कारे शब्दस्यैवारोपो भवति, किन्तु निदर्शनायां तु अर्थस्यारोपो भवति। अर्थात् रूपके उपमेयोपमानयोः एकत्वेन कथ्यते परन्तु निदर्शनायां यत्तद्द्वयाम् ऐकस्यारोपो दृश्यते।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**प्रसङ्गः** – अथ व्यतिरेकालङ्कारं निरूपयन्नाह जयदेवः –

**व्यतिरेको विशेषश्चेदुपमानोपमेययोः ।**
**शैला इवोन्नताः सन्तः किन्तु प्रकृतिकोमलाः ॥५९॥**

**अन्वयः** – उपमानोपमेययोः चेत् विशेषः (स्यात् – तर्हि) व्यतिरेकः। (यथा) – सन्तः शैलाः इव उन्नताः किन्तु प्रकृतिकोमलाः।

**व्याख्या** – व्यतिरेकं लक्षयति – **व्यतिरेक इति।** चेत् = यदि, उपमानोपमेययोः = प्रकृताऽप्रकृतयोः, विशेषः = वैलक्षण्यं, विलक्षणता वा, स्यात्तर्हि व्यतिरेकः = तन्नामकोऽलङ्कारो भवति। उपमानात् उपमेयस्य आधिक्ये न्यूनतायां वा विवक्षितायां व्यतिरेकालङ्कारो भवति।

**उदाहरति** – शैला इति। सन्तः = साधवः, शैलाः = पर्वताः इव, उन्नताः = उच्चैः स्थिताः सन्ति, किन्तु = परन्तु, प्रकृत्या = स्वभावेन कोमलाः = मृदुलान्तः करणाः, न तु पाषाणकठिना भवन्ति। अत्र हि सज्जनानां पर्वतानाञ्च उन्नत्वं समानं सत्यपि सज्जनानां कोमलत्वमिति अधिकं वैशिष्ट्यं प्रतिपादनात् व्यतिरेकालङ्कारो वेदितव्यः।

**भावार्थः** – सामान्यनियम – वैपरीत्यं व्यतिरेकपदस्यार्थः। एवञ्च 'अधिकगुणत्वमुपमानं, न्यूनगुणत्वमुपयेत्वम्' इति सामान्यनियमपरिहारेण उपमानापेक्षयोपमेये एव गुणाधिक्यं वर्णितं स्यात्तत्र व्यतिरेकालङ्कारः। प्रकृतोदाहरणे सन्तः उपमेयभूताः शैलाश्चोपमानभूताः सन्ति। औन्नत्यम् अनयोः सादृश्यप्रतिपादकं, किन्तु उपमेयभूते सज्जने प्रकृतिकोमलत्वं वर्णितमस्ति, यो खलुपमानभूते शैले नास्ति। इत्थं प्रकृतिकोमलत्वरूपगुणगतधर्मस्य उपमेयेवर्तमानत्वाद् उपमाने च असत्वाद् व्यतिरेकालङ्कारो वेदितव्यः।

**प्रसङ्गः** – अथ सहोक्तिनामानम् अलङ्कारं निरूपयन्नाह जयदेवः –

**सहोक्तिः सहभावश्चेद्भासते जनरञ्जनः ।**
**दिगन्तमगमद्यस्य कीर्तिः प्रत्यर्थिभिः सह ॥६०॥**

**अन्वयः** – जनरञ्जनः सहभावः चेत् भासते (तर्हि) सहोक्तिः। (यथा) – यस्य कीर्त्तिः प्रत्यर्थिभिः सह दिगन्तम् अगमत्।

**व्याख्या** – सहोक्तिस्वरूपमाह – सहोक्तिरिति। जनरञ्जनः = लोकरञ्जनः, सर्वहृदयग्राही, सहभावः = साहित्यं, सहितत्वं वा, भासते = प्रकाशते, चेत् = तर्हि, सहोक्तिः = एतन्नामालङ्कारः स्यादिति। यत्र सहृदयहृदयाह्लादकः सहभावः उपमानोपमेयभावकल्पकः तत्र सहोक्तिः।

**उदाहरति** – दिगन्तमिति। यस्य = वर्ण्यमानस्य राज्ञः, कीर्त्तिः = यशः, प्रत्यर्थिभिः = शत्रुभिः, सह = साकं, दिगन्तं = सर्वासु दिक्षु, अगमत् = अगच्छत्, प्रसृता जाता इति भावः।

**भावार्थः** – यदि द्वयोः वस्तुनोः चमत्कारजनकः सहभावः समानधर्मकथनं जायते तत्र सहोक्तिनामालङ्कारोऽवगन्तव्यः। उदाहरणेऽस्मिन् शत्रवो भूयात् पलायिता दिगन्तं यावत् गतवन्तः। तेनास्य राज्ञः कीर्त्तिरपि अयं राजा महाबली इत्येवं रूपा दिगन्तं प्राप्तेति भावः। अत्र कीर्त्तिशब्दस्य प्रथमान्ततया प्राधान्यं, तृतीयान्तया प्रत्यर्थिपदस्य गुणत्वम्। उभयोः अनयोः युगपदेव दिगन्तगमनरूपः सहभावः प्रतिपादनात् सहोक्तिनामालङ्कारोऽस्ति।

**विशेषः** – सहभावस्योक्तिः सहोक्तिः। सहयुक्तेऽप्रधाने (२/३/१८) इति पाणिनिसूत्रेण यत्र सहार्थे तृतीयाविभक्तिः भवति तत्रायमलङ्कारो भवति, न तु 'हेतवर्थकतृतीया (शशिना च निशा निशया च शशी) प्रसङ्गो इति सविशेषमवधेयम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**प्रसङ्गः** – अथ विनोक्त्यलङ्कारं निरूपयन्नाह जयदेवः –

**विनोक्तिश्चेद्विना किञ्चित्प्रस्तुतं हीनमुच्यते।**
**विद्या हृद्यापि सावद्या विना विनयसम्पदम्॥६१॥**

**अन्वयः** – चेत् किञ्चित् विना प्रस्तुतं हीनम् उच्यते (तर्हि) विनोक्तिः (यथा) – हृद्या अपि सा विद्या विनयसम्पदं विना अवद्या।

**व्याख्या** – विनोक्तिं लक्षयति – चेत् = यदि, किञ्चित् विना = किमपि वस्तु विना, प्रस्तुतं = वर्णनीयं, हीनं = न्यूनम्, उच्यते = कथ्यते, चेत्तदा, विनोक्तिः = एतन्नामालङ्कारो भवति।

**उदाहरति** – विद्येति। सा = वक्ष्यमाणा विद्या, हृद्या = मनोहराऽपि, विनयसम्पदं = विनम्रसम्पत्तिं, विना = अन्तरेण, अवद्या = निन्दनीया भवति। अत्र वर्णनीयविद्याया विनयसम्पदं विना हीनत्वप्रतिपादनात् विनोक्तिनामालङ्कारः।

**भावार्थः** – यत्र किञ्चिद् वस्तु विना (अभाववशाद्) वर्णनीयं पदार्थं हीनमुच्यते (न्यूनताप्रकटी क्रियते) तत्र विनोक्तिनामकोऽलङ्कारो भवति। प्रकृतेऽस्मिन्नुदाहरणे वर्णनीयायां विद्यायां विनयं विना हीनत्वप्रतिपादनाद् विनोक्तिः।

**विशेषः** – अत्र जयदेवेन विना इति शब्दार्थ एव विवक्षितस्तेन 'नञ्-निर्-वि-अन्तरेण-ऋते-हीन-विकलेत्यादि शब्दार्थानां प्रयोगेऽप्ययमेवालङ्कारोऽवगन्तव्यः।

**प्रसङ्गः** – अथ समासोक्त्यलङ्कारं निरूपयन्नाह जयदेवः –

**समासोक्तिः परिस्फूर्तिः प्रस्तुतेऽप्रस्तुतस्य चेत्।**
**अयमैन्द्रीमुखं पश्य रक्तश्चुम्बति चन्द्रमा॥६२॥**

**अन्वयः** – प्रस्तुते चेत् अप्रस्तुतस्य परिस्फूर्तिः (तर्हि) समासोक्तिः (यथा) – पश्य, अयं रक्तः चन्द्रमाः ऐन्द्रीमुखं चुम्बति।

**व्याख्या** – समासोक्तिं निरूपयन्नाह – समासोक्तिरिति। प्रस्तुते = प्रकृते, वर्णनीये, अप्रस्तुतस्य = अप्रकृतस्य, परिस्फुर्त्तिः = प्रतीतिः, चेत् = यदि जायते, तर्हि = तदा, समासोक्तिनामालङ्कारो भवति। समासेन = संक्षेपेणोक्तिरित्यन्वर्थेयं संज्ञा प्रस्तुतवृत्तान्ते यत्र कार्यसाम्येन, विशेषणसाम्येन च अप्रस्तुतव्यवहारारोप क्रियते तत्र समासोक्तिः। उदाहरणं यथा – अयमिति। पश्य = अवलोकय, अयम् = एष पुरोदृश्यमानः, रक्तः = रक्तवर्णः, रागयुक्तः, चन्द्रमाः = शशी, ऐन्द्रीमुखं = प्राचीमुखं, प्राची दिग्वदनं, चुम्बति = स्पृशति, पूर्वस्यां दिशि चन्द्र उदेति इति भावः। अत्र चन्द्रगतपुंस्त्वेन ऐन्द्रीगतस्त्रीत्वेन रक्तकामुकत्वरूपश्लिष्टविशेषणमहिम्नाऽप्रस्तुतनायकवृत्तान्तः प्रतीयते।

**भावार्थः** – यत्र प्रस्तुतवृत्तान्तवर्णनेन अप्रस्तुतवृत्तान्तस्य प्रतीतिरपि जायते तत्र समासोक्तिनामकोऽलङ्कारो भवति। प्रस्तुतेऽस्मिन् उदाहरणेऽपि वस्तुतः उदीयमानस्य चन्द्रस्य वर्णनप्रसङ्गे लिङ्गसाम्याच्चन्द्रे नायकव्यवहारस्यारोपः ऐन्द्रयाञ्चनायिकाव्यवहारस्यारोपः, एवञ्च रक्तोऽनुरक्तो कश्चननायकः कस्याश्चिन्नायिकायाः मुखं चुम्बतीति अप्रस्तुतार्थस्य प्रतीतिः कारणात् समासोक्तिरलङ्कारोऽवगन्तव्यः।

**प्रसङ्गः** – अथ खण्डश्लेषालङ्कारं निरूपयन्नाह जयदेवः –

**खण्डश्लेषः पदानां चेदेकैकं पृथगर्थता।**
**उच्छलद्भूरिकीलालः शुशुभे वाहिनीपतिः॥६३॥**

**अन्वयः** – चेत् एकैकम् पदानाम् पृथगर्थता (तर्हि) श्लेषः स्यात्। (यथा) – उच्छलद्-भूरि-कीलालः वाहिनीपतिः शुशुभे।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**व्याख्या** – खण्डश्लेषं लक्षयन्नाह – खण्डश्लेष इति। चेत् = यदि, एकैकं = प्रत्येकं वाक्यार्थं प्रति, पदानां = समस्तपदावयवानां शब्दानां पृथगर्थता = भिन्नार्थकता स्यात्तदा खण्डश्लेषः = एतन्नामालङ्कारो भवति।

**उदाहरति** – उच्छलद् इति। उच्छलन्ति = उद्‌गच्छन्ति, भूरीणि = बहुनि, कीलालानि = जलानि रुधिराणि वा यस्मिन् स उच्छलद्‌भूरिकीलालः, वाहिनीपतिः = वाहिन्या = नद्याः सेनाया वा पतिः स्वामिति वाहिनीपतिः सेनापतिः नदीपतिः (समुद्रः) वा शुशुभे = शोभितोऽभूत्।

**भावार्थः** – यत्र एकेनापि पदेन अनेकार्थस्य प्रतीतिर्जायते तत्र खण्डश्लेषनामकोऽलङ्कारो भवति। यथाहि प्रकृतोदाहरणे 'कीलालः' इत्यस्य जलरुधिरयोः, 'वाहिनीपतिः' इत्यस्य समुद्र-सेनापतिरुभयोः द्वयोः अर्थयोः प्रतीतिकारणात् खण्डश्लेषनामालङ्कारोऽस्ति।

**विशेषः** – श्लेषो नाम नानार्थशब्दविन्यासः अनेकार्थवाचकपदानामनेकार्थाभिधानं वा। यथोक्तं कुवलयानन्दे–

"नानार्थसंश्रयश्लेषो वर्ण्यावर्ण्योभयाश्रितः।" इति।

श्लेषो हि तावद् वर्ण-पद-लिङ्ग-भाषा-प्रकृति-प्रत्यय-विभक्ति-वचनमष्टधा भवति। पुनश्च स एव सभङ्गाभङ्गोभयरूपत्वात् त्रिविधः। खण्डश्लेषः अभङ्गश्लेषश्चेति उपर्युक्तेष्वाष्टसु भेदेषु पदश्लेषस्यैव द्वौ भेदौ अवगन्तव्यौ।

**प्रसङ्गः** – अथ भङ्गश्लेषालङ्कारं निरूपयन्नाह जयदेवः –

**भङ्गश्लेषः पदस्तोमस्यैव चेत्पृथगर्थता।**
**अजरामरता कस्य नायोध्येव पुरी प्रिया॥६४॥**

**अन्वयः** – पदस्तोमस्य एव चेत् पृथगर्थता (स्यात्तर्हि) भङ्गश्लेषः। (यथा) – अयोध्यापुरी इव अजरामरता कस्य न प्रिया?

**व्याख्या** – भङ्गश्लेषं व्याचष्टे – भङ्गश्लेष इति। चेत् = यदि, पदस्तोमस्य = पदसमूहस्यैव, पृथगर्थता = भिन्नार्थकता स्यात्तदा भङ्गश्लेषो भवति। अर्थात् समस्तस्य पदसमूहस्यैवानेकार्थता भवति चेत्तदा भङ्गश्लेषनामकोऽलङ्कारोवगन्तव्यः।

**उदाहरति** – अजरामरतेत्यादि। अजः = रघुपुत्रः रामश्च दशरथपुत्रः अजश्च रामश्चेति अजरामौ तयोः रता इति अजरामरता = अज-रामानुरक्ता, यद्वा अजरः जरारहितश्च अमरः मरणरहितश्चेति अजरामरौ तयोर्भावः अजरामरता = अजरता अमरता वा, अयोध्यापुरी = साकेतं नाम नगरं, कस्य = कस्यजनस्य, प्रिया = इष्टा, प्रीतिदा न अपितु सर्वजनस्य प्रिया एव।

**भावार्थः** – आचार्यजयदेवेन श्लेषस्य भेदद्वयं प्रतिपादितम् – शब्दश्लेषः अर्थश्लेषश्चेति। शब्दश्लेषस्यापि भेदद्वयं खण्डश्लेषः भङ्गश्लेषश्चेति समस्तपदस्य खण्डं कृत्वा समस्तपदावयवभूतपदस्य अनेकार्थतायां खण्डश्लेषः समस्तस्य पदसमूहस्यैव अनेकार्थतायां भङ्गश्लेष इति स्पष्टम्। यथोदाहरणेऽस्मिन् 'अजरामरता' इति पदसमुदायस्य भिन्नार्थकत्वाद् भङ्गश्लेषालङ्कारः। अलङ्कारोऽयं जतुकाष्ठन्यायेन भवति। यथा मिलिते काष्ठजतुनी एकरूपे भवतः, भेदे सति च पृथक्-पृथक् दृश्येते तथैव यदा पदे मिलिते भवतः तदा ते एकरूपे स्तः, विश्लेषे च पृथक्-पृथक् भवति इत्येव भावः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**प्रसङ्गः** – अथ अर्थश्लेषालङ्कारं निरूपयन्नाह जयदेवः –

**अर्थश्लेषोऽर्थमात्रस्य यद्यनेकार्थसंश्रयः।**
**कुटिलाः श्यामलाः दीर्घाः कटाक्षाः कुन्तलाश्च ते॥६५॥**

**अन्वयः** – यदि अर्थमात्रस्य अनेकार्थसंश्रयः (तर्हि) अर्थश्लेषः (स्यात्)।(यथा) – ते कटाक्षाः कुन्तलाः च कुटिलाः श्यामलाः दीर्घाः च (सन्ति)।

**व्याख्या** – अर्थश्लेषं लक्षयति – अर्थश्लेष इति। अर्थमात्रस्य = वाच्यार्थमात्रस्य, यदि = चेत्, अनेकार्थसंश्रयः = बहूनां वाच्यार्थानाम् अन्वयः (सम्बन्धः) स्यात्तदा, अर्थश्लेषः = अर्थश्लेषालङ्कारो भवति। अर्थात् पर्यायशब्दपरिवर्तने सत्यपि यत्र श्लेषो (अनेकार्थता) न नश्यति तत्रार्थश्लेषः, यत्र च नश्यति तत्र शब्दश्लेषः। तथा च एकस्यैव अर्थस्य अनेकप्रकारेणानेकवाक्यार्थान्वयत्वं स्यात्तत्रार्थश्लेष इति।

**उदाहरति** – कुटिला इति। हे प्रिये ते = तव, कटाक्षाः = अपाङ्गदृष्टयः, कुन्तलाः = केशाश्च, कुटिलाः = वक्राः, श्यामलाः = कृष्णवर्णाः, दीर्घाः = लम्बायमानाश्च सन्ति।

**भावार्थः** – यत्र वाच्यार्थमात्रस्य अनेकैः पदार्थैः सह अन्वयः (सम्बन्धः) स्यात्तत्रार्थश्लेषो भवति। यथाऽत्रोदाहरणे कटाक्षगतं कुटिलत्वं, श्यामलत्वं दीर्घत्वञ्चान्यत्, कुन्तलगतं कुटिलत्वं, श्यामलत्वं दीर्घत्वञ्चान्यत् एवास्ति। अस्यैव यदि कुटिलपदस्थाने तत्पर्यायवाचिवक्रादिपदमुपन्यस्येत तदापि नार्थश्लेषत्वहानिः। अतः एकस्यार्थस्यानेकार्थसंश्रयत्वादर्थश्लेषाख्योऽलङ्कारोऽस्ति।

**प्रसङ्गः** – अथ अप्रस्तुतप्रशंसालङ्कारं निरूपयन्नाह जयदेवः –

**अप्रस्तुतप्रशंसा स्यात्सा यत्र प्रस्तुतानुगा।**
**कार्यकारणसामान्यविशेषादेरसौ मता॥६६॥**

**अन्वयः** – यत्र प्रस्तुताऽनुगा अप्रस्तुत-प्रशंसा स्यात् (तत्र) सा (अप्रस्तुतप्रशंसा भवति)। असौ कार्य कारणसामान्य विशेषादेः मता।

**व्याख्या** – अप्रस्तुतप्रशंसां लक्षयति – अप्रस्तुतप्रशंसेति। यत्र = यस्मिन् सन्दर्भे वाक्ये वा, प्रस्तुतस्य अनुगा इति प्रस्तुताऽनुगा = प्रस्तुतवृत्तानुसारिणी, अप्रस्तुतस्य = अप्रकृतस्य वृत्तान्तस्य, प्रशंसा = वर्णनमिति, अप्रस्तुतप्रशंसा = एतन्नामालङ्कारो भवति। कार्यं च कारणं च सामान्यं च विशेषश्चेति, कार्यकारणसामान्यविशेषाः ते आदौ यस्य स तथा भूतात् सम्बन्धात् असौ = अप्रस्तुतप्रशंसा, मता = इष्टा। सेयं पञ्चधा तथाहि – कार्यप्रतीतिरूपा, कारणप्रतीतिरूपा, सामान्यप्रतीतिरूपा विशेषप्रतीतिरूपा आदिपदेन सारूयप्रतीतिरूपा इत्येवं पञ्चविधा अप्रस्तुतप्रशंसा स्वीक्रियते।

**भावार्थः** – यत्र अप्रस्तुतवृत्तान्तकथनेन प्रस्तुतवृत्तान्तस्य अनुगमनं भवति तत्र अप्रस्तुतप्रशंसानामकोऽलङ्कारः स्यादित्यर्थः। वाच्यार्थमुखेन (अभिधया) अप्रस्तुतस्य, व्यंग्यार्थमुखेन (व्यञ्जनया) च प्रस्तुतस्य प्रतीतिर्नाम अप्रस्तुतप्रशंसा। अप्रस्तुतप्रशंसा पञ्चविधा मन्यते – कार्यप्रतीतिरूपा, कारणप्रतीतिरूपा, सामान्यप्रतीतिरूपा, विशेषप्रतीतिरूपा, सारुप्यप्रतीतिरूपा चेति। यथोक्तं साहित्यदर्पणे – 'अप्रस्तुताप्रस्तुतं चेद्गम्यते पञ्चधा ततः। अप्रस्तुतप्रशंसा स्यात्।

**प्रसङ्गः** – अथ अप्रस्तुतप्रशंसाऽलङ्कारस्य उदाहरणद्वयं प्रस्तौति –

**कमलैः कमलावासैः किं किं नासादि सुन्दरम्।**
**अप्यम्बुधे परं पारे प्रयान्ति व्यवसायिनः॥६७॥**

**अन्वयः** – कमलावासैः कमलैः किं किं सुन्दरं न आसादि ?व्यवसायिनः अम्बुधेः अपि परं पारं प्रयान्ति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**व्याख्या** – अप्रस्तुत प्रशंसामुदाहरति – कमलैरिति। कमलाया: = लक्ष्म्या: आवासै: = स्थानभूतै:, कमलै: = सरोजै: किं किं सुन्दरं = किं किं रम्यं, न आसादि = न प्राप्तम्, अपितु सर्वमेव सुन्दरं प्राप्तमिति तात्पर्यम्। अत्र कमलानि अप्रस्तुतरुपाणि वर्णितानि तेषां विषये च सामान्यकथनमिदम्। एतञ्च कस्यचिद् धनिकस्य वृत्तान्तमुद्दिश्य सविशेषमुक्तम्। एवमत्र अप्रस्तुतसामान्यवर्णनद्वारा प्रस्तुतविशेषस्य प्रतीतिकारणात् विशेषप्रतीतिरूपाऽप्रस्तुतप्रशंसा विद्यते।

अप्रस्तुत विशेषप्रशंसया प्रस्तुतसामान्यमुदाहरति – अप्यम्बुधेरिति। व्यवसायिन: = उद्योगिन: पुरुषा:, अम्बुधे: = समुद्रस्य अपि, परं पारं = परतीरं, प्रयान्ति = गच्छन्ति।

**भावार्थ:** – अत्र उद्योगिनां जनानां कृते किमपि कार्यं दुष्करं नास्ति इति सामान्यवृत्तं प्रस्तुतम्। तदर्थञ्च अम्बुधिपारगमनरूपाप्रस्तुतवृत्तान्तविशेषवर्णनमत्र कृतमस्ति। एवम् अप्रस्तुतविशेषवर्णनेन प्रस्तुतसामान्यस्य प्रतीतिकरणादिह सामान्यप्रतीतिरूपाऽप्रस्तुतप्रशंसाऽवगन्तव्या।

**प्रसङ्ग:** – अथ अर्थान्तरन्यासालङ्कारं निरूपयन्नाह जयदेव: –

**भवदेर्थान्तरन्यासोऽनुषक्तार्थान्तराऽभिधा।**
**हनूमानब्धिमतरद्दुष्करं किं महात्मनाम्॥६८॥**

**अन्वय:** – अनुषक्तार्थान्तराभिधा अर्थान्तरन्यास: भवेत्। (यथा) – हनुमान् अब्धिम् अतरत्। महात्मनां किं दुष्करम्?

**व्याख्या** – अर्थान्तरन्यासं लक्षयति – भवेदर्थान्तरेत्यादि। अन्य अर्थ: अर्थान्तरम् अनुषक्तं (सम्बद्धं) च तत् अर्थान्तरं चेति अनुषक्तार्थान्तरम्, अनुषक्तार्थान्तरस्य अभिधा (कथनम्) अनुषक्तार्थान्तराभिधा यत्र स्यात्तत्र अर्थान्तरन्यास: – अन्य अर्थ: अर्थान्तरं तस्य न्यास: = न्यासो नाम स्थापनं प्रयोगो वा। अर्थान्तरन्यास: = एतन्नामालङ्कार:।

**उदाहरति** – हनूमानिति। हनूमान् = आञ्जनेय:, अब्धिं = समुद्रम्, अतरत् = तीर्णवान्, पारमगमत्। यतोहि महात्मनां = लोकोत्तराणां, महापुरुषाणां, किं = किं कार्यं, दुष्करं = कर्तुम् अशक्यं, कष्टसाध्यं वा? अपितु न किमपि दुष्करमित्यर्थ:।

**भावार्थ:** – यत्र मुख्यार्थस्य समर्थनार्थं सम्बद्धम् अर्थान्तरस्यग्रहणं क्रियते तत्रार्थान्तरन्यासो भवति। प्रकृतेऽस्मिन्नुदाहरणे हनूमान् समुद्रम् अतरत् इति विशेष:। तस्य च महात्मनां किं दुष्करम् इति सामान्येन समर्थमिति। इत्थं सम्बद्धेन अर्थान्तरेण मुख्यार्थस्य समर्थनादत्र अर्थान्तरन्यासनामालङ्कारोऽवगन्तव्य:।

**विशेष:** – अप्रस्तुतप्रशंसाऽलङ्कारवदत्रापि कार्यकारणसामान्यविशेषादे: ग्रहणं भवति। एवञ्च सामान्येन विशेषस्य, विशेषेण सामान्यस्य, कारणेन कार्यस्य कार्येण कारणस्य च समर्थनाद् अर्थान्तरन्यासालङ्कार: चतुर्विधो भवति। चतुर्विधोऽप्ययं साधर्म्यवैधर्म्याभ्यां भेदेनाष्टधा जायते। साहित्यदर्पणकारेण सर्वं प्रपञ्चितं – 'सामान्यं वा विशेषस्तेनवा यदि कार्यं च कारणेनेदं कार्येण च समर्थ्यते। साधर्म्येणेतरेणार्थान्तरन्यासोऽष्टधा तत:। इति।

**प्रसङ्ग:** – अथ विकस्वरालङ्कारं निरूपयन्नाह जयदेव: –

**यस्मिन्विशेषसामान्यविशेषा: स विकस्वर:।**
**स न जिग्ये महान्तो हि दुर्धर्षा: क्ष्माधरा इव॥६९॥**

**अन्वय:** – यस्मिन् विशेष – सामान्य – विशेषा: (स्यु:) स: विकस्वर:। (यथा) – स: न जिग्ये। महान्त: हि क्ष्माधरा: इव दुर्धर्षा: (भवन्ति)।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**व्याख्या** – विकस्वरालङ्कारं लक्षयन्नाह – यस्मिन्निति। यस्मिन् = यत्र वाक्ये, विशेषश्च सामान्यञ्च विशेषश्चेति – विशेषसामान्यविशेषाः अर्थाः भवेयुः तत्र विकस्वरः = विकस्वरनामालङ्कारो भवति। विशेषार्थस्य समर्थनाय सामान्यार्थस्य प्रयोगं कृत्वा पुनः विशेषार्थेन समर्थ्यते तत्राऽप्यमलङ्कारो वेदितव्यः।

**उदाहरति** – स न जिग्ये इत्यादि। रिपुभिराक्रान्तोऽपि सः = वीरः, न जिग्ये = नहि जितः, यतो महान्तः = महापुरुषाः, महात्मानः, क्ष्माधरा इव = पर्वता इव, दुर्धर्षाः = दुराक्रम्याः, दुरभिभवाः भवन्ति।

**भावार्थः** – यस्मिन् वाक्ये विशेषस्य समर्थनार्थं सामान्यस्य, तस्यापि च दृढतरं समर्थनार्थं पुनः विशेषस्य वर्णनं क्रियते तत्र विकस्वरालङ्कारो भवति। उदाहरणेऽस्मिन् 'स न जिग्ये' इति विशेषः, तस्य समर्थनार्थं – 'महान्तो हि दुर्धर्षाः' इति सामान्यस्य प्रतिपादनानन्तरं ततोऽपि समर्थनार्थं पुनः क्ष्माधरा इव इति विशेषस्य प्रतिपादनाद् विकस्वरनामालङ्कारोऽवगन्तव्यः।

**प्रसङ्गः** – अथ पर्यायोक्त्यलङ्कारं निरूपयन्नाह जयदेवः –

**कार्याद्यैः प्रस्तुतैरुक्ते पर्यायोक्तिं प्रचक्षते।**
**तृणान्यङ्कुरयामास विपक्षनृपसद्मसु॥७०॥**

**अन्वयः** – प्रस्तुतैः कार्याद्यैः (कारणाद्ये) उक्ते (सति) पर्यायोक्तिं प्रचक्षते। (यथा) – विपक्षनृप – सद्मसु (भवान्) तृणानि अङ्कुरयामास।

**व्याख्या** – पर्यायोक्तिं लक्षयति – कार्याद्यैरिति। प्रस्तुतैः = वर्णनीयैः, कार्याद्यैः = कार्यकारणादिभिः, फलादिभिः, उक्ते = अभिहिते, प्रतिपादिते सति विद्वांसः पर्यायोक्तिं = पर्यायोक्तिनामालङ्कारं, प्रचक्षते = वदन्ति। उदाहरति – तृणानीति। कस्यचिद् राज्ञः प्रशंसात्मकमिदं कथनं – हे राजन् = भवान्, विपक्षनृपसद्मसु =शत्रुनराधिपानां गृहेषु, तृणानि = घासान्, अङ्कुरयामास = उत्पादयामास, प्ररोहयामास। भवता शत्रवः हता इति तेषां गृहेषु परिमार्जनाद्भावे तृणानि समुत्पन्नानि सन्ति।

**भावार्थः** – यत्र वर्णनीयं वस्तु साक्षाच्छब्देन नोक्त्वा प्रकारान्तरेण कथ्यते, तत्र पर्यायोक्तिरलङ्कारोऽवगन्तव्यः। पर्यायः – प्रकारार्थकः, पर्यायेण प्रकारान्तरेण, उक्तिः कथनमिति पर्यायोक्तिः। वस्तुतस्तु व्यंग्यार्थस्य वाच्यरूपेण वर्णनमेव पर्यायोक्तिमूलं मन्तव्यम्। यथा प्रकृतोदाहरणे 'हे राजन् भवता शत्रवो व्यापादिता' इति प्रतिपाद्यं 'विपक्षनृपसद्मसु तृणाङ्कुरणेन' प्रतिपादनाद् व्यक्तव्यस्य प्रकारान्तरेण अमङ्गलरुपाश्लीलदोषस्य परिहार एव पर्यायोक्तिरलङ्काररूपेण परिणमतीति अतोऽत्र पर्यायोक्तिनामालङ्कारोऽवबोध्यः।

**प्रसङ्गः** – अथ व्याजस्तुतिनामकम् अलङ्कारं निरूपयन्नाह जयदेवः –

**उक्तिर्व्याजस्तुतिर्निन्दास्तुतिभ्यां स्तुतिनिन्दयोः।**
**कस्ते विवेको नयसि स्वर्गं पातकिनोऽपि यत्॥७१॥**

**अन्वयः** – निन्दास्तुतिभ्यां स्तुति-निन्दयोः उक्तिः – व्याजस्तुतिः (कथ्यते)। (यथा) – ते कः विवेकः यत् पातकिनः अपि स्वर्गं नयसि।

**व्याख्या** – व्याजस्तुतिं निरूपयन्नाह – उक्तिरिति। निन्दा च स्तुतिश्चेति निन्दास्तुती ताभ्यां निन्दास्तुतिभ्यां = गर्हणाप्रशंसाभ्यां, स्तुतिनिन्दयोः = प्रशंसा-गर्हणयोः, उक्तिः = कथनं, व्याजस्तुतिः = एतन्नामालङ्कारः स्यादिति। निन्दया स्तुतेः स्तुत्या च निन्दायाः प्रकाशनं व्याजोक्तिरिति भावः।

**उदाहरति** – कस्त इति। हे गङ्गे अयं ते = तव, कः = कीदृशः, विवेक = विचारनिर्णयः यत् पातकिनः = पापिनः, नरकगमिनोऽपि जनान् स्वर्गं = स्वर्गलोकं, नयसि = प्रापयसि। अतः तव विवेको नास्तीति निन्दाव्याजेन तत्प्रभावातिशयरुपा स्तुतिरेव प्रकाशिता।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**भावार्थः** – यत्र वाच्यया निन्दया स्तुतिर्व्यज्यते तथा च वाच्यया स्तुत्या निन्दा व्यज्यते तत्र व्याजस्तुतिनामालङ्कारो भवति। यथोक्तं साहित्यदर्पणे – ''निन्दास्तुतिभ्यां वाच्याभ्यां गम्यत्वे स्तुतिनिन्दयोः व्याजस्तुतिः। 'प्रस्तुतेऽस्मिन्नुदाहरणेऽपि सम्यक् समाचरणशीलायां त्वयि (गङ्गायां) विवेको नास्तीति निन्दया गङ्गायाः प्रभावातिशयं वर्णितं, यत् सा गङ्गा स्वप्रभावतिशयेन नहि केवलं पुण्यवत एवापि तु पापिनोऽपि जनान् स्वर्गलोकं नयति, तारयतीति भावः। एवञ्चात्र निन्दामुखेन गङ्गायाः स्तुतिर्व्यज्यते इति। इत्थं निन्दाव्याजेन गङ्गायाः, स्तुतिकथनादत्र व्याजस्तुतिनामालङ्कारो बोध्यः।

**प्रसङ्गः** – अथ आक्षेपालङ्कारं निरूपयन्नाह जयदेवः –

**आक्षेपस्तु प्रयुक्तस्य प्रतिषेधो विचारणात्।**
**चन्द्र! सन्दर्शयात्मानमथवास्ति प्रियामुखम्॥७२॥**

**अन्वयः** – प्रयुक्तस्य विचारणात् प्रतिषेधः – आक्षेपः। (यथा) – चन्द्र आत्मानं सन्दर्शय, अथवा प्रियामुखम् अस्ति।

**व्याख्या** – आक्षेपालङ्कारमाह – आक्षेप इति। प्रयुक्तस्य = कृतप्रयोगस्य उपमानत्वेन वर्णितस्य वस्तुनः, विचारणात् = विवेचनात्, उपमानापेक्षया उपमेयस्य एवोत्कृष्टवात्, प्रतिषेधः = निषेधः, आक्षेपः = आक्षेपनामालङ्कारो भवति।

**उदाहरति** – चन्द्रेति। हे चन्द्र आत्मानं = स्वस्वरूपं, संदर्शय = प्रदर्शय, अथवा यद्वा = अलमात्मदर्शनेन, प्रियायाः = नायिकायाः, प्रेयस्याः, मुखं = वदनम्, अस्ति = विद्यते, वर्तत एव।

**भावार्थः** – यत्र किञ्चित्कार्यविशेषसिद्ध्यर्थं गृहीतस्य अपि उपमानस्य पुनः कृतायां विचारणाायां तस्य उपमानत्वेन अनुपयुक्तत्वात् यद्वा तदपेक्षयोपमेयस्यैवोत्कृष्टत्वात् तन्निषेधः क्रियते तत्राक्षेपालङ्कारो भवति। यथा प्रस्तुतोदाहरणे पूर्वं मनसः आह्लादाय चन्द्रसन्दर्शनं – प्रार्थितं, पुनश्च प्रियामुख – विचारे समुपस्थिते सति प्रियामुखस्यैव समाह्लादकत्वं प्रतिपादयता नायकेन तस्य निषेधः कृतः। इत्थमिह आक्षेपालङ्कारो वर्तते। आक्षेपालङ्कारोऽयं द्विविधः भवति – अगूढाक्षेपः गूढाक्षेपश्चेति। प्रकृतोदाहरणेऽस्मिन् अगूढाक्षेपालङ्कारोऽस्ति।

**प्रसङ्गः** – अथ गूढाक्षेपालङ्कारं निरूपयन्नाह जयदेवः –

**गूढाक्षेपो विधौ व्यक्ते निषेधे चास्फुटे सति।**
**हर सीतां सुखं किन्तु चिन्तयान्तकढौकनम्॥७३॥**

**अन्वयः** – विधौ व्यक्ते (सति), निषेधे च अस्फुटे सति गूढाक्षेपः (स्यात्)। (यथा) – सीतां सुखं हर, किन्तु अन्तक-ढौकनं चिन्तय।

**व्याख्या** – गूढाक्षेपं लक्षयन्नाह – गूढाक्षेप इति। विधौ = विधिवाक्ये, व्यक्ते = स्पष्टे, निषेधे = निषेध वाक्ये, च = समुच्यार्थे, अस्फुटे = अस्पष्टते सति, गूढाक्षेपः गूढक्षेपालङ्कारो भवति।

**उदाहरति** – हर सीतेति। हे दशमुख! त्वं सीतां = जानकीं, सुखं = सुखपूर्वकं, हर = चोरय, किन्तु = परन्तु, अन्तकस्य = यमराजस्य, ढौकनं = गतिं, गमनं, चिन्तय = विचारय/अर्थात् सीताहरणं सुखेन कुरु किन्तु यमलोकगमनमपि निश्चितं भविष्यतीति भावः।

**भावार्थः** – यत्र विधिवचनं स्पष्टं स्यात् किन्तु निषेधवचनम् अस्पष्टं (निगूढं) स्यात्तत्र गूढाक्षेपालङ्कारो भवति। प्रकृतोदाहरणे सीतायाः अपहरणरुपः विधिर्व्यक्तः सुस्पष्टः 'हर' इति स्पष्टविधानात्, किन्तु यमलोकगमनं चिन्तय इति निषेधः (तव मरणं सुनिश्चितम्) इति नैव स्फुटः अपितु निषधो निगूढो वर्तते। अतोऽत्र गूढाक्षेपनामालङ्कारोऽस्ति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**प्रसङ्गः** – अथ विरोधालङ्कारं निरूपयन्नाह जयदेवः –

**विरोधोऽनुपपतिश्चेद्गुणद्रव्यक्रियादिषु ।**
**अमन्दचन्दनस्यन्दः स्वच्छन्दं दन्दहीति माम्॥७४॥**

**अन्वयः** – गुणद्रव्यक्रियादिषु चेत् अनुपपत्तिः (तर्हि) – विरोधः। (यथा) – अमन्दचन्दनस्यन्दः स्वच्छन्दं मां दन्दहीति।

**व्याख्या** – विरोधालङ्कारं लक्षयति – विरोध इति। चेद् = यदि, गुणाश्च द्रव्याणि च क्रियाश्चेति गुणद्रव्यक्रियाः आदिपदेन जातिवाचकपदार्थानामपि ग्रहणमभीष्टम्। जातिगुणद्रव्यक्रियासु अनुपपत्तिः = असङ्गतिः स्यात्तदा, विरोधः = विरोधनामकोऽलङ्कारः स्यादिति।

**उदाहरति** – अमन्दचन्दनेति। अमन्दः = अनल्पः, बहुलः चासौ चन्दनस्य = मलयजस्य, स्यन्दः = द्रवः, घनचन्दनद्रवलेपः, स्वच्छन्दं = यथेच्छम्, अत्यधिकं वा, मां = मां विरहिणीमिति, दन्दहीति = प्रज्वालयति, संतापयतीति। अत्र शीतलत्वेन प्रसिद्धस्य चन्दनस्यन्दस्य दाहक्रियान्वयात् अनुपपत्तेर्विरोधत्वम्।

**भावार्थः** – यत्र गुण-द्रव्य-क्रिया-जातिवाचकेषु पदार्थेषु मिथः असङ्गतार्थता (अनुपपत्तिः) प्रतीयते तत्र विरोधनामकोऽलङ्कारोऽवबोध्यः। यथा – प्रस्तुते उदाहरणे शीतप्रकृतेः चन्दनस्य दाहकत्वेन वर्णनात् प्रथमं तु आपाततः विरोधः प्रतीयते, किन्तु कस्याश्चिद् विरहिण्याः उक्तिरियमिति ज्ञानं जाते सति विरहावस्थायां शीतलतासम्पादकानां पदार्थानां सन्तापजनकत्वनियमात्तन्निवृत्तिः भवति। पुनरपि वाच्यार्थे सङ्गतेरभावाद् विरोधालङ्कारो वर्त्तते।

**प्रसङ्गः** – अथ विरोधाभासालङ्कारं निरूपयन्नाह जयदेवः –

**श्लेषादिभूर्विरोधश्चेद्विरोधाभासता मता।**
**अप्यन्धकारिणानेन जगदेतत्प्रकाश्यते॥७५॥**

**अन्वयः** – चेत् श्लेषादिभूः विरोधः (स्यात्, तर्हि) विरोधाभासता मता। (यथा) अन्धकारिणा अपि अनेन एतत् जगत् प्रकाश्यते।

**व्याख्या** – विरोधाभासं लक्षयन्नाह – श्लेषादिभूरिति। चेत् = यदि, श्लेषः आदिर्यस्यासौ श्लेषादिः तेन भवतीति श्लेषादिभूः = श्लेषादिजन्यः, विरोधः = अनुपपत्तिः, असङ्गतार्थता, परस्परमसङ्गतिस्तदा, विरोधाभासता = विरोधाभासोनामालङ्कारः मता = अभिमता, इष्टा।

**उदाहरति** – अपीति। अन्धं करोतीति अन्धकारी तेन अन्धकारिणा = अन्धकारवता अपि अनेन = शिवेन, एतत् = इदं दृश्यमानं, जगत् = विश्वं, प्रकाश्यते = देदीप्यते। अत्र यः स्वयमन्धकारवान्, अस्ति सः कथं जगत्प्रकाशको भवितुमर्हति इति विरोधः आभासते, किन्तु अन्धकारित्वेन महादेवभासमाने तत्परिहारः।

**भावार्थः** – यत्र श्लेषादिकारणाद् वक्ताऽन्यमर्थमादाय कथयति, श्रोत्रा तदन्यर्थमादाय अर्थसङ्गतिः क्रियते, विरोधश्चानुभूयते तत्र विरोधाभासनामालङ्कारो भवति। यथा प्रस्तुतेऽस्मिन् उदाहरणे अन्धकारसम्पादकेनानेन एतत् जगत् प्रकाश्यतेऽत्रापाततः विरोधः प्रतीयते किन्तु अन्धकस्य अरिः इति अन्धकारिः अन्धको नाम दैत्य विशेषः तस्य अरिः, तेन अन्धकारिणा = भगवताशङ्करेण एतत् विश्वं प्रकाश्यते तदा विरोधस्य परिहारो जातः। इत्थं श्लेषकारणाद् उपकल्पित्वाद् विरोधत्वादत्र विरोधाभासनामालङ्कारोऽवबोध्यः।

**प्रसङ्गः** – अथ असम्भवालङ्कारं निरूपयन्नाह जयदेवः –

**असम्भवोऽर्थनिष्पत्तावसम्भाव्यत्ववर्णनम्।**
**को वेद गोपशिशुकः शैलमुत्पाटयिष्यति॥७६॥**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**अन्वयः** – अर्थनिष्पत्तौ असम्भाव्यत्व-वर्णनम्-असम्भवः। (यथा) गोप-शिशुकः शैलम् उत्पाटयिष्यति (इति) कः वेद?

**व्याख्या** – असम्भवालङ्कारं लक्षयन्नाह – असम्भव इति। अर्थस्य = कार्यस्य, निष्पत्तौ = सिद्धे सति तस्मिन् कार्ये, असंभाव्यत्ववर्णनम् = असम्भवतायाः आख्यानम् (कथनम्) असम्भवः = एतन्नामालङ्कारः स्यात्।

**उदाहरति** – को वेद इति। कः = को जनः, वेदः = जानाति, यत् गोपस्य = आभीरस्य, गोपालकस्य, शिशुकः = अर्भकः, बालकृष्णः, शैलं = पर्वतम्, (गोवर्धनाख्यगिरिम्) उत्पाटयिष्यति = उत्तोलयिष्यति। अत्र गोपबालस्य श्रीकृष्णस्य गोवर्धनगिरिधारणमिति असम्भाव्यरूपेण वर्णनाद् असम्भवनामालङ्कारो वर्तते।

**भावार्थः** – यत्र कार्यसिद्धौ सत्यपि तस्मिन् असम्भवताया वर्णनं क्रियते, तत्र असम्भवनामकोऽलङ्कारो भवति। यथा प्रस्तुतोदाहरणे बालकृष्णेन गोवर्धनपर्वतधारणरुपकार्ये कृते सत्यपि तस्मिन् कार्ये असम्भाव्यत्वस्य वर्णनं कृतम्। अतोऽत्रासम्भवालङ्कारो बोध्यः।

**प्रसङ्गः** – अथ विभावनाऽलङ्कारं निरूपयन्नाह जयदेवः –

**विभावना विनापि स्यात्कारणं कार्यजन्म चेत्।**
**पश्य लाक्षारसासिक्तं रक्तं त्वच्चरणद्वयम्॥७७॥**

**अन्वयः** – कारणं विना अपि चेत् कार्य-जन्म स्यात् (तर्हि) – विभावना। (यथा) – लाक्षारस – असिक्तं त्वत् – चरणद्वयं रक्तं पश्य।

**व्याख्या** – विभावना लक्षणमाह – विभावनेति। कारणं = निमित्तं, हेतुं, विनाऽपि = अन्तरेणापि (विनाशब्दोऽभावबोधकः) चेत् = यदि, कार्यजन्म = फलोत्पत्तिः, स्यात्तर्हि विभावना = विभावनानामकोऽलङ्कारो भवति। सति कारणे कार्यनियमः, परमत्र तद्वैपरीत्यं जायते अर्थात् प्रसिद्धकारणाभावेऽपि कार्योत्पत्तिर्विभावनेति भावः।

**उदाहरति** – पश्येति। लाक्षारसेन = अलक्तद्रवेण, असिक्तम् = अलिप्तमिति, त्वच्चरणद्वयं = तव (नायिकायाः) पादयुगलं, रक्तं = रक्तवर्णं, पश्य = अवलोकय। अत्रालक्तरसाऽनुलेपनं विनाऽपि चरणयुगलस्य रक्तता प्रकटिता। अतोऽत्र विभावनाऽलङ्कारो ज्ञेयः।

**प्रसङ्गः** – अथ विशेषोक्त्यलङ्कारं निरूपयन्नाह जयदेवः –

**विशेषोक्तिरनुत्पत्तिः कार्यस्य सति कारणे।**
**नमन्तमपि धीमन्तं न लङ्घयति कश्चन॥७८॥**

**अन्वयः** – कारणे सति कार्यस्य अनुत्पत्तिः – विशेषोक्तिः। (यथा) – नमन्तम् अपि धीमन्तं कश्चन न लङ्घयति।

**व्याख्या** – विशेषोक्तिं लक्षयति – विशेषोक्तिरिति। कारणे = निमित्ते, हेतौ, सति = विद्यमाने, कार्यस्य = फलस्य, अनुत्पत्तिः = उत्पत्तेरभावः, असिद्धिरिति, विशेषोक्तिः = एतन्नामालङ्कारः स्यात्।

**उदाहरति** – नमन्तमपीति। नमन्तमपि = प्रणमन्तमपि, नतमस्तकवन्तमपि, धीमन्तं = बुद्धिमन्तं, जनं, कश्चन = कश्चिदपि पुरुषः, न = नहि, लङ्घयति = अतिक्रामति, लङ्घयितुं शक्तो न भवति इत्यर्थः।

**भावार्थः** – यत्र विद्यमानोऽपि कारणे कार्यस्य अभावो वर्ण्यते तत्र विशेषोक्तिनामकोऽलङ्कारो भवति। विशेषोक्तिः विभावनाऽलङ्कारस्य विपर्यासो ज्ञेयः। यथोदाहरणेऽत्र नमनं लङ्घने कारणमस्ति पुनरपि लङ्घनरूपकार्यस्य अभावो दृश्यते। सति कारणे न कार्योत्पत्तिः। तस्मादिह विशेषोक्तिनामालङ्कारोऽस्ति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**प्रसङ्गः** – अथ असङ्गतिनामानम् अलङ्कारं निरूपयन्नाह जयदेवः –

**आख्याते भिन्नदेशत्वे कार्यहेत्वोरसङ्गतिः।**
**त्वद्भक्तानां नमत्यङ्गं भङ्गमेति भवक्लमः ॥७९॥**

**अन्वयः** – कार्यहेत्वोः भिन्नदेशत्वे आख्याते (सति) असङ्गतिः। (यथा) – त्वद्भक्तानाम् अङ्गं नमति, भवक्लमः भङ्गम् एति।

**व्याख्या** – असङ्गतिं लक्षयन्नाह – आख्याते इति। कार्यं च हेतुश्च इति कार्यहेतू तयोः कार्यहेत्वोः = कार्यकारणयोः, भिन्नदेशत्वे = भिन्नाधिकरणत्वे, आख्याते = प्रतिपादिते सति, असङ्गतिः = एतन्नामालङ्कारः स्यादिति।

**उदाहरति** – त्वद्भक्तेति। भगवन्तं प्रति कस्यचिदुक्तिः हे भगवन्! त्वद्भक्तानां = भवत्सेवकानाम्, अङ्गम् = शरीरं, नमति = प्रणमति, नम्रं भवति, भवक्लमः = भवभीतिः, सांसारिकखेदः, भङ्गं = नाशम्, एति = प्राप्नोति, याति वा।

**भावार्थः** – यत्र कार्यस्य कारणस्य च आश्रयत्वं भिन्नं-भिन्नं वर्ण्यते तत्र असङ्गतिनामालङ्कारो भवति। उदाहरणेऽस्मिन् भङ्गस्य नमनरुपा कारणता भक्तानाम् अङ्गेषु वर्तते, किन्तु भङ्गरुपं कार्यं तु भवक्लमे वर्णितम्। अतोऽत्र कार्यकारणयोः भिन्नदेशत्वाद् असङ्गतिरलङ्कारो वेदितव्यः।

**प्रसङ्गः** – अथ विषमालङ्कारं निरूपयन्नाह जयदेवः –

**विषमं यद्यनौचित्यादनेकान्वयकल्पनम्।**
**क्वातितीव्रविषाः सर्पाः क्वासौ चन्दनभूरुहः ॥८०॥**

**अन्वयः** – यदि अनौचित्यात् अनेकाऽन्वय – कल्पनं (तर्हि) विषमम्। (यथा) – अतितीव्रविषाः सर्पाः क्व? असौ चन्दनभूरुहः च क्व?

**व्याख्या** – विषमालङ्कारं लक्षयति – विषममिति। यदि = चेत्, अनौचित्यात् = अननुरुपत्वात्, अनुचित्वात्, अनेकेषां (पदार्थानाम्) अन्वयस्य = सम्बन्धस्य, कल्पनं = वर्णनम् इति अनेकान्वयकल्पनं तदा विषमं = विषमनामालङ्कारः स्यादिति।

**उदाहरति** – क्वेति। अतितीव्रविषाः – अतितीव्रं विषं येषां ते अतितीव्रविषाः = अत्युग्रगरलाः, सर्पाः = भुजङ्गमाः, क्व = कुत्र? असौ = वर्ण्यमानः (सः) चन्दनभूरुहः = अतिशीतलः, अतिसुगन्धितः चन्दनवृक्षश्च क्व = कुत्र? इति।

**भावार्थः** – यत्र परस्परमन्वितयोः द्वयोः पदार्थयोः बहूनां पदार्थानां वा यत् अनौचित्यं परिकल्प्यते तत्र विषमालङ्कारो भवति। अत्रोदाहरणे सर्पचन्दनवृक्षयोः गुणगतं सामञ्जस्यं केनापि प्रकारेण नास्ति तथापि द्वयोः अननुरूपयोः सम्बन्धकल्पनत्वादत्र विषमालङ्कारोऽवबोध्यः।

**प्रसङ्गः** – अथा समालङ्कारं निरूपयन्नाह जयदेवः –

**सममौचित्यतोऽनेकवस्तुसम्बन्धवर्णनम्।**
**अनुरूपं कृतं सद्म हारेण कुचमण्डलम् ॥८१॥**

**अन्वयः** – औचित्यतः अनेकवस्तु-सम्बन्ध-वर्णनं समम्। (यथा) – हारेण कुचमण्डलम् अनुरूपं सद्म कृतम्।

**व्याख्या** – समनामकालङ्कारं लक्षयन्नाह – सममिति। औचित्यतः = अनुरुपत्वात्, अनेकेषां = बहूनां, वस्तूनां = पदार्थानां, सम्बन्धवर्णनम् = अन्वयकथनम्, अनेकवस्तुसम्बन्धवर्णनं, समं = समनामकमलङ्कारो भवति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**उदाहरति** – हारेण = मुक्ताहारेण, कुचमण्डलं = स्तनमण्डलम्, अनुरूपम् = उचितं, सद्म = निकेतनं, कृतं = विहितम्। अत्र हारकुचयोः अन्योन्यशोभाजनकत्वात् अनयोः सम्बन्धकल्पनं करणादत्र समनामकालङ्कारो वर्तते।

**भावार्थः** – यत्र औचित्याद् बहूनां पदार्थानां सम्बन्धवर्णनं क्रियते तत्रायमलङ्कारो भवति। यथाऽत्रोदाहरणे मुक्ताहारेण कुचमण्डलस्य कुचमण्डलेन च मुक्ताहारस्य परस्परं शोभावर्धनं कृतम्। अतः अनुरूपयोः हारकुचमण्डलयोः समौचित्येन सम्बन्धवर्णनादत्र समनामकोऽलङ्कारो वेदितव्यः।

**प्रसङ्गः** – अथ विचित्रालङ्कारं निरूपयन्नाह जयदेवः –

**विचित्रं चेत्प्रयत्नः स्याद्विपरीतफलप्रदः।**
**नमन्ति सन्तस्त्रैलोक्यादपि लब्धुं समुन्नतिम्॥८२॥**

**अन्वयः** – चेत् विपरीत-फल-प्रदःप्रयत्नः स्यात् (तर्हि) विचित्रम्। (यथा) – सन्तः त्रैलोक्यात् अपि समुन्नतिं लब्धुं नमन्ति।

**व्याख्या** – विचित्रमलङ्कारं लक्षयति – विचित्रमिति। चेत् = यदि, प्रयत्नः = प्रयासः, उद्योगः, विपरीतफलप्रदः = प्रतिकूलपरिणामदायकः, इच्छाविरुद्धफलजनकः, स्यात् = भवेत्, तर्हि विचित्रं = विचित्रनामालङ्कारो भवति।

**उदाहरति** – नमन्तीति। सन्तः = सत्पुरुषाः, महापुरुषाः, त्रैलोक्यात् = त्रिभुवनात् अपि, समुन्नतिं = सर्वोच्चतां, लब्धुम् = अधिगन्तुं, नमन्ति = नम्री भवन्ति। अत्र कृतः नमनरूपः प्रयत्नः तद्विपरीतस्य समुन्नतिफलस्य जनको वर्तते।

**भावार्थः** – यत्र इच्छाविरुद्धफलदायी प्रयत्नः कथ्यते तत्र विचित्रालङ्कारो भवति। अत्रोदाहरणे सज्जनाः लोकत्रयादपि उत्कृष्टतां प्राप्तुं प्रणमन्ति। नमनरूपस्य प्रयत्नस्य फलं नीचैः गमनं भवेत् किन्त्वत्र नमनरूपप्रयत्नेन त्रैलोक्यादपि समुन्नतिरूपा विपरीतफलप्राप्तिः कथनाद् विचित्रालङ्कारोऽवगन्तव्यः।

**प्रसङ्गः** – अथ अधिकालङ्कारं निरूपयन्नाह जयदेवः–

**अधिकं बोध्यमाधारादाधेयाधिकवर्णनम्।**
**यया व्याप्तं जगत्तस्यां वाचि मान्ति न ते गुणाः॥८३॥**

**अन्वयः** – आधारात् आधेयाऽधिक-वर्णनम् – अधिकं बोध्यम्। (यथा) – यया जगत् व्याप्तं तस्यां वाचि ते गुणाः न मान्ति।

**व्याख्या** – अधिकमलङ्कारं लक्षयति – अधिकमिति। आधारात् =अधिकरणात्, आधेयस्य = आधेयपदार्थस्य, अधिकवर्णनम् = आधिक्यकथनम्, अधिकम् = एतन्नामालङ्कारः बोध्यं = ज्ञेयम्। आधाराद् आधेयपदार्थस्य आधिक्य प्रतिपादनमेव अधिकालङ्कार इति।

**उदाहरति** – ययेति। कस्यापि भक्तस्योक्तिः भगवन्तं प्रति – हे भगवन्! यया = वाण्या, वाचा, जगत् = विश्वं, व्याप्तं = परिच्छिन्नं, तस्यां वाचि = तस्यां वाण्यां, ते = तव, गुणाः = महिमानः, न मान्ति = न आविशन्ति, तव गुणा वचनातीता इत्यर्थः।

**भावार्थः** – यत्र आधारापेक्षया आधेयपदार्थस्य अधिकं वर्णनं क्रियते तत्र अधिकालङ्कारो बोध्यः। यथा प्रकृतोदाहरणे पूर्वं तु आधारभूतायाः वाण्याः जगद् व्यापनेनाधिक्यं समुपवर्णितं पुनश्च तस्यामेव वाण्याम् आधेयभूतानां भगवद्गुणानां कृते पर्याप्तमवकाशो नास्तीति समुपवर्ण्य आधारपेक्षयाऽऽधेयपदार्थस्य आधिक्यवर्णनादत्र अधिकनामकोऽलङ्कारोऽस्ति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**प्रसङ्गः** – अथ अन्योऽन्यालङ्कारं निरूपयन्नाह जयदेवः –

**अन्योऽन्यं नाम यत्र स्यादुपकारः परस्परम्।**
**त्रियामा शशिना भाति शशी भाति त्रियामया॥८४॥**

**अन्वयः** – यत्र परस्परम् उपकारः स्यात् (तत्र) अन्योन्यं नाम (अलङ्कारः भवति) (यथा) – त्रियामा शशिना भाति, शशी त्रियामया भाति।

**व्याख्या** – अन्योन्यालङ्कारं लक्षयन्नाह – अन्योन्यामिति। यत्र = यस्मिन् वाक्ये, परस्परम् = अन्योन्यम्, उपकारः = उपकृतिः, उपकार्युपकृतभावः, स्यात् = भवेत्, तत्र अन्योन्यं नाम = तत्र अन्योन्यनामालङ्कारो भवति।

**उदाहरति** – त्रियामा इति। त्रियामा = रात्रिः, शशिना = चन्द्रेण, भाति = शोभते, शशी = चन्द्रश्च, त्रियामया = रात्र्या, भाति = शोभते।

**भावार्थः** – यत्र द्वयोः पदार्थयोः परस्परम् उपकारिक–उपकृतभावो वर्ण्यते तत्रायमलङ्कारो भवति। यथाऽस्मिन् उदाहरणे शशी त्रियामायाः शोभां वर्द्धयति, त्रियामा च शशिनः शोभां वर्द्धयतीति द्वयोरपि परस्परं शोभावर्द्धनकारणात् अन्योन्यालङ्कारो ज्ञेयः।

**प्रसङ्गः** – अथ विशेषालङ्कारं निरूपयन्नाह जयदेवः –

**विशेषः ख्यातमाधारं विनाप्याधेयवर्णनम्।**
**गतेऽपि सूर्ये दीपस्थास्तमश्छिन्दन्ति तत्कराः॥८५॥**

**अन्वयः** – ख्यातम् आधारं विना अपि आधेयवर्णनं विशेषः। (यथा) – सूर्ये गते अपि दीपस्थाः तत्कराः तमः छिन्दन्ति।

**व्याख्या** – विशेषालङ्कारलक्षणमाह – विशेष इति। ख्यातं = विख्यातं, प्रसिद्धम्, आधारम् = अधिकरणं, विनापि = अन्तरेणापि, आधेयस्य = निधेयस्य, वर्णनं = कथनं, विशेषः = विशेषनामालङ्कारः स्याद्। अर्थात् प्रसिद्धाधारं विनैव आधेयवर्णने विशेषालङ्कारः इति अवगन्तव्यः।

**उदाहरति** – गतेऽपि सूर्य इति। सूर्ये = भास्करे, गतेऽपि = अस्तङ्गतेऽपि, दीपस्थाः = दीपकस्थिताः, तत्कराः = तस्य किरणाः, तमः = अन्धकारं, छिदन्ति = नाशयन्ति।

**भावार्थः** – यत्र प्रसिद्धम्, आधारं विनैव आधेयपदार्थस्य वर्णनं क्रियते तत्र विशेषालङ्कारो भवति। अत्रोदाहरणे सूर्यः प्रसिद्धः आधारः, तत्करास्तु तदाधेयभूता एव सन्ति। किन्त्वत्र सूर्यरूपमाधारं विनैव तदाधेयभूतानां कराणां तमश्च्छेदनरूपकार्येकरणे सामर्थ्यस्य वर्णनाद् विशेषानामालङ्कारो बोध्यः।

**प्रसङ्गः** – अथ व्याघातालङ्कारं निरूपयन्नाह जयदेवः –

**स्याद्व्याधातोऽन्यथाकारि वस्त्वन्यक्रियमुच्यते।**
**यैर्जगत्प्रीयते हन्ति तैरेव कुसुमायुधः॥८६॥**

**अन्वयः** – अन्यक्रियं वस्तु (चेत्) अन्यथाकारि उच्यते (तर्हि) व्याघातः स्यात्। (यथा) – यैः कुसुमैः जगत् प्रीयते, कुसुमायुधः तैः एव हन्ति।

**व्याख्या** – व्याघातं लक्षयति – स्यादिति। अन्यक्रियम् = अन्यम् = अपरा, क्रिया = कार्यं यस्य तत् अन्यक्रियं, भिन्नक्रियं, वस्तु = पदार्थः, अन्यथाकारि = विरुद्धक्रियम्, उच्यते, तर्हि व्याघातः = एतन्नामालङ्कारः, स्यात् = भवेत्।

**उदाहरति** – यैरिति। यैः = कुसुमैः, जगत् = भुवनं, प्रीयते = प्रसन्नं क्रियते, तैरेव कुसुमैः कुसुमायुधः = कामदेवः, जगत् हन्ति = संसारं मारयति व्याकुलयति इति भावः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**भावार्थः** – कश्चिज्जनः यम् उपायमवलम्ब्य यद्वस्तुना यत्कार्यं करोति, अन्यो जनः तेनैवोपायेन तद्विपरीतमाचरति चेत्तदा व्याघातालङ्कारोऽवगन्तव्यः। यथ अत्र पूर्वं यानि कुसुमानि जगत्प्रीतिजनकतया वर्णितानि पुनः तान्येव पूर्वक्रिया (जगत्प्रीतिरित्यस्य) विरोधिमारणक्रियारूपेण वर्णितानि। अतः कुसुमानां विरुद्धक्रियाजनकत्वेन वर्णनाद् व्याघातालङ्कारोऽस्ति।

**प्रसङ्गः** – अथ कारणमालालङ्कारं निरूपयन्नाह जयदेवः –

**गुम्फः कारणमाला स्याद्यथाप्राक्प्रान्तकारणैः।**
**नयेन श्रीः श्रिया त्यागस्त्यागेन विपुलं यशः॥८७॥**

**अन्वयः** – यथाप्राक्प्रान्तकारणैः गुम्फः कारणमाला स्यात्। (यथा) – नयेन श्रीः, श्रिया त्यागः, त्यागेन विपुलं यशः (भवन्ति)।

**व्याख्या** – कारणमालाऽलङ्कारमाह – गुम्फ इति। प्राक् च प्रान्तश्चेति प्राक्प्रान्ते ते अनतिक्रम्येति यथाप्राक्प्रान्तं यानि कारणानि तैः यथाप्राक्प्रान्तकारणैः। यथा प्राक्कारणैः यथा प्रान्तकारणैः चेति भावः। परं परं प्रति पूर्वपूर्वस्य कारणै, पूर्वं पूर्वं परपरस्य कारणैश्च गुम्फः = रचनाविशेषः, कारणमाला = एतन्नामालङ्कारः, स्यात् = भवेत्। कारणानां माला कारणमाला इत्यर्थः।

**उदाहरति** – नयेनेति। नयेन = नीत्या, श्रीः = लक्ष्मीः, श्रिया = लक्ष्म्या, त्यागः = दानं, त्यागेन = दानेन, विपुलम् = अधिकं, यशः = कीर्त्तिः भवति। इह पूर्वं नयश्रीत्यागाः कारणानि, पुनश्च श्रीत्यागयशांसि तेषां कार्याणि कथितानि सन्ति।

**भावार्थः** – यत्र परं परं पदार्थं प्रति तत्पूर्वपूर्वस्य पदार्थस्य कारणतायां, कथितायां कारणानां माला इति व्युत्पत्त्या कारणमालानामकोऽलङ्कारो भवति। प्रस्तुतोदाहरणेऽत्र श्रियं प्रति नयस्य कारणता, ततश्च उत्तरवाक्ये परं त्यागं प्रति पूर्वस्य श्रीपदस्य कारणता, पुनश्च परं यशः प्रति पूर्वस्य त्यागस्य कारणतेति। इत्थं परं परं प्रति पूर्वपूर्वस्य कारणतायाः प्रतिपादनात् कारणमालाऽलङ्कारोऽवबोध्यः।

**विशेषः** – यथा परं परं पदार्थं प्रति तत्पूर्वपूर्वस्य पदार्थस्य कारणतायां कारणमाला भवति तथैव पूर्वं पूर्वं प्रति परस्यापि कारणतायां वर्णिते सति द्वितीया कारणमाला भवति। यथोक्तञ्च कुवलयानन्दे –

भवन्ति नरकाः पापात्पापं दारिद्रयसम्भवम्।
दारिद्र्यमप्रदानेन तस्माद्दानपरो भवेत्॥इति॥

अत्र पूर्वं नकरपापद्रारिद्र्याणि कार्याणि ततश्च तेषां कारणानि पापदारिद्र्याप्रदानानि गुम्फितानि सन्ति। अतोऽत्रापरा कारणमाला बोध्या।

**प्रसङ्गः** – अथ एकावलीं निरूपयन्नाह जयदेवः –

**गृहीतमुक्तरीत्यर्थश्रेणिरेकावली मता।**
**नेत्रे कर्णान्तविश्रान्ते कर्णौ दोर्मूलदोलिनौ॥८८॥**

**अन्वयः** – गृहीत-मुक्त-रीत्यर्थ-श्रेणिः एकावली मता। (यथा) – नेत्रे कर्णान्ते – विश्रान्ते, कर्णौ (च) दोर्मूलदोलिनौ।

**व्याख्या** – एकावलीं प्रदर्शयति – गृहीतेति। गृहीता स्थापिता च मुक्ता व्यक्ता चेति गृहीतमुक्ता सा चासौ रीतिः = पदसंस्थितिः, विशेष्यविशेषणत्वादिप्रतिपादनशैली इति, अर्थश्रेणिः = पदार्थपंक्तिः, एकावली = एतन्नामालङ्कारः, मता = मन्यते। उत्तरोत्तरस्य पूर्वपूर्वविशेषणभावः, पूर्वपूर्वस्योत्तरोत्तर विशेष्यभावो वा गृहीतमुक्तरीतिः। एकावल्येकयष्टिका इत्यमरप्रामाण्याद् एकावली हारविशेषः। एका चासौ अवली चेति कर्मधारयः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

एकलतिका एकावली प्रोच्यते। तथा च तत्सादृश्यादलङ्कारे लक्षणेति। पूर्वं पूर्वं प्रति परं परं विशेषणत्वेन विशेष्यत्वेन लक्षणेति। पूर्वं पूर्वं प्रति परं परं विशेषणत्वेन विशेष्यत्वेन च स्थापितमपोहितञ्च यत्र स्यात्तत्रैकावली। एवं च अलङ्कारस्य चत्वारो भेदाः परिगणनीया - पूर्वं प्रति परस्य विशेषणत्वे स्थापने अपोहने चेति द्वौ भेदौ। पूर्वं प्रति विशेष्यत्वेन स्थापनेऽपोहने च द्वौ भेदौ स्तः। पूर्वं पूर्वं प्रति परस्य विशेषणत्वस्थापनेऽपोहने चात्रोदाहरति - नेत्र इति। कस्यचिद् राज्ञः वर्णनमिदम्। तस्य राज्ञः नेत्रे = नयने, कर्णान्तयोः = कर्णमूलयोः, विश्रान्ते = श्रम-अपनोदनार्थं नेत्रप्रान्तपर्यन्तं कृतनिवासे आस्ताम्। कर्णौ च = कर्णयुगलं च, दोर्मूलदोलिनौ = भुजमूललम्बिनौ, स्कन्धावलम्बिनौ स्तः।

**भावार्थः** - यत्र गृहीतमुक्तरीत्या (क्रमशः ग्रहण-त्यागपूर्वकम्) अर्थपरम्परायाः प्रतिपादनम् एकावलीनामकोऽलङ्कारो भवति। उदाहरणेऽस्मिन् कर्णौ पूर्वं नेत्रयोः विशेषणत्वेन गृहीतौ तदनन्तरं विशेषणत्वेन गृहीतयोः तयोः विशेषणत्वेन त्यागः विशेष्यत्वेन ग्रहणाच्च एकावलीनामालङ्कारोऽस्ति।

**प्रसङ्गः** - अथ मालादीपकालङ्कारं निरूपयन्नाह जयदेवः -

**दीपकैकावलीयोगान्मालादीपकमुच्यते ।**
**स्मरेण हृदये तस्यास्तेन त्वयि कृता स्थितिः ॥८९॥**

**अन्वयः** - दीपक-एकावली - योगात् मालादीपकम् उच्यते। (यथा) - स्मरेण तस्याः हृदये स्थितिः कृता, तेन (हृदयेन च) त्वयि (स्थितिः कृता)।

**व्याख्या** - मालादीपकं लक्षयन्नाह - दीपकैकावलीति। दीपकं च एकावली च दीपकैकावल्यौ तयोः योगात् = सम्बन्धात् मालादीपकयोरेकत्र मेलनात् मालादीपकम् = एतन्नामालङ्कारः उच्यते = कथ्यते, विद्वद्भिरितिशेषः।

**उदाहरति** - स्मरेणेति। नायकं प्रति दूतीकथनमिदं - स्मरेण = कामदेवेन, तस्याः = नायिकायाः,, हृदये = मनसि, स्थितिः = अवस्थितिः, कृता = विहिता। तेन = नायिकाहृदयेन च, त्वयि = नायके, स्थितिः = स्थानं कृता = विहितम्। अत्र स्थितिपदं हृदये नायके चोभयत्र सम्बद्धम् अतो दीपकम्। एवमेव पूर्वं हृदयस्य मदनाधारतया ग्रहणं ततश्च नायकस्य आधारत्ववर्णनेन हृदयाधारत्वत्यागकारणात् एकावली। इत्थं दीपकैकावल्योरेकत्र समावेशान्मालादीपकमवबोध्यम्।

**भावार्थः** - यत्र दीपकालङ्कारस्यैकावल्याश्च चमत्कारो मिश्रितो भवति तत्र मालादीपकालङ्कारो वेदितव्यः। उदाहरणेऽस्मिन् स्थितिरुपकैक्रियायाः नायिकाहृदयनायकहृदयोः सम्बन्धात् दीपकालङ्कारः तथा च पूर्वं नायिकाहृदयं कामदेवस्य आधारत्वेन पुनश्च तदेव हृदयं नायकहृदयाधेयत्वेन वर्णनात् एकावलीनामालङ्कारो वर्तते। अनयोः दीपक-एकावली-उभयोरपि चमत्कारस्य मिश्रणात् मालादीपकस्योदाहरणं वर्तते।

**प्रसङ्गः** - अथ सारालङ्कारं निरूपयन्नाह जयेदवः -

**सारो नाम पदोत्कर्षः सारतायाः यथोत्तरम्।**
**सारं सारस्वतं तत्र काव्यं तत्र शिवस्तवः ॥९०॥**

**अन्वयः** - सारतायाः यथोत्तरं पदोत्कर्षः सारः नाम (अलङ्कारः)। (यथा) - सारस्वतं सारं तत्र काव्यं, तत्र शिवस्तवः।

**व्याख्या** - सारमलङ्कारं लक्षयति - सार इति। सारतायाः = उत्कृष्टतायाः, यथोत्तरम् = उत्तरोत्तरं, पदोत्कर्षः = पदस्य उत्कर्षः इति, वस्तूत्कर्ष इति, सारः नाम = सारनामालङ्कारः स्यात्। यथोत्तरं गुणगतोत्कर्षवर्णनमेव सारालङ्कार इति।

**उदाहरति** - सारं सारस्वतमिति। असारे संसारेऽस्मिन् सारस्वतं = वाङ्मयं, शास्त्रं, सारं = सारतत्त्वं वर्तते, तत्रापि = शास्त्रेऽपि, काव्यं = कविकर्म, कवितादि, सारं = श्रेष्ठं, तत्रापि च = काव्येऽपि च, शिवस्तवः = भगवतः



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

शङ्करस्य स्तुतिरूपं काव्यं सारमस्ति। एवम् अत्र उत्कृष्टताया उत्तरोत्तरं प्रतिपादनात् सारनामालङ्कारोऽवबोध्यः।

**भावार्थः** – यत्र सारतायाः यथोत्तरम् आधिक्यक्रमः कथ्यते तत्र सारनामकोऽलङ्कारो भवति। यथा ह्यस्मिन्नुदाहरणे सारस्वतकाव्यशिवस्तुतीनाम् उत्तरोत्तरमुत्कर्षतायाः वर्णनात् सारनामालङ्कारोऽस्ति।

**विशेषः** – अलङ्कारोऽयं श्लाघ्यगुणोत्कर्षरूपः अश्लाघ्यगुणोत्कर्षरुपः, उभयोत्कर्षरुपश्चेति त्रिविधो भवति। रसगङ्गाधरकारेण पुनरयम् एकविषयोऽनेकविषयश्चाप्युक्तः। पूर्वोक्तमुदाहरणमिदं श्लाघ्यगुणोत्कर्षरुपोऽस्ति।

**प्रसङ्गः** – अथ उदारसारालङ्कारं निरूपयन्नाह जयदेवः –

**उदारसारश्चेद भाति भिन्नोऽभिन्नतया गुणः।**
**मधुरं मधु पीयूषं तस्मात्तस्मात्कवेर्वचः॥९१॥**

**अन्वयः** – चेत् (उत्कृष्टतया वर्ण्यमानः) गुणः भिन्नः (अपि) अभिन्नतया भाति (तर्हि) उदारसारः। (यथा) – मधु मधुरं, तस्मात् पीयूषं, तस्मात् कवेः वचः।

**व्याख्या** – उदारसारमलङ्कारमाह – उदारेति। चेत् = यदि, यथोत्तरम् = उत्कृष्टतया वर्ण्यमानो वस्तुगुणः, भिन्नः = विसदृशोऽपिगुणः अभिन्नतया = एकरूपतया, अभिन्नरुपेण, भाति = प्रतीयते, शोभते, तर्हि उदारसारनामालङ्कारः स्यात्।

**उदाहरति** – मधुरमिति। अत्र संसारे मधुः = क्षौद्रं, मधुरं = मिष्टं भवति, तस्मात् = मधुनो मधुरं पीयूषम् = अमृतं वर्तते, तस्मात् = पीयूषादपि मधुरं, कवेः वचः = कविवचनं, काव्यं विद्यते। काव्यादधिकं मधुरं नास्ति किमपि संसारेऽस्मिन्निति भावः।

**भावार्थः** – अलङ्कारेऽस्मिन्नपि यथोत्तरमुत्कृष्टताप्रतिपादनमेव मूलम्। अर्थात् यत्र उत्तरोत्तरम् उत्कृष्टरूपेण वर्ण्यमानो वस्तुगुणो भिन्नोऽपि अभिन्नतया प्रतीयते तत्रोदारसारः अलङ्कारो भवति। प्रकृतेऽस्मिन् उदाहरणे मधुगतं पीयूषगतं कविवचनगतञ्च माधुर्यं वस्तुतो भिन्नं भिन्नमिति स्पष्टमेव। तथापि तद् माधुर्यम् अभिन्नरूपेण वर्णितोऽस्ति। इत्यस्मादत्र उदारसारोनाम अलङ्कारो ज्ञेयः।

**प्रसङ्गः** – अथ यथासंख्यालङ्कारं निरूपयन्नाह जयेदवः –

**यथासंख्यं द्विधार्थाश्चेत्क्रमादेकैकमन्विताः।**
**शत्रुं मित्रं द्विषत्पक्षं जय रञ्जय भञ्जय॥९२॥**

**अन्वयः** – चेत् द्विधा अर्थाः क्रमात् एकैकम् अन्विताः (स्युः, तर्हि) – यथासङ्ख्यम्। (यथा) – शत्रुं मित्रं, द्विषत्पक्षं – जय, रञ्जय, भञ्जय।

**व्याख्या** – यथासंख्यमलङ्कारमाह – यथासंख्यमिति। चेत् = यदि, द्विधा = द्विप्रकारकाः, उभयप्रकारकाः, क्रियाकारकरुपा वा, अर्थाः = वाच्यार्थाः, क्रमात् = क्रमेण, एकैकं = एकम् एकं प्रति, अन्विताः सम्बद्धाः स्युः, तर्हि यथासंख्यं = एतन्नामालङ्कारो भवति। क्रमेणोक्तानां कारकाणां क्रियाणां वा तेनैव क्रमेण कारकेण क्रियासु अन्वयो नाम यथासंख्यमित्यर्थः।

**उदाहरति** – शत्रुमिति। हे राजन्! त्वं शत्रुं = रिपुं, जय = विजयस्व, मित्रं = सुहृदं, रञ्जय = आनन्दय, द्विषत्पक्षं = रिपुपक्षं, भञ्जय = विनाशय। अत्र हि शत्रुं मित्रं द्विषत्पक्षमिति कारकपदैः जय रञ्जय भञ्जयेति क्रियापदानां क्रमिकोऽन्वयोऽस्ति।

**भावार्थः** – यत्र क्रमिकाणां क्रियाकारकरुप-पदार्थानां क्रमेणैव कारकेषु क्रियासु वा अन्वयो विधीयते तत्र संख्यानतिक्रम्येति यथासंख्यमन्वयाद् यथासंख्यनामालङ्कारो भवति। प्रकृतोदाहरणे पूर्वं कर्मकारकार्थान् पदार्थान् शत्रुं मित्रं द्विषत्पक्षञ्च अभिधाय ततः यथाक्रमं जय, रञ्जय, भञ्जयादिनि क्रियापदानि प्रयुक्तानि। इत्थं प्रत्येकं कर्मकारकस्य



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

क्रमशः क्रियान्वये शत्रुं जय, मित्रं रञ्जय द्विषत्पक्षं भञ्जयेति अर्थस्य उपस्थितित्वादत्र यथासंख्यनामालङ्कारोऽवबोध्यः।

**प्रसङ्गः** – अथ पर्यायालङ्कारं प्रदर्शयन्नाह जयदेवः –

**पर्यायश्चेदनेकत्र स्यादेकस्य समन्वयः।**
**पद्मं मुक्त्वा गता चन्द्रं कामिनीवदनोपमा॥९३॥**

**अन्वयः** – चेत् एकस्य अनेकत्र समन्वयः स्यात् (तर्हि) पर्यायः। (यथा) – कामिनीवदनोपमा पद्मं मुक्त्वा चन्द्रं गता।

**व्याख्या** – पर्यायमलङ्कारमाह – पयार्य इति। एकस्य = एकपदार्थस्य, अनेकत्र = अनेकेषु स्थानेषु, समन्वयः = सम्बन्धः, स्यात्तर्हि = भवेत्तदा, पर्यायः = एतन्नामालङ्कारो भवति।

**उदाहरति** – पद्ममिति। कामिन्याः = सुन्दर्या नायिकायाः, वदनस्य = मुखस्य, उपमा = सादृश्यमिति कामिनीवदनोपमा = सुन्दरीमुखसादृश्यं, पद्मं = कमलं, मुक्त्वा = त्यक्त्वा, चन्द्रं = चन्द्रमसं, गता = प्राप्ता। अयमाशयः कामिनीवदनस्योपमा दिने कमले आसीत्, रात्रौ कमलानि सङ्कुचन्ति अतो मुखसादृश्यं चन्द्रे तिष्ठति। अत्र एकस्याः कामिनीवदनोपमायाः पूर्वं पद्मेन ततश्च चन्द्रेण समन्वयात् पर्यायालङ्कारो बोध्यः।

**भावार्थः** – यत्र एकस्यैव पदार्थस्य पर्यायेण एकाधिकपदार्थेषु सम्बन्धवर्णनं भवति तत्र पर्यायालङ्कारो वर्तते। यथा प्रकृतोदाहरणे एकस्याः कामिनीवदनोपमायाः पर्यायेण (पद्मे चन्द्रे च) उभयत्र सम्बन्धवर्णनादत्र पर्यायालङ्कारोऽस्ति।

**प्रसङ्गः** – अथ परिवृत्तिनामकम् अलङ्कारं निरूपयन्नाह जयदेवः –

**परिवृत्तिर्विनिमयो न्यूयाभ्यधिकयोर्मिथः।**
**जग्राहैकं शरं मुक्त्वा कटाक्षान् शत्रुयोषिताम्॥९४॥**

**अन्वयः** – न्यून+अभ्यधिकयोः मिथः विनिमयः – परिवृत्तिः। (यथा) – एकं शरं मुक्त्वा शत्रु – योषितां कटाक्षान् जग्राह।

**व्याख्या** – परिवृत्तिं लक्षयति – परिवृत्तिरिति। न्यूनाभ्यधिकयोः = न्यूनस्य = अल्पस्य, अभ्यधिकस्य = महतः, मिथः = परस्परं, विनिमयः = परिवर्तनम्, आदान-प्रदानं वा, परिवृत्तिः = एतन्नामालङ्कारः। उदाहरति – जग्राहेति। कश्चित् राजा एकं शरं = एकं बाणं, मुक्त्वा = त्यक्त्वा, शत्रुयोषितां = वैरिवनितानां, कटाक्षान् = नेत्रप्रान्तभागान्, वक्रप्रेक्षितानि, जग्राहः = गृहीतवान्। एकेन बाणेन शत्रून् विजित्य तत्कामिनीनां कटाक्षान् स्वीकृतवान्। शत्रुयोषितः स्वपतिहन्तारं राजानं भूयो भूयो सकटाक्षम् अवलोकयन्तीति भावः॥

**भावार्थः** – यत्र न्यूनेन अधिकग्रहणवर्णने अधिकेन वा न्यूनग्रहणवर्णने परिवृत्तिनामकोलङ्कारो भवति। परिवर्तनमिति परिवृत्तिः सा च न्यूनवस्तु दत्त्वा किञ्चिदधिकमादानरुपा स्यात्। यथा उदाहरणेऽस्मिन् एकेन बाणेन अनेकवनितानां कटाक्षग्रहणकारणादत्र विनिमयात्मकः परिवृत्तिनामालङ्कारोऽवबोध्यः।

**प्रसङ्गः** – अथ परिसंख्यालङ्कारं निरूपयन्नाह जयदेवः –

**परिसंख्या निषिध्यैकमन्यस्मिन्वस्तुयन्त्रणम्।**
**स्नेहक्षयः प्रदीपेषु स्वान्तेषु न नतभ्रुवाम्॥९५॥**

**अन्वयः** – एकं निषिध्य अन्यस्मिन् वस्तु-यन्त्रणं परिसङ्ख्या। (यथा) – स्नेहक्षयः प्रदीपेषु, न (तु) नतभ्रुवां स्वान्तेषु।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**व्याख्या** – परिसंख्यां लक्षयति – परिसंख्येति। एकस्मिन् स्थले एकं = किमपि वस्तु निषिध्य = प्रतिषिध्य, अन्यस्मिन् स्थले तस्यैव वस्तुनः यन्त्रणं = नियन्त्रणं, नियमनं, परिसंख्या = एतन्नामालङ्कारः स्यादिति। उदाहरति – स्नेहेति। प्रदीपेषु = दीपकेषु, स्नेहस्य = तैलस्य, (अनुरागस्य वा), क्षयः = नाशः इति, स्नेहक्षयः = तैलक्षयः, न तु नतभ्रुवां = सुन्दरीणां, कामिनीनां, स्वान्तेषु = मनःसु। श्लेषमहिम्नाऽत्र स्नेहशब्दस्य तैलानुरागोभयरुपार्थोपस्थापितः।

**भावार्थः** – यत्र एकस्मिन् स्थाने कस्यचिद् वस्तुनो निषेधं कृत्वा अन्यत्र तस्यैव वस्तुनः सद्भावकथनं भवति, तत्र परिसंख्यानामकः अलङ्कारो बोध्यः। प्रकृतोदाहरणे श्लेषमहिम्ना स्नेहशब्दस्य तैलानुरागोभयरूपार्थोपस्थापकतया तैलस्य रात्रौ दीपकेषु अभावमुक्त्वा तस्यैव वस्तुनः (स्नेहस्य) कामिनीहृदयेषु स्थितिवर्णनात् परिसंख्यानामकः अलङ्कारोऽस्ति।

**प्रसङ्गः** – अथ विकल्पालङ्कारं निरूपयन्नाह जयेदवः –

**विकल्पस्तुल्यबलयोर्विरोधश्चातुरीयुतः।**
**कान्ताचित्तेऽधरे वाऽपि कुरु त्वं वीतरागताम्॥९६॥**

**अन्वयः** – तुल्य-बलयोः चातुरी-युतः विरोधः-विकल्पः। (यथा) – त्वं कान्ताचित्ते अधरे वाऽपि वीतरागतां कुरु।

**व्याख्या** – विकल्पं लक्षयति – विकल्पेति। तुल्यबलयोः = तुल्यं समानं बलं = सामर्थ्यं प्रभावो वा ययोस्तयोः द्वयोर्वस्तुनः, चातुरीयुतः = कविकौशलचातुर्येण विहितः, विरोधः = युगपत् कथनं, विकल्पः = एतन्नामालङ्कारः। युगपत् कर्तुम् अशक्ययोः द्वयोः कार्ययोः युगपत् कथनमेव विकल्पालङ्कारो भवति।

**उदाहरति** – कान्ताचित्ते इत्यादि। कस्यश्चित् खण्डितायाः नायिकायाः नायकं प्रति उक्तिरियं यत् – त्वं, कान्तायाः चित्ते इति कान्ताचित्ते, मम हृदये, अधरे = स्वस्य अधरे, वीतरागतां = अनुरागशून्यत्वं, रक्तताराहित्यं वा, कुरु = विधेहि। स्वस्य अधरस्य परनायिकाकृत चुम्बनेन जातं रक्तवर्णं तन्मार्जय, मम चेतसि च अनुरागशून्यतां कुरु इति भावः।

**भावार्थः** – यत्र समानबलयुक्तयोः द्वयोः विरुद्धकार्ययोः चातुर्यपूर्वकमेककालेन सम्बन्धं वर्ण्यते तत्र विकल्पनामालङ्कारो भवति। प्रस्तुतोदाहरणे अनुरागरहितत्वं रक्तिमाशून्यत्वञ्च विरुधौ धर्मौ, उभावपि कविना चातुर्येण कार्यत्वे वर्णितौ एतस्मादत्र विकल्पालङ्कारो बोध्यः।

**प्रसङ्गः** – अथ समुच्चयालङ्कारं निरूपयन्नाह जयदेवः –

**भूयसामेकसम्बन्धभाजां गुम्फः समुच्चयः।**
**नश्यन्ति पश्चात्पश्यन्ति भ्रश्यन्ति च तव द्विषः॥९७॥**

**अन्वयः** – एक-सम्बन्ध-भाजां भूयसां गुम्फः समुच्चयः। (यथा) – तवः द्विषः नश्यन्ति, पश्चात् पश्यन्ति, भ्रश्यन्ति च।

**व्याख्या** – समुच्चयालङ्कारमाह – भूयसामिति। एकं सम्बन्धं भजन्तीति एकसम्बन्धभाज, तेषामिति एकसम्बन्धभाजाम्, एकत्र अन्वितानामिति, भूयसां = बहूनां, बहूनां क्रियाणां, गुणानां कारणानां वा, गुम्फः = वर्णनं, रचनाविशेषः, समुच्चयः = एतन्नामालङ्कारः स्यादिति।

**उदाहरति** – नश्यन्तीति। हे राजन्! तव = भवतः, द्विषः = शत्रवः, नश्यन्ति = राज्यच्युता भवन्ति, पश्यन्ति = विलोकयन्ति, पश्चाद् = अनन्तरं च, भ्रश्यन्ति = भ्रष्टाश्च भवन्ति। अत्रानेक क्रियाणां नाश-दर्शन-भ्रंशरुपाणाम् एकशत्रुरुपपदार्थकथनात् समुच्यालङ्कारोऽस्ति।

**भावार्थः** – यत्र अनेकगुणक्रियाकारकादीनाम् एकत्रैव सम्बन्धवर्णनं क्रियते तत्र समुच्चयालङ्कारो भवति। यथा प्रकृतेऽस्मिन्नुदाहरणे एकस्मिन् शत्रुरूपपदार्थे नाश-अवलोकन-भ्रंशाद्यनेकक्रियाणां सम्बन्धवर्णनात्



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

समुच्चयालङ्कारोऽस्ति। एवमेव गुणसमुच्चयात् कारणसमुच्चयाच्च समुच्चयालङ्कारोऽवगन्तव्यः।

**प्रसङ्गः** – अथ समाधि अलङ्कारं निरूपयन्नाह जयदेवः –

**समाधिः कार्यसौकर्यं कारणान्तरसन्निधेः।**
**उत्कण्ठितां च कलयन् जगामास्तं च भानुमान्॥ ९८॥**

**अन्वयः** – कारणान्तरसन्निधेः कार्य-सौकर्यं – समाधिः (यथा) – उत्कण्ठितां च कलयन् भानुमान् अस्तं च जगाम।

**व्याख्या** – समाधिं लक्षयति – समाधिरिति। अन्यत् कारणं कारणानारं तस्य सन्निधिः = सामीप्यं तस्मात् कारणान्तरसन्निधेः कार्यस्य सौकर्यमिति कार्यसौकर्यं = फले सारल्यमिति कार्यसौकर्यं, फल-सुलभता इत्याशयः, स्यात्तदा समाधिः = एतन्नामालङ्कारो भवेत्। एकस्मिन् कारणे सत्यपि कारणान्तरेण कार्यसिद्धौ सौकर्यं स्यात्तर्हि समाधिनामकोऽलङ्कारो भवति।

**उदाहरति** – उत्कण्ठितामित्यादि। नायिकाम् उत्कण्ठितां = प्रियतमस्यान्तिकं गन्तुमुत्सुकतां, कलयन् = अवगच्छन्, जानन्, भानुमान् = भगवान् सूर्यः, अस्तं जगाम = अस्तमगच्छत् इति। अर्थात् अभिसाराय गन्तुं समुत्सुकता एव पर्याप्ताऽऽसीत् तथापि सूर्यास्तजन्येन कारणेन अभिसारकर्मणि सारल्यमुपस्थापितमिति।

**भावार्थः** – यत्र एकेनैव कारणेन कार्यस्य सिद्धिर्जायते तथापि तत्र कारणान्तरद्वारा तत्कार्य सम्पादने सुगमता वर्ण्यते तत्र समाधिनामालङ्कारो भवति। यथा प्रकृतोदाहरणेऽत्र अभिसारिकायाः कृते अभिसारणोत्कण्ठा एव पर्याप्तकारणमासीत् पुनरपि संयोगवशात् सूर्यास्तरुपं कारणान्तरमपि उपस्थाप्य कार्ये सौकर्यं वर्णितम्। अतोऽत्र समाधिनामालङ्कारो बोध्यः।

**प्रसङ्गः** – अथ प्रत्यनीकालङ्कारं निरूपयन्नाह जयदेवः –

**प्रत्यनीकं बलवतः शत्रोः पक्षे पराक्रमः।**
**जैत्रनेत्रानुगौ कर्णावुत्पलाभ्यामधः कृतौ॥ ९९॥**

**अन्वयः** – बलवतः शत्रोः पक्षे पराक्रमः – प्रत्यनीकम्। (यथा) – उत्पलाभ्यां जैत्र – नेत्र + अनुगौ कर्णौ अधः कृतौ।

**व्याख्या** – प्रत्यनीकमलङ्कारं लक्षयति – प्रत्यनीकमिति। बलवतः = शक्तिमतः, शत्रोः = रिपोः, पक्षे = सहायके, पराक्रमः = बलप्रयोगः, शक्तेः प्रदर्शनं, प्रत्यनीकम् = एतन्नामालङ्कारो भवेत्। बलवतः शत्रोः सहायकस्य पराभवर्णने प्रत्यनीकमलङ्कारः।

**उदाहरति** – जत्रैति। उत्पलाभ्यां = कमलाभ्यां, जैत्रयोः = जयनशीलयोः, नेत्रयोः = नयनयोः, अनुगौ = अनुगामिनी इति जैत्रनेत्रानुगौ, कर्णौ = श्रोत्रे, अधः कृतौ = तिरस्कृतौ, पराजितौ।

**भावार्थः** – यत्र बलवति शत्रौ विजयस्य सामर्थ्याभावकारणात्तस्य सहायकोपरि विजयस्य तस्य तिरस्कारवर्णनं वा क्रियते तत्र प्रत्यनीकनामालङ्कारो भवति। यथा अत्रोदाहरणे कमलाभ्यां नेत्रे विजेतुं काम्येते, किन्तु नेत्रे विजेतुम् असमर्थाभ्यां ताभ्यां नेत्र-पक्षपातिनौ सहायकौ वा कर्णौ एव तिरस्कृतौ इति। इत्थमत्र नेत्रानुगयोः कर्णयोः पराभवप्रतिपादनादत्र प्रत्यनीकालङ्कारोऽस्ति।

**प्रसङ्गः** – अथ प्रतीपालङ्कारं निरूपयन्नाह जयदेवः –

**प्रतीपमुपमानस्य हीनत्वमुपमेयतः।**
**दृष्टं चेद्वदनं तस्याः किं पद्मेन किमिन्दुना॥ १००॥**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**अन्वयः** – उपमेयतः उपमानस्य हीनत्वं प्रतीपम्। (यथा) – चेत् तस्याः वदनं दृष्टं (तर्हि) पद्मेन किम्? इन्दुना किम्?

**व्याख्या** – प्रतीपालङ्कारं लक्षयन्नाह – प्रतीपमिति। उपमेयतः = उपमेयात्, उपमेयाऽपेक्षया, उपमानस्य = उपमानपदार्थस्य, हीनत्वं = न्यूनत्वं वर्णितं भवेत्तदा प्रतीपालङ्कारो भवति।

**उदाहरति** – दृष्टमिति। तस्याः = कामिन्याः, वदनं = मुखं, दृष्टम् = अवलोकितं तर्हि पद्मेन किं = कमलेन किम्?इन्दुना किं = चन्द्रेण वा किं प्रयोजनम्। अत्र पद्मचन्द्रौ निष्फलौ इत्याशयः।

**भावार्थः** – न्यूनगुणत्वमुपमेयत्वम्, अधिकगुणत्वमुपमानमिति सामान्यनियमस्य यत्र वैपरीत्यं वर्ण्यते, अथवा उपमेयाद् उपमानस्य हीनताया वर्णनं यत्र क्रियते तत्र प्रतीपनामकोऽलङ्कारो भवति। यथोदाहरणे प्रेयसीमुखावलोकनान्तरं पद्मचन्द्रयोः अवलोकनं निष्प्रयोजनं व्यर्थमिति भावः। अतः अधिकगुणत्वसिद्धयोः पद्मचन्द्रयोरपेक्षया न्यूनगुणत्वसिद्धकामिनीमुखस्य वैशिष्ट्यं प्रतिपादनादत्र प्रतीपनामकोऽलङ्कारोऽवगन्तव्यः।

**प्रसङ्गः** – अथ उल्लासालङ्कारं निरूपयन्नाह जयदेवः –

**उल्लासोऽन्यमहिम्ना चेद्दोषो ह्यन्यत्र वर्ण्यते।**
**तद्भाग्यं धनस्यैव यन्नाश्रयति सज्जनम्॥१०१॥**

**अन्वयः** – चेत् अन्यमहिम्ना अन्यत्र हि दोषः वर्ण्यते (तर्हि) उल्लासः (यथा) – धनस्य एव तत् अभाग्यं – यत् सज्जनं न आश्रयति।

**व्याख्या** – उल्लासं लक्षयति – उल्लास इति। चेत् = यदि, अन्यमहिम्ना = परमहत्त्वेन, अन्यत्र = अन्यस्मिन्, दोषः = दूषणम्, अवगुणो वा, वर्ण्यते = कथ्यते, तदा उल्लासः एतन्नामालङ्कारो भवेत्।

**उदाहरति** – तदिति। यत् धनं = वित्तं, सज्जनं = सत्पुरुषं न आश्रयति = न प्राप्नोति, तत् धनस्यैव = वित्तस्यैव, अभाग्यं = दुर्भाग्यं वर्तते। अत्र सज्जनमहिम गुणेन धनस्यैव दोषो दर्शितः। अतः उल्लासनामालङ्कारोऽवगन्तव्यः।

**भावार्थः** – यत्र दोषयुक्तस्यापि कस्यापि वस्तुनो गुणवर्णनेन तद्दोषः अन्यस्मिन् वस्तुनि यदि वर्ण्यते तत्रोल्लासनामकोऽलङ्कारो भवति। यथा उदाहरणेऽस्मिन् 'सज्जनो दरिद्रो भवति' प्रायोवादः श्रूयते। पुनरप्यत्र दरिद्रत्वदोषयुक्तस्यापि सज्जनस्य गुणत्वेन वर्णनेन दोषत्वं तु धन एव प्रतिपादितं वर्तते। अतोऽत्रोल्लासनामकोऽलङ्कारोऽस्ति।

**प्रसङ्गः** – अथ तद्गुणालङ्कारं निरूपयन्नाह जयदेवः –

**तद्गुणः स्वगुणत्यागादन्यतः स्वगुणोदयः।**
**पद्मरागारुणं नासामौक्तिकं तेऽधराश्रितम्॥१०२॥**

**अन्वयः** – यत्र स्वगुण-त्यागात् अन्यतः स्वगुणोदयः (तत्र) तद्गुणः। (यथा) – आश्रितं ते नासा-मौक्तिकं पद्मरागाऽरुणम् (विद्यते)।

**व्याख्या** – तद्गुणं लक्षयन्नाह – तद्गुण इति। स्वगुणत्यागात् = स्वस्यगुणस्य त्यागः स्वगुणत्यागः तस्मात् स्वगुणत्यागात् = निजगुणविसर्जनात्, अन्यतः = अन्यस्मात् कारणात्, स्वगुणोदयः = स्वस्मिन् = आत्मनि गुणोदयः = गुणप्राप्तिः, गुणलाभो वा वर्ण्यते, तत्र तद्गुणः = तद्गुणालङ्कारः स्यादिति।

**उदाहरति** – पद्मेति। अधराश्रितं = रक्तवर्णाधरोष्ठसंलग्नं, ते = तव, नासामौक्तिकं = नासिकामुक्ताफलं, पद्मरागारुणं = पद्मरागवद्, रक्तमणिवत्, अरुणं, रक्तं = लोहितमस्ति। अत्र श्वेतगुणयुक्तस्य नासामौक्तिकस्य अधरोष्ठसम्पर्ककारणात् रक्तवर्णता वर्णनकारणादत्र तद्गुणालङ्कारोऽवबोध्यः।

**भावार्थः** – यत्र वस्तुनः स्वगुणत्यागपूर्वकम् अन्यगुणग्रहणं वर्ण्यते तत्र तद्गुणनामालङ्कारः। प्रकृतोदाहरणे



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

नासा–मौक्तिकेन स्वकीयस्य शुभ्रत्वगुणस्य त्यागं कृत्वा अधरोष्ठसम्पर्काद् अधरस्थितारुणत्वस्य ग्रहणं कृतमिति। एतस्मात् कारणादत्र तद्गुणनामालङ्कारो वर्तते।

**प्रसङ्गः** – अथ पूर्वरूपतालङ्कारं निरूपयन्नाह जयदेवः –

**पुनः स्वगुणसम्प्राप्तिर्विज्ञेया पूर्वरूपता।**
**हरकण्ठांशुलिप्तोऽपि शेषस्त्वद्यशसा सितः॥१०३॥**

**अन्वयः** – पुनः स्वगुण–सम्प्राप्तिः पूर्वरूपता विज्ञेया। (यथा) – हर–कण्ठांशु–लिप्तः अपि शेषः त्वद्–यशसा सितः।

**व्याख्या** – पूर्वरुपताऽलङ्कारं लक्षयति – पुनरिति। यदा अन्यगुणसम्बन्धवर्णनान्तरमपि स्वगुणसंप्राप्तिः – स्वगुणस्य = निजगुणस्य, सम्प्राप्तिः = लाभ इति स्वगुणसंप्राप्तिः, पूर्वरुपता विज्ञेया = एतन्नामाऽलङ्कारोऽवबोध्यः।

**उदाहरति** – हरेति। कस्यचिद् राज्ञः स्तुतिकथनमिदं – हे राजन्! हरस्य = भगवतः नीलकण्ठस्य, कण्ठांशुभिः = कण्ठकिरणैः, लिप्तोऽपि = नीलवर्णमाप्तोऽपीतिभावः, शेषः = शेषनागः, त्वद्यशसा = तवकीर्त्या, सितः = श्वेतवर्ण एवास्ति। अत्र श्वेतवर्णस्य शेषनागस्य भगवतः शङ्करस्य नीलकण्ठनीलिम्ना श्वेतवर्णनिरसन पूर्वकनीलगुणप्राप्तावपि पुनः स्वतः सिद्धस्य श्वेतगुणस्य प्राप्तिकथनात् पूर्वरुपतानामालङ्कारो वर्तते।

**भावार्थः** – अन्यगुणप्रभाववर्णनान्तरमपि पुनः स्वगुणग्रहणं यत्र वर्ण्यते तत्र पूर्वरुपतानामालङ्कारो भवति। प्रकृतेऽस्मिन् उदाहरणे पूर्वं श्वेतवर्ण शेषेण नीलकण्ठमहिम्ना नीलवर्णत्वमाप्तं, पुनश्च राज्ञः कीर्त्या शुभ्रवर्णत्वमाप्तमिति पूर्वस्वरूपतां प्राप्तवान् इत्यस्मादत्र पूर्वरूपतानामालङ्कारोऽस्ति।

**प्रसङ्गः** – अथ पूर्वरूपतालङ्कारं प्रकारान्तरेण निरूपयन्नाह जयदेवः –

**यद्वस्तुनोऽन्यथा रूपं तथा स्यात्पूर्वरूपता।**
**दीपे निर्वापिते ह्यासीत्काञ्चीरत्नैरहर्महः॥१०४॥**

**अन्वयः** – यत् वस्तुनः अन्यथारूपं (पुनः) तथा स्यात् (तर्हि) पूर्वरूपता। (यथा) – दीपे निर्वापिते हि काञ्चीरत्नैः अहर्महः आसीत्।

**व्याख्या** – पूर्वरूपतां प्रकारान्तरेणाह – यदिति। वस्तुनः = पदार्थस्य यद्रूपं बाह्योगुणः अन्यथारूपं = उच्छिन्नरूपं, नष्टरूपं, पुनः तथा स्यात् = पूर्वसदृशं स्वाभाविकं भवेद् तर्हि पूर्वरूपतानामालङ्कारः स्यात्।

**उदाहरति** – दीप इति। दीपे = दीपके, निर्वापिते = शमिते अपि, काञ्च्याः = रशनायाः, रत्नैः = मणिभिः इति काञ्चीरत्नैः = रशनामणिभिः, अहर्महः = अह्नो = दिनस्य महः = तेजः, प्रकाशः, आसीत् = अभूत्। अत्र दीपे निर्वापिते सत्यपि पूर्ववत् प्रकाशो वर्णितः। इत्यस्मादत्र पूर्वरूपताऽवबोध्या।

**भावार्थः** – यत्र वस्तुनः नष्टमपि रूपं पुनः कारणविशेषाद् पूर्ववदेव वर्ण्यते, तत्र पूर्वरूपताऽलङ्कारो भवति। यथा प्रस्तुतोदाहरणे दीपे शान्तिं नीतेऽपि काञ्चीरत्नैः दिनसम्बन्धी प्रकाशो (दीपनिर्वापणात् प्रागवत्) वर्णितः। अतः लुप्तस्य प्रकाशस्य पुनरवाप्तेः कारणात् पूर्वरूपताऽलङ्कारोऽस्ति।

**प्रसङ्गः** – अथ अतद्गुणालङ्कारं निरूपयन्नाह जयदेवः –

**सङ्गतान्यगुणानङ्गीकारमाहुरतद्गुणम्।**
**विशन्नपि रवेर्मध्यं शीत एव सदा शशी॥१०५॥**

**अन्वयः** – सङ्गतः + अन्यगुण+अङ्गीकारम् आहुः। (यथा) – रवेः मध्यं विशन् अपि शशी सदा शीतः एव।

**व्याख्या** – अतदगुणमाह – सङ्गतेति। अन्यस्य = अपरस्य, पदार्थस्य गुणः = अन्यगुणः, सङ्गताः = प्रसक्ताश्च ते अन्यगुणाः सङ्गतान्यगुणाः तेषाम् अनङ्गीकारं सङ्गतान्यगुणानङ्गीकारम्, अतद्गुणः = एतन्नामालङ्कारः,



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

आहु: = कथ्यन्ते विद्वांस:। अन्यपदार्थसङ्गतौ अपि तस्य गुणान् न गृह्णातीति भाव:।

**उदाहरति** – विशन्निति। रवे: = सूर्यस्य, मध्ये = अभ्यन्तरे, विशन्नपि = प्रविशन्नपि, शशी = चन्द्र:, सदा = सर्वदा, शीत एव = शीतल एव। एकराशिस्थित: चन्द्र: सूर्यस्य सङ्गतिं प्राप्यापि सूर्यस्य तापगुणं न अङ्गीकरोति, अपितु शीतल एव तिष्ठति।

**भावार्थ:** – सङ्गता अपि अन्यपदार्थगुणानां प्रभावो यदि नाङ्गीक्रियते तर्हि [नास्ति तद्गुणो यस्मिन् स अतगुण इति व्युत्पत्त्या] अतद्गुणनामालङ्कारो भवति। यथाऽत्रोदाहरणे सूर्यसम्बन्धेन चन्द्रस्य तापजनकताग्रहणमुचितमेवाऽऽसीत् किन्तु तदनङ्गीकारवर्णनेन अत्र अतद्गुणानामकोऽलङ्कारोऽवबोध्य:।

**प्रसङ्ग:** – अथानुगुणालङ्कारं निरूपयन्नाह जयदेव: –

**प्राक्सिद्धस्वगुणोत्कर्षोऽनुगुण: परसन्निधे:।**
**कर्णोत्पलानि दधते कटाक्षैरपि नीलताम्॥१०६॥**

**अन्वय:** – पर-सन्निधे: प्राक्-सिद्ध-स्वगुणोत्कर्ष: अनुगुण:। (यथा) – कर्णोत्पलानि कटाक्षै: अपि नीलतां दधते।

**व्याख्या** – अनुगुणं लक्षयति – प्रागिति। परसन्निधे: – परस्य = अन्यस्य सन्निधे: = सामीप्यात्, प्राक्सिद्धस्य अपि = पूर्वत एव स्थितस्य स्वगुणस्य = आत्मगुणस्य, उत्कर्ष: = आधिक्यम्, अनुगुण: = अनुगुणालङ्कारो भवति। अन्यपदार्थस्य सन्निधिवशात् प्राक्सिद्धस्वगुणोत्कर्षवर्णनाद् अनुगुणालङ्कार: इति भाव:।

**उदाहरति** – कर्णोत्पलानीति। कर्णोत्पलानि = कर्णोऽवतंसभूतानि कमलानि, कटाक्षै: = अपाङ्गदृष्टिभि:, अपि = भूयो, नीलतां = नीलवर्णतां, मेचकतां, दधते = धारयन्ति।

**भावार्थ:** – यत्र पूर्वमेव विद्यमानस्यापि स्वगुणस्य यदि अन्यपदार्थसम्पर्कवशाद् उत्कर्षवर्णनं क्रियते तर्हि अनुगुणाऽलङ्कारो भवति। प्रस्तुतोदाहरणे नायिकया कर्णलङ्कृतानि नीलकमलानि स्वत एव नीलानि सन्ति तथा तद्नुरुपै: नीलनीलै: कटाक्षै: इतोऽपि नीलतां प्राप्नुवन्ति। इत्थं कर्णोत्पलानां स्वाभाविके नीलगुणे कटाक्षसामीप्यात् नीलगुणस्योत्कर्षवर्णनादत्र अनुगुणालङ्कारोऽस्ति।

**प्रसङ्ग:** – अथ अवज्ञालङ्कारं निरूपयन्नाह जयदेव: –

**अवज्ञा वर्ण्यते वस्तु गुणदोषाक्षमं यदि।**
**म्लायन्ति यदि पद्मानि का हानिरमृतद्युते:॥१०७॥**

**अन्वय:** – यदि गुण-दोष+अक्षमं वस्तु वर्ण्यते (तर्हि) अवज्ञा। (यथा) – यदि पद्मानि म्लायन्ति (तर्हि) अमृतद्युते: का हानि: ?

**व्याख्या** – अवज्ञालङ्कारं लक्षयन्नाह – अवज्ञेति। यदि = चेत्, गुणदोषयो: अक्षमम् = अयोग्यं वस्तु वर्ण्यते = कथ्यते तर्हि अवज्ञा = अवज्ञानामालङ्कारो भवति। अन्यवस्तुन: गुणदोषाविष्करणे यदि असमर्थं वस्तु वर्ण्यते तदाऽवज्ञेति। उदाहरति – म्लायन्तीति। यदि = चेत्, पद्मानि = कमलानि, चन्द्रं दृष्ट्वा म्लायन्ति = सङ्कुचन्ति, तदाऽमृद्युते: = सुधांशो:, चन्द्रमस:, का हानि: = का क्षति ?स तु अमृतद्युतिरेवास्ति।

**भावार्थ:** – यत्र अन्यवस्तुसम्पर्काद् वर्ण्यमाने वस्तुनि न गुणोत्कर्षो जायते न च कश्चिदपकर्ष: तर्हि अवज्ञानामकोऽलङ्कारो भवति। यथोदाहरणेऽस्मिन् चन्द्रोदये जाते सति कमलानि सङ्कुचन्ति। अनेन कमलसङ्कोचरुपदोषेण चन्द्र: प्रभावितो न भवति इत्युक्ते न तस्मिन् कोऽप्युत्कर्षो भवति न च कश्चिदपकर्ष: इत्येवं निरपेक्षभावो विद्यमानादत्र अवज्ञालङ्कारो वर्तते।

**विशेष:** – अलङ्कारोऽयम् उल्लासालङ्कारस्य विपयर्यरूपोऽस्ति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**प्रसङ्गः** - अथोत्तरालङ्कारं निरूपयन्नाह जयदेवः -

**प्रश्नोत्तर - क्रमेणोक्तौ स्यूतमुत्तरमुत्तरम्।**
**यत्रासौ वेतसी पान्थ तत्रासौ सुतरा सरित्॥१०८॥**

**अन्वयः** - उक्तौ प्रश्नोत्तर-क्रमेण स्यूतम् उत्तरम् - उत्तरम्। (यथा) - पान्थ यत्र असौ वेतसी, तत्र असौ सरित् सुतरा।

**व्याख्या** - उत्तरालङ्कारं लक्षयति - प्रश्नोत्तरमिति। उक्तौ = कथने, वाक्ये, वाचने वा, प्रश्नोत्तरयोः क्रमेण इति प्रश्नोत्तरक्रमेण = प्रश्नोत्तरप्रकारेण, स्यूतं = संलग्नं, निबद्धम्, उत्तरं = प्रतिवचनम् तत्र उत्तरम् = एतन्नामालङ्कारः स्यात्। यदि प्रस्तुते वाक्ये एव प्रश्नोत्तररूपेण गूढाभिप्रायोऽपि प्रतिवचनरूपेण वर्ण्यते तदा उत्तरनामालङ्कारो भवति।

**उदाहरति** - यत्रेति। हे पान्थ! पथिक! यत्र = यस्मिन् स्थले, असौ = पुरोदृश्यमाना, वेतसी = वानीरवृक्षः, तत्र = तस्मिन् स्थले, असौ = दृश्यमाना, सरित् = नदी, सुतरा = सुखेन तरितुं शक्या विद्यते। सरित्तरणमार्गं पृच्छन्तं पान्थं प्रति यत्रासौ वेतसी इत्युत्तरमिति।

**भावार्थः** - यत्र सामान्यप्रश्नोत्तरक्रमेण गूढोऽभिप्रायः प्रकटी क्रियते तत्र उत्तरनामकोऽलङ्कारोऽवबोध्यः। यथा हि प्रस्तुतोदाहरणे कश्चित् कामुकः पथिकः सङ्केतस्थलकामनया कामिनीं पृच्छति - नदी कुत्र सुखपूर्वकं तरितुं योग्याऽस्ति? निगूढोऽभिप्रायः - निर्विघ्नं सुखपूर्वकञ्च रमणं कुत्र कर्त्तुं शक्यते तदा सा कामिनी वदति - यत्रासौ वेतसीवृक्षः तिष्ठतीति सामान्यमुत्तरम्। निगूढोऽभिप्रायः - सुखपूर्वकं निर्विघ्नञ्च रमणपुरस्सरं कामिन्याः स्वीकृतिः। इत्थं सामान्यप्रश्नोत्तरक्रमेण मनोऽभिप्रायोऽभिव्यक्तकारणादत्रोत्तरनामालङ्कारोऽस्ति।

**विशेषः** - एतमलङ्कारं केचित् प्रश्नोत्तरालङ्कारनाम्नाऽपि शास्त्रान्तरे कथितवन्तः। तन्मतानुसारम् अङ्गीकुर्मश्चेत् लक्षणश्लोके अर्थसङ्गतेः क्लेशोपजायते। अतोऽत्र उत्तराऽलङ्कारत्वेन स्वीकृतम् अस्माभिः।

**प्रसङ्गः** - अथ पिहितालङ्कारं निरूपयन्नाह जयदेवः -

**पिहितं परवृत्तान्तज्ञातुरन्यस्य चेष्टितम्।**
**प्रिये गृहागते प्रातः कान्ता तल्पमकल्पयत्॥१०९॥**

**अन्वयः** - पर-वृत्तान्त-ज्ञातुः अन्यस्य चेष्टितं - पिहितम्। (यथा) - प्रातः प्रिये गृहागते कान्ता तल्पम् अकल्पयत्।

**व्याख्या** - पिहितं लक्षयन्नाह - पिहितमिति। परस्य = अन्यस्य, वृत्तान्तस्य = वृत्तस्य, ज्ञाता = वेदिता, तस्य परवृत्तान्तज्ञातुः, अन्यस्य = परस्य, चेष्टितं = क्रियाकलापाः, चेष्टा, पिहितं = पिहितनामालङ्कारः। गोपितोऽपि परवृत्तान्तः केनचित् तदनुगुणक्रियाकलापैः प्रकटीक्रियते तदाऽयमलङ्कारो भवति। **उदाहरति** - प्रिय इति। प्रातः = प्रभाते, प्रिये = कान्ते, गृहागते = गृहमायाते सति, कान्ता = पत्नी, तल्पं = शय्याम्, अकल्पयन् = अरचयत्। रात्रौ अन्यस्याः गृहे रमणं कृत्वा कान्तः स्वगृहमायातः प्रातः। अतः श्रान्तोऽसि, साम्प्रतमस्मिन् सुखशयने निःशङ्कं यथासुखञ्च शयनं कुरु इति भावः।

**भावार्थः** - यत्र परस्य गोपनीयं रहस्यात्मकं वृत्तान्तं ज्ञात्वा यदि कश्चित्किमपि चेष्टां करोति यया तद्रहस्य-प्रकटनं जायते तत्र पिहितनामालङ्कारो भवति। यथा प्रस्तुतोदाहरणे प्रियस्य सपत्नीरमणं बुध्यमाना कान्ता किमपि अनुक्तवैव केवलं शय्यां रचितवती। एवमत्र कान्तस्य गुप्तवृत्तान्तं ज्ञात्वा कान्तायाः तदनुकूलचेष्टावर्णनादत्र पिहितनामालङ्कारोऽस्ति।

**प्रसङ्गः** - अथ व्याज्योक्त्यलङ्कारं निरूपयन्नाह जयदेवः -

**व्याजोक्तिः शङ्कमानस्य छद्मना वस्तुगोपनम्।**
**सखि! पश्य गृहाराम - परागैरस्मि धूसरा॥११०॥**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**अन्वयः** – शङ्कमानस्य छद्मना वस्तु–गोपनं – व्याजोक्तिः। (यथा) – सखि गृहाराम – परागैः धूसरा अस्मि, पश्य।

**व्याख्या** – व्याजोक्त्यलङ्कारं लक्षयन्नाह – व्याजोक्तिरिति। शङ्कमानस्य = रहस्यभावं वृत्तान्तं तर्कयतः छद्मना = कपटेन, वाक्चातुर्येण, वस्तु गोपनं = तथ्यगोपनं, व्याजोक्तिः = एतन्नामालङ्कारः स्यात्। अन्यथा शङ्कमानं प्रति अन्यथा कथनद्वारा वृत्तस्य गोपने व्याजोक्तिरलङ्कारः इति भावः।

**उदाहरति** – सखीति। हे सखि अहं गृहारामपरागैः = गृहोद्यानपुष्परजकणैः, धूसरा = मलिना, अस्मि = वर्त्ते इति त्वं पश्य। चौर्यरताप्रसङ्गे भूमिधूलिभिः धूसरिता नास्मीति भावः।

**भावार्थः** – यत्र स्वस्य गुप्तवृत्तप्रकाशनम् आशङ्कमानः जनः व्याजेन वस्तुगोपनं करोति तत्रायं व्याजोक्तिनामालङ्कारो भवति। यथा प्रकृतेऽस्मिन्नुदाहरणे नायिकया चौर्यरतं कृतं, तद्रतं तत्सखी तल्लक्षणैः जानाति। प्रकटितमपि तत् सा पुनः कपटपूर्णोक्त्या – गृहारामपरागैः धूसराऽस्मि न तु चौर्यरमण.........इति गोपयति। इत्थमत्र व्याजेन वस्तुगोपनं वर्णितत्वाद् व्याजोक्तिनामालङ्कारो बोध्यः।

**प्रसङ्गः** – अथ वक्रोक्त्यलङ्कारं निरूपयन्नाह जयदेवः –

**वक्रोक्तिः श्लेषकाकुभ्यां वाच्यार्थान्तरकल्पनम्।**
**मुञ्च मानं दिनं प्राप्तं मन्द नन्दी हरान्तिके॥१११॥**

**अन्वयः** – श्लेष–काकुभ्यां वाच्यार्थान्तर–कल्पनं–वक्रोक्तिः। (यथा) – मुञ्च मानं, दिनं, प्राप्तम्। मन्द नन्दी हरान्तिके।

**व्याख्या** – वक्रोक्तिं लक्षयति – वक्रोक्तिरिति। श्लेषश्च काकुश्च श्लेषकाकू ताभ्यां श्लेषकाकुभ्यां = श्लेषेण काक्वा वा (श्लेषोनाम अनेकार्थत्वं, काकुः नाम भिन्नकण्ठध्वनिः) वाच्यार्थान्तरस्य = अभिधेयापेक्षया भिन्नस्य अर्थस्य, कल्पनं = संयोजनमिति वाच्यार्थान्तरकल्पनं, वक्रोक्तिः = एतन्नामालङ्कारः स्यात्।

**उदाहरति** – मुञ्चेति। मानिनीं प्रति कथयन्नाह कश्चित् प्रिये मानं = प्रणयकोपं, मुञ्च = त्यज, यतोहि दिनं = दिवसः, प्राप्तं = समागतः, रात्रिस्तु गता। मुञ्च मानं दिनम् इति श्रुत्वा मानिनी श्लेषेण अन्यार्थकल्पनं कृत्वा प्रत्युत्तरं ददाति – मन्द = मूर्ख, नन्दी = शङ्करस्यवृषभः इह क्वास्ति, स तु हरान्तिके = भगवतः शङ्करस्य समीपे अस्ति। एवमत्र कामिन्या नायकोक्तेः श्लेषवशादन्यार्थकल्पनेन वक्रोक्तिः।

काकुवक्रोक्तेरुदाहरणं यथा – काले कोकिलवाचाले सहकारमनोरमे।
कृतागसः परित्यागात् तस्याश्चेतो न दूयते॥

अत्र दूत्या निषेधार्थे प्रतिपादितस्य नञ्शब्दस्य काक्वा न दूयते, अपितु दूयत एवेति विध्यर्थे परिणमते इति काकुवक्रोक्तिः।

**भावार्थः** – श्लेषेण काक्वा वा यत्र भिन्नस्य वाच्यार्थस्य कल्पनं क्रियते तत्र वक्रोक्तिनामकोऽलङ्कारो भवति। यथाऽत्रोदाहरणे श्लेषेण वाच्यार्थापेक्षया भिन्नस्य अर्थस्य कल्पनाद् वक्रोक्तिनामकोऽलङ्कारोऽस्ति।

**प्रसङ्गः** – अथ स्वभावोक्त्यलङ्कारं निरूपयन्नाह –

**स्वभावोक्तिः स्वभावस्य जात्यादिषु च वर्णनम्।**
**कुरङ्गैरुत्तरङ्गाक्षि स्तब्धकर्णैरुदीक्ष्यते॥११२॥**

**अन्वयः** – जात्यादिषु च स्वभावस्य वर्णनं स्वभावोक्तिः। (यथा) – उत्तरङ्गाक्षि स्तब्ध–कर्णैः कुरङ्गैः उदीक्ष्यते।

**व्याख्या** – स्वभावोक्तिं लक्षयन्नाह – स्वभावोक्तिरिति। जात्यादिषु = जाति–गुण–द्रव्य–क्रियादिपदार्थेषु,



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

स्वभावस्य = प्रकृतेः, स्वाभाविकक्रियाकलापस्य, वर्णनं = कथनं, स्वभावोक्तिः = एतन्नामालङ्कारः स्यादिति।

**उदाहरति** – कुरङ्गैरिति। उत्तरङ्गाक्षि! हे चञ्चललोचने! स्तब्धकर्णैः – निश्चलकर्णैः, निस्तब्धश्रुतिभिः, कुरङ्गैः = मृगैः, उदीक्ष्यते = विलोक्यते। मृगाणामयं जातिगतस्वभावो यन्ते स्तब्धकर्णाः सन्तः एव किमपि वस्तु पश्यन्तीति।

**भावार्थः** – यत्र जातिगुणद्रव्यक्रियासु कस्यापि स्वभावस्य चारुवर्णनं क्रियते तत्र स्वभावोक्तिनामालङ्कारो भवति। प्रकृतेऽस्मिन्नुदाहरणे मृगाणां दर्शनक्रियास्वभाववर्णनादत्र स्वभावोक्तिरलङ्कारोऽस्ति।

**विशेषः** – स्वभावस्य = स्वभाविकगुणस्य, उक्तिः = कथनमिति स्वभावोक्तिः अनया व्युत्पत्त्यानुसारं स्वभावोक्तिरिति नामान्वर्थकमेवाऽस्ति।

**प्रसङ्गः** – अथ भाविकालङ्कारं निरूपयन्नाह जयदेवः –

**भाविकं भूतभाव्यर्थसाक्षाद्दर्शनवर्णनम्।**
**अलं विलोकयाद्यापि युध्यन्तेऽत्र सुरासुराः॥११३॥**

**अन्वयः** – भूत-भावि-अर्थ-साक्षाद्-दर्शन-वर्णनं – भाविकम् (यथा) – अत्र सुर+असुराः अद्य अपि युध्यन्ते (इति) अलं विलोकय।

**व्याख्या** – भाविकमिति। भूताश्च = अतीताश्च, भाविनश्च = अनागताश्चेति भूतभाविनः तथाभूता येऽर्थाः = पदार्थाः तेषां साक्षात्दर्शनस्य = प्रत्यक्षावलोकनस्य, वर्णनं = कथनं, भाविकं = भाविकनामालङ्कारः स्यात्। अतीतानागतयोर्वर्तमानत्वे भाविकम्।

**उदाहरति** – अलमिति। अत्र = अस्मिन् स्थाने, सुरासुराः = देवदानवाः, अद्यापि = साम्प्रतमपि, युध्यन्ते = युद्धं कुर्वन्ति इति त्वम्, अलं = पर्याप्तं, विलोकय = पश्य।

**भावार्थः** – यत्र भूत-भविष्य-पदार्थानां दर्शनं हस्तामलकवत्प्रत्यक्षमिव जायते तत्र भाविकनामालङ्कारो भवति। यथा अत्रोदाहरणे अतीतभयङ्करदेवासुरसंग्रामस्य साक्षात् दर्शनवर्णनाद्भाविकालङ्कारोऽस्ति।

**प्रसङ्गः** – अथ भाविकच्छव्यलङ्कारं निरूपयन्नाह जयदेवः –

**देशात्मविप्रकृष्टस्य दर्शनं भाविकच्छविः।**
**त्वं वसन् हृदये तस्याः साक्षात्पञ्चेषुरीक्ष्यसे॥११४॥**

**अन्वयः** – देशात्मविप्रकृष्टस्य दर्शनं भाविकच्छविः। तस्याः हृदये वसन् त्वं साक्षात् पञ्चेषुः ईक्ष्यसे।

**व्याख्या** – भाविकच्छविं लक्षयति – देशात्मेति। देशः = स्थानं च आत्मा = शरीरं च देशात्मानौ ताभ्यां विप्रकृष्टस्य = दूरवर्तिनः पदार्थस्य, दर्शनं = प्रत्यक्षीकरणं यत्र वर्ण्यते तत्र भाविकच्छविः = एतन्नामालङ्कारः स्यादिति।

**उदाहरति** – त्वमिति। नायकं प्रति दूतीवाक्यमिदं – त्वं = भवान्, तस्याः नायिकायाः, हृदये = चित्ते, मनसि, वसन् = वर्तमानः, साक्षात् = प्रत्यक्षं, पञ्चेषुः = पञ्चबाणः, कामदेवः इव, ईक्ष्यसे = दृश्यसे।

**भावार्थः** – यत्र देशेन आत्मना च दूरस्थितस्यापि पदार्थस्य साक्षाद्दर्शनं वर्ण्यते तत्र भाविकच्छविनामालङ्कारो भवति। भाविकस्य छविः इव छविः यस्य असौ भाविकच्छविः। यथा उदाहरणेऽस्मिन् देशेन आत्मना च दूरस्थितायाः नायिकायाः हृदये दूरस्थस्य नायकस्य कामदेवरुपेण दर्शनवर्णनाद् भाविकच्छविनामकोऽलङ्कारो वेदितव्यः।

**प्रसङ्गः** – अथ उदात्तालङ्कारं निरूपयन्नाह जयदेवः –

**उदात्तमृद्धेश्चरितं श्लाघ्यं चान्योपलक्षणम्।**
**सानौ यस्याभवद्युद्धं तद्धूर्जटिकिरीटिनो॥११५॥**

**अन्वयः** – ऋद्धेः श्लाघ्यम् अन्योपलक्षणं च चरितम् – उदात्तम्। (यथा) – यस्य सानौ तद् धूर्जटि – कीरीटिनोः युद्धम् अभवत्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**व्याख्या** – उदात्तालङ्कारं लक्षयन्नाह – उदात्तमिति। ऋद्धेः = समृद्धेः, ऐश्वर्यस्य वा, श्लाघ्यं = प्रशंसनीयम्, अन्यस्य उपलक्षणं यस्मिन् तद् अन्योपलक्षणम् = अन्यस्य पदार्थविशेषस्य, महापुरुषस्य वा उद्धरणं यस्मिन् तत् तादृशं चरितं = माहात्म्यं वर्ण्यते, तत्र उदात्तम् = एतन्नामालङ्कारः स्यात्। उत्कर्षेण आदीयते = गृह्यते इत्युदात्तम्। तत्र सम्पदाधिक्यमेकमुदात्तं, महतां चरितस्य चाङ्गत्वमपरमुदात्तम्।

**उदाहरति** – सानाविति। यस्य = हिमालयस्य, सानौ = शिखरे, धूर्जटिकिरीटनोः – धूः = भारभूता, जटिः = जटा यस्य सः धूर्जटिः = शिवः, किरीटमस्यास्तीति किरीटी = अर्जुनः तयोः शिवार्जुनयोः तत् प्रसिद्धं युद्धं = सङ्ग्रामः, अभवत् = अजायत।

**भावार्थः** – यत्र कस्यापि समृद्धेः ऐश्वर्यस्य वा महनीयं चरित्रं यद्वा अन्याङ्गत्वेन महतां चरित्रं वर्ण्यते तत्रोदात्तनामालङ्कारो भवति। यथा प्रस्तुतोदाहरणे हिमालयस्य महिमवर्णनप्रसङ्गे शिवार्जुनयोः युद्धप्रसङ्गः हिमालयाङ्गत्वेनैवोद्धृतः। अतोऽत्र उदात्तनामालङ्कारोऽस्ति। पुनश्च समृद्धिवर्णनरूपस्योदाहरणं यथा – अधः

कृताम्भोधरमण्डलानां यस्यां शशाङ्कोपलकुट्टिमानाम्।
ज्योत्स्नानिपातात्क्षरतां पयोभिः केलीवनं वृद्धिमुरीकरोति॥

अर्थात् यत्र एकोऽपि चन्द्रकान्तमणिः दुष्प्राप्यस्ति किन्तु तस्यां नगर्यां तु तैरेव भवनोर्ध्वभूमयो वृद्धाः सन्तीति सर्वथा श्लाघ्यः सम्पत्तिवर्णनादत्र समृद्धिवर्णनरुपमुदात्तनामकोऽलङ्कारो वर्तते।

**प्रसङ्गः** – अथ अत्युक्त्यलङ्कारं निरूपयन्नाह जयदेवः –

**अत्युक्तिरद्भुतातथ्यशौर्यौदार्यादिवर्णनम् ।**
**त्वयि दातरि राजेन्द्रः याचकाः कल्पशाखिनः॥११६॥**

**अन्वयः** – अद्भुत+अतथ्य – शौर्य+औदार्य+आदिवर्णनम् – अत्युक्तिः। (यथा) – राजेन्द्र! त्वयि दातरि (सति) कल्पशाखिनः (अपि) याचकाः।

**व्याख्या** – अत्युक्त्यलङ्कारं लक्षयति – अत्युक्तिरिति। अद्भुतम् = आश्चर्यजनकम्, अतथ्यम् = असत्यं च शौर्यस्य = वीरतायाः, औदार्यादेः = उदारतादीनां च वर्णनं = कथनं यत्र क्रियते तत्र अत्युक्तिनामकोऽलङ्कारो भवति। अद्भुत-असत्य-शौर्य-औदार्यादि-वर्णनरुपा अत्युक्तिरेव अत्युक्तिनामकोऽलङ्करो बोध्यः।

**उदाहरति** – त्वयीति। हे राजेन्द्र! = हे नृपश्रेष्ठ! त्वयि = भवति, दातरि = वदान्ये सति, कल्पशाखिनः = कल्पवृक्षाः अपि, याचकाः = याचनाकारकाः, भवन्तं याचन्ते वा। कल्पवृक्षास्तु सर्वमनोरथान् पूरयितं समर्थाः भवन्ति, तेऽपि प्रस्तुते याचकत्वेन वर्णिताः इत्यहो राज्ञः दानमहिमाऽतिशयो वर्तते।

**भावार्थः** – शौर्य-औदार्यादीनां गुणानां वर्णनं यत्र अद्भुत-असत्य-लोकातीतरुपेण क्रियते तत्रात्युक्तिनामकोऽलङ्कारो भवति। यथा प्रकृतोदाहरणे राज्ञः अद्भुताऽतथ्यदानशीलता वर्णिता तस्मादत्र अत्युक्तिनामकोऽलङ्कारो वर्तते।

**विशेषः** – प्रस्तुतस्योदाहरणस्यार्थविषये यदि एवं विचारयामश्चेत् 'हे राजन् भवतां दानातिशयमहिम्ना महान्तं धनराशिं संगृह्य याचका अपि कल्पवृक्षसमदातारः सञ्जाताः इति। अनेनापि अर्थकरणेनापि कल्पवृक्षाणां याचकत्वे, याचकानां वा कल्पवृक्षत्वे राज्ञः मिथ्यौदार्योक्तिरेवास्ति।

**प्रसङ्गः** – अथ उपर्युक्तानुसारं स्वाभिमतान् अलङ्कारान् निरुप्येदानीं कैश्चिदालङ्कारिकैः परिगणिता वक्ष्यमाणा रसवदादयः सप्तालङ्कारान् अपि निरूपयन्नाह –



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**रसभावतदाभासभावशान्तिनिबन्धनाः ।**
**रसवत्प्रेय ऊर्जस्वित्समाहितमयाभिधाः ॥११७॥**
**भावानामुदयः सन्धिः शबलत्वमिति त्रयः ।**
**अलङ्कारानिमान् सप्त केचिदाहुर्मनीषिणः ॥११८॥**

**अन्वयः** - रस-भाव-तदाभास-भावशान्ति-निबन्धनाः रसवत्प्रेयऊर्जस्वत्समाहितमयाभिधाः (इति चत्वारः) भावानाम् उदयः, सन्धिः, शबलत्वम् इति त्रयः (इत्थम् समाहृत्य) इमान् सप्त अलङ्कारान् केचित् मनीषिणः आहुः।

**व्याख्या** - पीयूषवर्षजयदेवः स्वाभिमतान् अलङ्कारान्प्रतिपाद्य सम्प्रति कैश्चिदालङ्कारिकैः प्रतिपादिता रसवदादीन् अलङ्कारान् निरूपयति - रसभावेति। रसाश्च भावाश्च तदाभासाश्च भावशान्तिश्चेति रस-भाव-तदाभास-भावशान्तयः ताः निबन्धनानि = कारणानि येषां ते रसभावतदाभासभावशान्तिनिबन्धनाः। रसवांश्च प्रेयांसश्च ऊर्जस्विच्च समाहितश्चेति रसवत्प्रेयऊर्जस्वत्समाहिताः तन्मया तद्रूपाः अभिधा = नामानि येषां ते रसवत्प्रेयऊर्जस्वित्समाहितमयाभिधाः = रसवत्प्रेयऊर्जस्वित्समाहित्याख्या अलङ्काराः भवन्ति। रस-भाव-रसाभास-भावाभास-भावशान्ति मूलका एते चत्वारः अलङ्काराः - रसवदलङ्कारः, प्रेयोलङ्कारः, ऊर्जस्वदलङ्कारः, समाहितालङ्कारश्चेति। तथा च भावानामुदयः = निर्वेदादिभावानामुद्गमावस्था - भावोदयः, द्वयोर्विरुद्धयोर्भावयोः सन्धिः = परस्परस्पर्धा-भावसन्धिः, अनेकेषां भावानां शबलत्वं = भिन्नत्वं - भावशबलता चेति त्रयः अलङ्काराः। एवं प्रकारेण समाहृत्य एतान् सप्त अलङ्कारान् केचित् मनीषिणः = विद्वांसः, आचार्याः, आहुः = कथयन्ति। एवम् उपर्युक्तानां सप्त-अलङ्काराणां सामान्यलक्षणोदाहरणानि प्रस्तूयन्तेऽत्र -

**१. रसवदलङ्कारः** - काव्ये शृङ्गारादयो नवरसाः प्रसिद्धाः। यत्रैकोरसः रसान्तरस्य अङ्गत्वेन वर्ण्यते तत्र रसवदलङ्कारो भवति।

उदाहरणं यथा - अयं स रशनोत्कर्षी, पीनस्तनविमर्दनः।
नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः॥

अत्र शृङ्गाररसः करुणरसस्याऽङ्गत्वेन रसवदलङ्कारः।

**२. प्रेयोऽलङ्कारः** - निर्वेदादयः त्रयस्त्रिंशद्भावाः प्रसिद्धाः। देवता-गुरु-राजविषयिणी रतिश्च भाव इत्युच्यते। यत्र कश्चिद् भावोऽपरस्य भावस्य अङ्गं भवति तत्र प्रेयोऽलङ्कारः।

उदाहरणं यथा - कदा वारणस्याममरतटिनीरोधसि वसन्, वसानः कौपीनं शिरसि निदधानोऽञ्जलिपुटम्।
अये गौरीनाथ त्रिपुरहर शम्भो त्रिनयन प्रसीदेत्याक्रोशान् निमिषमिव नेष्यामि दिवसान्॥

अत्र चिन्ताख्यो व्यभिचारिभावः शान्तरसस्याङ्गमिति प्रेयोऽलङ्कारः।

**३. ऊर्जस्वदलङ्कारः** - यत्र रसो भावश्च अनौचित्येन प्रवृत्तो भवति तत्र रसाभासः भावाभासश्च विद्यते। तयोः अपरस्याङ्गत्वाद् ऊर्जिस्विदलङ्कारो बोध्यः। उदाहरणं यथा -

वनेऽखिलकलासक्ताः परिहृत्य निजस्त्रियः।
त्वद्वैरिवनितावृन्दे पुलिन्दा कुर्वते रतिम्॥

अत्र परस्त्रीसुरतवर्णनेन शृङ्गाराभासः। स च राजविषयकरतिभावस्याङ्गमिति रसाभासरुपोर्जस्विदलङ्कारः।

भावाभासस्योदाहरणं यथा -

त्वयि लोचनगोचरं गते सफल नृसिंह! भूपते।
अजनिष्ट ममेति सादरं युधि विज्ञापयति द्विषां गणः॥



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

अत्र प्रभुविषयक रतिभावस्य तद्विषयक द्विषद्भय इति रूपोऽङ्गमिति भावाभासः।

**४. समाहितालङ्कारः** – भावस्य प्रशाम्यावस्था भावशान्तित्वेन प्रसिद्धाः, सा च यत्र पराङ्गत्वेन वर्ण्यते तत्र समाहितालङ्कारः। उदाहरणं यथा –

अविरलकरवाल-कम्पनैर्भ्रुकुटि-तर्जन-गर्जनैर्मुहुः।
ददृशे तव वैरिणां मदः सः गतः क्वापि तवेक्षणं क्षणात्॥

अत्र राज्ञोऽवलोकनान्तरमेव वैरिमदस्य शान्तत्वाद् मदाख्यभावस्य शान्तिः। सा च पुनः नृपतिविषयकरतिभावस्याङ्गत्वादत्र समाहितालङ्कारः।

सम्प्रति भावोदयादीन् अलङ्कारान् आह –

**१. भावोदयालङ्कारः** – भावस्य उद्गमावस्था – भावोदयः। यत्र भावोदयः अपरस्य रसादेः अङ्गं भवति तत्र भावोदयालङ्कारः। उदाहरणं यथा –

मधुपानप्रवृत्तास्ते सुहृद्भिः सह वैरिणः।
श्रुत्वा कुतोऽपि त्वन्नामलेभिरे विषमां दशाम्॥

अत्र त्वन्नाम श्रुत्वा ते शत्रवस्त्रस्ता इति त्रासभावोदयो राजस्तुतावङ्गमिति भावोदयाऽलङ्कारः।

**२. भावसन्ध्यलङ्कारः** – यत्र द्वयोः विरुद्धयोः भावयोः परस्परस्पर्धाभावो भावसन्धिः। यत्र भावसन्धिः अपरस्य रसभावादेः अङ्गं भवति तत्र भावसन्धिनामालङ्कारः। उदाहरणं यथा –

जन्मान्तरीण-रमणस्याङ्ग-सङ्ग-समुत्सुका।
सलज्जा चान्तिके सख्याः पातु नः पार्वती सदा॥

अत्रौत्सुक्यलज्जाख्यभावयोः सन्धिः पार्वतीविषयकरतिभावस्याङ्गमिति भावसन्धिरलङ्कारः।

**३. भावशबलताऽलङ्कारः** – बहूनां भावानां पूर्वपूर्वोपमर्दनपूर्वकम् उद्गमो भावशबलता। यत्र भावशबलता अपरस्य रसभावादेः अङ्गं भवति तत्र भावशबलतानामकोऽलङ्कारः। उदाहरणं यथा –

पश्येत् कश्चिच्चल चपल रे! का त्वराहं कुमारी
हस्तालम्बं वितर हहहा! व्युत्क्रमः क्वासि यासि।
इत्थं पृथ्वीपरिवृढ! भवद्विद्विषोऽरण्यवृत्तेः,
कन्या कश्चित् फलकिसलयान्यादानाऽभिधत्ते॥

अत्र शङ्का-असूया-धृति-स्मृति-श्रम-दैन्य-विबोधौत्सुक्यानां भावानां शबलता, राजविषयक दूतीभावस्याङ्गमिति भावशबलतालङ्कारः।

**प्रसङ्गः** – अथ शुद्धिप्रभृतीनां चतुर्णाम् अलङ्कारत्वं निरस्यति –

**शुद्धिरेकप्रधानत्वं तथा संसृष्टिसङ्करौ।**
**एतेषामेव विन्यासान्नालङ्कारान्तराण्यमी॥११९॥**

**अन्वयः** – शुद्धिः, एकप्रधानत्वं तथा संसृष्टिः – सङ्करौ अमी (अलङ्काराः) एतेषाम् एव (पूर्वोक्तानाम् अलङ्काराणाम् एव) विन्यासात् अलङ्कारान्तराणि न (सन्ति)।

**व्याख्या** – शुद्ध्यादीनां चतुर्णामलङ्कारान्तरत्वं निराकुरुते – शुद्धिरिति। शुद्धिः, एकप्रधानत्वं, तथा संसृष्टिसङ्करौ = संसृष्टिः सङ्करश्च, एतेषां = पूर्वोक्तानाम् अलङ्काराणामेव विन्यासात् = रचनाविशेषात्, अमी = चत्वारः अलङ्कारान्तराणि न सन्ति, प्रत्युत पूर्वोक्तानामालङ्काराणामेव विन्यासविशेषा वर्तन्ते, योग-विभागजन्या इति। एतेषां स्वरुपम् एवं ज्ञातव्यं–



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**१. शुद्धिः** – यत्र एक एव अलङ्कारः तत्र शुद्धिः।

**२. एकप्रधानता** – यत्र द्वयोः अलङ्कारयोः विद्यमानयोः एकस्य प्राधान्यं तत्रैकप्रधानता।

**३. संसृष्टिः** – तिलतण्डुलन्यायेन यत्र परस्परापेक्षाविरहेण शब्दार्थालङ्काराणां पृथक् पृथक् स्थितिः तत्र संसृष्टिः।

**४. सङ्करः** – नीरक्षीरन्यायेन यत्रालङ्काराणां स्थितिः तत्र सङ्करः। एतस्यापि प्रायेण त्रयो भेदाः स्वीक्रियन्ते – अङ्गाङ्गिभावसङ्करः, एकाश्रयानुप्रवेशसङ्करः, सन्देहसङ्करश्चेति।

**भावार्थः** – शुद्धिः, एकप्रधानता, संसृष्टिः, सङ्करश्चेति अमी अतिरिक्ता अलङ्कारा न सन्ति अपितु पूर्वोक्तालङ्कारेष्वेवान्तर्भूताः, न तेभ्यः पृथग्भूता इति भावः।

**प्रसङ्गः** – अथ शुद्ध्यादीनाम् अलङ्काररुपेण स्वीकरणे दोषं प्रदर्शयति –

**सर्वेषां च प्रतिद्वन्द्वप्रतिच्छन्दभिदाभृताम्।**
**उपाधिः क्वचिदुद्भिन्नं स्यादन्यत्रापि संभवात्॥१२०॥**

**अन्वयः** – प्रतिद्वन्द्व-प्रतिच्छन्द-भिदा-भृतां सर्वेषाम् (अलङ्काराणाम्) उद्भिन्नः उपाधिः क्वचित् अन्यत्र अपि सम्भवात् स्यात्।

**व्याख्या** – शुद्ध्यादीन् निराकर्त्तुं दूषणान्तराणि कथयन्नाह – सर्वेषामिति। प्रतिद्वन्द्वः = विरोधितया न्यूनतया च प्रतिच्छन्दः = आधिक्यञ्च प्रतिद्वन्द्वप्रतिछन्दौ ताभ्यां भिदां बिभर्त्ति इति प्रतिद्वन्द्व- प्रतिच्छन्दभिदाभृत्, तेषां प्रतिद्वन्द्वप्रतिछन्दभिदाभृतां = न्यूनाधिक्यभेदवताम्। यद्वा प्रतिद्वन्द्वः = विसदृशं, प्रतिच्छन्दः = सदृशं ताभ्यां भिन्नानां सर्वेषां = सकलानाम् अलङ्काराणाम्, उद्भिन्नः = प्रकटितः, उपाधिः = प्रकारविशेषः, क्वचित् = कुत्रापि, अन्यत्रापि = अन्यस्मिन् स्थानेऽपि, सम्भवात् = उत्पन्नत्वात्, अलङ्कारत्वं स्यात्।

**भावार्थः** – यावन्तः अलङ्काराः सर्वैरालङ्कारिकैः स्वीकृता विद्यन्ते तेषु प्रत्यलङ्कारं न्यूनाधिक्यपरिवर्तनरूपः कश्चित् भेदो भवत्येव। यदि तमेव भेदं स्वीकृत्य अलङ्काराणां गणना क्रियते चेत्तर्हि तेषां परिगणनमेवासम्भवं भवेत्। अतः शुद्ध्यादयश्चत्वारो विन्यासविशेषा एव, एतेषाम् अलङ्कारत्वेन गणना कथमपि नोचिता।

**प्रसङ्गः** – अथ मालारशनोपमादीनामपि अलङ्कारत्वं निराकरोति –

**माला परम्परा चैषां भूयसामनुकूलके।**
**मनुष्ये भवतः क्वापि ह्यलङ्काराङ्गतां गते॥१२१॥**

**अन्वयः** – अलङ्काराङ्गतां गते हि माला परम्परा च मनुष्ये (इव) क्वापि (काव्ये) भूयसाम् एषाम् (अलङ्काराणाम्) अनुकूलके भवतः।

**व्याख्या** – मालारुपकादीनाम् अलङ्कारत्वं खण्डयन्नाह – मालेति। अलङ्काराङ्गतां गते = अलङ्कारोपकारकत्वं प्राप्ते, हि = निश्चयेन, माला = मालोपमा, मालारूपकं, मालादीपकञ्चेत्यादयः, परम्परा = रशना, शृंखला वा, रशनोपमादयो भेदाः, एवं मालापरम्परा च मनुष्ये इव = मानवे इव, क्वापि = कुत्रचित् काव्येऽपि इति भावः, भूयसां = बहूनाम्, एषां = एतेषाम् अलङ्काराणाम्, अनुकूलके = सहायकरूपे, सौन्दर्यवर्धनेऽनुकूले, भवतः = जायेते।

**भावार्थः** – मनुष्ये यथा मालापरम्परा च शोभाजनके भवतः तथैव काव्येऽपि अलङ्काराणां माला परम्परा च शोभाजनके भवतः। जयदेवमतानुसारम् एते अलङ्काराणाम् अङ्गरूपेणैव स्वीकरणीयाः पृथगलङ्कारत्वेन ग्राह्या न सन्ति।

**प्रसङ्गः** – अथ अतिशयोक्तिवादं खण्डयितुमादौ तत्स्वरूपं प्रदर्शयति –



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**शब्दे पदार्थे वाक्यार्थे वाक्यार्थस्तबके तथा।**
**एते भवन्ति विन्यासाः स्वभावातिशयात्मकाः ॥१२२॥**
**कस्याप्यतिशयस्योक्तेरित्यन्वर्थविचारणात्।**
**प्रायेणामी ह्यलङ्कारा भिन्ना नातिशयोक्तितः ॥१२३॥**

**अन्वयः** – शब्दे, पदार्थे, वाक्यार्थे तथा वाक्यार्थस्तबके एते विन्यासाः स्वाभावातिशयात्मकाः भवन्ति। कस्य अपि अतिशयस्य उक्तेः इति अन्वर्थविचारणात् अमी हि अलङ्काराः प्रायेण अतिशयोक्तितः भिन्नाः न (सन्ति)।

**व्याख्या** – अतिशयोक्तितो न भिन्ना इमेऽलङ्काराः इति मतं खण्डयितुं तत्स्वरूपमाह – शब्द इति। शब्दे = शब्दालङ्कारे–अनुप्रासयमकादयः, पदार्थे = अर्थालङ्कारे – उपमारुपकादयः, वाक्यार्थे = वाक्यार्थगतालङ्कारे – दृष्टान्तादयः तथा वाक्यार्थस्तबके = अनेकवाक्यार्थगतालङ्कारे – निदर्शनादयः इत्येते = इमे, विन्यासाः = रचनाविशेषाः, स्वभावातिशयात्मकाः = स्वभावात् – निसर्गतात् अतिशयः – अतिशयोक्तिः आत्मनि येषां ते स्वभावातिशयात्मकाः = अतिशयोक्तिमूला एव भवन्ति = सन्ति। अथ = तत्रापि अतिशयोक्तेः, प्राधान्यं वर्णयन्नाह – कस्यापीति। प्रायेण = प्रायः, अमी = पूर्वोक्ताः सर्वेः अनुप्रासोपमादयोऽलङ्काराः, कस्यापि = कस्यचनापि, अतिशयस्य = आधिक्यस्य, उक्ते = कथनात्, अन्वर्थं = सार्थकं, विचारणं = विचारः तस्मात् अन्वर्थविचारणात् = सार्थकता–विमर्शनात्, अतिशयोक्तितः = अतिशयोक्त्यलङ्कारात् भिन्ना न सन्ति प्रत्युत सर्वेऽपि अलङ्काराः अतिशयोक्त्यात्मका एव सन्तीति भावः।

**भावार्थः** – उपर्युक्तानुसारमेते अलङ्कारविन्यासाः (रचनाविशेषाः) शब्दे, पदार्थे, वाक्यार्थे, वाक्यार्थसमूहे च अतिशयोक्त्यात्मका एव भवन्तीति भावः।

**प्रसङ्गः** – साम्प्रतम् अतिशयोक्तिवादिनां मतं खण्डयति –

**अलङ्कारप्रधानेषु दधानेष्वपि साम्यताम्।**
**वैलक्षण्यं प्रतिव्यक्ति प्रतिभाति मुखेष्विव ॥१२४॥**

**अन्वयः** – अलङ्कारः प्रधानेषु मुखेषु इव साम्यतां दधानेषु अपि (अलङ्कारेषु) प्रतिव्यक्ति वैलक्षण्यं प्रतिभाति।

**व्याख्या** – अतिशयोक्तिवादं खण्डयन्नाह – अलङ्कारेति। अलङ्काराः = उपमादयः, प्रधानानि = प्रमुखानि यत्र तानि तेषु वाक्येषु, मुखेषु इव = वदनेषु इव, साम्यतां = समानतां, दधानेष्वपि = धारयत्सु अपि, काव्येषु = कवि कर्मसु, वैलक्षण्यं = विलक्षणता, प्रतिव्यक्ति = प्रतिजनं, प्रतिभाति = स्पष्टं प्रतीयते, प्रत्यक्षत उपलभ्यत एव।

**भावार्थः** – यथा अनेकमुखेषु मुखत्वेन समानेष्वपि मुखेषु प्रतिव्यक्तिमुखं विलक्षणं भवति सर्वेषां समानं न जायते तथैव अतिशयोक्तित्वे समानेष्वपि उपमाद्यलङ्कारेषु प्रातिस्विकभेदो भवत्येवेतिभावः। वस्तुतः ते अतिशयोक्तितः भिन्ना एव इत्याशयः।

**प्रसङ्गः** – अथैवं प्रपञ्चपूर्वकम् अलङ्कारान् निरुप्य तावत् स्वकल्पितेषु अलङ्कारेषु अलङ्कारत्वं स्थापयन्नाह –

**अलङ्कारेषु तथ्येषु यद्यनास्था मनीषिणाम्।**
**तदर्वाचीनभेदेषु नाम्नां नाम्नाय इष्यताम् ॥१२५॥**

**अन्वयः** – यदि तथ्येषु अलङ्कारेषु मनीषिणाम् अनास्था (अस्ति) तत् अर्वाचीन–भेदेषु नाम्नाम् आम्नायः न इष्यताम्।

**व्याख्या** – निजकल्पितेष्वलङ्कारेष्वलङ्कारत्वं व्यवस्थापयन्नाह जयदेवः – अलङ्कारेष्विति। यदि = चेत्,



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

तथ्येषु = वास्तविकेषु प्राचीनैः स्वीकृतेषु अलङ्कारेषु = कटक-कुण्डलादिषु अलङ्कारेषु, मनीषिणां = विदुषाम्, अनास्था = अनादरः विद्यते, तत् = तर्हि, अर्वाचीनभेदेषु = आधुनिककविकल्पितेषु उपमादिषु, नाम्नाम् = उपमादिसंज्ञानाम्, आम्नायः = पाठः कथनं वा, न इष्यतां = न क्रियताम्।

**भावार्थः** – यदि नवीनशैल्या निर्मितेषु स्वर्णालङ्कारेषु अलङ्कारत्वं न स्वीक्रियते तर्हि प्राचीनाचार्यलिखितेषु उपमादिषु अलङ्कारेष्वपि अलङ्कारता न स्वीकरणीया। यदि उपमादिषु स्वीक्रियते तदाऽस्मिन् ग्रन्थे कल्पिताः नवीनाः अलङ्कारा अपि अलङ्कारधर्मत्वेन स्वीकरणीया सन्ति। तेषाम् अङ्गीकरणे नास्ति कोऽपि दोष इत्याशयः।

**प्रसङ्गः** – अथेदानीं मयूखसमाप्तिं सूचयति –

**महादेवः सत्रप्रमुखमखविद्यैकचतुरः**
**सुमित्रा तद्भक्तिप्रणिहितमतिर्यस्य पितरौ।**
**चतुर्थः सैकोऽयं सुकविजयदेवेन रचिते**
**चिरं चन्द्रालोके सुखयतु मयूखः सुमनसः॥१२६॥**

**॥ इति चन्द्रालोके पञ्चमो मयूखः॥**

**अन्वयः** – सत्र-प्रमुख-मख-विद्या+एक-चतुरः महादेवः, तद्भक्तिप्रणिहितमतिः सुमित्रा यस्य पितरौ, अनेन सुकविजयदेवेन रचिते चन्द्रालोके अयं सैकः चतुर्थः मयूखः सुमनसः चिरं सुखयतु।

**व्याख्या** – अथ ग्रन्थकर्त्ता जयदेवः सुकविः स्वपरिचयपूर्वकं पञ्चममयूखसमाप्तिं सूचयन्नाह – महादेव इति। आदौ स्वपित्रोः परिचयं प्रस्तौति – महादेवः सुमित्रा च यस्य पितरौ वर्तेते इति। महादेवः पिता, सुमित्रा च माता इति। कीदृशः पिता महादेवः ?इत्याह – सत्राणि = अनेकदिनसाध्या यज्ञाः प्रमुखानि = प्रधानानि येषां ते तथाभूता ये मखाः = यज्ञाः तेषां या विद्या = श्रौत-स्मार्त-कर्मकाण्डरुपाः तस्याम् एक चतुरः = परम प्रवीणः इति सत्रप्रमुखविधैकचतुरः महादेवः = महादेवनामापरमपण्डितः इत्यर्थः, तस्य = महादेवस्य, भक्तौ = सेवायां, प्रणिहितमतिः = प्रकर्षेण निहिता स्थापिता मतिः = बुद्धिः यस्याः सा तद्भक्तिप्रणिहितमतिः = पतिव्रता, सुमित्रा = सुमित्रानाम्नी च अस्य = जयदेवकवेः, पितरौ = माता च पिता च पितरौ = जननी जनकौ आस्ताम्। अनेन = एतेन, सुकविजयदेवेन रचिते = प्रणीते, चन्द्रालोके – चन्द्रस्य आलोक इव आलोको यस्मिन् स चन्द्रालोकः, तस्मिन् चन्द्रालोके = चन्द्रालोकाख्ये ग्रन्थे, अयम् = एषः, एकेन सह सैकः = एकाधिकः, चतुर्थः = पञ्चमः, मयूखः = मिमीते इति मयूखः = किरणः, सुमनसः = सहृदयान् शास्त्ररुचीन् विद्वज्जनान् पण्डितान् देवान् वा, चिरं = चिरकालपर्यन्तं, सुखयतु = आनन्दयतु, प्रीणयतु इति।

**भावार्थः** – अखण्डयज्ञविशेषविधीनां परमनिपुणविद्वान् श्रीमहादेवः यस्य पिता वर्तते, पतिभक्तिसमर्पितहृदया सुमित्रानाम्नी च यस्य माता विद्यते, तेन सुकविना जयदेवनामकेन ग्रन्थकारेण प्रणीते चन्द्रालोकनामके ग्रन्थेऽयं प्रस्तुतः सैकश्चतुर्थोनाम पञ्चमो मयूखः सहृदयान् विद्वज्जनान् चिरकालपर्यन्तम् आह्लादयतु इति।

**॥ इति पीयूषवर्षेण श्रीजयदेवकविना प्रणीते चन्द्रालोके अलङ्कारनिरूपणो नाम पञ्चमो मयूखः समाप्तः॥**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# योग्यता-विस्तारः

## अलङ्कारस्वरूपम्

अलङ्कारशब्दो द्विधा निष्पन्नो भवति – 'अलङ्कृतिरलङ्कारः' इति भावव्युत्पन्नः, 'अलङ्क्रियतेऽनेन' इति करणव्युत्पन्नश्च। तत्र भावव्युत्पन्नोऽलङ्कारः शास्त्ररूपेऽर्थे प्रयुज्यते, अत एव काव्यस्वरूप-तद्भेद-गुण-दोष-रीति-वृत्ति-रसादिनिरूपणात्मकस्य ग्रन्थस्य 'काव्यालङ्कारः' इति नामकरणं कृतं पूर्वाचार्यैः।

अलङ्कारनिरूपणात्मके पञ्चम मयूखेऽलङ्कारशब्दः अलं क्रियतेऽनेनेत्यलङ्कार इति करणव्युत्पत्त्या काव्यशोभा- सम्पादकत्वेन अनुप्रासोपमादीनामलङ्काराणां वाचको वर्तते। तथा च यथा मनुष्याणां शरीरे शरीरसौन्दर्याधायकत्वेन हारादयोऽलङ्कारा उपकारका भवन्ति तथैव अनुप्रासोपमादय अलङ्कारा अपि काव्यशरीरे चमत्कृतिजनकत्वेन अलं-शोभां करोतीति व्युत्पत्त्या तदुपकारका जायन्ते। अलङ्कारः सौन्दर्यधायकत्वेन काव्येऽवश्यमेव स्वीकरणीयो वर्तते। यथोक्तं भामहेन – 'न कान्तमपि निर्भूषं विभाति वनिताननम्' इति। अलङ्कारस्य काव्ये कोपादेयता? अस्मिन् विषये महर्षिव्यासेनोक्तम् – 'अलङ्काररहिता विधवेव सरस्वती' (अग्निपु०- ३३४/२) चन्द्रालोककारेण जयदेवेन तु मम्मटाचार्यस्य 'अनलङ्कृती पुनः क्वापि' इत्यंशमाक्षिप्ता कथितम् –

**अङ्गीकरोति यः काव्यं शब्दार्थावनलङ्कृती।**
**असौ न मन्यते कस्मादनुष्णमनलङ्कृती॥**

इत्युक्तेऽलङ्कारेण विना काव्यस्य काव्यत्वमेव न सम्भवतीति।

अलङ्कारस्वरूपं प्रतिपादयन्नाह जयदेवः –

**शब्दार्थयोः प्रसिद्धया वा कवेः प्रौढिवशेन वा।**
**हारादिवदलङ्कारः सन्निवेशो मनोहरः॥**

कवेः परम्परया प्रगल्भकल्पनया वा शब्दानाम् अर्थानाञ्च हारकुण्डलादिवत् रमणीयः प्रयोगः अलङ्कारः कथ्यते। सः चालङ्कारः प्रथमं द्विविधो भवति। शब्दालङ्कारः अर्थालङ्कारश्चेति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## अभ्यास-प्रश्नाः

**बहुविकल्पात्मकाः प्रश्नाः –**

१. चन्द्रालोकेऽलङ्कारा: वर्णिता: सन्ति –
(क) तृतीयमयूखे (ख) चतुर्थमयूखे
(ग) पञ्चममयूखे (घ) षष्ठमयूखे ( )

२. साभिप्राये विशेष्येऽलङ्कारो भवति –
(क) परिकर: (ख) रुपकम्
(ग) परिकराङ्कुर: (घ) प्रहर्षणम् ( )

३. वाक्ययोरर्थसामान्येऽलङ्कारो भवति –
(क) दृष्टान्त: (ख) व्यतिरेक:
(ग) प्रतिवस्तूपमा (घ) आवृत्तिदीपकम् ( )

४. ''त्वद्भक्तानां नमत्यङ्गं भङ्गमेति भवक्लम:'' अत्रालङ्कारो अस्ति –
(क) विषमम् (ख) विशेष:
(ग) विचित्रम् (घ) असङ्गति: ( )

**अतिलघूत्तरात्मकाः प्रश्नाः –**

१. दृष्टान्तालङ्कारस्य लक्षणं लिखत।
२. दीपकालङ्कारस्योदाहरणं लिखत।
३. वक्रोक्ति-अलङ्कारस्य लक्षणं लिखत।
४. विभावनालङ्कार: कुत्र भवति ?
५. ''अमन्दचन्दनस्यन्द: स्वच्छन्दं दन्दहीतिमाम्' इत्यत्र कोऽलङ्कारो वर्तते ?
६. अर्थश्लेष: कुत्र भवति ?

**लघूत्तरात्मकाः प्रश्नाः –**

१. व्यतिरेकालङ्कारं सोदाहरणं विलिख्य तद्भेदान् प्रदर्शयत।
२. दीपकालङ्कारं सोदाहरणं विवेचयत।
३. प्रतिवस्तूपमालङ्कारं सोदाहरणं विवेचयत।
४. निदर्शनालङ्कारं सोदाहरणं विवेचयत।
५. खण्डश्लेषं निरूपयत।
६. विरोधालङ्कारं सोदाहरणं विवेचयत।

**निबन्धात्मकाः प्रश्नाः –**

१. तुल्ययोगिताया: लक्षणं विलिख्य तदुदाहरणमपि प्रदर्शयत।
२. दीपकावृत्तिदीपकयोरन्तरं प्रदर्श्योभयोरुदाहरणेऽपि प्रस्तोतव्ये।
३. अप्रस्तुतप्रशंसालङ्कारं सोदाहरणं विवेचयत।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

४. अर्थान्तरन्यासालङ्कारस्य लक्षणं विलिख्य तदुदाहरणमपि प्रदर्शयत।

५. केषाञ्चन चतुर्णामलङ्काराणां लक्षणोदाहरणानि सङ्गतिपूर्वकं प्रदर्शनीयानि।

(क) विभावना (ख) विशेषोक्तिः
(ग) समासोक्तिः (घ) स्वभावोक्तिः
(ङ) विनोक्तिः (च) वक्रोक्तिः
(छ) व्यतिरेकः (ज) व्याजस्तुतिः

६. निम्नलिखितालङ्कारयुग्मेषु चतुर्णां परस्परं भेदः प्रदर्शनीयः –

(क) विभावना – विशेषोक्तिः
(ख) अप्रस्तुतप्रशंसा – व्याजस्तुतिः
(ग) सहोक्तिः – समासोक्तिः
(घ) तद्गुणः – अतद्गुणः
(ङ) विशेषः – व्याघातः
(च) यथासंख्यम् – पर्यायः

७. केषाञ्चन चतुर्णामलङ्काराणां लक्षणोदाहरणानि सङ्गतिपूर्वकं प्रदर्शनीयानि –

(क) अर्थान्तरन्यासः (ख) असङ्गतिः
(ग) विषमम् (घ) समाधिः
(ङ) अप्रस्तुतप्रशंसा (च) विरोधः
(छ) उदात्तम् (ज) प्रतीपम्

८. कारणमाला-मालादीपक-एकावली अलङ्कारान् सोदाहरणं विवेचयत।

९. समुच्य-विकल्प-परिसंख्यालङ्कारान् सोदाहरणं विवेचयत।

१०. खण्डश्लेषभङ्गश्लेषयोरन्तरं प्रदर्श्योभयोरुदाहरणेऽपि प्रस्तोतव्ये।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# षष्ठो मयूखः

## अथ रसाः

अथालङ्कारान्निरुप्य 'रसानेकवृत्तिर्वाक्काव्यनामभाक्' इति काव्यलक्षणोद्देशक्रमेणेदानीं रसान् निरूपयति - अथ रसा इति। रस्यते आस्वाद्यते इति रसः। रस शब्दो हि वेदे सोमरसजलादिवाचकः। रसौ वै सः, रसं हि एवायं लब्ध्वा आनन्दी भवति (२/७) इति तैत्तिरीयोपनिषदि आनन्दार्थकोऽपि दृश्यते। 'विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः' इति रसनिष्पत्तिप्रतिपादकभरतसूत्रे प्रतिपादिता तदभिमतत्वेन रसाङ्गभूताः विभावादयो निरूप्यते -

**आलम्बनोद्दीपनात्मा विभावः कारणं द्विधा।**
**कार्योऽनुभावो भावश्च सहायो व्यभिचार्यपि॥ १॥**

**अन्वयः** - कारणम् विभावः। (सः) द्विधा - आलम्बनोद्दीपनात्मा। अनुभावः कार्यः। सहायः भावः व्यभिचारी अपि (उच्यते)।

**व्याख्या** - विभावादीन् परिचयन्नाह - आलम्बनेति। कारणं = रसमात्रं प्रति कारणं, विशेषेण भावयन्ति = आस्वाद् योग्यान् जनयन्ति रत्यादीन् इति व्युत्पत्त्या विभावः रसमात्रं प्रति कारणमित्यर्थः। सोऽयं विभावो आलम्बनश्च उद्दीपनश्चेति आलम्बनोद्दीपनौ तौ आत्मा = स्वरूपं यस्य स आलम्बनोद्दीपनात्मा = आलम्बनस्वरूप उद्दीपनस्वरूपश्चेति भेदात् द्विधा = द्विप्रकारको भवति। यथोक्तम् अग्निपुराणे -

विभाव्यते हि रत्यादिर्यत्र येन विभाव्यते।
विभावो नाम स द्वेधाऽऽलम्बनोद्दीपनात्मकः॥

तथा च आलम्बनोद्दीपनतया द्विप्रकारको विभावो रसमात्रे कारणम्। यमालम्ब्य रत्यादिर्भवति स आलम्बनविभावो यथा - नायक-नायिकादिः। यश्च रत्यादिकम् उद्दीपयति स उद्दीपनविभावो यथा - चन्द्रचन्द्रिका नदीपर्वतादिः।

**अनुभावः** - अनुभावयन्ति इति अनुभावः। रत्यादिभावानाम् उद्बोधनान्तरम् आस्वादं जनयन्ति भावयन्ति इति अनुभावाः। यद्वा अनु= पश्चाद् भावः = उत्पत्तिर्यस्येति व्युत्पत्त्याऽनुभावः। अनुभावा यथा -

स्मितं गीतं कटाक्षश्च भुजक्षेपश्च हुङ्कृतिः।
तनु मोहन-जृम्भादिश्चानुभावः प्रकीर्तितः॥

अपि च -

भ्रूविक्षेपकटाक्षादि-विकारो हृदयस्थितम्।
भावं व्यनक्ति यः सोऽयमनुभाव इतीरितः॥



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

अनुभावः कार्यरूपः कथ्यते। विभावो रसमात्रं प्रति कारणम्, अनुभावश्च कार्यं भवति।

**व्यभिचारिभावः** – विशेषेण अभितः स्थायिभावान् शरीरे चारयति = सञ्चारयति यः स व्यभिचारिभावः। व्यभिचारिभावमेव सञ्चारिभाावनाम्नाऽपि ज्ञायते। वस्तुतोऽयं भावः सहकारीरूपो भवति। एते निर्वेद–ग्लानि–शङ्कादयः व्यभिचारिभावा त्रयस्त्रिंशद् संख्यात्मकाः परिगणिताः।

**भावार्थः** – लोके यत् कारणमभिधीयते तदेव काव्ये नाट्ये च विभावपदेनोच्यते। तथा च यत्कार्यमुच्यते तदेव काव्ये नाट्ये च अनुभावपदेनोच्यते। लोके यत्सहकारिणं तदेव काव्ये व्यभिचारिपदेन कथ्यते। इत्थम् एभिः विभावैः अनुभावैः व्यभिचारिभावैः च परिपुष्टः रत्यादि–स्थायिभावो रसरूपतां प्राप्नोति। तथा चोक्तं –

विभावेनानुभावेन व्यक्तः सञ्चारिणा तथा।
रसतामेति रत्यादिः स्थायीभावः सचेतसाम्॥

**प्रसङ्गः** – अथ रसस्वरूपं निरूपयति –

**गलद्वेद्यान्तरोद्भेदं हृदयेष्वजडात्मनाम्।**
**मिलन्मलयजालेप इवाह्लादं विकासयन्॥२॥**
**काव्ये नाट्ये च कार्ये च विभावाद्यैर्विभावितः।**
**आस्वाद्यमानैकतनुः स्थायिभावो रसः स्मृतः॥३॥**

**अन्वयः** – काव्ये नाट्ये कार्ये च विभावाद्यैः विभावितः, आस्वाद्यमानैकतनुः, अजडात्मनाम् हृदयेषु मिलन्मलयजालेपः इव गलद्–वेद्यान्तरोद्भेदम् आह्लादं विकासयन् स्थायी भावः रसः स्मृतः।

**व्याख्या** – रसस्वरूपं वर्णयन्नाह – गलदिति। काव्ये = श्रव्यकाव्ये, गद्यपद्यादिरूपे, नाट्ये = दृश्यकाव्ये, नृत्यगीतात्मके नाटके, कार्ये = नाटकावलोकने च, विभावाद्यैः = विभावानुभावव्यभिचारिभावैः, विभावितः = अभिव्यक्तः, रूपान्तरे परिणतः, आस्वाद्यमाना = व्यञ्जनया ज्ञायमाना, एका तनुः = शरीरं यस्य स आस्वाद्यमानैकतनुः = चर्व्यमाणा शरीरमित्याशयः, आस्वादन–स्थितावेव रत्यादि–स्थायिभावरूपो रसः, अजडात्मनां = न जडः इति अजडः अजडः आत्मा यस्य स अजडात्मा तेषाम् अजडात्मनां = रसज्ञानां, विदुषामित्यर्थः, हृदयेषु = अन्तःकरणेषु, मलयजस्य आलेपः इति मलयजालेपः मिलंश्चासौ मलयजालेपश्च मिलन्मलयजालेपः = मृगमदसंवलितचन्दनालेपः इव गलद्वेद्यान्तरोद्भेदं = ज्ञानान्तरानुभावशून्यम्, आह्लादम् = आनन्दम्, उल्लासयन् = विकासयन्, प्रकाशयन्, स्थायीभावः = रत्यादिस्थायीभाव इति, रसः = रस इति नाम्ना, स्मृतः = विद्वद्भिः कथितः। तथा च उक्तविधः सामाजिकनिष्ठो रत्यादिस्थायिभावो रस्यते = आस्वाद्यते इति व्युत्पत्त्या रस इत्युच्यते। उक्तञ्चापि –

रसते स्वादनार्थत्वात् रस्यन्ते इति ते रसाः।

दशरूपककारेणापि –

विभावैरनुभावैश्च सात्त्विकैर्व्यभिचारिभिः।
आनीयमानः स्वादुत्वं स्थायिभावः रसः स्मृतः॥

अथ नव रसाः – शृङ्गार–हास्य–करुण–रौद्र–वीर–भयानकाः।
बीभत्साद्भुत–शान्तश्च रसाः पूर्वैरुदाहृताः॥

क्रमशः एतेषां स्थायिभावाः – रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा।
जुगुप्सा–विस्मयशमाः स्थायिभावा नव क्रमात्॥

**प्रसङ्गः** – इत्थं रसस्वरूपमुक्त्वाऽधुना नवसु रसेषु शृङ्गाररसं निरूपयति पद्यद्वयेन –

**रत्याख्यस्थायिभावात्मा वल्लभादिविभावितः।**
**आलस्येर्ष्याजुगुप्साभ्यो विना सञ्चारिभिर्युतः॥४॥**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**अनुभावैः कटाक्षाद्यैरुन्मादाद्यैर्यथाक्रमम्।**
**संभोगो विप्रलम्भश्च शृङ्गारो द्विविधो मतः ॥५॥**

**अन्वयः** – रत्याख्य–स्थायिभावात्मा, वल्लभादि–विभावितः, आलस्येर्ष्याजुगुप्साभ्यः विना सञ्चारिभिः युतः, कटाक्षाद्यैः अनुभावैः उन्मादाद्यैश्च यथाक्रमं (युतः) शृङ्गारः द्विविधः मतः, सम्भोगः (कटाक्षाद्यैः अनुभावैः), विप्रलम्भः च (उन्मादाद्यैः)।

**व्याख्या** – शृङ्गाररसमाह – रत्याख्येति। रतिः = मनोनुकूलविषयं सुखात्मकं संवेदनम् आख्या = नाम यस्य सः रत्याख्यः, रत्याख्यः = रतिनामधेयस्थायिभावः, आत्मा = स्वरूपं यस्य सः, रत्याख्यस्थायिभावात्मा = रतिनामकस्थायिभावात्मा इत्यर्थः, वल्लभादिभिः = कान्ताकान्तरूपैः आलम्बनविभावैः, चन्द्रचन्द्रिकारोलम्बादिभिः उद्दीपनविभावैश्च, विभावितः = एभिः द्विविधैः विभावैः युक्तः इत्यर्थः, आलस्यं च ईर्ष्या च जुगुप्सा च आलस्येर्ष्याजुगुप्साः ताभ्यः व्यभिचारिभावेभ्यः, विना = अन्तरेण, सञ्चारिभिः = व्यभिचारिभिः, युतः = युक्तः, निर्वेदादिषु उपर्युक्तं त्रीन् विहाय शेषाः त्रिंशद्–व्यभिचारिभावैः युक्तः, कटाक्षाद्यैः – नयनविक्षेपाद्यैः अनुभावैः, उन्माद्यैः = उन्मादादि–व्यभिचारिभिः युक्तः, शृणाति चरमदशा प्रापणेन हिनस्ति कामुकानिति शृङ्गं = मन्मथोद्भेदः, शृङ्गमृच्छति = प्राप्नोति अनेनेति शृङ्गाररसः, द्विविधः = द्विप्रकारकः, मतः = विद्वद्भिः कथितः, यथाक्रमं सम्भोगशृङ्गारः विप्रलम्भशृङ्गारश्चेति।

**भावार्थः** – शृङ्गाररसस्य रतिः स्थायीभावो वर्तते, नायकनायिकादयः आलम्बनविभावाः चन्द्रिकादयः उद्दीपनविभावाः कटाक्षादयः अनुभावाः, आलस्येर्ष्याजुगुप्साभिन्न चिन्तादयो व्यभिचारिभावाः भवन्ति। रसोऽयं द्विविधः – संभोगशृङ्गारः, विप्रलम्भशृङ्गारश्चेति। तत्र सम्भोगशृङ्गारस्योदाहरणं यथा –

'शून्यं वासगृहं विलोक्य शयनादुत्थाय किञ्चिच्छनै–
निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखम्।
विस्रब्धं परिचुम्ब्य जातपुलकामालोक्य गण्डस्थलीं,
लज्जानम्रमुखी प्रियेण हसता बाला चिरं चुम्बिता॥'

अत्र नायकः आलम्बनविभावः, शून्यं वासगृहम् उद्दीपनविभावः, चुम्बनमनुभावः, लज्जा व्यभिचारिभावः। एभिः विभावादिभिः विभावितः नायिकानिष्ठरत्याख्यस्थायिभावः शृङ्गारो रसः। स च रतेः पुष्टत्वात् सम्भोगशृङ्गारो वर्तते।

विप्रलम्भशृङ्गाररसस्योदाहरणं यथा –

त्वामालिख्य प्रणयकुपितां धातुरागैः शिलाया–
मात्मानं ते चरणपतितं यावदिच्छामि कर्त्तुम्।
अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे,
क्रूरस्तस्मिन्नपि न सहते सङ्गमं नौ कृतान्तः॥

विप्रलम्भशृङ्गारे उन्मादाद्या व्यभिचारिभावा भवन्ति।

**विशेषः** – शृङ्गाररसः श्यामवर्णो विष्णुदैवतश्च कथितः।

**प्रसङ्गः** – अथ हास्यरसं निरूपयन्नाह जयदेवः –

**हासस्थायी रसो हास्यो विभावाद्यैर्यथाक्रमम्।**
**वैरूप्यफुल्लगण्डत्वावहित्थाद्यैः समन्वितः॥६॥**

**अन्वयः** – वैरूप्य–फुल्लगण्डत्व+अविहत्था+आद्यैः विभाव+आद्यैः यथाक्रमं समन्वितः हासस्थायी – हास्यः रसः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**व्याख्या** – हास्यरसस्वरूपमाह – हासस्थायीति। वैरूयं च फुल्लगण्डत्वं च अवहित्था चेति वैरूप्य–फुल्ल–गण्डत्वावहित्था: सा आद्या येषां तै: वैरूप्यफुल्लगण्डत्वावहित्थै:, विभावाद्यै: = विभावानुभावव्यभिचारिभि:, यथाक्रमं = क्रमश:, वैरूप्यादिभि: विभावै:, फुल्लगण्डत्वादिभि: अनुभावै: अवहित्थादिभि: व्यभिचारिभावै:, समन्वित: = सहित:, हासस्थायी = हास: स्थायी भावो यस्य स हासस्थायी रस: = हास्यरस:।

**भावार्थ:** – यस्य स्थायीभावो हास:, वैरूप्यादिरुद्दीपनविभाव:, फुल्लगण्डत्वादि: अनुभाव:, अवहित्थादि व्यभिचारिभाव:, स हास्यरसो भवति। उदाहरणं यथा –

गुरोर्गिर: पञ्चदिनान्यधीत्य वेदान्तशास्त्राणि दिनत्रयञ्च।
अमी समाघ्राय च तर्कवादान् समागत: कुक्कुटमिश्रपादा: ॥

अत्र कुक्कुटमिश्रपाद: आलम्बनविभाव:, तद्वैरूप्यमुद्दीपनविभाव:, गतिवैलक्षण्यं व्यभिचारिभाव:, अध्ययनागमनादिकमनुभाव:। एभि: विभावाद्यै: अभिव्यक्त: सन् हास: स्थायी भावो हास्यरसतां प्राप्नोति इति। हास्यरस: श्वेतवर्ण: प्रमथादिशिवगणा देवताश्च।

**प्रसङ्ग:** – अथ करुणरसं निरूपयति –

**अभीष्टविप्रयोगाश्रुपातग्लान्यादिभि: क्रमात्।**
**विभावाद्यैर्युत: शोकस्थायी स्यात् करुणो रस: ॥७॥**

**अन्वय:** – क्रमात् अभीष्ट–विप्रयोग + अश्रुपात – ग्लानि + आदिभि: विभावाद्यै: युत: शोकस्थायी करुण: रस: स्यात्।

**व्याख्या** – करुणरसं निरूपयन्नाह – अभीष्टेति। क्रमात् = क्रमश:, अभीष्टस्य = प्रियस्य, विप्रयोग: = वियोग:, अभीष्टविप्रयोग:, अभीष्ट विप्रयोगश्च अश्रुपातश्च ग्लानिश्चेति अभीष्टविप्रयोगाश्रपातग्लानय: आदौ येषां ते तै: अभीष्टविप्रयोगाश्रुपातग्लान्यादिभि: विभावाद्यै: = विभावानुभावव्यभिचारिभावै:, युत: = सहित:, शोच्यत इति शोक:, शोक: स्थायी यस्य स: शोकस्थायी इति रस: करुण: = करुणरसो भवेत्।

**भावार्थ:** – करुणरसस्य शोक: स्थायीभाव:, नायको नायिका चालम्बनविभाव:, अभीष्टस्य प्रियजनविप्रयोगो दूरगमनरूपो मरणञ्च उद्दीपनविभाव:, अश्रुपातादिरनुभाव:, ग्लान्यादिर्व्यभिचारिभावा: भवन्ति। कपोतवर्णोऽयं यमदैवतश्च।

उदाहरणं यथा – प्रतिमानाटके रामवियोगविह्वलस्य दशरथस्य –

'हा वत्स! राम! जगतां नयनाभिराम! हा वत्स! लक्ष्मण! सलक्षणसर्वगात्र!।
हा साध्वि! मैथिलि! पतिस्थितचित्तवृत्ते! हा हा गता: किल वनं गत मे तनुजा: ॥'

अत्र हि रामादिवियोग: आलम्बनविभाव:, तत्स्मरणञ्चोद्दीपनविभाव:, विलापादयोऽनुभावाा:, ग्लान्यादयश्च व्यभिचारिभावा:। एतैर्विभावितो दशरथस्य शोक एव करुणो रस:।

**प्रसङ्ग:** – अथ रौद्ररसं निरूपयति –

**क्रोधस्थायी रसो रौद्रो विभावाद्यै: समन्वित:।**
**मात्सर्यहस्तनिष्पेषसम्मोहाद्यैर्यथाक्रमम् ॥८॥**

**अन्वय:** – यथाक्रमं मात्सर्य–हस्तनिष्पेष–सम्मोहाद्यै: विभावाद्यै: समन्वित: क्रोधस्थायी रौद्र: रस: (कथित:)।

**व्याख्या** – रौद्ररसस्वरूपमाह – क्रोधस्थायीति। यथाक्रमं = क्रममनतिक्रम्य क्रमश:, मात्सर्यं च



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

हस्तनिष्पेषश्च सम्मोहश्चेति आद्या: येषां तै: - मात्सर्यहस्तनिष्पेषसम्मोहाद्यै:, विभावाद्यै: = विभावानुभावव्यभिचारिभि:, समन्वित: = युक्त:, क्रोधस्थायी = क्रोधनामकस्थायिभाव: रस:, रौद्र: = रौद्रनामास्मृत: सूरिभि:। रुद्रोऽस्य देवता, वर्णश्चास्य रक्तोऽस्ति।

**भावार्थ:** - मात्सर्यादि विभावै:, हस्तनिष्पेषाद्यनुभावै:, सम्मोहादिव्यभिचारिभावैरभिव्यज्यमान: क्रोधनामक: स्थायिभावत्वेन रौद्ररसोच्यते।

उदाहरणं यथा - वेणीसंहारनाटके द्रोणाचार्यस्य वधानन्तरं क्रुद्धस्य तत्पुत्रस्य अश्वत्थाम्नो गर्वोक्ति: -

कृतमनुमतं दृष्टं वा यैरिदं गुरुपातकं,
मनुजपशुभिर्निर्मर्यादैर्भवद्भिरुदायुधै: ।
नरकरिपुणा सार्द्धं तेषां सभीमकिरीटिनाम्,
अयमहमसृङ्गमेदोमांसै: करोमि दिशां बलिम्॥

अत्र पाण्डवपक्षीया: आलम्बनविभाव:, नि:शस्त्रे तत्पितरिशस्त्रप्रहार: मृत्युश्चोद्दीपनविभाव:, अहङ्कारात् हस्तयो: संघर्षणं तर्जनादिकञ्च अनुभाव:, गर्व-अमर्ष-पितृसम्मोहादयश्च व्यभिचारिभावा:। एभि: अभिव्यक्त: अश्वत्थामानिष्ठ: क्रोध एव रौद्र: रस इति।

**प्रसङ्ग:** - अथ वीररसं निरूपयति -

**उत्साहाख्यस्थायिभाव: प्रभावादिविभावभू:।**
**वीरोऽनुभावै: स्थैर्याद्यैर्भावैर्गर्वादिभिर्युत:॥९॥**

**अन्वय:** - प्रभावादि-विभावभू:, स्थैर्याद्यै: अनुभावै:, गर्वादिभि: भावै: (सञ्चारिभि:) युत:, उत्साहाख्यस्थायिभाव: (रस:) वीर: (भवति)।

**व्याख्या** - वीररसं प्रतिपादयन्नाह - उत्साहेति। प्रभावादिभ्यो विभावादिभ्यो: भवति इति प्रभावादिविभावभू:, स्थैर्याद्यै: = स्थिरत्वादिभि: अनुभावैरिति, गर्वादिभि: भावै: = गर्वादिव्यभिचारिभावैरिति, युत: = समन्वित:, उत्साहाख्यस्थायिभाव: = उत्साहनामक: स्थायिभावो यस्मिन् स: वीर: = वीर रसो भवति।

**भावार्थ:** - वीररसे उत्साहस्थायिभाव:, प्रभावोदय: विभाव:, स्थैर्यादयोऽनुभावा:, गर्वादयश्च व्यभिचारिभावा: भवन्ति।

उदाहरणं यथा - वेणीसंहारनाटके द्रौपदीं प्रति भीमसेनस्योक्ति: -

चञ्चद्भुजभ्रमितचण्डगदाऽभिघात-
सञ्चूर्णितोरुयुगलस्य सुयोधनस्य।
स्त्यानाऽवनद्ध-घनशोणित-शोणपाणि:,
उत्तंसयिष्यति कचांस्तव देवि! भीम:॥

अत्र हि दुर्योधन आलम्बनविभाव:, तस्यदुश्चेष्टोद्यताशक्ति: उद्दीपनविभाव:, गदायुद्धस्य कृते भीमस्य दृढसङ्कल्पादय: अनुभावा:, गर्वादयश्च व्यभिचारिभावा:। एभि: विभावादिभि: अभिव्यक्तो भीमसेनस्य उत्साह एव वीररसोऽस्ति। वीररसो हि महेन्द्रदैवत: हेमवर्णश्च भवति।

**प्रसङ्ग:** - अथ भयानकरसं निरूपयति -

**व्याघ्रादिभिर्विभावैस्तु वेपिताद्यनुभावकृत्।**
**भावैर्मोहादिभिर्युक्तो भयस्थायी भयानक:॥१०॥**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**अन्वयः** – व्याघ्रादिभिः विभावैः, मोहादिभिः भावैः (सञ्चारिभिः) युक्तः वेपित-आदि अनुभावभृत् भयस्थायी (रसः) तु भयानकः (कथ्यते)।

**व्याख्या** – भयानकरसस्वरूपमाह – व्याघ्रादिभिरिति। व्याघ्रादिभिः विभावैः, वेपितादिभिः अनुभावैः, मोहादिभिः व्यभिचारिभावैश्च युक्तो भयं स्थायी भाव एव भयानकरसो जायते।

उदाहरणं यथा –

घोरमम्भोधरध्वानं निशम्यव्रजबालकाः।
मातुरङ्के निलीयन्ते सकम्पविकृतस्वराः॥

अत्र हि ब्रजबालकाः आलम्बनविभावः, मेघध्वनिरुद्दीपविभावः कम्पोऽनुभावः आवेगादिर्व्यभिचारिभावः भयं च स्थायी भावः।एतैर्विभावाद्यैः अभिव्यक्तः सन् भयमेव भयानकरसः।रसोऽयं भूताधिदैवतः कृष्णवर्णयुक्तश्च विद्यते।

**प्रसङ्गः** – अथ बीभत्स रसं निरूपयति –

**स्थायी जुगुप्सा बीभत्सो विभावाद्यैर्यथाक्रमम्।**
**अनिष्टेक्षणनिष्ठीवमोहाद्याः सम्मताः क्रमात्॥११॥**

**अन्वयः** – यत्र स्थायी (भावः) जुगुप्सा, यथाक्रमम् अनिष्टेक्षण-निष्ठीव-मोहाद्याः (च) विभावाद्याः सम्मताः (इति तादृशः रसः) बीभत्सः (कथितः)।

**व्याख्या** – बीभत्सस्वरूपमाह – स्थायीति। यत्र = यस्मिन् रसे, स्थायी जुगुप्सा = जुगुप्सानामकः, स्थायिभावः, यथाक्रमं = क्रमशः, अनिष्टस्य ईक्षणमिति अनिष्टेक्षणम्, निष्ठीवः = वान्तिः, मोहः = मूर्च्छा, एते आद्या यत्र ते अनिष्टेक्षणनिष्ठीवमोहाद्याश्च, सम्मता = अङ्गीकृताः, स्वीकृताः इति तादृशो रसः बीभत्सनाम्ना ज्ञायते।

**भावार्थः** – जुगुप्सा यस्य स्थायिभावः, अनिष्टस्य वस्तुनः दुर्गन्धमांसादेः दर्शनम् आलम्बनविभावः, कृमिपातादिरुद्दीपनविभावः, निष्ठीवादिरनुभावः, सम्मोहादिर्व्यभिचारिभावः स बीभत्सरसो भवतीति भावः। सोऽयं बीभत्सरसो नीलवर्णो महाकालदैवतश्च कथितः।

उदाहरणं यथा –

नखैर्विदारितान्त्राणां शवानां पूयशोणितम्।
आननेष्वनुलिम्पन्ति हृष्टा वेतालयोषितः॥

अत्र शवाः आलम्बनविभावः, अन्त्रादिविदारणम् उद्दीपनविभावः, नेत्रनिमीलन-निष्ठीवनादयोऽनुभावाः, आवेगादिश्च व्यभिचारिभावाः।एभिः परिपुष्टा जुगुप्सा एव बीभत्सनामको रसोऽवगन्तव्यः।

**प्रसङ्गः** – अथ अद्भुतरसं निरूपयति –

**अद्भुतो विस्मयस्थायी मायादिकविभावभूः।**
**रोमाञ्चाद्यनुभावोऽयं स्तम्भादिव्यभिचारिकः॥१२॥**

**अन्वयः** – मायादिक-विभावभूः, रोमाञ्चादि + अनुभावः, स्तम्भादि-व्यभिचारिकः, विस्मयस्थायी अयम् (रसः) अद्भुतः (कथितः)।

**व्याख्या** – अद्भुतरसं प्रतिपादयन्नाह – अद्भुत इति। मायादिभिः विभावैः, रोमाञ्चादिभिः अनुभावैः, स्तम्भादिभिः व्यभिचारिभावैः अभिव्यक्तो विस्मयनामकः स्थायिभावः एव अद्भुतरसः कथ्यते।

**भावार्थः** – अद्भुतरसस्य विस्मयः स्थायिभावः, लोकोत्तरवस्तु आलम्बनविभावः, मायादिः (इन्द्रजालादि) उद्दीपनविभावः, रोमाञ्चादिः अनुभावः, स्तम्भादिर्व्यभिचारिभावयुक्तो रसः एव अद्भुतरसो भवति। तथा च पीतवर्णो गन्धर्वदैवतश्च कथितो रसोऽयम्।उदाहरणं यथा –



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

चराचरजगज्जालसदनं वदनं तव।
गलद्गगनगाम्भीर्यं वीक्ष्यास्मि हृतचेतना: ॥

भगवत: बालकृष्णस्य मुखे ब्रह्माण्डदर्शनं कृतवत्या: मातुर्यशोदाया: उक्तिरियम्। अत्र श्रीकृष्णस्य वदनम् आलम्बनविभाव:, अन्तर्जगच्चराचरदर्शनम् उद्दीपनविभाव:, रोमाञ्चादि: अनुभाव:, हृत्चेतनत्वस्तब्धादयश्च व्यभिचारिभावा:। एभि: परिपुष्टो यशोदाया विस्मय एव अद्भुतो रसो जायते।

**विशेष:** – विविधेषु पदार्थेषु लोकसीमातिवर्त्तिषु।
विस्फारश्चेतसो यस्तु स विस्मय उदाहृत: ॥

**प्रसङ्ग:** – अथ शान्तरसं निरूपयन्नाह –

**निर्वेदस्थायिक: शान्त: सत्सङ्गादिविभावभू:।**
**क्षमादिकानुभावोऽयं स्तम्भादिव्यभिचारिक: ॥१३॥**

**अन्वय:** – सत्सङ्गादि-विभावभू:, क्षमादिकाऽनुभाव: स्तम्भादि-व्यभिचारिक:, निर्वेद-स्थायिक: अयं (रस:) शान्त: (कथित:)।

**व्याख्या** – शान्तरसं निरूपयति – निर्वेदेति। सत्सङ्गादिभ्यो विभावेभ्य: भवतीति सत्सङ्गादि विभावभू: = सज्जनपुरुषसङ्गमाद्युद्दीपनविभावजन्य:, क्षमादिकोऽनुभावो यस्य स: क्षमादिकानुभाव:, स्तम्भादयो व्यभिचारिणो यस्य स: स्तम्भादिव्यभिचारिक: निर्वेद: = संसारदु:खानुभव: स्थायिभाव: यस्य स: निर्वेदस्थायिक: अयं = प्रस्तुतो रस: शान्त: = शान्तरसो भवति।

**भावार्थ:** – आत्मन: अवमानरूप:, संसारे हेयत्वबुद्धिरुपो वा निर्वेद: स्थायीभाव:, परमात्मस्वरूपम् आलम्बनविभाव:, सत्सङ्गादि: उद्दीपनविभाव:, क्षमादिरनुभाव:, स्तम्भादि: व्यभिचारिभाव: स: रस: शान्तरसाभिधो भवतीति भाव:। उदाहरणं यथा हि वैराग्यशतके –

अहो वा हारे वा बलवति रिपौ वा सुहृदि वा,
मणौ वा लोष्ठे वा कुसुमशयने वा दृषदि वा।
तृणे वा स्त्रैणे वा मम समदृशो यान्ति दिवसा:,
क्वचित् पुण्यारण्ये शिव शिव शिवेति प्रलपत: ॥

अयं सत्सङ्गादिभि: विभावादिभि: व्यज्यमानो निर्वेद: शान्तरसोऽस्ति। तथा चायं हि श्वेतवर्ण: नाराणदैवतश्च कथित:।

**विशेष:** – शान्तरसे शमनामकं स्थायिभावमपि अङ्गीकुर्वन्ति केचिद् विद्वांस:। तत्स्वरूपं यथा – शमो निरीहावस्थायां स्वात्मविश्रामजं सुखम्।

**प्रसङ्ग:** – अथ भावान् निरूपयति –

**रतिर्देवादिविषया सन्ति च व्यभिचारिण:।**
**वेद्यमाना निगद्यन्ते भावा: साहित्यवेदिभि: ॥१४॥**

**अन्वय:** – देवादि-विषया रति:, (ये) च व्यभिचारिण: सन्ति (ते) वेद्यमाना: साहित्यवेदिभि: भावा: निगद्यन्ते।

**व्याख्या** – रसनिरूपणानन्तरं भावान् निरूपयन्नाह – रतिरिति। देवा:, आदिपदेन मुनि-नृप-गुरुप्रभृतय: गृह्यन्ते, विषया: यस्या: सा रति: = अनुराग: तथा च ये व्यभिचारिण: = व्यभिचारिभावा:, निर्वेदादय: सञ्चारिभावा: सन्ति ते यदा वेद्यमाना: = व्यञ्जनया प्रतीयमाना भवन्ति तदा साहित्यवेदिभि: = साहित्यशास्त्रविद्भि: आलङ्कारिकैर्वा



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

भावा निगद्यन्ते = भावनाम्ना कथ्यन्ते, भावपदेनोच्यन्ते वेति। एवं देवादिविषया: रति: भाव: इति भावस्य प्रथमं लक्षणं, वेद्यमाना व्यभिचारिणो भावा इत्यपरं लक्षणमिति।

**भावार्थः** – देव-द्विज-मुनि-नृपादि-विषयक रतिः, निर्वेदादयः व्यभिचारिभावाश्च यदा व्यञ्जनाद्वारा प्रकटीक्रियन्ते तदा ते भावशब्देन कथ्यन्ते।

देवविषयिणी रतिर्यथा –

वंशीविभूषितकरान्नवनीरदाभात्
पीताम्बरादरुणबिम्बफलाधरोष्ठात्।
पूर्णेन्दुसुन्दरमुखादरविन्दनेत्रात्
कृष्णात् परं किमपि तत्त्वमहं न जाने॥

अत्र भक्तनिष्ठ-श्रीकृष्णविषया रतिरस्ति।

**प्रसङ्गः** – अथ यथाक्रमं व्यभिचारिभावान् निरूपयति –

**निर्वेदग्लानिशङ्काख्यास्तथाऽसूयामदश्रमाः।**
**आलस्यं चैव दैन्यं च चिन्ता मोहः स्मृतिर्धृतिः॥१५॥**
**व्रीडा चपलता हर्ष आवेगो जडता तथा।**
**गर्वो विषाद औत्सुक्यं निद्रापस्मार एव च॥१६॥**
**सुप्तं प्रबोधोऽमर्षश्चाप्यवहित्थमथोग्रता।**
**मतिर्व्याधिस्तथोन्मादस्तथा मरणमेव च॥१७॥**
**त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिणः।**
**त्रयस्त्रिंशदिमे भावाः समाख्यातास्तु नामतः॥१८॥**

**अन्वयः** – निर्वेद-ग्लानि-शङ्काख्याः तथा असूया-मदश्रमाः, आलस्यं चैव दैन्यं च चिन्ता, मोहः, स्मृतिः, धृतिः, व्रीडा, चपलता, हर्षः, आवेगः तथा जडता, गर्वः, विषादः, औत्सुक्यं, निद्रा, अपस्मारः एव च, सुप्तं, प्रबोधः, अमर्षः च अपि अवहित्थम्, अथ उग्रता, मतिः व्याधिः तथा उन्मादः तथा मरणम् एव च, त्रासः चैव वितर्कः च व्यभिचारिणः विज्ञेयाः।इमे त्रयस्त्रिंशत् भावाः नामतः तु समाख्याताः।

**व्याख्या** – भावान् निरुप्य त्रयस्त्रिंशद् व्यभिचारिभावान्निरूपयन्नाह – निर्वेदेति। निर्वेदश्च ग्लानिश्च शङ्का चेति आख्या = नाम येषां ते निर्वेदग्लानिशङ्काख्याः, तत्र –

१. **निर्वेदः** – तत्त्वज्ञाननापदीर्ष्यादेनिर्वेदः स्वावमाननम्। तत्त्वज्ञानाद्, आपत्कारणाद् ईर्ष्यादिवशाद् वा स्वस्य अवमाननमिति।

२. **ग्लानिः** – आयासाद्वा मनस्तापाद् ग्लानिर्निष्प्राणतास्थितिः।

३. **शङ्का** – परक्रौर्याऽऽत्मदोषाद्यैः शङ्काऽनर्थस्य तर्कणम्। परेषां क्रूरतया, आत्मनो दोषैः वा अनर्थस्य तर्कणम् अनिष्टचिन्तनं नाम शङ्का।

४. **असूया** – उद्धतस्वभाववशाद् अन्येषां गुणसमृद्धिं प्रति असहिष्णुता नाम असूया।

५. **मदः** – मद्यादिसेवनजन्यम् आनन्द-सम्मोह-मिश्रणं नाम मदः।

६. **श्रमः** – सुरत-मार्गादि जन्यः खेदः नाम श्रमः।

७. **आलस्यम्** – श्रमवशाद् गर्भादिधारणाद् वा उत्पन्नं जाड्यं नाम आलस्यम्।

८. **दैन्यम्** – दुर्गतिकारणाद् ओजस्विताऽभावो दैन्यम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

९. **चिन्ता** – अभीष्टवस्तुन: अप्राप्ते ध्यानं नाम चिन्ता।
१०. **मोह:** – भय-दु:खादिवशात् चित्तविकलता नाम मोह:।
११. **स्मृति:** – पूर्वाऽनुभूताऽर्थविषयज्ञानं नाम स्मृति:।
१२. **धृति:** – ज्ञानवशाद् अभीष्टप्राप्तिवशाद् वा सन्तोषधारणं नाम धृति:।
१३. **व्रीडा** – धृष्टताऽभावविशिष्टताजन्यश्च मन:सङ्कोचो नाम व्रीडा। लज्जा इति अपरं नाम।
१४. **चपलता** – राग-द्वेष-मात्सर्यादिकारणाद् मनसोऽवस्थिति: (अस्थिरता) नाम चपलता। चाञ्चल्यमिति।
१५. **हर्ष:** – इष्टप्राप्तिजन्यो मन: प्रसाद: सुखविशेषो नाम हर्ष:।
१६. **आवेग:** – चित्तस्य सम्भ्रमो नाम आवेग:।
१७. **जडता** – किङ्कर्त्तव्यविमूढता नाम जडता।
१८. **गर्व:** – विद्या-बलैश्वर्य-सौन्दर्यजन्यपराऽवहेलनारूप आत्मोत्कर्षाऽभिमानो नाम गर्व:।
१९. **विषाद:** – उपायाऽभावादिजन्या पुरुषार्थहीना सन्तापो नाम विषाद:। अपराधादिबोधजन्योऽनुतापो वा।
२०. **औत्सुक्यम्** – अभीष्टप्राप्तौ कालक्षेपाऽसहिष्णुता नाम औत्सुक्यम्।
२१. **निद्रा** – चेत: सम्मीलनं श्रमादिना नयनयो: सम्मीलनं नाम वा निद्रा।
२२. **अपस्मार:** – ग्रहभूताद्यावेशजन्यो मनोविक्षेपो नाम अपस्मार:।
२३. **सुप्तम्** – निद्राऽवस्थाया विषयोऽनुभावो नाम सुप्तम्। स्वप्न इत्यपरं नाम।
२४. **प्रबोध:** – निद्राऽनन्तरं जायमानो बोधो नाम प्रबोध:। जागरणमिति।
२५. **अमर्ष:** – निन्दाऽऽक्षेपाऽपमानादिकरणात् चेतसोऽभिनिवेशो नाम अमर्ष:। अभिनिवेश: – दृढप्रवृत्ति:।
२६. **अवहित्थम्** – हर्षादिजन्याऽऽकार-विकार-गोपनं नाम अवहित्थम्।
२७. **उग्रता** – शौर्यवशाद् अपराधवशाद् वा जनित: प्रचण्डभावो नाम उग्रता।
२८. **मति:** – नीतिमार्ग-शास्त्राद्यनुसरणेन अर्थनिर्धारणं नाम मति:।
२९. **व्याधि:** – वातपित्तादिविषमताजन्यो ज्वरादिरोगो नाम व्याधि:।
३०. **उन्माद:** – काम-शोक-भयादिजन्य: चित्तसम्मोहो नाम उन्माद:। अन्यस्मिन् अन्यावभासनं नाम सम्मोह:।
३१. **मरणम्** – शस्त्रप्रहार-रोगादिवशात् प्राणत्यागो नाम मरणम्। मृत्युरिति।
३२. **त्रास:** – विद्युदुल्कापातादिजन्यो विकटस्थितिजन्यो वा मन: क्षेपो नाम त्रास:।
३३. **वितर्क:** – सन्देहाऽनन्तरम् उत्थितो विचारो नाम वितर्क:।

नामत: = नामपूर्वकं, समाख्याता: = कथिता:, इमे = एते, त्रयस्त्रिंशत् = एतत्संख्याका:, भावा: = व्यभिचारिणोभावा, विज्ञेया: = ज्ञातव्या:। तथा च इमे व्यभिचारिभावा: रससहकारित्वेन कथ्यन्ते।

**प्रसङ्ग:** – अथेदानीं रसाभासभावाभासान् निरूपयति –

**सर्वसाधारणप्रेमप्रश्रयादिस्वरूपया।**
**अनौचित्या रसाभासा भावाभासाश्च कीर्तिता:॥१९॥**

**अन्वय:** – सर्वसाधारण-प्रेम-प्रश्रयादिस्वरुपया अनौचित्या रसाभासा: भावाभासा: च कीर्तिता:।

**व्याख्या** – सम्प्रति रसाभासभावाभासस्वरूपं निरूपयन्नाह – सर्वेति। प्रेम = रतिश्च, प्रश्रय: = शरणागतिश्चेति प्रेमप्रश्रयौ, सर्वेषां = समेषां, साधारणौ = सामान्यौ, न तु विशेषौ च तौ प्रेमप्रश्रयौ तौ आदीस्वरूपं यस्या: सा तया अनौचित्या = अनुचितप्रवृत्त्या रसवद्भासन्ते ये ते रसाभासा: भाववद्भासन्ते ये ते भावाभासा:, कीर्त्तिता: = वर्णिता: सन्ति शास्त्रविद्भिरिति शेष:।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

अत्र हि अनौचित्यमाभासत्वनियामकम्। एवञ्चानौचित्यमाभासत्वम्। यथोक्तं काव्यप्रकाशे – 'तदाभासा अनौचित्य प्रवर्तिताः'। रसे आभासः अनौचित्यं रसाभासः, भावे आभास अनौचित्यं भावाभासः। रसाभासत्वे हेतुः सर्वसाधारणप्रेम बहुनायकविषया रतिः इति। एवमेव भावभासत्वे हेतुः सर्वसाधारणप्रश्रया बहुदेवविषया रति इति।

**भावार्थः** – स्वकान्ताविषया रतिः शृङ्गाररसो भवति किन्तु यदा काचित् स्त्री स्वनायकं विहाय अन्यं प्रति रतिं प्रदर्शयति रमते वा तत्र अनौचित्यं जायते। एवमेव यदा कश्चिन्नायकः स्वकीयां नायिकां परित्यज्य अन्यां कामयते तत्रापि अनौचित्याद् रसाभास एव। तथैव एक नायक नायिका बहुनायक नायिका वा अन्यविषया रतिः रसाभास इति। एवमेव पशुपक्षिविषयणि रतिः रसाभासत्वमेव। पुनश्च कश्चिद् भक्तः स्वेष्टदेवं विहाय अन्यमन्यान् वा देवान् आराधयति, तत्रापि अनौचित्यादनुचितप्रश्रयाद् भावाभासोऽवबोध्यः।

**प्रसङ्गः** – अथ भावानां शान्त्यादिकं निरूपयन्नाह –

**भावस्य शान्तिरुदयः सन्धिः शबलता तथा।**
**काव्यस्य काञ्चनस्येव कुङ्कुमं कान्तिसम्पदे॥ २०॥**

**अन्वयः** – भावस्य शान्तिरुदयः सन्धिः शबलता तथा, काञ्चनस्य कुङ्कुमं इव काव्यस्य कान्तिसम्पदे।

**व्याख्या** – आभासान्निरुपयित्वा भावशान्त्यादीन् निरूपयन् कथयति – भावस्येति। भावस्य = व्यभिचारिभावादेः शान्तिः = शमनरूपः भावशान्तिः, भावस्य उदयः = उद्‌गमः भावोद्‌गमः, भावोदयः, भावस्य सन्धिः = भावद्वयस्य परस्परस्पर्धाभावः भावसन्धिः, तथा शबलता = बहूनां भावानां कथनं भावशबलता, यथा काञ्चनस्य = सुवर्णस्य, हेम्नः, कुङ्कुमम् इव = केसरम् इव तथा काव्यस्य = कविकर्मभूतस्य, कान्तिसम्पदे = शोभा सवंर्धनायाऽलमिति।

**भावार्थः** – भावशान्तिः, भावोदयः, भावसन्धिः, भावशबलता च एतच्चतुष्टयं काव्यस्य शोभासम्पत्तिवर्धनाय तथैव आवश्यकम् अलं वा यथा स्वर्णस्य कृते केसरमिति भावः। तत्र भावशान्तेरुदाहरणं यथा –

सुतनु जहीहि कोपं पश्य पादान्नतं मां
न खलु तव कदाचित् कोप एवं विधोऽभूत्।
इति निगदति नाथे तिर्यगामीलिताक्ष्या
नयनजलमनल्पं मुक्तमुक्तं न किञ्चित्॥

अत्र वाष्पमोचनेन ईर्ष्याख्यसञ्चारिभावस्य शान्तिः।

भावोदयस्योदाहरणं यथा –

एकस्मिन् शयने विपक्षरमणीनामग्रहे मुग्धया,
सद्यो मानपरिग्रहग्लपितया चाटूनि कुर्वन्नपि।
आवेगादवधीरितः प्रियतमस्तूष्णीं स्थितस्तत्क्षणात्
माभूत् सुप्त इवेत्यमन्दमवलितग्रीवं पुनर्वीक्षितः॥

अत्र औत्सुक्यभावस्योदयो वर्तते।

भावसन्धेरुदाहरणं यथा –

यौवनोद्‌गमनितान्तशङ्किता शीलशौर्यबलकान्तिलोभिताः।
सङ्कुचन्ति विकसन्ति राघवे जानकीनयननीरजश्रियः॥

अत्र नयन-सङ्कोच-विकासाभ्यां व्रीडायाः औत्सुक्यस्य च सन्धिः व्यज्यते।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

भावशबलताया उदाहरणं यथा –

पश्येत्कश्चिच्चलचपल रे ! का त्वराऽहं कुमारी,
हस्तालम्बं वितर ह ह हा व्युत्क्रमः क्वासि यासि।
इत्थं पृथ्वीपरिवृढ ! भवद्विद्विषोऽरण्यवृत्तेः
कन्या कश्चित् फलकिसलयान्याददानाभिधत्ते॥

अत्र शङ्का-असूया-धृति-स्मृति-श्रम-दैन्य-प्रबोधोत्सुक्यानां भावानां शबलता ध्वन्यते।

**प्रसङ्गः** – अथ रीतिनिरूपणं कुरुते पद्यद्वयेन –

**आतुर्यमासप्तमं च यथेष्टैरष्टमादिभिः।**
**समासः स्यात्पदैर्न स्यात्समासः सर्वथापि च॥२१॥**
**पाञ्चालिकी च लाटीया गौडीया च यथारसम्।**
**वैदर्भी च यथासंख्यं चतस्रो रीतयः स्मृताः॥२२॥**

**अन्वयः** – १. आतुर्यं पदैः समासः स्यात्, २. आसप्तमं पदैः समासः स्यात्, ३. अष्टमादिभिः यथेष्टैः पदैः समासः स्यात्, ४. सर्वथा अपि समासः न स्यात् च (इत्येवं) यथारसं यथासङ्ख्यं च चतस्रः रीतयः स्मृताः – १. पाञ्चालिकी, २. लाटीया, ३. गौडीया, ४. वैदर्भी च।

**व्याख्या** – रीतिस्वरूपं निरूपयन्नाह – आतुर्यमिति। आतुर्यम् = आचतुर्थं, द्वित्रिचतुः पदपर्यन्तं यथास्यात्तथा पदैः समासः स्यात् = भवेत्तदा पाञ्चालिकी = पाञ्चालदेशीयानां (पाञ्चाली) रीतिः, यदा आसप्तमं = पञ्चषट्सप्तमपदपर्यन्तं समासः स्यात्तदा लाटीया = लाटदेशप्रिया (लाटी) रीतिः, अष्टमादिभिः = अष्टानां पदानां, ततोऽप्यधिकानां स्वेच्छया वा समासः स्यात्तदा गौडदेशप्रिया (गौडी) रीतिः, सर्वथापि = नितान्तमपि यदा समासो न स्यात्तर्हि वैदर्भी = विदर्भदेशप्रिया (वैदर्भी) रीतिरिति। इत्थं यथारसं = रसमनतिक्रम्य, यथासंख्यञ्च चतस्रः = चतुःसंख्याकाः, पाञ्चाली, लाटी, गौडी, वैदर्भी, चेति रीतयः कथिताः सन्ति। तथा च यस्मिन् रसे या रीतिरनुकूला सा तत्र प्रयोक्तव्या। यथा शृङ्गारे वैदर्भी, रौद्रवीररसयोः गौडीया, अन्यत्र द्वे इति। वस्तुतस्तु रसानुगुणं पदयोजना नामैव रीतिरिति। उपर्युक्तानां चतसृणां रीतिनामुदाहरणानि क्रमशः प्रस्तूयन्ते। तद्यथा –

**१. पाञ्चाली** – द्वित्रिचतुष्पदपर्यन्तं समासे सति पाञ्चाली रीतिः स्यात् –

मदनृपतियात्राकालविज्ञापनाय स्फुरति जलधिमध्ये ताम्रपात्रीव भानुः।
अयमपि पुरुहूतप्रेयसीमूर्ध्नि पूर्णः कलश इव सुधांशुः साधुरुल्लासीति॥

**२. लाटी** – पञ्चषट्सप्तपदपर्यन्तं समासे सति लाटी रीतिर्भवति –

अयमुदयति मुद्राभञ्जनः पद्मिनीनामुदयगिरिवनावलीबालमन्दारपुष्पम्।
विरहविधुरकोकद्वन्द्वबन्धुर्विभिन्दन् कुपितकपिकपोलक्रोडताम्रतमांसि॥

**३. गौडी** – अष्टपदयुक्ते ततोऽप्यधिकपदयुक्ते यथेष्टं वा समासे सति गौडी रीति स्यात् –

चञ्चद्भुजभ्रमितचण्डगदाऽभिघातसञ्चूर्णितोरुयुगलस्य सुयोधनस्य।
स्त्यानाऽवनद्ध-घनशोणित-शोणपाणिरुत्तंसयिष्यति कचांस्तव देवि भीमः॥

**४. वैदर्भी** – सर्वथा समासरहिता, स्वल्पसमासा वा रीतिः वैदर्भी –

निविशते यदि शूकशिखापदे सृजति सा कियतीमिव न व्यथाम्।
मृदुतनोर्वितनोतु कथं न तामवनिभृतु निविश्य हृदि स्थितः॥



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**प्रसङ्गः** – अथेदानीं वृत्तिनिरूपणं कुरुते –

**मधुरायां समाक्रान्ता वर्गस्थाः पञ्चमैर्निजैः।**
**लकारश्च लसंयुक्तो ह्रस्वव्यवहितौ रणौ॥२३॥**

**अन्वयः** – मधुरायां वर्गस्थाः (वर्णाः) निजैः पञ्चमैः (वर्णैः) समाक्रान्ताः (भवन्ति), लकारः च लसंयुक्तः (भवति) रणौ च ह्रस्वव्यवहितौ (भवतः)।

**व्याख्या** – काव्यस्वरूपनिरूपणोक्तां वृत्तिं प्रतिपादयितुं मधुरा-प्रौढा-परुषा-ललिता-भद्राख्यासु पञ्चसु वृत्तिषु प्रथमां मधुरां प्रतिपादयन्नाह – मधुरायामिति। मधुरायां = तत्समाख्यां वृत्तौ, वर्गस्थाः = कवर्गादिवर्गेषु स्थिताः वर्णाः, निजैः = स्वकीयैः, पञ्चमैः = अन्तिमैः वर्णैरिति, समाक्रान्ता = संयुक्ताः भवन्ति, कवर्गस्थाः ङकारेण, चवर्गस्थाः, ञकारेण, टवर्गस्थाः, णकारेण तवर्गस्थाः नकारेण तथा पवर्गस्थाः मकारेण युक्ता भवन्ति। पुनश्च लकारः = लवर्णस्तु 'ल' वर्णेन तथा च रश्चणश्चेति रणौ – रकारणकाराविति ह्रस्वेण = अदीर्घेण वर्णेन व्यवहितौ = अन्तरितौ स्यातामिति। सा वृत्तिः मधुरा नाम। उदाहरणं यथा –

अङ्गभङ्गोल्लसल्लीला तरुणी स्मरतोरणम्।
अनङ्गरङ्गप्रतिमं तदङ्गभङ्गीभिरङ्गीकृत्तमायताक्ष्या॥

लताकुञ्जं गुञ्जनमदवदलिपुञ्जं चपलयन्,
समालिङ्गमङ्गं द्रुततरमनङ्गं प्रबलयन्।
मरुन्मन्दं मन्दं दलितमरविन्दं तरलयन्,
रजोवृन्दं विन्दन् किरति मकरन्दं दिशि दिशि॥

प्रकृतेषु गकारो 'ङ' कारेण, जकारो 'ञ' कारेण तथा दकारो 'न' कारेण समाक्रान्तत्वाद् मधुरावृत्तिरवगन्तव्याऽत्र।

**प्रसङ्गः** – अथ प्रौढां निरूपयति –

**रेफाक्रान्ता वर्ग्ययणाष्टवर्गात्पञ्चमादृते।**
**कपाक्रान्तस्तवर्गः स्यात्प्रौढायां च कमूर्धता॥२४॥**

**अन्वयः** – प्रौढायां टवर्गात् पञ्चमात् ऋते, वर्ग्य-यणाः रेफाक्रान्ताः, तवर्गः कपाक्रान्तः स्यात् कमूर्धता च (स्यात्)।

**व्याख्या** – प्रौढां निरूपयन्नाह – रेफेति। प्रौढायां = प्रौढानामकवृत्तौ, टवर्गात् = टवर्गीय वर्णेभ्यः तथा पञ्चमात् = ङ-ञ-ण-न-मरुपादक्षरात्, ऋते = विना, टवर्गं पञ्चमाक्षराणि च वर्जयित्वा, वर्गेभवाः वर्ग्याः = क-ख-ग-घादयो वर्णाश्च यश्च णश्चेति यणौ = यकारणकारौ, रेफाक्रान्ताः = रेफयुक्ताः स्युः। तथा तवर्गः कपाक्रान्तः = ककारपकाराभ्यां युक्तो भवति, तत्र प्रौढाप्रवृत्तिर्भवति। तथा च तकारस्य कमूर्धता = ककारस्य मूर्धनि तकारो यस्यां सा कमूर्धता जायते।

उदाहरणं यथा – तर्कचातुर्यपूर्णोक्तिप्राप्तोत्कटधियां वृथा॥

अत्र 'तर्कचातुर्य' इत्यत्र रेफाक्रान्तताऽस्ति 'उक्ति-प्राप्त' इत्यत्र तवर्गस्य कपाक्रान्तता, 'उत्कटे' इत्यत्र कमूर्धता प्रतिपादनात् प्रौढावृत्तिरवबोध्या।

**भावार्थः** – यस्यां वृत्तौ टवर्गं, पञ्चमाक्षराणि च वर्जयित्वा अन्यानि वर्गाक्षराणि यकार-णकारौ च रेफाक्रान्तौ तवर्गश्च ककारपकाराभ्यामाक्रान्तः तकारश्च ककारोर्ध्वमुच्यते सा वृत्तिः प्रौढा नाम्नाऽवगन्तव्या।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**प्रसङ्गः** – अथ परुषां वृत्तिं निरूपयति –

**सर्वैरूर्ध्वैः सकारस्य सर्वै रेफस्य सर्वथा।**
**रहोर्द्वेधा तु संयोगः परुषायां शषौ स्वतः॥ २५॥**

**अन्वयः** – परुषायाम् सकारस्य संयोगः ऊर्ध्वैः सर्वैः (वर्णैः स्यात्)। रेफस्य (संयोगः) सर्वैः सर्वथा (स्यात्)। रहोः तु द्वेधा (संयोगः स्यात्)। शषौ स्वतः (स्याताम्) इति।

**व्याख्या** – परुषावृत्तिस्वरूपमाह – **सर्वैरिति।** परुषायां वृत्तौ सकारस्य ऊर्ध्वैः = उपरि स्थितैः, सर्वैः = सकलैः, वर्गीयवर्णैः संयोगसम्बन्धः तथा रेफस्य = रकारस्य, सर्वैः वर्णैः सर्वथा = सर्वप्रकारेण उपरिभावेन अधो भावेन च संयोगः, एवमेव रहोः = रकारहकारयोस्तु द्वेधा = उपर्यधोभावेन संयोगः भवेत्, शषौ = शकारः षकारश्च तु स्वतः = स्वतन्त्रौ भवतः।

**भावार्थः** – अस्यां वृत्तौ सर्वे वर्णाः सकारोत्तरोच्चार्यमाणाः भवन्ति, रेफस्य हकारस्य च उपरि–अधो भावेन द्वयोः संयोगो भवति, शकारषकारौ च वर्णान्तरेण असंयुक्तौ स्वतन्त्रौ वा भवतः। उदाहरणं यथा –

वीप्सोत्सर्पन्मुखाग्रार्द्रं बर्ह्री जह्रे कृशस्तृषम्।'

अत्र हि 'विप्सोत्' इत्यत्र सकारः पकारेण पूर्वभावेन, उत्तरभावेन च तकारेण सम्बन्धितोऽस्ति, 'ग्रार्द्रम्' इत्यत्र रेफस्य उपर्यधोभावेन संयोगश्चास्ति, 'ब्रर्ही' इत्यत्र रकारहकारयोरुपरिभावेन, 'जह्रे' इत्यत्र अधोभावेन संयोगो वर्तते। 'कृश' इत्यत्र शकारस्य 'तृष' इत्यत्र षकारस्य स्वतन्त्रेण प्रयोगकारणात् परुषावृत्तिरवबोध्या।

**प्रसङ्गः** – अथ ललितां भद्रां च वृत्तिं निरूपयति –

**लकारोऽन्यैरसंयुक्तो लघवो घभधां रसौ।**
**ललितायां तथा शेषा भद्रायामिति वृत्तयः॥ २६॥**

**अन्वयः** – ललितायाम् लकारः अन्यैः असंयुक्तः। घ–भ–धाः–र–सौ (च) लघवः। तथा शेषाः (वर्णाः) भद्रायाम् (भवन्ति) इति वृत्तयः।

**व्याख्या** – ललितां वृत्तिं प्रतिपादयन्नाह – लकारेति। ललितायां वृत्तौ लकारः अन्यैः = अन्यवर्णैः, असंयुक्तः = संयोगरहितः, स्वतन्त्रो वा भवति, घभधाः = घकार–भकार–धकाराः तथा च रसौ = रकारसकारौ, लघवः = लघुरुपेण, असंयुक्ता भवन्ति।

उदाहरणं यथा – 'ललना रभसं धत्ते घनाटोपे महीयसि।'

अत्र 'ललना' इत्यत्र लकारः स्वतन्त्ररूपेण, असंयुक्ततया, 'धत्ते' इत्यत्र धकारस्य 'घना' इत्यत्र घकारस्य ह्रस्वता वर्णिता। अतोऽत्र ललितावृत्तिः बोध्या।

अथ भद्रां निरूपयन्नाह – तथा = एवं भद्रायां वृत्तौ शेषाः = शेषवर्णाः, उक्तवृत्तिचतुष्टयाऽवशिष्टाः वर्णाः भवन्ति।

उदाहरणं यथा – 'घनाटोपे महीयसि' अत्र सर्वे वर्णाः असंयुक्ता इत्यस्मात् भद्रावृत्तिः।

**प्रसङ्गः** – यथाक्रमं इत्थं मधुरादीन् वृत्तीन् निरुप्य तासामुदाहरणानि प्रस्तौति –

**अङ्गभङ्गोल्लसल्लीला तरुणी स्मरतोरणम्।**
**तर्कचातुर्यपूर्णोक्तिप्राप्तोत्कटधियां वृथा॥ २७॥**
**वीप्सोत्सर्पन्मुखाग्रार्द्रं बर्ह्री जह्रे कृशस्त तृषम्।**
**ललना रभसं धत्ते घनाटोपे महीयसि॥ २८॥**

**अन्वयः** – अङ्गभङ्ग + उल्लसत् + लीला स्मर–तोरणं तरुणी तर्क–कर्कश–पूर्ण + उक्ति – प्राप्त + उत्कटधियां



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

(कृते) वृथा। महीयसि घनाटोपे कृश: बर्ही वीप्सा-उपसर्पत् मुख-आर्द्रं तृषं जह्रे। ललनां रभसं धत्ते।

**व्याख्या** - एतेषाम् उदाहरणानां व्याख्या - भावार्थादिकं सर्वं तत्तत्प्रसङ्गे विवेचितम्। अत: पुनरत्र न विवेच्यते।

**प्रसङ्गः** - अथेदानीं रस-रीति-वृत्तिनिरूपणानन्तरं मयूखसमाप्तिं सूचयन्नाह -

**महादेवः सत्रप्रमुखमखविधैकचतुरः**
**सुमित्रा तद्भक्ति प्रणिहितमतिर्यस्य पितरौ।**
**मयूखस्तेनासौ सुकविजयदेवेन रचिते**
**चिरं चन्द्रालोके महति ऋतुसंख्यः सुखयतु॥ २९॥**

**॥ इति चन्द्रालोके रसादिविवेचनो नाम षष्ठो मयूख॥**

**अन्वयः** - सत्र-प्रमुख-मख-विद्या+एक-चतुरः महादेवः, तद्भक्तिप्रणिहितमतिः सुमित्रा यस्य पितरौ, अनेन सुकविजयदेवेन रचिते चन्द्रालोके ऋतुसंख्यः मयूखः सुमनसः चिरं सुखयतु।

**व्याख्या** - व्याख्या भावार्थश्च पूर्ववदेव। ऋतुसंख्यः = षट्संख्यकः इति विशेषः।

**॥इति पीयूषवर्षेण श्रीजयदेवकविना विरचिते चन्द्रालोके रसरीतिवृत्तिनिरूपणो नाम षष्ठो मयूखः सम्पन्नः॥**

## अभ्यास-प्रश्नाः

**बहुविकल्पात्मकप्रश्नाः** -

१. विभावः (कारणं) कतिविधो भवति?
(क) पञ्चविधः (ख) द्विविधः
(ग) त्रिविधः (घ) एकविधः ( )

२. रससंज्ञां प्राप्नोति -
(क) संचारिभावः (ख) अनुभावः
(ग) विभावः (घ) स्थायिभावः ( )

३. चन्द्रालोकानुसारेण रसाः सन्ति -
(क) नव (ख) षट्
(ग) अष्ट (घ) दश ( )

४. चन्द्रालोकानुसारं रीतयः सन्ति -
(क) सप्त (ख) चतस्रः
(ग) पञ्च (घ) तिस्रः ( )

५. आलस्येर्ष्याजुगुप्साख्याः संचारिभावा वर्ज्या भवन्ति -
(क) रौद्ररसे (ख) करुणरसे
(ग) शृङ्गाररसे (घ) हास्यरसे ( )

६. समासरहिता रीतिर्भवति -
(क) पाञ्चाली (ख) लाटी
(ग) गौडी (घ) वैदर्भी ( )



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**अतिलघूत्तरात्मकप्रश्नाः –**

१. शृंगाररसस्य स्थायिभावः कः ?
२. करुणरसस्य स्थायिभावः कः ?
३. शान्तरसस्य स्थायिभावः कः ?
४. रससन्दर्भे कार्यरूपः कः भवति ?
५. भावोदयः कः ?
६. भावशान्तिः का भवति ?
७. वैदर्भी–रीतिः कुत्र भवति ?
८. व्यभिचारिभावानां संख्यां निर्दिशत ?
९. गौडी–रीतेः स्वरूपं प्रदर्शयत ?
१०. मधुरावृत्तिं निरूपयत।

**लघूत्तरात्मकप्रश्नाः –**

१. शृंगाररसस्वरूपं विवेचयत।
२. भयानकरसस्वरूपं प्रकटयत।
३. हास्यरसस्य विभावानुभावव्यभिचारिभावान् निर्दिशत।
४. वीररसस्य स्वरूपं सोदाहरणं विवेचनीयम्।
५. व्यभिचारिभावानां संख्यां निर्दिशत।
६. भावस्वरूपं विवेचयत।
७. पाञ्चालीरीतिं विवेचयत।
८. प्रौढावृत्तिं वर्णयत।
९. शान्तरसस्य विभावानुभावव्यभिचारिभावान् निर्दिशत।
१०. रसाभासं भावाभासं च वर्णयत।

**निबन्धात्मकप्रश्नाः –**

१. रसस्वरूपं विवेचयत।
२. करुणरसस्य स्वरूपं सोदाहरणं विवेचयत।
३. रौद्ररसस्य लक्षणं विलिख्य उदाहरणं प्रदर्शयत।
४. अद्भुतरसं सोदाहरणं निरूपयत।
५. चन्द्रालोकानुसारं व्यभिचारिभावानां नामोल्लेखः कार्यः।
६. बीभत्सरसस्य स्वरूपं सोदाहरणं विवेचयत।
७. परुषां ललितां च वृत्तिं सोदाहरणं विवेचयत।
८. चन्द्रालोकानुसारं चतस्रो रीतयो वर्णनीयाः।
९. शृंगाररसस्य स्वरूपं विलिख्य उदाहरणं विवेचयत।
१०. शान्तरसस्य स्वरूपं प्रदर्श्य उदाहरणमपि लिखत।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# सप्तमो मयूखः

## व्यञ्जनानिरूपणात्मकः

**प्रसङ्गः** – काव्यलक्षणनिर्दिष्टमधुरादिवृत्तीनां निरूपणं कृत्वा सम्प्रति व्यञ्जनादिवृत्तीनां निरूपणं कुर्वाणो ग्रन्थकारः प्रथमं तावद् वृत्तिभेदान् निर्दिशन्नाह –

**वृत्तिभेदैस्त्रिभिर्युक्ता स्रोतोभिरिव जाह्नवी।**
**भारती भाति गम्भीरा कुटिला सरला क्वचित्॥ १॥**

**अन्वयः** – त्रिभिः वृत्तिभेदैः युक्ता भारती (त्रिभिः) स्रोतोभिः (युक्ता) जाह्नवी इव क्वचित् गम्भीरा, (क्वचित्) कुटिला, (क्वचित् च) सरला भाति।

**व्याख्या** – व्यञ्जनादिवृत्तिभेदान् निरूपयति – वृत्तिभेदैरिति। त्रिभिः = त्रिसंख्याकैः, वृत्तिभेदैः = वर्तते शब्दैः अर्थोऽनया इति वृत्तिः तस्या भेदाः – वृत्तिभेदाः तैः वृत्तिभेदैः = अभिधालक्षणाव्यञ्जनारुपैः, युक्ता = संयुक्ता, सहिता, भारती = वाणी, त्रिभिः स्रोतोभिः = त्रिभिः प्रवाहैः, युक्ता = सम्बद्धा, जाह्नवी इव = गङ्गा इव, क्वचित् गम्भीरा = कुत्रचित् समधिकजलत्वाद् अगाधा गङ्गा, व्यङ्ग्यत्वेनार्थगाम्भीर्यसमन्विता च भारती, क्वचित् = क्वचिच्च, कुटिला = वक्रपथगामिनी गङ्गा, लक्ष्यार्थरुपवक्रार्थबोधनपरा च भारती, पुनश्च क्वचित् सरला = सरलपथप्रवाहमाना गङ्गा, वाच्यार्थबोधरुपेयं भारती, भाति = शोभते इत्यर्थः।

**भावार्थः** – यथा गम्भीर-कुटिल-सरलरुपस्रोतो भेदात् पतितपावनीगङ्गा त्रिपथगा जायते तथैव भगवती भारती (वाणी) गम्भीर-वक्र-सरलार्थप्रतिपादनात्मिकाभिः वृत्तिभिः त्रिधा-व्यञ्जना-लक्षणा-अभिधा चेति विभक्ताऽस्ति। अर्थोत्कर्षदृष्ट्या कवीनां कृते व्यञ्जनायाः प्राधान्यात् तस्याः प्रथमं परिगणनं कृतमस्ति। अनयैव वृत्त्या कविः बहुविधानामर्थानां प्रकाशनं करोति इत्यस्मात् गम्भीरा इत्युक्ता। तदनन्तरं प्रसिद्धाप्रसिद्धानां विपरीतानां वाऽर्थानां मुख्यार्थबाधपूर्वकं प्रतिपादनक्षमा लक्षणावृत्तिः कुटिलात्वेन परिगणिता। अन्ते च वाच्यार्थबोधनपरा, साक्षात्सङ्केतितार्थप्रतिपादनात्मिका याऽभिधा सा सरलेति प्रथिता। इत्थं व्यञ्जना लक्षणा अभिधा चेति तिस्रः शब्दवृत्तयो भवन्तीति तात्पर्यम्।

**प्रसङ्गः** – अथ व्यञ्जनावृत्तिं निरूपयति –

**सामुख्यं विदधानायाः स्फुटमर्थान्तरे गिरः।**
**कटाक्ष इव लोलाक्ष्या व्यापारो व्यञ्जनात्मकः॥ २॥**

**अन्वयः** – स्फुटम् साम्मुख्यं विदधानायाः गिरः लोलाक्ष्याः कटाक्षः इव अर्थान्तरे व्यञ्जनात्मकः व्यापारः (भवति)।

**व्याख्या** – अथ तावद् व्यञ्जनावृत्तेः स्वरूपमाह – सामुख्यमिति। स्फुटं = स्पष्टं, सामुख्यम् = आभिमुख्यं, विदधानायाः = कुर्वाणायाः, नायकसम्मुखं गतायाः, लोलाक्ष्या = चञ्चलनयनाया नायिकायाः, कटाक्ष इव = नेत्र विक्षेप इव, प्रणयरूपव्यापारो भवति तथैव गिरः = वाण्याः, अर्थान्तरे = अन्यस्मिन् अर्थे, वाच्यलक्ष्यार्थभिन्ने, व्यञ्जनात्मकः = व्यञ्जना एव आत्मा यस्य सः व्यञ्जनात्मकः, व्यञ्जनारूपः, व्यापारः क्रियाकलापो भवति। वाच्यलक्ष्यार्थभिन्नार्थ विषयक प्रतीतिं कुर्वतः शब्दस्य यो व्यापारो जायते तद्व्यञ्जनेति नाम्नाऽवगम्यते।

**भावार्थः** – यथा काचित् चञ्चलाक्षी कामिनी कस्यचित् जनस्य (नायकस्य) सम्मुख-आगतायां सती स्वाऽपाङ्गदृष्टिभिरेव स्वमनोभिलषितं प्रेमातिशयं प्रकटयति तथैव इयं व्यञ्जनावृत्तिरपि व्यञ्जनात्मकेन व्यापारेण वाच्यार्थलक्ष्यार्थातिरिक्तम् अर्थान्तरं (व्यङ्ग्यार्थं) प्रकाशयतीति भावः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**विशेषः** – व्यञ्जनाशक्त्या योऽर्थोऽभिधीयते स एव व्यङ्ग्यार्थः इत्युच्यते। अयं व्यङ्ग्यार्थ एवोत्कृष्टतां प्राप्य ध्वनिनाम्नापि प्रसिध्यति। चन्द्रालोककारजयदेवेन व्यञ्जनानिरूपणक्रमे व्यञ्जनात्मकव्यापारो ध्वनिर्वा अन्योन्यपर्यायरूपेणैव गृहीतौ वर्तते। अतः प्रकरणेऽस्मिन् ध्वनिशब्दो व्यञ्जनार्थ एव प्रयुक्तोऽस्तीति विशेषेणावगन्तव्यः।

**प्रसङ्गः** – अथ व्यञ्जनात्मकव्यापारस्य (ध्वनेः) भेदान् निरूपयति –

**अविवक्षितवाच्यस्य द्वौ भेदौ वाच्यमेव चेत्।**
**अर्थान्तरे सङ्क्रमितमत्यन्तं वा तिरस्कृतम्॥३॥**

**अन्वयः** – वाच्यम् एव चेत् अर्थान्तरे सङ्क्रमितम् (स्यात्) अत्यन्तं तिरस्कृतं वा (स्यात् तर्हि) अविवक्षितवाच्यस्य द्वौ भेदौ (भवतः)।

**व्याख्या** – व्यञ्जनास्वरूपं निरूप्य ध्वनिभेदप्रसङ्गेऽविवक्षितवाच्यमाह – उत्तममध्यमाधमभेदेन काव्यं तावत् त्रिविधं विद्यते। तत्र ध्वनिकाव्यमुत्तमं, गुणीभूतव्यङ्ग्यकाव्यं मध्यमं, सर्वथा व्यङ्ग्यरहितमधमम् इति। तत्र ध्वनेः अभिधामूल – लक्षणामूलत्वेन द्वौ भेदौ स्तः। एतौ द्वावेव अविवक्षितवाच्यध्वनिः विवक्षितान्यपर वाच्यध्वनिश्च उच्यते। अविवक्षितवाच्यो लक्षणामूलो ध्वनिः, विवक्षितवाच्योऽभिधामूलश्चेत्यर्थः।

प्रकृते तावद् अविवक्षितवाच्यस्य भेदद्वयम् उच्यते – वक्तुमिष्टं विवक्षितं, न विवक्षितम् अविवक्षितम्, अविवक्षितम् = अनुपयुक्तं, वाच्यं = वाच्यार्थो यस्मिन् स अविवक्षितवाच्यः तस्य अविवक्षितवाच्यस्य, ध्वनेः द्वौ भेदौ भवतः। चेत् = यदि, वाच्यमेव = अभिधेयार्थ एव अर्थान्तरे = अभिधेयातिरिक्त लक्ष्यार्थे, सङ्क्रमितं = परिणतं भवेत् वा = अथवा, अत्यन्तं = सर्वथाभावेन, तिरस्कृतं = परित्यक्तं, भवेत्तर्हि क्रमशः अर्थान्तरसङ्क्रमितवाच्यध्वनिः, अत्यन्ततिरस्कृतवाच्य ध्वनिश्चेति भेदद्वयं भवति। तत्र अर्थान्तरसङ्क्रमितवाच्यध्वनेरुदाहरणं यथा –

कदली कदली करभः करभः, करिराजकरः करिराजकरः।
भुवनत्रितयेऽपि बिभर्त्ति तुलामुरुयुग्मं न चमूरुदृशः॥

अत्र द्वितीय कदलीशब्दः पुनरुक्तेः प्रकृतेऽनुपयुज्यमानः शैत्यजाड्यविशिष्टकदलीरूपेऽर्थे परिणमते। तत्र कदलीपदस्य वाच्यार्थः (कदलीत्वं) स्वार्थमपरित्यजन् शैत्यजाड्यविशिष्टकदलीरुपमुपस्थापयति। तत्र शैत्यजाड्याद्यतिशयो व्यज्यते। इदमेव अर्थान्तरसङ्क्रमणं वर्तते।

अत्यन्ततिरस्कृतवाच्यध्वनेरुदाहरणं यथा –

उपकृतं बहु तत्र किमुच्यते सुजनता प्रथिता भवता परम्।
विदधदीदृशमेव सदा सखे सुखितमास्व ततः शरदां शतम्॥

अत्र अपकारिणं प्रति यदा कश्चिदेवं वदति तदा मुख्यार्थस्य बाधो भवति। ततश्च वैपरित्यसम्बन्धेन उपकृतमित्यस्य 'अपकृतम्' सुजनतायाः 'दुर्जनता' इत्यस्मिन्नर्थे लक्षणाकरणादत्र अपकारातिशयादयश्च व्यङ्ग्यार्थः। एवञ्च वाच्यस्य सर्वथाभावेन परित्यागादत्यन्ततिरस्कृतवाच्यध्वनिरवगन्तव्यः।

**प्रसङ्गः** – अथ विवक्षितवाच्यध्वनेः भेदान् निर्दिशन्नाह –

**द्वौ विवक्षितवाच्यस्य लक्ष्यालक्ष्यक्रमात्मकौ।**
**चत्वारिंशद्युतैकेन भेदाः षट् चानयोः क्रमात्॥४॥**

**अन्वयः** – विवक्षितवाच्यस्य लक्ष्याऽलक्ष्यक्रमात्मकौ द्वौ (भेदौ भवतः)। अनयोः क्रमात् चत्वारिंशत् + युत+एकेन भेदाः, षट् च (भेदः भवन्ति)।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**व्याख्या** – अभिधामूलध्वनेः विवक्षितवाच्यध्वनेर्वा भेदानुपवर्णयन्नाह – विवक्षितवाच्यस्य = विवक्षितवाच्यध्वनेः, लक्ष्यश्च अलक्ष्यश्चेति लक्ष्यालक्ष्यौ, लक्ष्यालक्ष्यौ क्रमौ ययौ तौ लक्ष्यालक्ष्यक्रमौ तौ आत्मानौ ययोस्तौ लक्ष्यालक्ष्याक्रमात्मकौ द्वौ = द्विसंख्याकौ भेदौ भवतः। एवं विवक्षितवाच्यध्वनेः – लक्ष्यक्रमव्यङ्ग्यः अलक्ष्यक्रमव्यङ्ग्यश्चेति द्वौ भेदौ स्त। अनयोः = उपर्युक्तयोः भेदयोः, क्रमात् = क्रमशः चत्वारिंशत् (४०) + युतैकेन (०१) + षट् (०६) भेदाः भवन्ति।

**भावार्थः** – विवक्षितवाच्यस्य तावत्प्रथमं द्वौ भेदौ (क) लक्ष्यक्रमव्यङ्ग्यः, (ख) अलक्ष्यक्रमव्यङ्ग्यश्च भवतः। एतावेव भेदौ संलक्ष्यक्रमव्यङ्ग्यध्वनिः असंलक्ष्यक्रमव्यङ्ग्यध्वनिश्चेति नाम्नापि कथ्यते। पुनश्च अनयोः लक्ष्यक्रमङ्व्यग्यध्वने एकचत्वारिंशद् (४१), अलक्ष्यक्रमव्यङ्ग्यध्वनेश्च षड् (०६) भेदाः भवन्ति। तत्रैव अविवक्षितवाच्यध्वनेः पूर्ववर्णितान् चतुरोभेदान् समाकलय्य वदामश्चेद् ध्वनेः एकपञ्चाशद् भेदाः जायन्ते।

**प्रसङ्गः** – अथ पूर्वोपदिष्टान् ध्वनिभेदान् सविस्तरं निरूपयन्नाह –

**त्रिधा शब्दार्थतद्युग्मशक्तिजन्मा स्फुटक्रमात्।**
**रसभावतदाभासप्रमुखस्त्वस्फुटक्रमात् ॥५॥**

**अन्वयः** – स्फुटक्रमात् शब्दाऽर्थ-तद्युग्म-शक्तिजन्मा (ध्वनिः) त्रिधा। अस्फुटक्रमात् तु रसभावतदाभासप्रमुखः (एक एवेति)।

**व्याख्या** – पूर्वोपदिष्टान् सप्तचत्वांरिशद्भेदान् वर्णयितुं प्रथमं लक्ष्यालक्ष्यक्रम व्यङ्ग्योः भेदानाह – त्रिधेति। स्फुटक्रमात् – लक्ष्यक्रमव्यङ्ग्यात्, शब्दश्च अर्थश्च तद्युग्मं चेति शब्दार्थयुग्मानि तेषां शक्तिभ्यो जन्म यस्य सः – शब्दार्थतद्युग्मशक्तिजन्मा ध्वनिः, त्रिधा = त्रिप्रकारकः – शब्दशक्तिजन्मा, अर्थशक्तिजन्मा, शब्दार्थोभयशक्तिजन्मा चेति त्रयो भेदाः भवन्ति।

अस्फुटक्रमात् = अलक्ष्यक्रमव्यङ्ग्यात् तु, रसश्च भावश्च तदाभासश्च प्रमुखाः यस्मिन् सः रसभावतदाभासप्रमुख इति एक एव भेदो भवति।

**भावार्थः** – लक्ष्यक्रमव्यङ्ग्यध्वनेः त्रयो भेदा भवन्ति। ते यथा – १. शब्दशक्तिजन्मा, २. अर्थशक्तिजन्मा, ३. शब्दार्थोभयशक्तिजन्मा चेति। अलक्ष्यक्रमव्यङ्ग्यध्वनेः च रस-भाव-तदाभासप्रमुखः एक एव भेदो भवति।

**प्रसङ्गः** – पुनस्तानाह –

**वस्त्वलङ्कारयोर्व्यक्तेर्भेदौ द्वौ शब्दशक्तिजौ।**
**अर्थशक्तिसमुत्थस्य भेदा द्वादश तद्यथा ॥६॥**
**चत्वारो वस्त्वलङ्कारमलङ्कारस्तु वस्तु यत्।**
**अलङ्कारमलङ्कारो वस्तु वस्तु व्यनक्ति तत् ॥७॥**
**वक्तुः कविनिबद्धस्य कवेर्वा प्रौढिनिर्मितः।**
**स्वसिद्धो वा व्यञ्जकोऽर्थश्चत्वारस्त्रिगुणास्ततः ॥८॥**

**अन्वयः** – १. वस्त्वलङ्कारयोः व्यक्तेः शब्दशक्तिजौ द्वौ भेदौ। अर्थशक्तिसमुत्थस्य द्वादश भेदाः। तद्यथा–

२. चत्वारः (भेदाः भवन्ति) यत् वस्तु अलङ्कारं व्यनक्ति। अलङ्कारः तु वस्तु व्यनक्ति। अलङ्कारम् अलङ्कारः व्यनक्ति। वस्तु च वस्तु व्यनक्ति (इति) तत्।

३. कवि-निबद्धस्य वक्तुः, कवेः वा प्रौढि-निर्मितः स्वसिद्धः वा व्यञ्जकः अर्थ (इत्येवं) ततः चत्वारः त्रिगुणाः (४ x ३ = १२ इति)।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**व्याख्या** – वस्त्वलङ्कारयोः = वस्तुनः अलङ्कारस्य च, व्यक्तेः = अभिव्यञ्जनात्, शब्दशक्तिजौ = शब्दशक्त्युद्भवौ द्वौ भेदौ भवतः। वस्तुध्वनिः अलङ्कारध्वनिश्चेति द्वौ भेदौ शब्दशक्तिजौ इति।

अर्थशक्तिसमुत्थस्य = अर्थशक्तिसमुद्भवध्वनेः, द्वादश = द्वादशसंख्याकाः भेदाः भवन्ति। तद्यथा – चत्वारः = प्रथमं चत्वारो भेदाः जायन्ते – १. वस्तुनः अलङ्कारः ध्वनिः, २. अलङ्काराद् वस्तुध्वनिः, ३. अलङ्कारादलङ्कारध्वनिः, ४. वस्तुनोवस्तुध्वनिश्चेति। एतेषां चतुर्णां पुनः त्रयः त्रयो भेदाः जायन्ते – १. कविनिबद्धवक्तृ प्रौढोक्तिसिद्धाः चत्वारः २. कविप्रौढोक्तिसिद्धाः चत्वारः, ३. स्वसिद्धाः चत्वारश्चेति त्रिगुणसङ्कलनेन द्वादशभेदाः जायन्ते। (४ x ३ = १२ इति।)

**प्रसङ्गः** – पुनरग्रे परिगणयन्नाह –

**शब्दार्थोभयभूरेकः स च वाक्यैकसंश्रयः।**
**पदैकदेशे रचनावर्णवाक्यपदेष्वपि॥९॥**
**प्रबन्धे चेति षोढाऽसौ रसाद्याख्योऽस्फुटक्रमः।**
**एषु सप्तदशस्वेकं परित्यज्यास्फुटक्रमम्॥१०॥**
**ये षोडशाद्या द्विगुणास्ते स्युर्वाक्यपदाश्रयात्।**
**प्रबन्धेऽपि द्वादश स्युरर्थशक्तिभुवो भिदः॥११॥**

**अन्वयः** – शब्दार्थोभयभूः सः च वक्यैकसंश्रयः एकः एव। असौ रसाद्याख्यः अस्फुटक्रमः षोढा–पदैकदेशे, रचना–वर्ण–वाक्य–पदेषु अपि, प्रबन्धे च इति। एषु सप्तदशसु एकम् अस्फुटक्रमं परित्यज्य ये आद्याः षोडश–ते वाक्यपदाश्रयात् द्विगुणाः स्युः।

**व्याख्या** – शब्दार्थोभयशक्तिजन्यध्वनिमुपवर्णयन्नाह – शब्देति। शब्दार्थोभयभूः = शब्दश्च अर्थश्च शब्दार्थौ शब्दार्थयोः उभयं शब्दार्थोभयं तेन भवतीति शब्दार्थोभयभूः = शब्दार्थोभयशक्तिजन्मा, सः च = असौ ध्वनिः च वाक्यमेव एकः संश्रयः (आश्रयो) यस्य सः वाक्यैकसंश्रयः = केवलं वाक्यनिष्ठः, असौ वाक्यगत एक एव भेदो भवतीति तात्पर्यः।

असौ = सः, रसाद्याख्यः = रसादिराख्या यस्य स रसादिनामकः, अस्फुटक्रमः = असंलक्ष्यक्रमव्यङ्ग्यध्वनिः, षोढा = षड्विधः इति, यथा – पदैकदेशे = पदांशे, रचना – वर्ण–वाक्य–पदेषु अपि = रचनायां, वर्णे, वाक्ये, पदे चापि प्रबन्धे = वाक्यसमूहे चेति। एषु = एतेषु, सप्तदशसु = सप्तदशभेदेषु, एकम् = अस्फुटक्रमम् = एकमात्रम् असंलक्ष्यक्रमव्यङ्ग्यं, परित्यज्य = वर्जयित्वा, आद्या ये = पूर्वोक्ताः ये, षोडश = षोडशभेदाः ते वाक्यपदाश्रयात् = वाक्यस्य पदस्य चाश्रयात्, द्विगुणाः = द्विगुणिताः स्युः, पदवाक्यगतत्वेन (१६ x २ = ३२), द्वात्रिंशत्संख्याकाः भेदा भवन्तीति।

अथ प्रबन्धेऽपि = काव्यादिरूपे, वाक्यसमूहेऽपि अर्थशक्तिभुवः = अर्थशक्तिजस्य, द्वादश भिदः = द्वादशभेदाः सञ्जायन्ते।

**भावार्थः** – शब्दार्थोभयशक्ति–समुद्भवस्य ध्वनेः केवलं वाक्यमात्रगत एक एव भेदो भवति। असंलक्ष्यक्रमव्यङ्ग्यः रसादिध्वनिश्च सप्रबन्धं षड्विधो भवति। तद्यथा – पद–पदांश–वर्ण–रचना–वाक्य–प्रबन्धगतत्वेन च। एषु सप्तदशसु भेदेषु असंलक्ष्यक्रमव्यङ्ग्यमित्येकं परित्यज्य अवशिष्टाः षोडश भेदाः पुनः वाक्यस्य पदस्य चाश्रयात् द्विगुणाः भवन्ति। इत्थं द्वात्रिंशद् भेदाः एतावत्पर्यन्तं सम्पद्यन्ते।

**प्रसङ्गः** – अथ सर्वान् भेदान् संकलयति –



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**द्वात्रिंशद्द्वादशैकः षट् सर्वसङ्कलितध्वनेः।**
**भेदाः स्युरेकपञ्चाशत् सम्भिन्नास्तु सहस्रशः॥१२॥**

**अन्वयः** – द्वात्रिंशत्, द्वादश, एकः, षट् (चेति) सर्वसङ्कलितध्वनेः एकपञ्चाशत् भेदाः सम्भिन्नाः तु सहस्रशः।

**व्याख्या** – अथेदानीं ध्वनेरेकपञ्चाशद्भेदान् सङ्कलयन्नाह – द्वात्रिंशदिति। द्वात्रिंशत् च द्वादश च एकश्च षट् चेति सर्वः सङ्कलितः ध्वनिरिति सर्वसङ्कलितध्वनिः, तस्य सर्वसङ्कलितध्वनेः = सर्वेषां भेदानां सङ्कलनेन एकपञ्चाशद्भेदाः (३२+१२+१+६ = ५१) सम्भवन्ति। सम्भिन्नास्तु = सङ्कर-संसृष्टिभ्यां सम्मिलितास्तु सहस्रशो भेदाः = असंख्य – भेदाः, स्युः = भवेयुः, भवितुमर्हन्तीत्याशयः।

साहित्यदर्पणे तु एतया रीत्या ध्वनिभेदानां संख्या (५३५५) परिमिता वर्णिता वर्तते।

**प्रसङ्गः** – अथ सम्प्रति पुनः व्यङ्ग्यस्य विभागमाह –

**वक्तृस्यूतं बोधयितुं व्यङ्ग्यं वक्तुरभीप्सितम्।**
**स्वाङ्कुरितमतद्रूपं स्वयमुल्लसितं गिरः॥१३॥**

**अन्वयः** – (तात्पर्यं) बोधयितुं वक्तुः अभीप्सितं व्यङ्ग्यं – वक्तृस्यूतम्। अतद्रूपं गिरः स्वयम् उल्लसितं (व्यङ्ग्यं) – स्वाङ्कुरितम्।

**व्याख्या** – आर्थीव्यञ्जनानिरूपण प्रसङ्गेन पुनः व्यङ्ग्यस्य द्वैविध्यं प्रतिपादयन्नाह – वक्तृस्यूतमिति। बोधयितुं = तात्पर्यं ज्ञापयितुं, कथयितुं, वक्तुः = कथयितुः, अभीप्सितम् = अभिलषितं यत् व्यङ्ग्यं तत् वक्तृस्यूतं = वक्तृतात्पर्यविषयीभूतं व्यङ्ग्यं भवतीति शेषः। उदाहरणं यथा – 'गङ्गायां घोषः' इत्यत्रैतद् वाक्यप्रयोक्तुः शीतत्वपावनत्वादि व्यङ्ग्यं बोधयितुम् अभीप्सितम्। अतो वक्तृस्यूतव्यङ्ग्यमिदम्। पुनश्च यद् व्यङ्ग्यम्, अतद्रूपं = वक्तृतात्पर्य-अविषयीभूतं गिरः = वाचः, स्वयं = स्वतः एव, उल्लसितम् = अभिव्यक्तं भवति तत् स्वाङ्कुरितं = स्वाङ्कुरितनामव्यङ्ग्यं भवति। उदाहरणं यथा – 'गतोऽस्तमर्क' इति। अत्र बोद्धृभेदात् क्वचित् गावो गृहे प्रवेश्यन्तां, कुत्रचित् अभिसरणकालो जातः, क्वचित् प्रियमिनलनवेला प्राप्ता 'अकालोऽयमध्ययनस्य' कुत्रचित् चेति नानाविधा व्यङ्ग्यार्थाः बोद्धा स्वयमेव जायन्ते न तु ते वक्तृतात्पर्यविषयीभूताः। अतोऽतत्र स्वाङ्कुरितं व्यङ्ग्यमवगन्तव्यम्।

**भावार्थः** – यत्र वक्ता स्वीयं तात्पर्यं बोधयितुं व्यङ्ग्यार्थप्रतिपादकान् शब्दान् प्रयोगे आनयति तद् वक्तृस्यूत-व्यङ्ग्यं भवति। यथा – 'गङ्गायां घोषः' इत्यादौ। पुनश्च यत्र व्यङ्ग्यं वक्तृ-तात्पर्याऽविषयीभूतं स्वयमेवाभिव्यक्तं स्यात्तत्र स्वाङ्कुरितं व्यङ्ग्यं बोध्यमिति। यथा – गतोऽस्तमर्क इत्यादौ।

**प्रसङ्गः** – अथेदानीं वक्तृस्यूतव्यङ्ग्यस्य भेदचतुष्ट्यं प्रतिपादयति –

**कश्चित् साधारणः कश्चिदामन्त्र्य प्रतिबोधितः।**
**कश्चित्तटस्थः कश्चिच्च बोधितप्रतिबोधितः॥१४॥**
**इत्येवं बोद्धृवैचित्र्याद् वक्तृस्यूतं चतुर्विधम्।**

**अन्वयः** – कश्चित् साधारणः, कश्चित्, आमन्त्र्य प्रतिबोधितः, कश्चित् तटस्थः, कश्चित् च बोधित-प्रतिबोधित-इति एवं बोद्धृ-वक्तृ वैचित्र्यात् वक्तृस्यूतं (व्यङ्ग्यं) चतुर्विधम्।

**व्याख्या** – वक्तृस्यूतस्य भेदान् आह – कश्चिदिति। बोद्धृवैचित्र्यादिति। कश्चित् = कश्चन, साधारणः = वक्तृतात्पर्याऽनभिज्ञो बोद्धा भवति, कश्चित् आमन्त्र्य = सम्बोध्य प्रतिबोधितो भवति, कश्चित् तटस्थः, कश्चिच्च



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

बोधितप्रतिबोधितो भवति। इत्येवम् = इत्थं बोद्धुः वैचित्र्यात् = बौद्धव्यवैशिष्ट्यात्, श्रोतृभेदाद् वक्तृस्यूतं व्यङ्ग्यं चतुर्विधं = चतुष्प्रकारं भवति।

**भावार्थः** – श्रोतृवैशिष्ट्याद् वक्तृस्यूतव्यङ्ग्यं चतुर्विधं भवति। तद्यथा –

१. यः वक्तुः तात्पर्याऽनभिज्ञः स्वमनोऽनुकूलं व्यङ्ग्यार्थं गृह्णाति, सः साधारणो बोद्धा भवति। उदाहरणं यथा – 'अस्तं गतो भानुमान्' इत्यत्र वक्त्रा केन तात्पर्येण इदं वाक्यं प्रयुक्तमिति अभिज्ञस्यापि जनस्य स्वाभिप्रायानुसारमर्थबोधो भवत्येव।

२. सम्बोधनपूर्वकं यं प्रति स्वतात्पर्यप्रतिबोधनं क्रियते स बोद्धा (श्रोता) आमन्त्र्य प्रतिबोधितः। उदाहरणं यथा – 'पथिक नात्र स्रस्तरमपि' इत्यादौ। इत्यत्र पथिक इति सम्बोध्य उन्नतपयोधरादिशब्दैः नायिकया उपभोगायात्रैव तिष्ठ इति स्वाभिप्रायः प्रतिबोधितः।

३. सम्बोधनं विनाऽपि यद्वा सम्बोधननिरपेक्षः यो वक्तुः तात्पर्यं गृह्णाति स तटस्थः श्रोता। उदाहरणं यथा –

'पश्य निश्चल निस्तब्धा बिसिनीपत्रे राजते बलाका।
निर्मल-मरकतभाजन - परिस्थिता शङ्खशुक्तिरिव॥

इत्यत्र सखीं प्रति कथयन्त्या नायिकया अकृतसम्बोधनं तटस्थं जनं प्रति स्वकीयं सङ्केतस्थानमुक्तम्।

४. अन्येन बोधितेन पुनरन्यः प्रतिबोध्यमानः श्रोता बोधितप्रतिबोधितः। उदाहरणं यथा –

प्राणेश विज्ञप्तिरियं मदीया तत्रैव ज्ञेयाः दिवसाः कियन्तः।
अत्र स्थितिर्युक्तिमती न देशे करा हिमांशोरपि तापयन्ति॥

अत्र नायिकाबोधितेन वक्त्रा नायकः प्रतिबोधितः। इत्थं श्रोतृवैशिष्ट्याद् वक्तृस्यूतव्यङ्ग्यं चतुर्विधम्।

**प्रसङ्गः** – अथ स्वाङ्कुरितव्यङ्ग्यं प्रतिपादयति –

**उपेक्षाह्निवाभ्यां च द्विधा स्वाङ्कुरितं मतम्॥ १५॥**
**भूतादिकालभेदेन निह्नवः स्यादनेकधा।**
**अनेनापि प्रभेदेन व्यक्तिवल्ली विजृम्भते॥ १६॥**

**अन्वयः** – स्वाङ्कुरितं च उपेक्षा-निह्नवाभ्यां द्विधा मतम्। भूतादि-कालभेदेन निह्नवः अनेकधा स्यात्। अनेन अपि प्रभेदेन व्यक्ति-वल्ली विजृम्भते।

**व्याख्या** – स्वाङ्कुरितव्यङ्ग्यस्य भेदद्वयं प्रतिपादयन्नाह – स्वाङ्कुरितमिति। उपेक्षा च निह्नवश्चेति उपेक्षानिह्नवौ ताभ्यां उपेक्षानिह्नवाभ्यां, अगूढगूढाभ्यां द्विधा = द्विप्रकारकं, मतं = स्वीकृतम्। तत्रागूढव्यङ्ग्यस्योदाहरणं यथा –

'अनेन लोक गुरुणा सतां धर्मोपदेशिना।
अहं व्रतवती स्वैरमुक्तेन किमतः परम्॥'

अत्र लोकगुरुणा धर्मोपदेशिनाऽपि शाक्यमुनिना तिर्यग्योषिति बलात्कारेणोपभोगः। इति व्यङ्ग्यार्थे वाच्य इव स्फुटनादत्रागूढव्यङ्ग्यमवगन्तव्यम्।

गूढ (निह्नव) व्यङ्ग्यस्योदाहरणं यथा – 'उपकृतं बहु तत्र किमुच्यते' इत्यादि। अत्र अपकारातिशयरूपं व्यङ्ग्यमतीव गूढमस्ति, तस्मादत्र गूढव्यङ्ग्यं बोध्यम्।

अथ निह्नवस्यानेकरूपतां प्रतिपादयन्नाह – भूतादिति। भूतादिकालभेदेन = भूत-भविष्यद्वर्तमानकालभेदेन, निह्नवः अनेकधा = अनेकप्रकारः भवति। उदाहरणं यथा –



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

श्वश्रूः क्रुध्यतु निर्दिशन्तु सुहृदो निदन्तु वा मातर –
स्तस्मिन् किन्तु न मन्दिरे सखि पुनः स्वापो विधेयो मया।
आखोराक्रमणाय कोणकुहरादुत्फालमातन्वती,
मार्जारीनखरैः खरैः कृतवती कां कां न मे दुर्दशाम्॥

अत्र भूतभविष्यद्वर्तमानसुरतगोपनं व्यङ्ग्यम् इति। अनेन अपि = एतेन अपि, प्रभेदेन = व्यङ्ग्यार्थमूलक-स्वाङ्कुरितव्यङ्ग्यभेदेनापि, व्यक्तिवल्ली = व्यञ्जनालता, विजृम्भते = विकसति, विस्तारं प्राप्नोति, अनेकानेकभेदयुक्ता भवतीति भावः।

**भावार्थः** – उपेक्षा निह्नवाभ्याम् अगूढगूढाभ्यां स्वाङ्कुरितं व्यङ्ग्यं द्विधा स्वीकृतमस्ति। इत्थमेव पुनः भूतभविष्यद्वर्तमानकालभेदाद् निह्नवः अनेकधा जायते। अनेनापि भेदप्रविभागेन लक्षणामूलव्यञ्जनारुपा लता अनेकभेदयुक्ता भवतीत्यर्थः।

**प्रसङ्गः** – अथेदानीं वाच्यव्यङ्ग्यम् निर्दिशन्नाह –

**नानाप्रभेदा नियताः क्वचित् प्रकरणादिना।**
**अर्थेऽर्थमन्यं यं वक्ति तद्वाच्यव्यङ्ग्यमिष्यते॥१७॥**

**अन्वयः** – नानाप्रभेदा (वाक्) प्रकरणादिना क्वचित् नियता (अपि) अर्थे यम् अन्यम् अर्थं वक्ति–तद् वाच्यव्यङ्ग्यम् इष्यते।

**व्याख्या** – वाच्यव्यङ्ग्यमाह – नानेति। नाना = अनेकाः, प्रभेदाः = भिदः, अर्था वा, नानार्था, अनेकार्था वा वाक् प्रकरणादिना = प्रकरणाद्यनुरोधेन, क्वचित् = कस्मिंश्चित् अर्थे, नियता = नियमिता, एकार्थवाचत्वेन नियन्त्रिता सती यमन्यमर्थं = यं वाच्यातिरिक्तं द्वितीयमर्थं, वक्ति = प्रकटयति, तद्वाच्यव्यङ्ग्यम् इष्यते = वाच्यव्यङ्ग्यनाम्ना कथ्यते। एतदेव च अभिधामूलाव्यङ्ग्यमप्युच्यते।

**भावार्थः** – प्रकरणादिद्वारा अनेकार्थशब्दानाम् एकार्थनिर्णये सति अपि यो अन्यो अर्थः प्रतीयते स एव वाच्यव्यङ्ग्यनाम्नोच्यते। अस्यैवापरं नाम अभिधामूलव्यङ्ग्यमपि वर्तते।

उदाहरणं यथा – भद्रात्मनो दुरधिरोहतनोर्विशाल–
वंशोन्नतेः कृतशिलीमुखसङ्ग्रहस्य।
यस्याऽनुपप्लवगतेः परिवारणस्य,
दानाम्बुसेकसुभगः सततं करोऽभूत्॥

अत्र प्रकरणद्वारा राजाऽर्थो नियमित। अतः गजरूपो अर्थो न केवलं वाच्यः प्रत्युत वाच्यव्यङ्ग्यरुपो विद्यते।

**प्रसङ्गः** – इत्थं ध्वनिभेदनिरूपणं कृत्वा सम्प्रति मयूखसमाप्तिं सूचयति –

**महादेवः सत्रप्रमुखमखविद्यैकचतुरः**
**सुमित्रा तद्भक्ति प्रणिहितमतिर्यस्य पितरौ।**
**मयूखस्तेनासौ सुकविजयदेवेन रचिते**
**चिरं चन्द्रालोके महति मुनिसंख्यः सुखयतु॥२९॥**

**॥ इति चन्द्रालोकालङ्कारे ध्वनिनिरूपणो नाम सप्तमो मयूख॥**

**भावार्थः** – अन्वयो व्याख्या च पूर्ववदेव। ऋतुसंख्य इत्यस्य स्थाने मुनिसङ्ख्य इति योजनीयः। मुनयः = सप्तसंख्याकाः प्रसिद्धाः। तत्सङ्ख्यकः सप्तमो मयूख इत्यर्थः।

**॥ इति पीयूषवर्षेण श्रीजयदेवकविना विरचिते चन्द्रालोके ध्वनिनिरूपणो नाम सप्तमो मयूखः सम्पन्नः॥**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**योग्यताविस्तारः**






Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

व्यङ्ग्यस्य विभागान्तरम्

- वक्तृस्यूतव्यङ्ग्यम् (गंगायां घोषः)
  - १. साधारणो बोधा
  - २. आमन्त्र्य प्रतिबोधितः
  - ३. तटस्थः
  - ४. बोधितप्रतिबोधितः
- स्वाङ्कुरितव्यङ्ग्यम् (गतोऽस्तमर्कः)
  - उपेक्षितव्यङ्ग्यम् (अगूढम्)
  - निह्नुतव्यङ्ग्यम् (गूढम्)



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## अभ्यास-प्रश्ना:

**बहुविकल्पात्मकप्रश्ना: –**

१. चन्द्रालोकानुसारं सर्वसङ्कलितध्वने: भेदा: भवन्ति –
   (क) द्वादश (ख) एकपञ्चाशत्
   (ग) द्वात्रिंशत् (घ) षट् ( )

२. रसभावतदाभासादयोऽन्तर्निहिता भवन्ति –
   (क) असंलक्ष्यक्रमव्यङ्ग्ये (ख) संलक्ष्यक्रमव्यङ्ग्ये
   (ग) अर्थान्तरसङ्क्रमितवाच्ये (घ) अत्यन्ततिरस्कृतवाच्ये ( )

३. वक्तृस्यूत-व्यङ्ग्यस्य भेदा: सन्ति –
   (क) पञ्च (ख) चत्वार:
   (ग) सप्त (घ) त्रय: ( )

४. ध्वनेर्भेदा: संभिन्नास्तु भवन्ति –
   (क) लक्षश: (ख) शतश:
   (ग) कोटिश: (घ) सहस्रश: ( )

**अतिलघूत्तरात्मकप्रश्ना: –**

१. विवक्षितवाच्यध्वनि: कतिविधो भवति ?
२. अविवक्षितवाच्यध्वने: भेदयोर्नाम्नी लेख्ये।
३. व्यञ्जनात्मको व्यापार: कीदृशो भवति ?
४. संलक्ष्यक्रमव्यङ्ग्यध्वनि: कतिविधो भवति ?
५. असंलक्ष्यक्रमव्यङ्ग्यध्वनि: कतिविधो भवति ?
६. असंलक्ष्यक्रमव्यङ्ग्यध्वनौ केषामन्तर्भावो भवति ?
७. स्वाङ्कुरितव्यङ्ग्यं कतिविधम् ?

**लघूत्तरात्मकप्रश्ना: –**

१. व्यञ्जनात्मकव्याापारस्य प्रमुखान् भेदान् लिखत।
२. संलक्ष्यक्रमव्यङ्ग्यध्वनि: कतिविधो भवति ?नामोल्लेखं कुरुत।
३. वक्तृस्यूतव्यङ्ग्यस्य भेदानां नामानि लेख्यानि।
४. वाच्यव्यङ्ग्यं निरूपयत।
५. अर्थशक्तिजन्यस्य ध्वने: भेदान् विवेचयत।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**निबन्धात्मकप्रश्नाः –**

१. ध्वनिः व्यञ्जना स्वरूपं विवेचयत।
२. ध्वनिः कतिविधः ?चन्द्रालोकानुसारं तद्भेदाः नामतो गणनीयाः।
३. अविवक्षितवाच्यध्वनिः सोदाहरणं विवचेनीयः।
४. विवक्षितवाच्यध्वनेः भेदान् सोदाहरणं विवेचयत।
५. व्यञ्जनाव्यापारं निरूप्य तद्भेदान् प्रदर्शयत।
६. असंलक्ष्यक्रमव्यङ्ग्यध्वनिं सभेदं निरूपयत।
७. विभागान्तरं व्यङ्ग्यस्य भेदान् सोदाहरणं विवेचयत।
८. शब्दस्य वृत्तयः कतिविधा भवन्ति ?सोदाहरणं विवेचनीयाः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# अष्टमो मयूखः

## गुणीभूतव्यङ्ग्यनिरूपणात्मकः

**प्रसङ्गः** – सप्तमे मयूखे उत्तमकाव्यत्वेन ध्वनिनिरूपणानन्तरं साम्प्रतं गुणीभूतव्यङ्ग्यं नाम मध्यमं काव्यं निरूपयति –

**यद् व्यज्यमानं मनसः स्तैमित्याय स नो ध्वनिः।**
**अन्यथा तु गुणीभूतव्यङ्ग्यमापतितं त्रिधा॥१॥**

**अन्वयः** – यत् व्यज्यमानं मनसः स्तैमित्याय (भवति) सः नः (मतेन) ध्वनिः। अन्यथा तु गुणीभूतव्यङ्ग्यम् आपतितं – त्रिधा (भवति)।

**व्याख्या** – गुणीभूतव्यङ्ग्यं वर्णयन्नाह – यद् व्यज्यमानमिति। यद् = येन काव्येन, व्यज्यमानं = व्यञ्जनया प्रतीयमानं व्यङ्ग्यं, मनसः = सहृदयहृदयस्य, स्तैमित्याय = स्तिमितस्य भावः स्तैमित्यं तस्मै स्तैमित्याय = आर्द्रीभावाय, आह्लादाय भवति। सः नः = अस्माकं मतेन, ध्वनिः = ध्वन्यतेऽस्मिन्निति व्युत्पत्त्या ध्वनिः, उत्तमकाव्यत्वेन ध्वनिरिति। यत्र वाच्यार्थापेक्षया व्यङ्ग्यार्थस्यात्यन्तं चमत्कारजनकता तत्र ध्वनिरिति। यथोक्तं ध्वन्यालोके – 'काव्यविशेषः सः ध्वनिरिति सूरिभिः कथितः' इति। अन्यथा तु = नो चेत्, व्यङ्ग्यस्य चमत्कारजनकत्वाभावे तु, गुणीभूतव्यङ्ग्यं = गुणीभूतव्यङ्ग्यं नाम मध्यमं काव्यं भवति, तच्च गुणीभूतव्यङ्ग्यं त्रिधा आपतितं = त्रिप्रकारकं भवति।

**भावार्थः** – व्यञ्जनया प्रकाश्यमानं व्यङ्ग्यं सहृदयहृदयस्य आह्लादाय भवति तदेव ध्वनिमत् काव्यम् उत्तमकाव्यं भवति। आह्लादस्य चमत्काराभावे वा गुणीभूतव्यङ्ग्यमत् काव्यं मध्यमकाव्यं कथ्यते। तच्च त्रिप्रकारकं भवति।

**प्रसङ्गः** – अथ गुणीभूतव्यङ्ग्यस्य त्रैविध्यं प्रतिपादयति –

**व्यक्त एव क्वचिद् व्यङ्ग्यः क्वचिदर्थस्वभावतः।**
**क्वचिच्चारुतरस्याग्रे स विमुञ्चति चारुताम्॥२॥**

**अन्वयः** – क्वचित् व्यङ्ग्यः व्यक्तः एव। क्वचित् अर्थस्वभावतः। क्वचित् च सः (व्यङ्ग्यः) चारुतरस्य अग्रे चारुतां मुञ्चति।

**व्याख्या** – गुणीभूतव्यङ्ग्यस्य त्रैविध्यमाह – व्यक्त एव इति। क्वचित् = कुत्रचित्, कस्मिंश्चित् स्थाने,



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

व्यङ्ग्यः = व्यञ्जनया प्रकाश्यमानोऽर्थः, व्यङ्ग्यार्थः, व्यक्तः एव = प्रकटरूपः एव, अतिप्रस्फुटः [अयं प्रथमः प्रकारः] क्वचित् = कुत्रचन, अर्थस्वभावतः = अर्थस्य = वाच्यार्थस्य स्वभावतः = स्वभावात्, वाच्यार्थस्वभावात्, व्यङ्ग्यः = व्यङ्ग्यार्थः [अयं द्वितीय प्रकारः] क्वचिच्च = कुत्रचन, चारुतरस्य अग्रे = अतिरमणीय वाच्यार्थस्य सम्मुखे, सः = व्यङ्ग्यार्थः, चारुतां = स्वीयं मनोहरतां, रम्यतां, विमुञ्चति = परित्यज्यतीति [अयं तृतीयः प्रकारः]

**भावार्थः** – गुणीभूतव्यङ्ग्यं त्रिप्रकारकं भवति। तद्यथा – व्यङ्ग्यार्थः, क्वचिद् वाच्यार्थवद् अतिमात्रं स्पष्टो भवति। यद्वा वाच्यस्यैव प्राधान्यं भवति, वाच्यापेक्षया व्यङ्ग्यं गुणीभूतं जायते। क्वचित् तु वाच्यव्यङ्ग्ययोः प्राधान्यं समं भवति। यद्वा स्वभावत एवाऽचारुः भवति। क्वचिच्च वाच्यव्यङ्ग्ययोः प्राधान्ये सन्देहावसरो भवति। यद्वा व्यङ्ग्यापेक्षया वाच्यार्थः मनोहरो भवति।

उपर्युक्तेषु त्रिषु गुणीभूतव्यङ्ग्यभेदेषु प्रथमः प्रकारः अगूढपदेनोक्तमन्यैः। द्वितीयं यत्र व्यङ्ग्यापेक्षया वाच्यमेव समधिकचमत्कारि प्रधानं वा तत्तु अपराङ्गं, वाच्यसिद्ध्यङ्गम्, अस्फुटं, काक्वाक्षिप्तं तथा असुन्दरमिति उक्तमस्ति। तृतीयं समप्राधान्यं तुल्यप्राधान्यमिति। इत्थं गुणीभूतव्यङ्ग्यस्याष्टौ भेदाः जायन्ते। यथोक्तमपि –

अगूढमवरस्याङ्गं वाच्यसिद्ध्यङ्गमस्फुटम्।
सन्दिग्धतुल्यप्राधान्ये काक्वाक्षिप्तमसुन्दरम्॥
व्यङ्ग्यमेवं गुणीभूतव्यङ्ग्यस्याष्टौ भिदा स्मृताः। इति।

**प्रसङ्गः** – अथ गुणीभूतव्यङ्ग्यस्याष्टौ भेदान्निरूपयन्नसौ प्रथमं भेदं (अगूढमिति) निरूपयति –

**अगूढं कलयेदर्थान्तरसङ्क्रमितादिकम्।**
**विस्मृतः किमपांनाथ! स त्वया कुम्भसम्भवः॥ ३॥**

**अन्वयः** – अर्थान्तरसङ्क्रमितादिकम् अगूढं कलयेत्। (यथा) – अपांनाथ सः कुम्भसम्भवः किं त्वया विस्मृतः ?

**व्याख्या** – अगूढगुणीभूतव्यङ्ग्यं लक्षयन्नाह – अगूढमिति। अर्थान्तरसङ्क्रमितादिकम् = अन्यमर्थमर्थान्तरम्, अर्थान्तरे सङ्क्रमितमर्थान्तरसङ्क्रमितम् आदौ यस्य तत् अर्थान्तरसङ्क्रमितादिकम्। आदिपदेन अत्यन्ततिरस्कृतवाच्यस्य ग्रहणम्, तथाभूतं गुणीभूतं व्यङ्ग्यम् अगूढं = स्फुटं सामान्यजनैरपि झटिति ज्ञायमानं, कलयेत् = जानीयात्। अर्थान्तरसङ्क्रमितादिकं व्यङ्ग्यम् अगूढगुणीभूतव्यङ्ग्यं स्यादिति।

**उदाहरति** – समुद्रं प्रति कस्यचिदुक्तिः – हे अपांनाथ! हे समुद्र! सः = सर्वलोकप्रसिद्धः, कुम्भसम्भवः = कुम्भः = कलशः, सम्भवः = उत्पत्तिस्थानं यस्यासौ, कुम्भसम्भवः = समुद्रपानकर्त्ता, ऋषिः अगस्त्यः, किं त्वया विस्मृतः = किं भवता विस्मृतिंगतः ? अपितु न विस्मृतः। समूलोन्मूलकं शत्रुं न हि कश्चित् कदाचिदपि विस्मरतीति तस्मात् त्वया सदा भेतव्यमिति भावः।

**भावार्थः** – अर्थान्तरसङ्क्रमितादिकं व्यङ्ग्यम् अगूढनामकं गुणीभूतव्यङ्ग्यं भवति। यथा ह्यस्मिन्नुदाहरणे 'कुम्भसम्भवः' 'त्वया' 'अपांनाथ' 'विस्मृत' इत्यादिषु पदेषु स्थितं 'सोऽगस्त्यमहर्षिः' त्वां पुनः पातुं समर्थोऽस्ति तस्मात्त्वया सदा भेतव्यमिति व्यङ्ग्यं वाच्यार्थवत् स्फुटरूपेण सर्वैः स्थूलबुद्धिभिरपि ज्ञातुं शक्यते। तस्मादत्र अगूढगुणीभूतव्यङ्ग्यमवगन्तव्यम्।

**प्रसङ्गः** – अथ अपराङ्गगुणीभूतव्यङ्ग्यं निरूपयति –

**अपरस्य रसादेश्चेदङ्गमन्यद्रसादिकम्।**
**हा हा! मत्कुचकाश्मीरलिप्तं भिन्नमुरः शरैः॥ ४॥**

**अन्वयः** – अन्यत् रसादिकं चेत् अपरस्य रसादेः अङ्गम् (तर्हि अपराङ्गनामकभेदः)। (यथा) – हा हा! मत्कुच काश्मीरलिप्तम् उरः शरैः भिन्नम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**व्याख्या** – अपराङ्गगुणीभूतव्यङ्ग्यं लक्षयति – अपरस्येति। अन्यत् = अपरं, रसादिकं = शृङ्गारादिकम्, अन्नादिनि भावरसाभासभावाभासादीनां ग्रहणमिति रसादिव्यङ्ग्यं, चेत् = यदि, अपरस्य रसादेः = अन्यस्य वीरादेः, अङ्गम् = अङ्गभूतम्, उत्कर्षकं भवेत्तदा अपराङ्गगुणीभूतव्यङ्ग्यमस्ति।

**उदाहरति** – समरभूमौ पतितं स्वकान्तम् अवलोक्य तदीयप्रेयस्या उक्तिरियं – हा हन्त! मत्कुचकाश्मीरलिप्तं = ममस्तनकेसरेण संलिप्तम्, उरः = वक्षस्थलं, शरैः = बाणैः, भिन्नं = विदीर्णम्। अत्र शृङ्गाररसः करुणरसस्याङ्गमभूत् तस्मादत्र अपराङ्गगुणीभूतव्यङ्ग्यमस्ति।

**भावार्थः** – यत्र कश्चिद् रसादिः अन्यस्य रसस्य अङ्गं भवति तत्र अपराङ्गगुणीभूतव्यङ्ग्यमवबोध्यम्। यथा प्रकृतोदाहरणे शृङ्गाररसः करुणरसस्य अङ्गभूताद् अपराङ्गगुणीभूतव्यङ्ग्यत्वेन वर्तते।

**प्रसङ्गः** – अथ वाच्यसिद्ध्यङ्गं निरूपयति –

**तथा वाच्यस्य सिद्ध्यङ्गं नौरर्थो वारिधेर्यथा।**
**संश्रित्य तरणिं धीरास्तरन्ति व्याधिवारिधीन्॥५॥**

**अन्वयः** – यथा नौः अर्थः वारिधेः (सिद्ध्यङ्गं) तथा (एव अर्थः व्यङ्ग्यार्थः) वाच्यस्य सिद्ध्यङ्गम् (भवति)।(उदाहरणं) धीराः तरणिं संश्रित्य व्याधि-वारिधीन् तरन्ति।

**व्याख्या** – वाच्यसिद्ध्यङ्गमाह – तथेति। यथा = येन प्रकारेण, नौः = नौकारुपो व्यङ्ग्यार्थः वाच्यस्य वारिधिसम्बन्धिरुपकस्य सिद्धेः उपपादकः अङ्ग, तथा = तद्वत् अर्थः = व्यङ्ग्यार्थः, वाच्यस्य = वाच्यार्थस्य, सिद्ध्यङ्गं = साधकम्, उपपादकं भवतीति शेषः, सिद्धेः अङ्गं यद्वा सिद्ध्यै अङ्गम् इति सिद्ध्यङ्गम् = एतन्नामकं गुणीभूतव्यङ्ग्यं भवतीत्यर्थः।

**उदाहरति** – संश्रित्येति। धीराः = धैर्यशालिनो जनाः, तरणिं = सूर्यं, संश्रित्य = आश्रित्य, आराध्य वा, व्याधय एव वारिधयस्तान् व्याधिवारिधीन् = रोगसमुदान्, तरन्ति = पारं यान्ति। 'आरोग्यं भास्करादिच्छेत्, ऐश्वर्यञ्च महेश्वरात्' इति पुराणवचनात् सूर्याराधनेन व्यक्तिः रोगमुक्तो भवतीति भावः। अत्र हि तरणि पदं द्वयर्थको विद्यते – सूर्ये नौकायाञ्चेति। तत्र व्याधितरणप्रसङ्गे सूर्य एव प्राकरणिकः परं तथापि नौकारुपम् अर्थं व्यङ्ग्यरूपेण प्रकाशयत्येव सादृश्यसन्दर्भात्। व्याधिवारिधीन् इत्यत्र रूपकसमासाद् वारिधिपदस्य प्राधान्यात् तत्तरणे नौकाया एवोपयोगिता यथा जनाः नौकया वारिधींस्तरन्ति तथैव धीराः सूर्येण व्याधी स्तरन्ति इति प्रतीतिर्न जायते। अस्य वाक्यार्थस्य सम्पादनं तावन्न भवति यावत् नौकारुपव्यङ्ग्यार्थस्य प्रतीतिर्न भवति। एवञ्चात्र व्यङ्ग्यं वाच्यसिद्धेऽङ्गमिति वाच्यसिद्ध्यङ्गव्यङ्ग्यं विद्यते।

**भावार्थः** – यत्र व्यङ्ग्यार्थो वाच्यार्थम् सम्पादयितुं सहायकत्वेन भवति तत्र वाच्यसिद्ध्यङ्गगुणीभूतव्यङ्ग्यं भवति। यथा – 'संश्रित्य तरणिमित्यादौ।'

**प्रसङ्गः** – अथ अस्फुटगुणीभूतव्यङ्ग्यं निरूपयति –

**अस्फुटं स्तनयोरत्र कोकसादृश्यवन्मतम्।**
**कुङ्कुमाक्तं स्तनद्वन्द्वं मानसं मम गाहते॥६॥**

**अन्वयः** – कुङ्कुमाक्तं स्तनद्वन्द्वं मम मानसं गाहते। अत्र (उक्ते उदाहरणे इति) स्तनयोः कोकसादृश्यवत् अस्फुटं मतम्।

**व्याख्या** – अस्फुटं गुणीभूतव्यङ्ग्यम् उदाहरणद्वारैव लक्षयति – अस्फुटमिति। सहृदयैरपि व्यङ्ग्य-विलम्ब-वेद्यत्वं स्यात्तर्हि अस्फुटमिति। कुङ्कुमाक्तं = केसरलेपयुक्तं, स्तनद्वयं = स्तनयुगलं, मम = मे, मानसं = चित्तं, गाहते = प्रविशति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

अत्रोदाहरणे कुङ्कुमाक्तयोः एव स्तनयोः कोकसादृश्यम् उपपद्यते। तत्सादृश्यमेवात्र व्यङ्ग्यं, तदपि काव्यमर्मज्ञान् स्पष्टं न प्रतीयते। विलम्बप्रतीतेः कारणादत्रास्फुटगुणीभूतव्यङ्ग्यमवगन्तव्यम्।

**भावार्थः** – सहृदयैः जनैरपि यद् व्यङ्ग्यं झटिति नाऽवगम्यते तद् अस्फुटनाम्ना कथ्यते। यथा प्रकृतोदाहरणे नायिकायाः स्तनयोः चक्रवाकयुग्मेन सादृश्यरुपव्यङ्ग्यं झटिति प्रतीयमानं न भवति। अपितु विचारे कृते सति विलम्बेन प्रतीयते। इत्थं प्रतीयमानार्थस्य विलम्बेन उपस्थितिवशादत्र अस्फुटं गुणीभूतव्यङ्ग्यं वर्तते।

**प्रसङ्गः** – अथ सन्दिग्धप्राधान्यं गुणीभूतव्यङ्ग्यं निरूपयति –

**सन्दिग्धं यदि सन्देहो दैर्घ्याद्युत्पलयोरिव।**
**सम्प्राप्ते नयने तस्याः श्रवणोत्तंसभूमिकाम्॥७॥**

**अन्वयः** – तस्याः नयने श्रवणोत्तंसभूमिकां सम्प्राप्ते। (इति) दैर्घ्यादि + उत्पलयोः इव यदि सन्देहः (तर्हि) सन्दिग्धम्।

**व्याख्या** – उदाहरणपुरस्सरमेव सन्दिग्धप्राधान्यं गुणीभूतव्यङ्ग्यं लक्षयन्नाह – सन्दिग्धमिति। तस्याः = पूर्वानुभूताया नायिकायाः, नयने = नेत्रे, नेत्रयुगलमिति, श्रवणोत्तंसभूमिकां = कर्णाभूषणस्थानं सम्प्राप्ते: = गते, याते। कामिन्याः नेत्रे श्रवणपर्यन्तगते इत्युक्ते दीर्घे स्तः इति वाच्योऽर्थः किन्तु कमलसाम्यमिति व्यङ्ग्योऽर्थः। अत्र कर्णान्तदीर्घे नयने इति वाच्योऽर्थः कर्णावतंसीभूतकमलसदृशे नेत्रे इति व्यङ्ग्योऽर्थश्च इत्यनयोर्मध्ये कः प्रधानः इति सन्देहः उत्पद्यते। अतः सन्देहप्राधान्यादत्र सन्दिग्धप्राधान्यनामकं गुणीभूतव्यङ्ग्यं वर्तते।

तल्लक्षणेऽपि तदेव प्रतिपादितं यद् दैर्घ्याद्युत्पलयोः इव सन्देह तदा सन्दिग्धम्। दैर्घ्यं = दीर्घता आदि = आद्यं यस्य तत् दैर्घ्यादि दैर्घ्यादि, विशालता च उत्पलं = कमलसादृश्यं चेति दैर्घ्याद्युत्पले तयोरिव यदि सन्देहो भवेत्तदा सन्दिग्धम्।

**भावार्थः** – यत्र वाच्यार्थ-व्यङ्ग्यार्थयोः एकतरप्रधानतायां सन्देहः स्यात्तत्र सन्दिग्धप्राधान्यनामकं गुणीभूतव्यङ्ग्यं भवति। यथा उदाहरणेऽस्मिन् नायिकायाः नयने श्रवणपर्यन्तगते, अतो दीर्घे स्तः इति वाच्योऽर्थः। पुनश्च कर्णावतंसीभूतकमलसदृशे नेत्रे इति व्यङ्ग्योऽर्थः। अत्रानयोः वाच्यार्थव्यङ्ग्यार्थयोः कः प्रधानः? इत्येष सन्देहो जायते। अतोऽत्र सन्देहप्राधान्यात् सन्दिग्धप्राधान्यं नाम गुणीभूतव्यङ्ग्यं विद्यते।

**प्रसङ्गः** – अथ तुल्यप्राधान्यनामकं गुणीभूतव्यङ्ग्यं निरूपयति –

**तुल्यप्राधान्यमिन्दुत्वमिव वाच्येन साम्यभृत्।**
**कान्ते त्वदननरुचा ग्लानिमेति सरोरुहम्॥८॥**

**अन्वयः** – कान्ते! त्वत् + आनन-रुचा सरोरुहं ग्लानिम् एति। (इत्थम्) इन्दुत्वम् इव वाच्येन साम्यभृत् (व्यङ्ग्यं) तुल्यप्राधान्यम् (भवति)।

**व्याख्या** – उदाहरणमुखेन तुल्यप्राधान्यं गुणीभूतव्यङ्ग्यमाह – तुल्येति। कान्ते! = सुन्दरि!, त्वदाननरुचा = तवमुखकान्त्या, सरोरुहं = कमलं, ग्लानिं = मालिन्यम्, एति = प्राप्नोति, पराजयमवाप्नोतीति भावः।

सुन्दरि तव मुखकान्त्या कमलं पराजितमिति वाच्योऽर्थः। वस्तुतः कमलानां पराजयस्तु चन्द्रेण भवतीति प्रसिद्धिः वर्तते। इत्युक्ते 'तव मुखं चन्द्रः' इति व्यङ्ग्योऽर्थः। एवमत्र मुखे चन्द्रस्य स्थापनरुपव्यङ्ग्योऽर्थः पुनश्च मुखकान्त्या कमलस्य मालिन्यरूपवाच्योऽर्थः। इत्थमुभयोरर्थयोः तुल्यरूपेण चमत्कारजनकत्वात् तुल्यप्राधान्यनामकं गुणीभूतव्यङ्ग्यमत्रबोध्यम्। एतदेव सर्वं ग्रन्थकारेण तावल्लक्षणे लक्षितं यद् इन्दुत्वमिव = चन्द्रत्वमिव, वाच्येन = वाच्यार्थेन, साम्यं बिभर्त्तीति साम्यभृत् समानं स्यात्तर्हि तुल्यप्राधान्यनामकं गुणीभूतव्यङ्ग्यं भवति।

**भावार्थः** – यत्र वाच्यार्थव्यङ्ग्यार्थयोः प्राधान्यं तुल्यं भवति। तत्र तुल्यप्राधान्यगुणीभूतव्यङ्ग्यं भवति। यथा हि प्रस्तुते उदाहरणे मुखे चन्द्रसादृश्यरुपव्यङ्ग्यार्थस्य, मुखकान्त्या कमलपराभवरुपवाच्यार्थस्य च तुल्यं प्राधान्यं वर्तते। तस्मादत्र तुल्य प्राधान्यनामकं गुणीभूतव्यङ्ग्यमवगन्तव्यम्।

**प्रसङ्गः** – अथ असुन्दरनामकं गुणीभूतव्यङ्ग्यं निरूपयति –



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**असुन्दरं यदि व्यङ्ग्यं स्याद्वाच्यादमनोहरम्।**
**सरस्यामीलदम्भोजे चक्रः कान्तां विलोकते॥९॥**

**अन्वयः** – यदि व्यङ्ग्यं वाच्यात् अमनोहरम् (स्यात् तर्हि) असुन्दरम् (यथा) – आमीलदम्भोजे सरसि चक्रः कान्तां विलोकते।

**व्याख्या** – असुन्दरं गुणीभूतव्यङ्ग्यं लक्षयन्नाह – असुन्दमिति। यदि = चेत्, व्यङ्ग्यं = व्यङ्ग्योऽर्थः, वाच्यात् = वाच्यार्थापेक्षया, अमनोहरम् = असुन्दरम्, अचारु स्यात्तर्हि असुन्दरं गुणीभूतव्यङ्ग्यं भवति।

**उदाहरति** – सरसीति। आमीलन्ति = सङ्कुचन्ति, अम्भोजानि = कमलानि यस्मिंस्तस्मिन् आमीलदम्भोजे, सरसि = सरोवरे, तडागे, चक्रः = चक्रवाकः, कान्तां = चक्रवाकीं, विलोकते = निरीक्षते, कातर्दृष्ट्या विलोकयतीति भावः।

**भावार्थः** – यत्र व्यङ्ग्यार्थस्यापेक्षया वाच्यार्थ एव चमत्कारी भवति तत्र व्यङ्ग्यार्थस्य असुन्दरत्वाद् असुन्दरनामकं गुणीभूतव्यङ्ग्यं बोध्यम्। प्रकृतोदाहरणे कमलसङ्कोचेन रजन्या आगमनं, तेन च भावी वियोगो व्यज्यते। चक्रवाकः पुनः पुनः कान्तां पश्यतीति वाच्यार्थः। अत्र पुनः पुनरवलोकनात्मके वाच्यार्थे तद्व्यग्रता औत्सुक्यञ्च प्रतीयते, न सा कातरता रात्रिजन्यवियोगरुपव्यङ्ग्यार्थेनेति। अतोऽत्र असुन्दरनामकं गुणीभूतव्यङ्ग्यमवबोध्यम्।

**प्रसङ्गः** – अथ काक्वाक्षिप्तनामकंगुणीभूतव्यङ्ग्यं निरूपयति –

**काकुस्थं प्रणतोऽम्भोधिरद्य माद्यतु रावणः।**
**इत्यष्टधा गुणीभूतव्यङ्ग्यमङ्गीकृतं बुधैः॥१०॥**

**अन्वयः** – काकुस्थम् (यथा) – अम्भोधिः काकुस्थं प्रणतः, अद्य रावणः माद्यतु इति अष्टधा गुणीभूतव्यङ्ग्यं बुधैः अङ्गीकृतम्।

**व्याख्या** – काक्वाक्षिप्तनामकं काकुस्थनामकं वा गुणीभूतव्यङ्ग्यमाह – काकुस्थमिति। काकुः = ध्वनेः विकारः, [भिन्नकण्ठध्वनिर्धीरैः काकुरित्यभिधीयते] काक्वा आक्षिप्तं व्यङ्ग्यम् इत्याशयः। काकुद्वारा यत्र व्यङ्ग्यस्य आक्षेपः क्रियते तत्र काकुस्थनामकं काक्वाक्षिप्तनामकं वा गुणीभूतव्यङ्ग्यं भवति।

**उदाहरति** – प्रणत इति। अम्भोधिः = समुद्रः, काकुस्थं = श्रीरामं, प्रणतः = नतः, कृतप्रणामः, अद्य = साम्प्रतं, रावणः = दशाननः, माद्यतु = मदयुक्तो भवतु इति विधिरुपो वाच्यार्थः। तथा च समुद्रपरिवेष्टितायां सर्वथा सुरक्षितायां लङ्कायां रावणो मदं कुर्वन्नासीत् किन्तु सम्प्रति प्रणमता समुद्रेण रामाय मार्गः दत्तः, अद्यापि रावणो माद्यतु इति भिन्नकण्ठेनोच्चार्यमाणे 'नैव माद्यतु' इति निषेधो व्यजते। यावदयं काकुजन्यः व्यङ्ग्यार्थः नैव आगच्छति तावद् वाक्यार्थ एव न सम्पद्यते। तेनात्र काकुस्थं काक्वाक्षिप्तं वा गुणीभूतव्यङ्ग्यं बुधैः = पूर्वाचार्यैः, मनीषिभिः, अङ्गीकृतं = स्वीकृतमिति।

**भावार्थः** – यत्र भिन्नकण्ठेनोच्चार्यमाणत्वाच्छब्दात् कश्चिदन्यो वाच्यार्थभिन्नोऽर्थः प्रतीयते तत्र काकुस्थं यद्वा काक्वाक्षिप्तं नाम गुणीभूतव्यङ्ग्यं भवति। उदाहरणं यथा – काकुस्थं प्रणत इत्यादौ।

**प्रसङ्गः** – इत्थं सभेदं गुणीभूतव्यङ्ग्यं निरूपयित्वा सम्प्रति मयूखसमाप्तिं सूचयन्नाह –

**महादेवः सत्रप्रमुखमखविधैकचतुरः**
**सुमित्रा तद्भक्ति प्रणिहितमतिर्यस्य पितरौ।**
**मयूखस्तेनासौ सुकविजयदेवेन रचिते**
**चिरं चन्द्रालोके महति वसुसंख्यः सुखयतु॥११॥**

**॥ इति चन्द्रालोके गुणीभूतव्यङ्ग्यनिरूपणो नाम अष्टमो मयूख॥**

**भावार्थः** – अन्वयो व्याख्या च पूर्ववदेव केवलं वसुसंख्य इति विशेषः। वसवः = अष्टसंख्याकाः प्रसिद्धाः। तत्संख्यकः अष्टमो मयूखः इत्यर्थः।

**॥ इति पीयूषवर्षेण श्रीजयदेवकविना विरचिते चन्द्रालोके गुणीभूतव्यङ्ग्यनिरूपणो नामाष्टमो मयूखः सम्पन्नः॥**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## अभ्यास-प्रश्नाः

**बहुविकल्पात्मकप्रश्नाः –**

१. यत्र वाच्यार्थापेक्षया व्यङ्ग्यार्थोऽधिकचमत्कारयुक्तो न भवति तत्र भवति –
(क) अधमकाव्यम् (ख) उत्तमकाव्यम्
(ग) ध्वनिकाव्यम् (घ) गुणीभूतव्यङ्ग्यकाव्यम् ( )

२. चन्द्रालोके गुणीभूतव्यङ्ग्यकाव्यं वर्णितम् –
(क) नवमे मयूखे (ख) दशमे मयूखे
(ग) अष्टमे मयूखे (घ) पञ्चमे मयूखे ( )

३. चन्द्रालोके गुणीभूतव्यङ्ग्यं कतिविधं वर्णितम् ?
(क) अष्टविधम् (ख) सप्तविधम्
(ग) दशविधम् (घ) पञ्चविधम् ( )

४. व्यञ्जनाद्वारा प्रकाश्यमानो व्यङ्ग्यार्थः भवति –
(क) अभिधा (ख) लक्षणा
(ग) ध्वनिः (घ) गुणीभूतव्यङ्ग्यः ( )

**अतिलघूत्तरात्मकप्रश्नाः –**

१. गुणीभूतव्यङ्ग्य कः ?
२. ध्वनिः कः ?
३. संश्रित्य तरणिं धीरास्तरन्ति व्याधिवारिधीन् इत्यत्र कः गुणीभूतव्यङ्ग्यः अस्ति ?
४. गुणीभूतव्यङ्ग्यकाव्यं कतिविधं भवति ?

**लघूत्तरात्मकप्रश्नाः –**

१. गुणीभूतव्यङ्ग्यभेदा नामतो गणनीयाः।
२. अगूढगुणीभूतव्यङ्ग्यं कुत्र भवति ?सोदाहरणं विवेचयत।
३. गुणीभूतव्यङ्ग्यकाव्यं कुत्र भवति ?
४. अपराङ्गगुणीभूतव्यङ्ग्यं सोदाहरणं विवेचयत।

**निबन्धात्मकप्रश्नाः –**

१. गुणीभूतव्यङ्ग्यस्य त्रैविध्यं विवेचयत।
२. वाच्यसिद्धयङ्गम् अगूढञ्च सोदाहरणं विवेचयत।
३. तुल्यप्राधान्यम् असुन्दरञ्च सोदाहरणं विवेचयत।
४. सन्दिग्धप्राधान्यगुणीभूतव्यङ्ग्यस्य स्वरूपं प्रदर्श्य तदुदाहरणमपि दातव्यम्।
५. काकुस्थगुणीभूतव्यङ्ग्यं सोदाहरणं निरूपयत।
६. ध्वनि-गुणीभूतव्यङ्ग्ययोरन्तरं सोदाहरणं प्रदर्शयत।
७. गुणीभूतव्यङ्ग्यस्य परिभाषां विलिख्य तस्य भेदानां सोदाहरणं विवेचनं करणीयम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# नवमो मयूखः

## अथ लक्षणा

**प्रसङ्गः** – पूर्वं सप्तमे मयूखे शब्दस्य वृत्तित्रयान्यतमां व्यञ्जनावृत्तिं निरूप्येदानीं लक्षणावृत्तिं निरूपयति –

**मुख्यार्थस्याविवक्षायां पूर्वाऽर्वाची च रूढितः।**
**प्रयोजनाच्च सम्बद्धं वदन्ती लक्षणा मता॥ १॥**

**अन्वयः** – मुख्यार्थस्य अविवक्षायां सम्बद्धं (अर्थं) वदन्ती (वाक्) लक्षणा मता। (सा लक्षणा) रूढितः पूर्वा, प्रयोजनात् च अर्वाची।

**व्याख्या** – लक्षणावृत्तेः स्वरूपमाह – **मुख्यार्थस्येति।** लक्ष्यते अन्योऽर्थः अनयेति लक्षणा। मुख्यार्थस्य = अभिधेयार्थस्य, वाच्यार्थस्य, अविवक्षायां = वक्तुम् इच्छा विवक्षा, न विवक्षा इति अविवक्षा तस्यामिति अविवक्षायां = वक्तुम् अनिच्छायां, तात्पर्यानुपपत्तौ, प्रतिपादन-अनिच्छायमिति, सम्बद्धं = मुख्यार्थसम्बद्धमर्थं, वदन्ती = बोधयन्ती, प्रतिपादयन्ती, वाक् = वृत्तिः, लक्षणा = लक्षणावृत्तिः, मता = अभीष्टा। मुख्यार्थसम्बद्धाऽन्यार्थप्रतिपादकत्वमेव वस्तुतः लक्षणावृत्तित्वमेवेति। सा एव लक्षणा द्विविधा – रूढितः = लोकप्रसिद्धव्यवहारात्, पूर्वा = निरूढलक्षणा, प्रयोजनाच्च = वक्तुस्तात्पर्यानुसन्धानहेतुकात्, उद्देश्यविशेषात्, अर्वाची = अर्वाचीना, प्रयोजनलक्षणा चेति भेदात् द्विधा कथ्यते। मुख्यार्थस्य अविवक्षायाम् अमुख्यार्थबोधने रूढिः प्रयोजनं चेति हेतुद्वयमेव मुख्यम्। इत्थं लक्षणावृत्तिः निरूढलक्षणा प्रयोजनवतीलक्षणा चेति द्विधा जायते।

तत्र निरूढलक्षणा (पूर्वा) यथा – 'कलिङ्गसाहसिकः'। अत्र कलिङ्गशब्दस्य देशविशेषरुपः मुख्यार्थः। स चात्र अविवक्षितः। तेन मुख्यार्थसम्बद्धः कलिङ्गदेशस्थाः पुरुषाः साहसिका' इति अन्योऽर्थ लक्ष्यते। कलिङ्गदेशस्य तन्निवासिनाञ्च परस्परं संयोगसम्बन्धः। कलिङ्गादिशब्दानां पुरुषार्थेषु प्रसिद्धत्वादत्र निरूढलक्षणाऽवगन्तव्या।

प्रयोजनवतीलक्षणा (अर्वाची) यथा – 'गङ्गायां घोषः' घोषो नाम पर्णकुटीरम् आभीरपल्लीवेति। गङ्गा प्रवहमाना नदी वर्तते, जलप्रवाहे घोषस्य सम्भावना न कर्तुं शक्यते। अतो मुख्योऽर्थ वाच्यार्थः न सङ्घटते। तेन 'गङ्गातीरे घोषः' इत्यर्थो लक्ष्यते। पुनश्च तत्रत्य – शैत्य पावनत्वादिबोधनं च प्रयोजनं विद्यते। अतोऽत्र प्रयोजनवतीलक्षणाऽवबोध्या।

**भावार्थः** – मुख्यार्थस्य अविवक्षायां या वृत्तिः मुख्यार्थसम्बद्धम् अर्थान्तरं बोधयति सा वृत्तिर्लक्षणानाम्नोच्यते। सा च निरूढलक्षणा प्रयोजनवतीलक्षणेति भेदाच्च द्विधा कथ्यते। तत्र निरूढलक्षणा – कलिङ्गसाहसिकः। प्रयोजनवतीलक्षणा – गङ्गायां घोषः।

**प्रसङ्गः** – अथेदानीं पुनः लक्षणाया भेदान् निरूपयति –

**लक्षणीयस्वशब्दस्य मीलनाऽमीलनाद् द्विधा।**
**लक्षणा सा त्रिधा सिद्धसाध्यसाध्याङ्गभेदतः॥ २॥**

**अन्वयः** – लक्षणीयस्वशब्दस्य मीलन+अमीलनात् सा लक्षणा द्विधा। सिद्ध-साध्य-साध्याङ्गभेदतः पुनः त्रिधा।

**व्याख्या** – लक्षणावृत्तेः निरूढप्रयोजनभेदादस्या द्वैविध्यं प्रतिपाद्य पुनरन्यान् भेदानाह – लक्षणीयेति। लक्षणीयस्वशब्दस्य = लक्ष्यार्थवाचकपदस्य, मीलनं च अमीलनं च इत्यनयोः समाहारः मीलनामीलनं मीलनं नाम अप्रकटनम्, अकथनम्, अप्रकाशनम्, अग्रहणम्, अनुपादनञ्चेति, अमीलनं नाम प्रकटनं, प्रकाशनं, कथनं, ग्रहणम्, उपादानं चेति तस्मात् मीलनामीलनात् = लक्ष्यवाचकपदस्य अप्रयोगात् प्रयोगात् च सा = पूर्वोक्ता, निरूढा प्रयोजनवती



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

च लक्षणा द्विधा = द्विप्रकारा भवति। एवं निरूढप्रयोजनवत्यो: प्रत्येकं द्विविधत्वात् चत्वारो भेदा: जायन्ते। ते यथा –

१. निरूढा मीलतलक्ष्यवाचकपदालक्षणा। यथा – श्वेतो धावति।

२. निरूढा अमीलितलक्ष्यवाचकपदालक्षणा । यथा – शुक्लो घट:।

३. प्रयोजनवती मीलितलक्ष्यवावचकपदालक्षणा। यथा – कुन्ता: प्रविशन्ति।

४. प्रयोजनवती अमीलितलक्ष्यवाचकपदा लक्षणा। यथा – अग्निर्माणवक:।

इत्थं प्रत्येकं द्विधा लक्षणा पुनस्त्रिधा विभज्यते –

१. सिद्धलक्षणा २. साध्यलक्षणा, ३. साध्याङ्गलक्षणेति। तत्र –

**१. सिद्धलक्षणा** – उद्देश्यवाचकपदनिष्ठा सिद्धा। यत्र उद्देश्यपदेनैव अर्थो लक्ष्यते सा सिद्धलक्षणा। यथा – ''भो: पाषाण !, उक्तं गृहाण'' इति उक्ते सति उद्देश्यभूतेन पाषाणशब्देनैव मूर्खत्वलक्षणा सिद्धा।

**२. साध्यलक्षणा** – विधेयवाचकपदनिष्ठा साध्या। यत्र विधेयोऽर्थो लक्ष्यते सा साध्यलक्षणा। यथा – ''अमृतं कामिनीवच:''।

**३. साध्याङ्गलक्षणा** – विधेयान्वयिवाचकपदनिष्ठा साध्यङ्गा:। यत्र अनुपपद्यमानस्य विधेयस्य सिद्धये प्रयुक्तालक्षणा साध्याङ्गलक्षणोच्यते। यथा – ''गङ्गायां घोष:''। अत्र हि जलप्रवाहे अनुपपन्नस्य अघटितस्य घोषस्य सिद्धये गङ्गापदेन तटरुपोऽर्थो लक्ष्यते। अतोऽत्र साध्याङ्गलक्षणा। इत्थम् एतै: त्रिभि: भेदै: पूर्वोक्ताश्चत्वारो भेदा: प्रत्येकं गुणिता: २ X २ = ४ X ३ = १२ द्वादश भेदा: भवन्ति।

**भावार्थ:** – लक्षणावृत्ति: पूर्वं लक्ष्यवाचकपदस्य अमीलनाद् मीलनाच्च द्विधा जायते। निरूढा–प्रयोजनवशाच्च एते चत्वारो भेदा: जायन्ते। पुनश्च सिद्ध–साध्य–साध्याङ्गभेदात् लक्षणा त्रिविधा भवति। एवं त्रिगुणिता एते चत्वारो भेदा: द्वादश सञ्जायन्ते।

**प्रसङ्ग:** – अथ प्रयोजनभेदेन लक्षणाया भेदान् प्रपञ्चयति –

**स्फुटास्फुटप्रभेदेन प्रयोजनमपि द्विधा।**
**विदु: स्फुटं तटस्थत्वादर्थगत्वाद् द्विधा बुधा: ॥ ३ ॥**

**अन्वय:** – स्फुट+अस्फुट – प्रभेदेन प्रयोजनमपि द्विधा। तटस्थत्वात् च बुधा: स्फुटं द्विधा: विदु:।

**व्याख्या** – प्रयोजनभेदेन लक्षणाभेदान् निरूपयन्नाह – स्फुटास्फुटेति। स्फुटम् = अगूढम्, अस्फुटं गूढं चेति स्फुटास्फुटे तयो: प्रभेद: तेन स्फुटास्फुटभेदेन = अगूढगूढव्यङ्ग्यभेदेन, प्रयोजनमपि = प्रयोजनवतीलक्षणावृत्तिरपि, द्विधा = द्विप्रकारका भवति। तत्र स्फुट (अगूढ) व्यङ्ग्यप्रयोजनलक्षणा – यत्र व्यङ्ग्यं सर्वसाधारणजनवेद्यं स्पष्टं भवति सा स्फुटप्रयोजना लक्षणा भवति। यथा – 'अग्निर्माणवक:' इत्यत्र माणवकस्य = बालकस्य, अग्निसदृशतेजस्वितारूपं व्यङ्ग्यं (स्फुटम्) अगूढम् वर्तते। अस्फुट (गूढ) व्यङ्ग्यप्रयोजनलक्षणा – यत्र व्यङ्ग्यं स्पष्टं न भवति अपितु गूढं भवति सा अस्फुटप्रयोजनलक्षणा कथ्यते। यथा – ''पटोऽयं दग्ध:'' अत्र पटैकदेशे दग्धे पटो दग्ध: इति वाक्येन तावत् अवशिष्टपटस्य उपयोगिता नास्तीति व्यङ्ग्यं स्पष्टं न वर्तते। व्यङ्ग्यमिदं गूढमस्ति। अतोऽत्राऽस्फुटव्यङ्ग्यप्रयोजनालक्षणा विद्यते।

अथ च पुन: स्फुटमपि प्रयोजनं तटस्थत्वात्, अर्थगतत्वात् बुधा: = विद्वांस:, द्विधा = द्विप्रकारकं, विदु: = प्रतिपादितवन्त:। तौ च यथा –

**१. तटस्थप्रयोजनम्** – प्रयोजनस्य लक्ष्यलक्षकेतरवृत्तितया प्रतीयमानत्वं तटस्थत्वम्। इदं च समासोक्तौ उपयुज्यते। तद्यथा – 'अयमैन्द्री मुखं पश्य रक्तश्चुम्बति चन्द्रमा'। इत्यत्र परनायिकाऽऽसक्तनायकप्रतीति: प्रयोजनम् 'मुखं चुम्बति चन्द्रमा' इति लाक्षणिकपद प्रयोग:। अस्याग्रं स्पृशति इति लक्ष्यार्थ:। अत्र परकलत्रासक्तिरुपं प्रयोजनं स्फुटम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**२. अर्थगतं प्रयोजनम्** – लक्ष्यार्थे लक्षकपदार्थे वा विद्यमानं प्रयोजनम् अर्थगतप्रयोजनं कथ्यते। यथा – उपर्युक्तमुदाहरणमेव। यतोहि उदाहरणेऽस्मिन् यत् नायकनायिकाव्यवहारप्रतीतिरूपो व्यङ्ग्यार्थोऽस्ति तदर्थपरम्परयैव प्रतीतिकारणादत्रार्थगतं प्रयोजनं वर्तते।

**भावार्थः** – प्रयोजनभेदेन लक्षणायाः द्वैविध्यं भवति। तद्यथा – स्फुटव्यङ्ग्यप्रयोजना, अस्फुटव्यङ्ग्यप्रयोजना चेति। तत्रापि स्फुटव्यङ्ग्यं प्रयोजनं – तटस्थत्वात् अर्थगतत्वाच्च द्विधा भवति। इत्थं लक्षणायाः तटस्थस्फुटव्यङ्ग्यप्रयोजनालक्षणा, अर्थगतस्फुटव्यङ्ग्यप्रयोजनालक्षणा चेति भेदद्वयं जायते।

**प्रसङ्गः** – अथ अस्फुटव्यङ्ग्यायाः प्रयोजनलक्षणायाः भेदद्वयं प्रदर्शयति –

**अस्फुटं चार्थनिष्ठत्वात् तटस्थत्वादपि द्विधा।**
**लक्ष्यलक्षकनिष्ठत्वादर्थसंस्थमपि द्विधा॥४॥**

**अन्वयः** – अर्थनिष्ठत्वात् तटस्थत्वात् च अस्फुटम् अपि द्विधा। अर्थसंस्थम् अपि लक्ष्य-लक्षकनिष्ठत्वात् द्विधा।

**व्याख्या** – अस्फुटव्यङ्ग्याया भेदद्वयमाह – अस्फुटमिति। अर्थनिष्ठत्वात् = अर्थगतत्वात्, तटस्थात्वाच्च अस्फुटमपि = निगूढप्रयोजनमपि, अस्फुटव्यङ्ग्यप्रयोजनमपि, द्विधा = द्विविधं भवति। लक्ष्यलक्षकभिन्नस्थाने स्थितं प्रयोजनं नाम तटस्थम्। लक्ष्यार्थे लक्षकपदार्थे वा स्थितं प्रयोजनम् अर्थगतमिति अवगन्तव्यम्। तत्र अर्थसंस्थमपि = अर्थगतमपि प्रयोजनं, लक्ष्यलक्षकनिष्ठत्वात् लक्ष्यं = लक्ष्यार्थः च लक्षकं = लक्षकपदार्थश्चेति लक्ष्यलक्षके तयोः निष्ठं = स्थितं तस्य भावः = लक्ष्यलक्षकत्वं तस्मात् लक्ष्यलक्षकनिष्ठत्वात् = लक्ष्यनिष्ठत्वात् लक्षकनिष्ठत्वाच्च, द्विधा = द्विविधं भवतीति शेषः।

**भावार्थः** – अस्फुटप्रयोजनमपि अर्थनिष्ठत्वात् तटस्थत्वाच्च द्विप्रकारकं भवति। अर्थनिष्ठप्रयोजनमपि पुनः लक्ष्यनिष्ठत्वात् लक्षकनिष्ठत्वात् च द्विविधं जायते।

**प्रसङ्गः** – केचन विद्वांसः अस्फुटप्रयोजनस्य एकमेव भेदं स्वीकुर्वन्ति तन्मते पूर्वोक्तमेव लक्षणायाः भेदचतुष्टयं प्रतिपादयन्नाह –

**लक्षकस्थं स्फुटं यत्र सा विचलक्षणलक्षणा।**
**अस्फुटत्वं तटस्थत्वं लक्ष्यस्थत्वममुष्य च॥५॥**
**अन्यास्तिस्त्र इति व्यक्ता शक्तितः सा चतुर्विधा।**

**अन्वयः** – यत्र लक्षकस्थं (प्रयोजनं) स्फुटं – सा विचक्षणलक्षणा। अमुष्य अस्फुटत्वं तटस्थम्, लक्ष्यस्थत्वं च (भवति)। अन्याः तिस्रः इति (हेतोः) शक्तितः व्यक्ता सा चतुर्विधा।

**व्याख्या** – मतान्तरेण प्रयोजनवतीलक्षणाया भेदानाह – लक्षकस्थमिति। यत्र = यस्यां लक्षणायां लक्षकस्थं = लक्षकनिष्ठं प्रयोजनमिति स्फुटम् = अगूढं, स्पष्टं भवति, सा एव एका लक्षणा, सा च विचक्षणलक्षणा इति नाम्ना व्यवह्रियते।

अमुष्य = अस्य प्रयोजनस्य अस्फुटत्वं, तटस्थत्वं लक्ष्यस्थत्वं चेति भेदत्रयं जायते। इत्थं विचक्षणलक्षणासहितं प्रयोजनवतीलक्षणायाः भेदचतुष्टयमङ्गीकुर्वन्ति केचन विद्वांसः।

**भावार्थः** – अन्याचार्यमतानुसारं प्रयोजनवती लक्षणा चतुर्विधा भवति। तद्यथा – १. लक्षकस्थप्रयोजना [विचक्षणलक्षणा]। २. तटस्थ प्रयोजना ३. अस्फुटप्रयोजना ४. लक्ष्यस्थप्रयोजना चेति।

**प्रसङ्गः** – पूर्वोक्तायाः चतुर्विधलक्षणायाः क्रमशः उदाहरणानि प्रस्तूयन्ते –



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**इन्दुरेवैष तद्वक्त्रमुत्कर्षो लक्ष्यते मुखे॥६॥**
**प्रदीपं वर्धयेत्यत्र तटस्थं मङ्गलोदयः।**
**पटोऽयं दग्ध इत्यादौ स्फुटं नास्ति प्रयोजनम्॥७॥**
**अमृतं सूक्तमित्यादौ लक्ष्यस्थमतिहृद्यता।**

**अन्वयः** – १. 'एषः इन्दुः एव तद्वक्त्रम्' (इति) मुखे उत्कर्षः लक्ष्यते।
२. 'प्रदीपं वर्धय' इति अत्र मङ्गलोदयः – तटस्थम्। (प्रयोजनम्)
३. 'पटः अयं दग्धः' इत्यादौ स्फुटं प्रयोजनं नास्ति।
४. 'अमृतं सूक्तम्' इत्यादौ अतिहृद्यता – लक्ष्यस्थं प्रयोजनम्।

**व्याख्या** – पूर्वस्यां कारिकायां वर्णितानां चतुर्णां लक्षणाभेदानां क्रमशः उदाहरणानि – १. एषः = दृश्यमानोऽयं, इन्दुः एव = चन्द्रः एव, तद्वक्त्रं = तस्याः प्रियायाः मुखमिति। अस्मिन् वाक्ये प्रियायाः मुखे उत्कर्षो लक्ष्यते = प्रतीयते। मुखोत्कर्षमेव प्रयोजनं वर्तते। इन्दुः लक्ष्यः मुखञ्च लक्षकपदम्। तेन उत्कर्षरूपं प्रयोजनं मुखरूपे लक्षके विद्यते। अतोऽत्र लक्षकस्थस्फुटप्रयोजनालक्षणा विचक्षणलक्षणा वाऽवबोध्या।

२. 'प्रदीपमिति'। दीपनिर्वापणेऽभिलषितेऽमङ्गलभिया दीपं निर्वापय इति अनुक्त्वा दीपं वर्धय इत्येव प्रयोगो दृश्यते प्राचीनानां शिष्टपुरुषाणाम्। एतादृशः प्रयोगश्च वृद्ध्यर्थक-वृधुधातो व्यतिरेकसम्बन्धेन नाशे लक्षणयेव बोध्यः। साक्षात् नाशार्थकधातुप्रयोगे कृते सति मङ्गलपरिहाररूपप्रयोजनानुपत्तिः। तथा च 'दीपं वर्धय' इत्यत्र दीप निर्वापणं लक्ष्यम् अमङ्गलपरिहारपूर्वकं मङ्गलस्योदये प्रयोजनम्। तच्च प्रयोजनं लक्ष्यगतमपि नास्ति, लक्षकगतमपि नास्ति। तस्मादत्र तटस्थं प्रयोजनमवगन्तव्यम्।

३. 'पटोऽयं दग्धः' इत्यादौ प्रयोजनं स्फुटं नास्ति। पटैकदेशे दग्धे सति पटोऽयं दग्धः इति प्रयोगे सम्पूर्णपटस्य दाहप्रतिपादनं तावत् नोपपद्यते। तेन पटस्य उपयोगिता नास्तीति प्रयोजनं तु विदग्धानामपि सरलतया नैव बोध्यम्। अतोऽत्र अस्फुटप्रयोजनमवबोध्यम्।

४. 'अमृतं सूक्तम्' इत्यादौ अतिहृद्यता = अतीवरमणीयता, अतिमनोरमता वा प्रयोजनं लक्ष्यस्थं तिष्ठति। यथा सूक्तमिति लक्षकपदम् अमृतञ्च लक्ष्यम्। अतिरमणीयता प्रतीतिः प्रयोजनं तच्च लक्ष्यभूतेऽमृतपदे वर्तते। तस्मादत्र लक्ष्यस्थ प्रयोजनं बोध्यम्।

**भावार्थः** – मतान्तरेण प्रयोजनवत्याः लक्षणायाः ये चत्वारः भेदाः परिगणिताः तेषां क्रमशः उदाहरणानि दीयन्तेऽत्र – १. 'एष इन्दुरेव' तद्वक्त्र मित्यादौ लक्षकनिष्ठे प्रयोजनं वर्तते।
२. 'प्रदीपं वर्धये 'त्यादौ तटस्थं प्रयोजनमवगन्तव्यम्।
३. 'पटोऽयं दग्धः' इत्यादौ प्रयोजनस्य अस्फुटत्वादत्र अस्फुटं प्रयोजनं विद्यते।
४. 'अमृतं सूक्त' मित्यादौ लक्ष्यस्थं लक्ष्यनिष्ठं वा प्रयोजनं ज्ञेयम्।

**प्रसङ्गः** – अथ साम्प्रतं लक्षणाप्रयोजकसम्बन्धान् दर्शयति –

**आभिमुख्यात् सन्निधानात्तथाऽऽकारप्रतीतितः॥८॥**
**कार्यकारणभावात्सा वाच्यवाचकभावतः।**
**इत्येवमादेः सम्बन्धात् किञ्चाऽन्यस्माच्चतुष्टयात्॥९॥**
**सादृश्यात् समवायात् सा वैपरीत्यात् क्रियान्वयात्।**

**अन्वयः** – आभिमुख्यात्, सन्निधानात् तथा आकारप्रतीतितः कार्यकारणभावात्, वाच्यवाचकभावतः (च) इत्येवमादेः सम्बन्धात् किञ्च अन्यस्मात् (अपि) चतुष्टयात् सा (लक्षणा भवति) – सादृश्यात्, समवायात्, वैपरीत्यात् क्रियान्वयात् (चेति)।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**व्याख्या** – लक्षणाया: प्रयोजकसम्बन्धानाह – आभिमुख्यादिति। वाच्यार्थ-लक्ष्यार्थयो: पारस्परिका: सम्बन्धा एव लक्षणाप्रयोजकसम्बन्धा: कथ्यन्ते। यथा हि –

**१. आभिमुख्यात्** – सम्मुखस्य भाव: आभिमुख्यं सम्मुखावस्थानत्वं वा तस्मात् आभिमुख्यात् एतन्नामकसम्बन्धात् लक्षणा भवति। यथा – 'अङ्गुल्यग्रे करिशतम्' इत्यत्र अङ्गुलिसम्मुखस्थो यो देश: तत्र करिशतं विद्यते इत्यर्थो लक्ष्यते। अत्र आभिमुख्यसम्बन्धात् अङ्गुल्यग्रपदेन अङ्गुलिसम्मुखस्थो देशो लक्ष्यते। अतोऽत्र आभिमुख्यसम्बन्धाद् लक्षणा ज्ञेया।

**२. सन्निधानात्** – सन्निधानं नाम सान्निध्यं, सामीप्यं वा। सामीप्यसम्बन्धादपि लक्षणा भवति। यथा – 'गङ्गायां घोष:', इत्यत्र गङ्गातीरयो: समीपावस्थानात् सामीप्यसम्बन्धाद् गङ्गापदस्य गङ्गातीरे लक्षणा भवति।

**३. आकारप्रतीते:** – यत्र वास्तविकं सान्निध्यं नैव भवति तत्र आकारप्रतीति: = सान्निध्याकारज्ञानत: लक्षणा भवति। यथा – 'वृक्षाग्रे चन्द्र:' इत्यत्र यद्यपि चन्द्रस्य वृक्षाग्रसान्निध्यं वास्तविकं नास्ति, तथापि वृक्षस्य अत्यन्तम् औन्नत्यात् दूरत: तदग्रे एव चन्द्र इति प्रतीति: जायते। अत: सान्निध्याकाररुपप्रतीतिसम्बन्धादत्र लक्षणा।

**४. कार्यकारणभावात्** – कार्यकारणभावसम्बन्धादपि लक्षणा भवति। यथा – 'आयुर्वैघृतम्' इत्यत्र आयुष: कारणं घृतम्। उभयो: कार्यकारणयो: तादात्म्य प्रतिपादनेन तावद् अन्येभ्य आयुर्वर्धकपदार्थेभ्यो घृतस्य उत्कृष्टता लक्ष्यते।

**५. वाच्यवाचकभावात्** – वाच्य-वाचकभावसम्बन्धादपि लक्षणा भवति। यथा 'द्विरेफपदे'। द्वौ रेफौ यस्मिन् स: द्विरेफ: इति योगवृत्त्या बहूनि हि द्विरेफ पदानि मतिमायान्ति पुनरपि द्विरेफपदेन भ्रमरपदमेव लक्ष्यते। नैयायिका: इमां लक्षितलक्षणां कथयन्ति। इत्येवमादे: = इत्थम् उक्तप्रकारादे:, आदिपदेनात्र न्यायोक्ता अवशिष्टा: सम्बन्धा: विज्ञेया किञ्च अन्यस्मात् = इतो व्यक्तिरिक्तादपि, चतुष्ट्यात् = सम्बन्धचतुष्ट्यात् लक्षणा भवति। ते च चत्वार: सम्बन्धा: निम्नानुसारं सन्ति –

**१. सादृश्यात्** – सदृशस्य भाव: सादृश्यं, तस्मात् सादृश्यसम्बन्धात् लक्षणा भवति। यथा 'गौर्वाहीक:' इत्यत्र गोगतजाड्यमन्दतादिसादृश्यात् लक्षणा। अत एव वाहीकगतं जाड्यमन्दतादिकं लक्ष्यते। गुणसादृश्यादियं लक्षणा गौणीत्यप्युच्यते।

**२. समवायात्** – समवायसम्बन्धादपि लक्षणा भवति। समवायो नाम समूह: समुदायो वा। यथा 'छत्रिणो यान्ति' इत्यत्र जनसमूहे केचनछत्रधारिण: केचन च छत्ररहिता अपि सन्ति, किन्तु समवायसम्बन्धात् सर्वेषां कृते छत्रपदं प्रयुक्तम्। इत्थं छत्रधारिणाम् आधिक्यं लक्ष्यते।

**३. वैपरीत्यात्** – विपरीतस्य भावो वैपरीत्यम्। वैपरीत्यसम्बन्धादपि लक्षणा भवति। यथा – कञ्चिदपकारिणं प्रति – 'उपकृतं बहु तत्रे'त्यादौ महदपकृतं त्वया इत्यादिकं लक्ष्यते। इयं लक्षणलक्षणा।

**४. क्रियान्वयात्** – तत्क्रियासम्बन्धादपीयं लक्षणा भवति। यथा – 'युधिष्ठरोऽयं' राजा इत्यत्र युधिष्ठरस्य सत्यवचनक्रियाया: धार्मिककृत्यसम्पादनक्रियायाश्च सम्बन्धं राजनि लक्ष्यते। परमधार्मिकोऽयं राजेति लक्ष्यार्थश्च जायते।

**भावार्थ:** – उपर्युक्ता: शक्यलक्ष्ययो: परस्परं सम्बन्धा: लक्षणाप्रयोजकसम्बन्धा अभिधीयन्ते।

**प्रसङ्ग:** – इत्थं लक्षणाप्रयोजकसम्बन्धान् प्रदर्श्य साम्प्रतं मतान्तरेण प्रयोजनवत्या भेदान् निरूपयति –

**सारोपाध्यवसानाख्ये गौणशुद्धे पृथक् पृथक् ॥ १० ॥**
**गौणं सारोपमुद्दिष्टमिन्दुर्मुखमितीदृशम्।**
**गौणं साध्यवसानं स्यादिन्दुरेवेदमीदृशम् ॥ ११ ॥**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**शुद्धं सारोपमुद्दिष्टमायुर्घृतमितीदृशम्।**
**शुद्धं साध्यवसानं स्यादायुरेवेदमीदृशम्॥१२॥**

**अन्वयः** – सारोपाध्यवसानाख्ये गौणशुद्धे पृथक् पृथक् (भवतः)।१. इन्दुः मुखम् इति ईदृशं (वाक्यं) गौणं सारोपम् उद्दिष्टम्। २. इन्दुः एव इदम् (इति) ईदृशं गौणं साध्यवसानं स्यात्। ३. आयुः घृतम् इति ईदृशं शुद्धं सारोपं स्यात्।४. आयुः एव इदम् (इति) ईदृशं साध्यवसानं स्यात्।

**व्याख्या** – मतान्तरसिद्धान् लक्षणाभेदानाह – सारोपेति। सारोपासाध्यवसानाख्ये = सारोपाख्या, साध्यवसानाख्या चेति, सारोपालक्षणा, साध्यवसानालक्षणा चेति। गौणी च शुद्धा चेति गौणशुद्धे, पृथक् पृथक् भवतः। अर्थात् लक्षणा तावद् द्विविधा सारोपा, साध्यवसाना चेति। द्विविधाऽप्येषा पुनः गौणशुद्धा चेति भेदतः द्विधा भूत्वा चतुर्थी जायते। गुणसादृश्ययोगाद् गौणी भवति। तादात्म्यप्रतिपादनात् सारोपा भवति। कार्य-कारणयोः लक्ष्यलक्षकरूपेण उपादानात् शुद्धा लक्षणा तथा लक्ष्यमात्रस्य [आरोप्यमाणस्य] उपादानात् साध्यवसाना लक्षणाऽवगन्तव्या।

क्रमशः उदाहरणानि यथा – **१. गौणीसारोपा** – 'इन्दुर्मुख' मित्यादौ गुणसादृश्य गौणी। इन्दुः – मुखयोः सादृश्यवशाद् तादात्म्यप्रतिपादनार्थञ्च द्वयोरपि उपादानात् [ग्रहणात्] सारोपा इति गौणीसारोपालक्षणा।

**२. गौणीसाध्यवसाना** – 'इन्दुरेवेदम्' इत्यत्र गुणसादृश्याद्गौणी। लक्षकमात्रस्य [इन्दुपदस्य] उपादानात् च साध्यवसाना इति गौणीसाध्यवसाना।

**३. शुद्धासारोपा** – 'आयुर्घृतम्' इत्यत्र सादृश्येतरसम्बन्धात् शुद्धा। लक्ष्यलक्षकयोः [आयुर्घृतयोः] उभयोरपि उपादानाच्च सारोपा इति शुद्धासारोपालक्षणा।

**४. शुद्धासाध्यवसाना** – 'आयुरेवेदम्' इत्यत्र सादृश्येतरसम्बन्धकारणात् शुद्धा। लक्ष्यमात्रस्य [आयुः पदस्य] उपादानाच्च साध्यवसाना इति शुद्धासाध्यवसानालक्षणा।

**भावार्थः** – प्रकारान्तरेण लक्षणा द्विधा सारोपा, साध्यवसाना चेति। पुनः सा गौणी शुद्धा भेदेन द्विधा। एवमाहत्य चत्वारो भेदाः जायन्ते। यथा – १. गौणीसारोपा (इन्दुर्मुखम्), २. गौणीसाध्यवसाना (इन्दुरेवेदम्), ३. शुद्धासारोपा (आयुर्घृतम्), ४. शुद्धासाध्यवसाना (आयुरेवेदम्)।

**प्रसङ्गः** – अथेदानीं पुनः शुद्धायाः लक्षणायाः भेदान प्रदर्शयति –

**उपादानार्पणद्वारे द्वे चान्ये इति षड्विधा।**
**कुन्ता विशन्ति, गङ्गायां घोषो निवसतीति च॥१३॥**

**अन्वयः** – उपादान+अर्पणद्वारे द्वे च अन्ये (लक्षणे भवतः) इति (लक्षणा) षड्विधा। कुन्ताः विशन्ति, गङ्गायां घोषः निवसति इति च (उदाहरणद्वयं क्रमशः)।

**व्याख्या** – शुद्धलक्षणाया भेदानाह – उपादानेति। मुख्यार्थो गृह्यतेऽनेनेति उपादानं, मुख्यार्थस्य ग्रहणनामोपादानम्, अर्पणं = मुख्यार्थस्य त्यागनामार्पणम्, उपादानं च अर्पणं च उपादानार्पणे ते द्वारे ययोः ते उपादानार्पणद्वारे, उपादानलक्षणा, अर्पणलक्षणा च द्वे = द्विसंख्याके, अन्ये = अपरे लक्षणे भवतः। शुद्धसारोपालक्षणायाः, शुद्धसाध्यवसानलक्षणायाश्च उपादानाऽर्पणाभ्यां पुनर्भेदद्वयं भवतीति। तद्यथा –

१. उपादानलक्षणा शुद्धासारोपा
२. उपादानलक्षणा शुद्धासाध्यवसाना
३. अर्पणलक्षणा शुद्धासारोपा
४. अर्पणलक्षणा शुद्धा साध्यवसाना।

इत्थं द्विधा च गौणी पूर्वोक्ता इत्येवं सङ्कलनया (२+४=६) षड्विधा = षट्प्रकारा लक्षणा भवति। तत्रोपादानलक्षणा यथा – 'कुन्ताः प्रविशन्ति' इत्यत्र कुन्तपदस्य निर्जीवत्वात् प्रविशनक्रियायाम् अन्वयाभावात्,



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

कुन्तपदेन कुन्तधारिणः पुरुषाः लक्ष्यन्ते। इत्थं वाक्यार्थसिद्धये कुन्तपदं स्वकीयमर्थमादाय पुरुषरूपार्थम् उपस्थापयतीति उपादानलक्षणा। अर्पणलक्षणा – 'गङ्गायां घोषः' इत्यत्र गङ्गाघोषयोः आधाराधेयसम्बन्धरूपवाक्यार्थसिद्धये गङ्गापदं स्वार्थं पत्यिज्य तटरूपमर्थम् उपस्थापयतीति वाच्यार्थस्य अर्पणात् अर्पणलक्षणेयं बोध्या।

**भावार्थः** – द्विविधाऽपि शुद्धालक्षणा उपादानार्पणभेदाभ्यां पुनः द्विप्रकारा भवति – उपादानलक्षणा, अर्पणलक्षणा चेति। एवं द्विधा गौणी, चतुर्धा शुद्धा चेति सङ्कलनद्वारा लक्षणायाः षड्भेदाः सम्भवन्ति।

**प्रसङ्गः** – अथ विशेषणयोगाल्लक्षणाया भेदद्वयं प्रस्तौति –

**लक्ष्यलक्षकवैशिष्ट्याद् द्विविधा लक्षणा पुनः।**
**सरसं काव्यममृतं विद्या स्थिरतरं धनम्॥१४॥**

**अन्वयः** – लक्ष्य-लक्षक-वैशिष्ट्यात् लक्षणा पुनः द्विविधा। (क्रमशः यथा) – सरसं काव्यम् अमृतम्। विद्या स्थिरतरं धनम्।

**व्याख्या** – पुनः लक्षणायाः विशेषणयोगाद् भेदद्वयं प्रतिपादयन्नाह – लक्ष्येति। लक्ष्यं च लक्षकं चेति लक्ष्यलक्षके तयोः वैशिष्ट्यं = विशेषणवत्त्वं लक्ष्यलक्षकवैशिष्ट्यं तस्मात् लक्ष्यवैशिष्ट्यात् लक्षकवैशिष्ट्याच्च इयं लक्षणा पुनर्द्विविधा = लक्ष्यविशेषणविशिष्टा सिद्धा, लक्षकविशेषणविशिष्टा साध्येति भेदात् इयं लक्षणा पुनः द्विधा भवति। तत्र – १. लक्ष्यविशेषणविशिष्टा लक्षणा यथा – 'सरसं काव्यम् अमृतम्' इत्यत्र अमृतमिति लक्षकपदं, काव्यमिति च लक्ष्यम् तस्यैव सरसत्ववैशिष्ट्यमत्रोदीरितम्। सरसमिति काव्यस्य [लक्ष्यस्य] विशेषणम्।

२. लक्षकविशेषणविशिष्टा लक्षणा यथा – 'विद्या स्थितरं धनम्' इत्यत्र विद्या इति लक्ष्यपदं, धनमिति लक्षकम्। स्थिरतरमिति धनस्य [लक्षकस्य] विशेषणं स्थितरत्वविशिष्टं धनमिति।

**भावार्थः** – लक्ष्यवैशिष्ट्यात् लक्षकवैशिष्ट्याच्च लक्षणा द्विविधा भवति। तत्र लक्ष्यविशेषणविशिष्टा – 'सरसं काव्यममृतम्' इति। लक्षकविशेषणविशिष्टा – 'विद्यास्थिरतरं धनमिति।'

**प्रसङ्गः** – अथ पुनरिदानीं लक्षणायाः भेदद्वयं प्रतिपादयति –

**तथा सहेतुरतथा भेदभिन्ना च कुत्रचित्।**
**सौन्दर्येणैष कन्दर्पः सा मूर्त्तिमती रतिः॥१५॥**

**अन्वयः** – तथा एव कुत्रचित् सहेतुः कुत्रचित् च अतथा इति भेदभिन्ना भवति। यथा – एषः सौन्दर्येण कन्दर्पः। सा च मूर्त्तिमती रतिः।

**व्याख्या** – पुनरपि सहेतुनिर्हेतुभेदेन अन्यद् भेदयुगलमाह – तथेति। तथा = तेन प्रकारेण, पूर्वोक्तभेदवत् हेतुना सहिताः सहेतुः न तथेति अतथा = तद्विपरीता हेतुशून्या चेति भेदाभ्यां भिन्नापि लक्षणा कुत्रचित् कस्मिंश्चित् स्थले, लक्ष्यार्थबोधने सहेतुका क्वचिच्च अहेतुका इति द्वौ अन्यौ अपि भेदौ भवतः इत्याशयः। क्रमेणोदाहरणं यथा – एषः = पुरुषः, सौन्दर्येण = रमणीयतया, कन्दर्पः = कामदेव एव, कन्दर्पसदृश एष पुरुष इति लक्ष्यार्थः। सौन्दर्येण इति हेतोः उपादानात् सहेतुका लक्षणा वर्तते। सा च = कामिनी, मुर्त्तिमती = शरीरधारिणीसाक्षात् रतिः = कामप्रियेति। अत्र सौन्दर्यरूपहेतोः अननुपादानात् अहेतुका लक्षणाऽवबोध्या।

**भावार्थः** – यत्र हेतोः निर्देशः क्रियते सा सहेतुकालक्षणा। यथा – 'सौन्दर्येण एषः कन्दर्पः'। पुनश्च यत्र हेतोः निर्देशः न क्रियते सा अहेतुका लक्षणा। यथा – 'सा च मूर्त्तिमती रतिरिति'।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**प्रसङ्गः** – अथोपाधिवैशिष्ट्याद् लक्षणायाः भेदान्तरं प्रतिपादयति –

**शब्दे पदार्थे वाक्यार्थे सङ्ख्यायां कारके तथा।**
**लिङ्गे चेयमलङ्कारा‍ऽङ्कुरबीजतया स्थिता॥१६॥**

**अन्वयः** – शब्दे, पदार्थे, वाक्यार्थे, सङ्ख्यायां तथा कारके, लिङ्गे च इयं लक्षणा अलङ्कार + अङ्कुर – बीजतया स्थिता।

**व्याख्या** – उपाधिभेदाद् भेदान्तरमाह – शब्द इति। शब्दे = पदे, पदार्थे = पदस्य अर्थे, वाक्यार्थे, संख्यायां, कारके, लिङ्गे च, इयम् = एषा लक्षणा, अलङ्काराङ्कुरबीजतया = अलङ्कारप्रादुर्भावस्य हेतुतया स्थिता = तिष्ठति। विद्वांसो लक्षणामवलम्ब्य असंख्यकान् रुपकादीन् अलङ्कारान् कल्पनाभिः उद्भावयन्ति इत्याशयः।

अथ पदादिषु लक्षणा यथा –

१. पदे लक्षणा यथा – 'अग्नेरग्निर्नष्टः' इत्यत्र द्वितीयेन अग्निपदेन अग्निशिखा लक्ष्यते।

२. पदार्थे लक्षणा यथा – 'मुखं चन्द्रः' इत्यत्र मुखपदार्थे चन्द्रसादृश्यं लक्ष्यते।

३. वाक्यार्थे लक्षणा यथा – 'यद् गुरुवचनमाकर्णयन्ति तदमृतं पिबन्ति' इत्यत्र अमृतं पिबन्तीति वाक्येन गुरुवचनश्रवणस्य ऐक्यं लक्ष्यते।

४. सङ्ख्यायां लक्षणा यथा – 'यावन्तो युद्धप्रियास्तावन्तोऽर्जुनाः' इत्यत्र एकस्मिन् पुरुषे अर्जुने बहुत्वसंख्याया धुरन्धरत्वं, युद्धवीरत्वञ्च लक्ष्यते।

५. कारके लक्षणा यथा – 'स्थाली पचति' इत्यत्र स्थाल्यां पचति इति अधिकरणकारके लक्षणा।

६. लिङ्गे लक्षणा यथा – 'हस्तिनी' इत्यत्र स्त्रीलिङ्गत्वे सति अपि हस्तिपदस्य पुल्लिङ्गता लक्ष्यते। इत्थं संक्षेपतः सलक्षणञ्च लक्षणाया भेदोपभेदाः उपदर्शिताः।

**भावार्थः** – लक्षणेयं पदे, पदार्थे, वाक्यार्थे, संख्यायां, कारके, लिङ्गे चापि स्थिता अनेकेषाम् अलङ्काराणां बीजरुपा भवति। लक्षणामाश्रित्य हि कवयोऽनेकान् अलङ्कारान् परिकल्पयन्ति इति भावः।

**प्रसङ्गः** – अथ प्रपञ्चपूर्वकं लक्षणां निरूप्येदानीं मयूखसमाप्तिं सूचयति –

**महादेवः सत्रप्रमुखमखविद्यैकचतुरः**
**सुमित्रा तद्भक्ति प्रणिहितमतिर्यस्य पितरौ।**
**मयूखस्तेनासौ सुकविजयदेवेन रचिते**
**चिरं चन्द्रालोके महति नवसंख्यः सुखयतु॥१७॥**

**॥इति चन्द्रालोके लक्षणानिरूपणो नाम नवमो मयूखः॥**

**भावार्थः** – अन्वयो व्याख्या च पूर्ववदेव नवसङ्ख्य इति विशेषः, नवमो मयूखः इत्यर्थः।

**॥इति पीयूषवर्षेण जयदेवेन विरचिते चन्द्रालोके लक्षणानिरूपणनाम नवमो मयूखः समाप्त॥**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## योग्यता विस्तारः






Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**लक्षणाया: प्रयोजकसम्बन्धा:**

- अभिमुख्यात् (अङ्गुल्यग्रे करिशतम्)
- सन्निधानात् (गङ्गायां घोष:)
- आकारप्रतीते: (पर्वताग्रे चन्द्र:)
- कार्यकारणात् (आयुर्घृतम्)
- वाच्यवाचक भावात् (द्विरेफ:)
- सादृश्यात् (गौर्वाहिक:)
- समवायात् (छत्रिणो यान्ति)
- वैपरीत्यात् (उपकृतं बहु तत्र...)
- क्रियान्वयात् (युधिष्ठरोऽयं राजा)

**मतान्तरेण सिद्धलक्षणाया: भेदा:**

- सारोपा
  - शुद्धा सारोपा (आयुर्घृतम्)
  - गौणीसारोपा (इन्दुर्मुखम्)
- साध्यवसाना
  - शुद्धासाध्यवसाना (आयुरेवेदम्)
  - गौणीसाध्यवसाना (इन्दुरेवेदम्)



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## अभ्यास-प्रश्नाः

### बहुविकल्पात्मकप्रश्नाः -

१. चन्द्रालोके लक्षणा कस्मिन् मयूखे वर्णितः -
   (क) पञ्चमे मयूखे (ख) सप्तमे मयूखे
   (ग) दशमे मयूखे (घ) नवमे मयूखे ( )

२. प्रयोजनभेदेन लक्षणा कतिधा -
   (क) एकधा (ख) द्विधा
   (ग) त्रिधा(घ) पञ्चधा ( )

३. अमीलनम् इत्यस्य कोऽर्थः -
   (क) सङ्कोचः (ख) शुक्लः
   (ग) उपादानम् (घ) माणवकः ( )

४. गङ्गायां घोषः इत्यत्र का लक्षणा वर्तते ?
   (क) रुढि(ख) प्रयोजनवती
   (ग) अभिधा (घ) अस्फुटम्। ( )

### अतिलघूत्तरात्मकप्रश्नाः -

१. प्रयोजनभेदेन लक्षणा कतिधा ?
२. 'प्रदीपं वर्धय' इत्यत्र किं नामकं प्रयोजनं वर्तते ?
३. 'पटोऽयं दग्धः' इत्यत्र प्रयोजनस्य नाम किम् ?
४. अस्फुटव्यङ्ग्यलक्षणायाः कति भेदाः ?
५. 'आयुर्घृतम्' इत्यत्र किं नामकः प्रयोजकसम्बन्धः ?
६. 'अमृतं कामिनी वचः' अत्र का लक्षणा ?

### लघूत्तरात्मकप्रश्नाः -

१. सिद्धलक्षणा कुत्र भवति ?
२. लक्षणायाः मूलभूतहेतुद्वयं किम् ?
३. अमीलितलक्ष्यवाचकपदालक्षणा कुत्र भवति ?
४. 'गङ्गायां घोषः' इत्यत्र प्रयोजनं किम् ?
५. 'गङ्गायां घोषः' इत्यत्र लक्ष्यपदं किम् ?
६. 'एष इन्दुरेव तद्वक्त्रम्' अत्र प्रयोजनं किम् ?

### निबन्धात्मकप्रश्नाः -

१. जयदेवानुसारं लक्षणायाः भेद-प्रभेदान् गणयत।
२. लक्षणायाः स्वरूपं प्रतिपाद्य तत्र प्रयोजकसम्बन्धान् प्रदर्शयत्।
३. लक्ष्य-लक्षक वैशिष्ट्याद् लक्षणायाः भेदद्वयं सोदाहरणं विवेचनीयम्।
४. हेतुसन्दर्भे लक्षणायाः भेदद्वयं सोदाहरणं विवेचनीयम् ?



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

५. मतान्तरेण प्रयोजनवतीलक्षणा कतिविधा ?सोदाहरणं लिखत।

६. गौण-शुद्धादिभेदात् षड्विधा लक्षणा सोदाहरणं विवेचनीया।

७. उपाधि-भेदेन लक्षणाया: प्रकारा: सोदाहरणं दर्शनीया: ।

८. जयदेवानुसारं मतमतान्तरसिद्धान् लक्षणाभेदान् परिगणयत।

९. सारोपा साध्यवसानालक्षणाया: भेदान् परिगण्य उदाहरणं विवेचयत।

१०. निम्नलिखितेषु उदाहरणेषु लक्षणाया: भेदनामानि विलिख्य सङ्गतिर्विधेया -

(क) कलिङ्ग: साहसिक: (ख) गङ्गायां घोष:

(ग) आयुरेवेदम् (घ) आयुर्घृतम्



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# दशमो मयूखः

## अथाऽभिधा

**प्रसङ्गः** – अभिधीयते मुख्यार्थोऽनयेति – अभिधा। अथेदानीम् अभिधाशक्तिं निरूपयन्नाह –

**धर्मं कञ्चित् पुरस्कृत्य प्रायः शब्दः प्रवर्त्तते।**
**यथार्थं स्पष्टमाचष्टे शब्दस्तामभिधां विदुः॥१॥**

**अन्वयः** – शब्दः प्रायः कञ्चित् धर्मं पुरस्कृत्य प्रवर्तते। यया (वृत्त्या) स्पष्टम् अर्थम् आचष्टे ताम् (वृत्तिम्) अभिधां विदुः।

**व्याख्या** – अभिधाशक्तिं निरूपयति – धर्ममिति। शब्दः यया वृत्त्या कञ्चित् = कमपि, धर्मं = जात्यादिधर्मं, पुरस्कृत्य = द्वारीकृत्य, सम्मुखीकृत्य, प्रवर्तते = अर्थबोधने समर्थो भवति, तत्र यया = वृत्त्या, शब्दः स्पष्टं = स्पष्टरूपेण, असन्दिग्धम्, अर्थम् = अभिधेयं, वाच्यं, शब्दार्थं वा, आचष्टे = प्रकटयति, तां = वृत्तिम्, अभिधाम् = अभिधाशक्तिं, विदुः = जानन्ति बुधा इति शेषः। निर्बाधरूपेण शब्दार्थबोधिका वृत्तिर्नाम अभिधा। अभिधेयमेव शक्तिः आद्यावृत्तिः मुख्यावृत्तिः इत्येतैर्नामभिरपि व्याह्रियते।

**भावार्थः** – शब्दः प्रायेण कमपि जात्यादिकं धर्मं द्वारीकृत्यैव मुख्यार्थबोधने समर्थो भवति। असौ शब्दो यया वृत्त्या साक्षाद् अर्थं बोधयति सा वृत्तिरभिधा नाम।

**विशेषः** – अभिधाद्वारा योऽर्थो बोध्यते सः – अभिधेयार्थः, सङ्केतितार्थः, मुख्यार्थः, शक्यार्थः, वाच्यार्थः, इत्यादिभिः नामभिः ज्ञायते। पुनश्च कारिकायामस्यां यथार्थेति पदं सङ्केतितार्थे प्रयुक्तमस्ति। यतोहि संकेतितार्थ एव शब्दस्य वास्तविकोऽर्थो भवति। उक्तञ्चापि –

'साक्षात्सङ्केतितं योऽर्थमभिधत्ते स वाचकः'।

अथवा

'साक्षात्सङ्केतितार्थस्य बोधानादग्रिमाऽभिधा'।

**प्रसङ्गः** – अथ धर्मनिर्देशपूर्वकम् अभिधाभेदान् निरूपयन्नाह –

**जात्या गुणेन क्रियया वस्तुयोगेन सञ्ज्ञया।**
**निर्देशेन तथा प्राहुः षड्विधामभिधां बुधाः॥२॥**
**गौर्नीलः पाचको दण्डी डित्थः कंस इति क्रमात्।**
**कं संहिनस्ति कंसारिर्नरं च कं समाश्रितम्॥३॥**

**अन्वयः** – बुधाः जात्या, गुणेन, क्रियया, वस्तुयोगेन, सञ्ज्ञया तथा निर्देशेन अभिधां, षड्विधाम् आहुः। (यथा) – क्रमात् गौः, नीलः, पाचकः, दण्डी, डित्थः, कंसः। (निर्दशने यथा) – कंसारिः कं संहिनस्ति? (इति प्रश्नः) (उत्तरं च) कं सम् आश्रितम् (संहिनस्ति)। नरं च कं समाश्रितम् (संहिनस्ति।)

**व्याख्या** – अभिधाभेदान् प्रतिपादयन्नाह – जात्या गुणेनेति। बुधाः = विद्वांसः, आलङ्कारिकाः, जात्या = गोत्वरुपजातिवाचकशब्देन, गुणेन = नीलत्वादिगुणवाचकशब्देन, क्रियया = गमनत्वक्रियावाचकशब्दभेदेन, वस्तुयोगेन = दण्डादिपदार्थयोगेन, संज्ञया = डित्थादिरुपयदृच्छावाचकशब्दभेदेन, तथा निर्देशेन = कंसादिनिर्देशवाचकशब्दभेदेन च धर्मस्य षड्विधत्वेन अभिधा = अभिधावृत्तिं, षड्विधां = षट्प्रकारां, प्राहुः = कथयन्ति। एते जातिगुणादयो वस्तुतः अभिधायाः षड् धर्माः कथ्यन्ते। एतान् धर्मानेव पुरस्कृत्य अभिधावृत्तिः तत्तत्सङ्केतितान् अर्थान् बोधयति। एवं तदर्थवाचकाः शब्दाः अपि षड्विधाः जायन्ते – जातिवाचकशब्दः, गुणवाचकशब्दः, क्रियावाचकशब्दः, वस्तुयोगवाचकशब्दः, सञ्ज्ञावाचकशब्दः, निर्देशवाचकशब्दश्चेति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

अथेदानीम् एतेषां षड्विधजात्यादिशब्दानां क्रमेणोदाहरणानि प्रस्तूयन्ते –

१. गौः – गौरिति शब्दः गोत्वरूपजातिवाचकः।

२. नीलः – नीलशब्दो नीलत्वरूपगुणवाचकः।

३. पाचकः – पाचकशब्दः पाकत्वरूपक्रियावाचकः।

४. दण्डी – दण्डीति शब्दो दण्डरूपवस्तुयोगवाचकः।

५. डित्थः – डित्थशब्दो नामरुपसंज्ञावाचकः।

६. कंसः – कंसशब्दः कंकारसकाररूपवर्णनिर्देशवाचकः।

निर्देशवाचकशब्दस्य लक्षणं समन्वेति – कमिति। कं संहिनस्ति कंसारि ? इति प्रश्नः। कंसारिः = श्रीकृष्णः, कं = किं नामानं पुरुषं, संहिनस्ति = हन्ति, मारयति इति। एतदुत्तरं निर्देशवाचकैः शब्दैः दीयते यत् – कं = कंकारं, समाश्रितं = सहितं, नरं = नरकं संहिनस्ति, एवमेव स = सकारम् आश्रितं प्राप्तं कंकारं = कंसं च, हिनस्ति = हन्ति कंसारिः (श्रीकृष्णः) कंसं हन्ति इति एकम् उत्तरम्। अपि च नरकं (नरकासुरं) हन्ति। इत्यपरमुत्तरम्। अत्र समाश्रितं कमिति कथने सकारककारशब्दौ प्रतीयते इति वर्णानां स्वपरत्वम्। वर्णानां स्वपरत्वे जात्यादिभिन्नविषयी निर्देशशब्दः। एवं कंसादिशब्दो यत्र व्युत्पत्त्या निर्दिश्यत इति तत्र तस्य निर्देशपदेनग्रहणम्। यत्र तु कंसो हत इत्यादौ अर्थपरता तत्र तस्य जात्यादि शब्दत्वम्।

**भावार्थः** – जात्या, गुणेन, क्रियया, वस्तुयोगेन, सञ्ज्ञया, निर्देशेन च अभिधावृत्तिः षड्विधा भवति। जात्यादिधर्मानवलम्ब्य षड्विधामभिधां क्रमेणोदाहरति – गौः इति शब्दः गोत्वरुपजातिवाचक, नीलः इति शब्दः नीलत्वरुपगुणवाचकः, पाचकशब्दः क्रियावाचकः, दण्डी इति शब्दो वस्तुयोगवाचकः, डित्थशब्दस्तु सञ्ज्ञावाचकः, कंसशब्दः कं तथा समिति द्वयोः वर्णयोः निर्देशवाचकः।

**विशेषः** – महामुनि–पतञ्जलिना महाभाष्ये शब्दस्य चत्वारो धर्माः स्वीकृताः – जातिः गुण, द्रव्यं क्रियाचेति। चतुष्टयी शब्दानां प्रवृत्तिः इति। प्रायशः अन्ये चापि विद्वांसः शब्दानां चातुर्विध्यमेवाङ्गीकुर्वन्ति, किन्तु जयदेवेन तु शब्दानां षड्विधत्वं वर्णितमस्ति।

**प्रसङ्गः** – अथ निर्देशवाचकशब्दस्य यौगिकत्वादि निरस्यति –

**न योगादेरायतनं न सङ्केतनिकेतनम्।**
**वृत्त्या निर्देशशब्दोऽयं मुख्या स्वाभिधेयया॥४॥**

**अन्वयः** – अयं निर्देशशब्दः योगादेः आयतनम् (अस्ति), न (वा) सङ्केत – निकेतनम् (अस्ति, प्रत्युत) स्वाऽभिधेयया मुख्यया वृत्त्या (एव प्रवर्त्तते)।

**व्याख्या** – निर्देशशब्दस्य यौगिकत्वादि निरस्यति – न योगादेरिति। अयं = पूर्वोक्तः निर्देशवाचकः शब्दः, निर्देशत्वं नाम स्वपरत्वं, योगादेः = व्युत्पत्त्यादेः, आयतनं = स्थानम्, आस्पदं, न = नास्ति, सङ्केतस्य = डित्थडवित्थादिवत् सङ्केतस्य निकेतनं = स्थानमपि नास्ति। तर्हि कथं प्रवर्तते निर्देशवाचकशब्दः ? इत्याह – अयं निर्देशशब्दः = कंसादिः, स्वं वर्णद्वयमेवाभिधेयं यस्यां सा तया स्वाभिधेयया, मुख्यया = प्रधानया, वृत्त्या = व्यापारेण अभिधाशक्त्या प्रतीयते इति। अर्थात् स्वाभिधेयया मुख्ययावृत्त्याऽभिधया प्रवर्तत इति।

**भावार्थः** – अयं निर्देशशब्दः न यौगिकः नापि रूढः योगरूढश्चापि नास्ति, न वा डित्थादिवत् कृतसङ्केतः प्रत्युत मुख्यया अभिधावृत्त्या अभिधेयार्थं प्रकटयति। अतो जाति – गुणादिवाचकशब्दवदेव निर्देशवाचकः शब्दोऽपि मन्तव्य इति। जात्यादिभ्यो भिन्नैवेयं षड्विधाऽभिधाशक्तिरिति।

**प्रसङ्गः** – अभिधां विविच्य ग्रन्थान्ते ग्रन्थस्य फलं कथयन्नाह –

**पीयूषवर्षप्रभवं चन्द्रालोकं मनोहरम्।**
**सुधानिधानमासाद्य श्रयध्वं विबुधा मुदम्॥५॥**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**अन्वयः** – विबुधाः पीयूषवर्षप्रभवं, सुधानिधानं, मनोहरं, चन्द्रालोकम् आसाद्य मुदं श्रयध्वम्।

**व्याख्या** – ग्रन्थस्य फलं ब्रूते – पीयूषेति। द्व्यर्थकोऽयं श्लोको, देवपक्षे विद्वत्पक्षे च संघटते। हे विबुधाः ! = हे देवाः ! विद्वांसश्च, यूयं, पीयूषवर्षात् प्रभवः यस्य सः पीयूषवर्षात् प्रभवः यस्य सः पीयूषवर्षप्रभवः, तमिति। पीयूषवर्षोनाम = चन्द्रमा जयदेवश्च, प्रभवो नाम उत्पत्तिः, सुधाया निधानमिति सुधानिधानम् = अमृतस्य निकेतमिति, मनोहरं = चित्ताह्लादकं, चन्द्रालोकं = चन्द्रप्रकाशं, चन्द्रालोकनामानं ग्रन्थं चेति, आसाद्य = अधिगत्य, प्राप्य, मुदं = प्रीतिं प्रमोदश्च, श्रयध्वम् = आश्रयध्वम्।

**भावार्थः** – यथा पीयूषवर्षिणः चन्द्रमसः प्रकाशम् (चन्द्रप्रकाशम्) अधिगम्य देवाः प्रमोदमाप्नुवन्ति तथैव पीयूषवर्षोपनामकस्य जयदेवस्य चन्द्रालोकाख्यमिमं ग्रन्थमासाद्य सहृदयाः साहित्यिकाः (विबुधाः) अपि परां प्रीतिम् आस्वादयन्तु इति भावः।

**प्रसङ्गः** – अथेदानीं ग्रन्थकारो जयदेवकविः स्ववचः प्रकर्षं दर्शयति –

**जयन्ति याज्ञिक श्रीमन्महादेवाङ्गजन्मनः।**
**सूक्तिपीयूषवर्षस्य जयदेवकवेर्गिरः॥६॥**

**अन्वयः** – याज्ञिकश्रीमन्महादेवाङ्गजन्मनः, सूक्तिपीयूषवर्षस्य जयदेवकवेः गिरः जयन्ति।

**व्याख्या** – ग्रन्थकारः स्ववचः प्रकर्षं दर्शयन्नाह – जयन्तीति। याज्ञिकश्चासौ श्रीमान् इति याज्ञिकश्रीमान् स चाऽसौ महादेव इति, याज्ञिकश्रीमन्महादेवः, ग्रन्थकारस्य पितुर्नाम इदम्, अङ्गात् जन्म यस्येति अङ्गजन्मा, पुत्र इत्यर्थः, तस्येति = जयदेवस्येति, सूक्तिरेव पीयूषमिति सूक्तिपीयूषं तदवर्षतीति सूक्तिपीयूषवर्षः, जयदेव कवेः = जयदेवनाम्नः कवेरिति तस्य गिरः = वाचः, जयन्ति = सर्वोत्कर्षेण वर्तते, निर्दुष्टत्वादिति भावः।

**भावार्थः** – याज्ञिकस्य श्रीमतः महादेवस्य आत्मजस्य सूक्तिपीयूषवर्षस्य पण्डितजयदेवस्य वाणीनां (शब्दानां) जयः भवतु।

**प्रसङ्गः** – अथ इदानीं प्रपञ्चपूर्वकं काव्यतत्त्वनिरूपणं विधाय मयूखस्य ग्रन्थस्य च समाप्तिं सूचयन्नाह –

**महादेवः सत्रप्रमुखमखविद्यैकचतुरः**
**सुमित्रा तद्भक्ति प्रणिहितमतिर्यस्य पितरौ।**
**मयूखस्तेनासौ सुकविजयदेवेन रचिते**
**चिरं चन्द्रालोके महति दशसंख्यः सुखयतु॥७॥**

**॥ इति चन्द्रालोकेऽभिधानिरूपणो नाम दशमो मयूखः॥**

**अन्वयः** – सत्र-प्रमुख-मख-विद्या+एक-चतुरः महादेवः, तद्भक्तिप्रणिहितमतिः सुमित्रा यस्य पितरौ, अनेन सुकविजयदेवेन रचिते चन्द्रालोके असौ दशसंख्यः मयुखः सुमनसः चिरं सुखयतु।

**व्याख्या** – अथ दशममयूखस्य समाप्तिं सूचयति – महादेवेति। सर्वेषु मयूखेषु समाप्तौ श्लोकोऽयं पठितो वर्तते। दशममयूखान्ते श्लोकेऽपि केवलं चतुर्थपादे दशसंख्यः इत्येतावन्मात्रं परिवर्तितं विद्यते।

**॥ इति पीयूषवर्षेण जयदेवेन विरचिते चन्द्रालोके अभिधानिरूपणनाम दशमो मयूखः ग्रन्थश्च समाप्तः॥**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## अभ्यास-प्रश्नाः

**बहुविकल्पात्मकप्रश्नाः –**

१. चन्द्रालोकानुसारम् अभिधा वर्तते –

(क) एकविधा (ख) द्विविधा

(ग) त्रिविधा (घ) षड्विधा ( )

२. चन्द्रालोकस्य दशममयूखस्य विषयोऽस्ति –

(क) अभिधा-विचारः (ख) लक्षणा-विचारः

(ग) व्यञ्जना-विचारः (घ) रस-विचारः ( )

३. गौः इत्यत्र कया अभिधा ?

(क) जात्या (ख) संज्ञया

(ग) गुणेन (घ) क्रियया ( )

४. डित्थः इत्यत्र कया अभिधा ?

(क) क्रियया (ख) संज्ञया

(ग) गुणेन (घ) वस्तुयोगेन ( )

**अतिलघूत्तरात्मकप्रश्नाः –**

१. शब्दः प्रायः कं पुरस्कृत्य प्रवर्त्तते ?
२. निर्देशशब्दः कस्य आयतनं नास्ति ?
३. निर्दिष्ट-शब्दानाम् अर्थबोधः कया वृत्त्या भवति ?
४. अभिधया कोऽर्थो अभिधीयते।

**लघूत्तरात्मकप्रश्नाः –**

१. अभिधावृत्तेः स्वरूपं लिखत।
२. अभिधा-भेदाः नामतो गणनीयाः।
३. अभिधा-भेदानाम् उदाहरणानि लिखत।

**निबन्धात्मकप्रश्नाः –**

१. अभिधावृत्तेः स्वरूपं सोदाहरणञ्च विवेचयत।
२. चन्द्रालोकग्रन्थस्य पठनफलं वर्णयत।
३. अभिधा-शक्तिर्जात्यादिभिन्ना वर्तते इति कथनं समर्थयत।
४. धर्मं कञ्चित् पुरस्कृत्य प्रायः शब्दः प्रवर्तते।
यथार्थं स्पष्टमाचष्टे शब्दस्तामभिधां विदुः॥ इत्यस्याः कारिकायाः सप्रसङ्गं व्याख्या कार्या।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# प्रस्तावना

जगति अद्य या: काश्चनापि भाषा: प्रचलिता: सन्ति, तासां सकलानामपि भाषाणां जननी संस्कृतभाषैवास्तीति प्राय: सर्वेषामपि भाषेतिहासतत्त्वज्ञानां मतम्। यं हि ऋग्वेदं संसारस्यादिमं ग्रन्थं सर्वेऽपि प्राच्या: प्रतीच्याश्च विद्वांस एकस्वरेण सादरमङ्गीकुर्वन्ति, स: स्वर्गापवर्गमार्गदर्शक: ज्ञानज्योतिप्रदीपश्च वेद: संस्कृतभाषायामेव विराजते। स्वदिव्यगुणैरेवेयं दैवी वाग् देववाणीत्यादिनामभि: कीर्त्यते। उक्तं च –

**"संस्कृतं नाम दैवी वागन्वाख्याता महर्षिभि:।"**

संस्कृतभाषा अस्माकमनुपममक्षयं धनं संस्कृतवाण्या: साहित्यं केवलमाकार एव नापितु भावभाषार्थ-गाम्भीर्यादिदृष्ट्याऽपि गुरुतमम्। संस्कृतसाहित्यं हि नवनवकल्पनानां प्रचुरतायां ललितानवद्यगद्यस्य सरसतायां रसगुणालङ्कारादीनां च कमनीयतायां निखिलेऽपि विश्वभाषासाहित्ये किमप्यसाधारणं गौरवं बिभर्ति। हितेन सह सहितं, सहितस्य भाव इत्यर्थे 'गुणवचन....... इत्यनेन ष्यञ् प्रत्ययेन निष्पन्नं साहित्यपदम्। अतो हितकारिणो भावा अत्र निसर्गतो राजन्ति। शब्दार्थयोर्यथावत् सहभावेन स्थितौ साहित्यं भवति। सा च मनोहारिण्यवस्थिति: प्रतिभावता कविवरेण्येनैवोत्पादयितुं शक्यते। अत एवोक्तं वक्रोक्तिजीवितकारेणाचार्यकुन्तकेन –

**साहित्यमनयो: शोभाशालितां प्रति काप्यसौ।**
**अन्यूनानतिरिक्तत्व मनोहारिण्यवस्थिति:॥**

संस्कृतसाहित्ये वेदानां स्थानं सर्वोपरि वर्तते। अत एव संस्कृतसाहित्यमपि वैदिकसाहित्यं लौकिकसाहित्यञ्चेति द्विविधमङ्गीकृतम्। वैदिकसाहित्ये ऋग्वेदादारभ्य संहिता:, ब्राह्मणग्रन्था:, आरण्यकग्रन्था: उपनिषद्ग्रन्थाश्च गण्यन्ते।

## लौकिकसंस्कृतसाहित्यम् –

लौकिकसंस्कृते काव्यलेखनस्य क्रम: वाल्मीकित: प्रारब्ध:। कामातुरक्रौञ्चपक्षिमिथुनयोरेकस्य वधस्य हृदयविदारिकां घटनां दृष्ट्वा आदिकवि: वाल्मीकि: स्वीयामनुभूतिं श्लोकरूपेण व्यक्तीकृतवान्। अर्थात् शोक: श्लोकत्वमागत:। रामायणवत् महाभारतमपि एकम् उपजीव्यं काव्यमस्ति। इदम् अष्टादशपर्वसु विभक्तम् एकं बृहद्ग्रन्थरत्नमस्ति, यस्मिन् प्राय: सपादलक्षश्लोका: सन्ति। अस्य प्रणेता वेदव्यासोऽस्ति। रामायणेन महाभारतेन च समं पुराणान्यपि संस्कृतसाहित्यस्य उपजीव्याानि सन्ति। अष्टादशपुराणानामिव उपपुराणानामपि विशिष्टं महत्त्वमस्ति। वेदव्यास: अस्य रचयिता अस्ति। महाकाव्यपरम्परासु कविकुलचूडामणिकालिदासस्य नाम संस्कृतसाहित्याकाशे देदीप्यमानसूर्यवत् अद्यापि नितरां विभाति।।

## संस्कृतकाव्यभेदा: –

काव्यलक्षणविषये संस्कृतज्ञानां नैकमत्यम्। केचन मम्मटं, केचन विश्वनाथं केचन च जगन्नाथं साधिष्ठं मन्यन्ते। आचार्यविश्वनाथस्य काव्यलक्षणं प्रायो विद्वद्भि: प्रशस्यते –

**'वाक्यं रसात्मकं काव्यम्' इति।**

रस एवात्मा साररूपतया जीवनाधायको यस्य तेन विना तस्य काव्यत्वाभावस्य प्रतिपादनात्। तच्च काव्यं दृश्यश्रव्यत्वभेदेन द्विविधमङ्गीकृतं –

**दृश्यश्रव्यत्वभेदेन पुन: काव्यं द्विधा मतम्।**
**दृश्यं तत्राभिनेयं स्यात् रूपारोपात्तुरूपकम्॥**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

दृश्यकाव्यमभिनेयं भवति। नटादिभिः पात्राणामनुकरणवशाद् रूपकमिति नाम्नाऽपि ज्ञायते।

श्रव्यकाव्यञ्च श्रवणीयं भवति। उक्तमपि साहित्यदर्पणकारेण –

**''श्रव्यं श्रोतव्यमात्रं तद्गद्यपद्यमयं द्विधा।''**

गद्यपद्ययोः मिश्रितस्वरूपं चम्पूकाव्यमपि काव्यभेदत्वेनाङ्गीकृतं –

**''गद्यपद्यमयं काव्यं चम्पूरित्यभिधीयते।''**

पुनश्च पद्यकाव्यस्यापि त्रयो भेदाः विद्वद्भिः स्वीक्रियन्ते – (१) महाकाव्यं, (२) खण्डकाव्यं, (३) मुक्तककाव्यञ्चेति।

**महाकाव्यम् –**

तत्र सर्गैरवान्तरार्थवर्णनैरुपलक्षितो बन्धः रसवत्पद्यकदम्बविन्यासो यत्र भवति, तदेव महाकाव्यम्। यथोक्तं–

**सर्गबन्धो महाकाव्यं तत्रैको नायकः सुरः।**
**सद्वंशः क्षत्रियो वापि धीरोदात्तगुणान्वितः॥**
**एकवंशभवाभूपाः कुलजा बहवोऽपि वा॥**

महाकाव्यस्वरूपविस्तृतव्याख्या भामह–दण्डि–रुद्रट–विश्वनाथप्रभृतिभिराचार्यैः कृता। मूलतः संस्कृतमहाकाव्यानि पुराणं रामायणं महाभारतं च बीजभावेनाश्रयन्ति।

**खण्डकाव्यम् –**

पूर्वाभिहितस्य महाकाव्यस्यैकदेशानुसारि यत्किञ्चिल्लक्षणहीनं संस्कृतपद्यैर्निर्मितं काव्यं खण्डकाव्यं भवेत्। अस्य काव्यप्रभेदस्येतिहासः कदा आरभ्यते इति जिज्ञासायाम् ऋग्वेदकाल एव खण्डकाव्यस्य बीजमिति सविश्वासं वक्तुं शक्यते। साहित्यदर्पणकारेणाचार्यविश्वनाथेन खण्डकाव्यस्य गीतिकाव्यस्य वा लक्षणमेवं समुद्घोषितं –

**''खण्डकाव्यं भवेत् काव्यस्यैकदेशानुसारि च।''**

## मेघदूतम्

कविकुलगुरुकालिदासस्य मेघदूतम् अतिप्रसिद्धं खण्डकाव्यं वर्तते। कालिदासेन विरहिणो लोकस्य मनःस्थितेर्वर्णनं कृतम्। पूर्वमेघे आदितोऽवसानपर्यन्तं बाह्यप्रकृतिश्चित्रिता, एवमेव उत्तरमेघे अन्तः प्रकृतिः। मेघदूते स्वाऽनुष्ठेय कार्यप्रमादजन्यभर्तृशापाद्वर्षभोग्यप्रियाविश्लेषितस्य कस्यचिद्यक्षस्य मेघं सम्बोध्य स्ववल्लभाऽर्थं प्रेषणीयसन्देशकथनं प्रदर्शितं महाकविना। रामगिर्याश्रमस्थेन यक्षेण अलकापुर्यां विद्यमानायाः प्रियायाः सकाशं सन्देशप्रेषणाऽऽर्थं मेघस्याऽऽसादनाय मार्गमन्तराऽऽपतितानां तत्तद्देशानां यादृशं वर्णनं कृतं, तेनाऽस्य कविवरस्य भौगोलिकज्ञानेऽसाधारणवैभवं स्फुटं भवति।

**मेघदूतस्य नामकरणम् –**

मेघः दूतः यस्मिन् काव्ये, तत् मेघदूतम् अथवा मेघश्चासौ दूतः मेघदूतः, मेघदूतमाश्रित्य कृतं काव्यं, मेघदूतम्।

सन्देशप्रेषणस्य प्रवृत्तिस्तदाधारेण काव्यप्रणयने प्रवृत्तिश्चेयं पुराणेषु रामायणे महाभारते चापि प्राप्यते। तदत्र कालिदासेन रामायणमनुसृत्य मेघदूतं प्रणीतमिति कथनं नासत्यम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**मेघदूतस्य कथावस्तु –**

महाकविकालिदासविरचिते खण्डकाव्येऽस्मिन् भागद्वयं वर्तते – पूर्वमेघ: उत्तरमेघश्च। पूर्वमेघ: बाह्यप्रकृते: भारतभूमेश्च मनोहारि चित्रं प्रस्तौति। उत्तरमेघे च अलकापुर्या: विस्तृतं वर्णनं महाकविना प्रस्तुतम्।

**पूर्वमेघस्य कथासार: –**

स्वनियोगात् प्रमत्त: कश्चित् यक्ष: स्वामिन: कुबेरस्य शापेन ग्रस्त: तिरस्कृतश्च सन् रामगिरिपर्वते वियोगकालावधिं यापयति। आषाढस्य प्रारम्भे मेघं दृष्ट्वा तस्य विरहवेदना तीव्रा भवति। कामार्तो यक्ष: चेतनाचेतनम् अविचार्य मेघं प्रत्यात्मन: शरणागतिं निवेद्य सन्देशप्रेषणरूपकार्यस्य सिद्ध्यै गन्तव्यं निर्दिशति। मेघं प्रति तत्पूर्वपरिचयं प्रस्तूय यक्ष: कथयति – हे सुहृन्मेघ! पश्य मन्दं मन्दं प्रवहन् वायु: त्वामनुकूलां दिशं प्रति प्रेरयति, सगर्व: चातक: तव वामभागे मधुरं कूजति। एतत् सर्वं भवतो यात्रायै शुभशकुनमस्ति। मार्गे श्रान्तो भवान् पर्वतशिखरेषु विश्रामं कुर्वन् अग्रेसरतु। क्षीण: सन् नदीनां जलं पिबतु। मेघस्य कौलीन्यं वर्णयन् यक्ष: स्वप्रार्थनाया: औचित्यं स्पष्टयति –

**''याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा''**

यक्ष: मेघं मालक्षेत्रात् विनिर्गत्य आम्रकूटपर्वतम् उपगन्तुं निर्दिशति। स: पर्वत: मार्गपरिश्रान्तं भवन्तं पूर्वोपकारवशात् स्वकूटे आश्रयं प्रदास्यति। उक्तमपि –

**न क्षुद्रोऽपि प्रथमसुकृतापेक्षया संश्रयाय।**
**प्राप्ते मित्रे भवति विमुख: किं पुनर्यस्तथोच्चै:॥**

पुन: अग्रे विन्ध्यपादे विशीर्णां नर्मदां द्रक्ष्यसि। तस्या: तिक्तजलपानेन अन्त: सारं भवन्तं वायुरपि तुलयितुं समर्थो न भवेत्। यथोक्तं –

**''रिक्त: सर्वो भवति हि लघु: पूर्णता गौरवाय।''**

ततोऽग्रे नीचै: नामकगिरिं प्राप्य विकसितकदम्बकपुष्पै: पुलकितो भविष्यति।

तत: उत्तराशां प्रस्थितस्य मेघस्य पन्था: यद्यपि वक्रो भवति तथाऽपि मेघ: उज्जयिनीं गत्वा तत्रत्य पौराङ्गनानां चञ्चलापाङ्गै: रमेत। तत्र महाकालस्य शिवस्य मन्दिरं गत्वा सन्ध्यापूजनावसरे नृत्यन्तीनां वेश्यानां सम्मुखं गर्जनध्वनिना पटहकार्यमपि सम्पाद्य तस्य फलमपि मेघ आप्नुयात्। मार्गे गम्भीरामुपभुज्य देवगिरिमाश्रयेत्। तत्र साक्षात् वसन्तं कार्तिकेयं स्वजलै: अभिषिच्य चर्मण्वतीं भजेत्। ततोऽग्रे दशपुरललनानां नेत्रकौतूहलस्य विषयोऽपि मेघ: भविष्यति।

स्वच्छाया शरीरेण ब्रह्मावर्तजनपदं प्रविशन् मेघ: कुरुक्षेत्रं गमिष्यति। तत्र सरस्वत्या: जलं पीत्वा अन्त:करणात् पवित्रो भविष्यति। ततोऽग्रे स: कनखलं निकषा हिमालयात् अवतीर्णां गङ्गामाश्रयेत्। तत्रासौ शिवस्य अट्टाहासमिव कैलासं द्रक्ष्यति। मेघे कैलासं प्राप्ते सति कैलासस्य शोभा स्कन्धोपरि नीलवस्त्रधारिणो बलरामस्य इव भविष्यति। तत्रैव कैलासस्य क्रोडे स्रस्तगङ्गादुकूला अलका प्रणयिनीवावस्थिता स्यात् इति मेघ: स्वयमेव ज्ञास्यति। सा अलका मेघसमूहं स्वशिरसि तथैव धारयति यथा मुक्ताजालगुम्फितम् अलकं कामिनी धारयति इति पूर्वमेघस्य कथासार:।

**मेघदूते प्रकृतिचित्रणम् –**

भौतिकजगत: ईश्वरकृतपदार्थेषु पर्वतवननदीत्यादय: प्रकृति मध्ये गण्यन्ते। मेघ: स्यवमेव प्रकृते: विशिष्टरूपम्। यं संश्रित्य कविनामुना मेघदूतं व्यरचि।

कालिदासस्य समग्रास्वपि रचनासु प्रकृतिनटी तस्य सहचरीव प्रतीयते। प्रकृते: यादृशं सजीवस्वरूपं कवि: अवणर्यत् तेनेदमेव प्रतीयते –

''प्रकृति: कालिदासस्य'' इति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

मेघदूताभिधाने खण्डकाव्ये धूमज्योतिः सलिलमरुतां सन्निपातः अचेतनो मेघः सर्वत्र सजीव इवानुभूतः महाकविकालिदासेन। अत एव दूतकर्मनिर्वहणमपि नास्ति कठिनं तत्कृते। यक्षः मेघे आम्रकूटमुपगते सति तदीयां शोभां वर्णयन् वदति यत् तत्र आम्रवृक्षाणां बाहुल्यवशाद् तस्य (पर्वतस्य) पाण्डुराभा वर्तते पुनश्च श्यामवर्णस्य मेघस्य मध्यभागे नीलाभा पृथिव्या उरोजरूपिणि पर्वते कुचाग्रतुल्या लक्षिता स्यात्। यथा हि –

**छन्नोपान्तः परिणतफलद्योतिभिः काननाम्रैः**
**त्वय्यारूढे शिखरमचलः स्निग्धवेणीसवर्णे।**
**नूनं यास्यत्यमरमिथुनप्रेक्षणीयामवस्थाम्**
**मध्ये श्यामः स्तन इव भुवः शेषविस्तारपाण्डुः॥**

दशार्णदेशे वर्षतौ मेघस्य प्रभावात् कानि प्राकृतिकपरिवर्तनानि भविष्यन्तीत्यप्यत्र कविना वर्णितं –

**पाण्डुच्छायोपवनवृतयः केतकैः सूचिभिन्नै**
**र्नीडारम्भैर्गृहबलिभुजामाकुल ग्रामचैत्याः।**
**त्वय्यासन्ने परिणतफल श्यामजम्बूवनान्ताः**
**सम्पत्स्यन्ते कतिपयदिनस्थायिहंसा दशार्णाः॥**

अचेतनस्थमेघस्य उज्जयिनीगमनावसरे निर्विन्ध्यायाः वैशिष्ट्यं तादृशमेव वर्णितं यथा काचिन्नायिका विलासेच्छया स्वनायकं प्रति चेष्टते –

**निर्विन्ध्यायाः पथि भव रसाभ्यन्तरः सन्निपत्य**
**स्त्रीणामाद्यं प्रणयवचनं विभ्रमो हि प्रियेषु॥**

कैलासपर्वतस्याङ्के अलका स्रस्तगङ्गादुकूला नायिकेव वर्णिता –

**तस्योत्सङ्गे प्रणयिन इव स्रस्तगङ्गादुकूलाम्।**

खण्डकाव्येऽस्मिन् महाकविकालिदासेन पूर्वभागे बाह्य प्रकृतेः परार्धभागे च अन्तः प्रकृतेः मार्मिकं मनोरमवर्णनं कृतम्। मेघदूतस्य निर्माणे बाह्यान्तः प्रकृत्योः दुर्लभः समन्वयो दृश्यते।

## महाकविकालिदासः

कविताकामिनीविलासः महाकविकालिदासः संस्कृतसाहित्यमहाकाशे अम्बरमणिरिव प्रकाशते – इति सुविदितमेव। न केवलं चरित्रचित्रणेऽपितु प्रकृतिवर्णनेऽपि कविकुलशिरोमणिरयं सर्वानपि कवीन्द्रानतिशेते। तस्य वर्णविन्यासमाधुर्यं भाषायाः प्राञ्जलता च नान्यत्राभिलक्ष्यते। अस्मादेव कारणाद् विद्वत्समवाये कालिदासस्य भारती विषये सूक्तिरियं प्रसिद्धा –

**अमृतेनेव संसिक्ता चन्दनेनेव चर्चिता।**
**चन्द्रांशुभिरिवोद्धृष्टा कालिदासस्य भारती॥**

### कालिदासस्य स्थितिकालः –

अयं महाकविः स्वजन्मना कदा कतमञ्च जनपदमलङ्कृतवानितिनिर्धारणं कष्टसाध्यं कार्यं विदुषां कृते यतोऽसौ स्वविषये कुत्रापि स्पष्टतया उल्लेखं न चकार। तथापि ई०पू० प्रथमशतके विक्रमादित्यस्य राजसभायां नवरत्नेष्वयं मुख्यतमः आसीत्। पुनश्च बुद्धचरितेऽश्वघोषेण कालिदासस्यैवानुकरणं कृतम्। अत एव प्रमुखेतिहासविद्भिः मनीषिभिः अस्य महाकवेः स्थितिकालः ई०पू० प्रथमशतकमिति स्वीक्रियते।

कालिदासेन यथा सूक्ष्मेक्षिकयावन्तीनां भौगोलिकी स्थितिर्मेघदूते निबद्धा सा तद्देशवासित्वे एव सम्भवति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

अपि च कालिदासस्योज्जयिनीवर्णनपक्षपातोऽपि पक्षमिमं समर्थयते।

**कृतिपरिचयः –**

संस्कृतसाहित्यजगति महाकविकालिदासस्य सप्त एव कृतयः स्वीक्रियन्ते। ऋतुसंहारं, मेघदूतं, कुमारसंभवं, रघुवंशञ्च काव्यानि सन्ति। अन्यानि त्रीणि नाटकानि सन्ति – मालविकाग्निमित्रं, विक्रमोर्वशीयम्, अभिज्ञानशाकुन्तलञ्चेति।

## ऋतुसंहारम्

ऋतुसंहारं कालिदासस्य प्रथमा कृतिः मन्यते। षड्भागैः विभक्तेऽस्मिन् मुक्तककाव्ये ग्रीष्मादारभ्य षण्णां ऋतूनां क्रमेण मनोहारि वर्णनं महाकविना कृतम्। ऋतुवर्णनविषयमाधारीकृत्य लिखितमिदं संस्कृतसाहित्यस्य प्रथममेव काव्यम्।

## मेघदूतम्

गीतिकाव्यस्यादितमं काव्यं मेघदूतम्। अस्मिन् काव्ये कुबेरशापविमुक्तस्य यक्षस्य मनोव्यथायाः मार्मिक-चित्रणमस्ति। पूर्वमेघः बाह्यप्रकृतेः भारतभूमेश्च मनोहरं चित्रं प्रस्तौति। मेघदूतं संस्कृत-साहित्यस्यातिमहार्हं रत्नमस्ति। अत्र मानवीयान्तः प्रकृतेः मार्मिकं स्नेहसम्पन्नं चित्रणं सद्यः मनो हरति।

## कुमारसम्भवम्

महाकविकालिदासस्य कुमारसम्भवं सप्तदशसर्गात्मकमेकं लालित्यपूर्णं महाकाव्यमस्ति। अत्र हिमालयवर्णनं, शिवपार्वत्योः विवाहः, कुमारकार्तिकेयजन्म, तारकासुरवधश्चेत्यादयः विषयाः कथानकरूपेणाङ्गीकृताः। अङ्गीरसः शृङ्गारः तदङ्गतया च सर्वेऽन्ये रसाः यथास्थानं विन्यस्ताः।

## रघुवंशमहाकाव्यम्

रघुवंशम् एकोनविंशति (१९) सर्गात्मकं महाकाव्यम्। अत्र रघोर्वंशकथा निबद्धा वर्तते। दशमसर्गादारभ्य पञ्चदशसर्गपर्यन्तं रामस्य कथा वर्णिता। तदुत्तरमवशिष्टानां रामवंशीयनृपाणां चरितान्युपन्यस्तानि।

रघुवंशे येषां राज्ञां वर्णनानि प्राप्यन्ते, तेषां रामायणवर्णितनृपैः सह भेद आपतति, परन्तु वायुपुराणवर्णित – रामवंशावल्या सह रघुवंशवर्णितरामवंशावली भूयसा सामञ्जस्यं धारयति।

## मालविकाग्निमित्रम्

अत्र महाकविना अग्निमित्रेण मालविकायाः स्नेहकथायाः चित्ताकर्षकं वर्णनं प्रस्तुतम्। सौन्दर्यातिशयसमन्विता विदर्भराजभगिनी मालविका नाटकस्यास्य प्रधानभूता नायिका विद्यते। तस्यामादर्शनायिकायाः सर्वे गुणाः समाविष्टाः सन्ति। सा त्रिलोकललनाललामभूता अतीव कमनीया वर्तते। नाटकस्यास्य पद्यमिदं नूनं श्लाघनीयं महत्त्वपूर्णञ्च –

**पुराणमित्येव न साधु सर्वं**
**न चापि काव्यं नवमित्यवद्यम्।**
**सन्तः परीक्ष्यान्यतरद् भजन्ते**
**मूढः परप्रत्ययनेयबुद्धिः॥**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

### विक्रमोर्वशीयम्

महाकविकालिदासस्य द्वितीया नाट्यकृतिरस्ति - विक्रमोर्वशीयम्। पौराणिकीं कथामाश्रित्य विरचितेऽस्मिन् नाटके पुरुरवसाउर्वश्या: प्रेमवर्णनं सुन्दरं मनोहारि च वर्तते। पञ्चाङ्कै: विभूषितेऽस्मिन् नाटके नायिका उर्वशी दिव्यपात्रमस्ति।

### अभिज्ञानशाकुन्तलम्

महाकविकालिदासस्य अभिज्ञानशाकुन्तलमस्ति एकं घटनाप्रधानं नाटकम्। सप्ताङ्कैर्विभूर्षिते नाटकेऽस्मिन् नायिका शकुन्तला राज्ञा दुष्यन्तेन गान्धर्वविवाहविधिना परिणीता।

अभिज्ञानप्रधानं शाकुन्तलम् ''अभिज्ञानशाकुन्तलम्''। इदं नाटकं कालिदासस्य सर्वस्वमभिधीयते। अभिज्ञानशाकुन्तलस्य चतुर्थेऽङ्के लौकिकालौकिकप्रकृति मानवयो: विलक्षणं समन्वयोऽस्ति। उक्तमपि -

**कालिदास्य तु सर्वस्वम् अभिज्ञानशाकुन्तलम्।**
**तत्रापि चतुर्थो ह्यङ्कस्तत्र श्लोकचतुष्ट्यम्॥**

पुनश्च अन्यदपि -

**''काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला॥''**

## कालिदासस्य वैशिष्ट्यम् -

महाकविकालिदासस्य काव्यमाधुरी नितरां प्रसिद्धा मनोरमा च। कलापक्षापेक्षया हृदयपक्षस्य चमत्कार: प्राधान्यं यस्य काव्ये संभवति स कवि: श्रेष्ठ:। एतदनुकूलं हृदयपक्षस्य चमत्कारपरिपूर्णं चित्रणं कालिदासस्य काव्येषु सर्वत्र प्राप्यते। चरित्रचित्रणे प्रकृतिवर्णने चायं कविकुलशिरोमणि: सर्वानपि कवीन्द्रानतिशेते। अस्य प्रसादगुणालङ्कृता वाणी, गम्भीरार्था च कल्पना अस्य सिद्धवाग्विभवस्यैव प्रखरप्रतिभाप्रसूतेषु काव्येषु विलोक्यते।

महाकविकालिदास: शृङ्गारस्य उपमाऽलङ्कारस्य च प्रयोगे उद्भट: विद्वान् आसीत्। अस्मादेव कारणात् महाकविबाणभट्ट: कालिदासस्य विषये एवमुक्तवान् -

**निर्गतासु न वा कस्य कालिदासस्य सूक्तिषु।**
**प्रीतिर्मधुरसान्द्रासु मञ्जरीष्विव जायते॥**

अर्थात् कालिदासस्य रससिक्तासु सुमधुरसूक्तिषु सहकारमञ्जरीष्विव कस्य प्रीतिर्न जायते? अपि तु सर्वस्यैव जनस्य तत्राकर्षणं जायते।

### उपमा कालिदासस्य -

प्राय: कालिदास: सर्वास्वलङ्काररचनासु प्रसिद्ध एवास्ति, तथापि उपमा प्रयोगसम्बन्धे तस्य महती ख्याति:। तत्र त्वयं कविकुलगुरुरितरान् अखिलान् कवीश्वरानतिशेते। उपमा त्वस्य नैसर्गिकी प्रेयसीव प्रतीयते। काव्येष्वस्य उपमालता यादृशी पुष्पिता पल्लविता च न तादृशी कवीश्वराणामन्येषां काव्येषु। रघुवंशमहाकाव्ये दिलीपसुदक्षिणयोर्मध्ये विराजमानां वसिष्ठधेनुं नन्दिनीं दिनक्षपयोर्मध्ये विद्यमानां संन्ध्यां कवि: वर्णयति यथा -

**पुरस्कृता वर्त्मनि पार्थिवेन प्रत्युद्गता पार्थिव धर्मपत्न्या।**
**तदन्तरे सा विरराजधेनुर्दिनक्षपा मध्यगतेव सन्ध्या॥**

अत्र दिनरात्र्युपलक्षणेन नहि केवलं सूर्य इव दिलीपप्रताप:, चन्द्र इव सुदक्षिणाया: नयनाभिरामत्वं व्यञ्जनया प्रकाशितम् अपितु राज्ञो गौरवर्णत्वं सुदक्षिणाया: श्यामत्वं, रक्तवर्णत्वं सन्ध्याया: नन्दिन्या: कपिलत्वञ्च प्रकटितमस्ति। सर्वमिदमुपमाप्रभावमिति निर्विवादमेव।

एवमेव उपस्थिते सति स्वयम्वरे इन्दुमती यथा यथा भूमिपालान् परित्यज्य व्रजति तथा ते नृपा



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

राजमार्गस्योपरि परित्यक्ताः प्रासादा इव प्रतिभान्ति राज्ञामत्रोदासीनताया विषण्णतायाश्चाभिव्यक्तिः सुशोभना प्रतीयते उपमाप्रयोगेण। अत एव कालिदासः, कविसमवाये ''दीपशिखा'' कालिदास इति नाम्ना प्रसिद्धोऽभूत्। तद्यथा –

**सञ्चारिणी दीपशिखेव रात्रौ यं यं व्यतीताय पतिंवरा सा।**
**नरेन्द्रमार्गाट्ट इव प्रपेदे विवर्णभावं स स भूमिपालः॥**

### मेघदूते उपमाविधानं सादृश्यविधानं वा –

महाकविकालिदासो भारतीयसंस्कृतेः पोषकोऽस्तीति भारतीयदर्शनस्य प्रभावोऽप्यस्य काव्येषु पूर्णतः द्रष्टुं शक्यते। भारतीयदर्शनस्य वैशिष्ट्यमस्ति – 'अचेतने चेतनत्वारोपः'' 'सर्वं विष्णुमयं जगत्' इति। एवमेवाचेतने चेतनत्वं चेतनेऽचेतनत्वं मेघदूतस्यापि प्रथमं वैशिष्ट्यमस्ति – 'प्रकृतिकृपणाश्चेतनाचेतनेषु' स्वकाव्यसर्वस्वभूतामुपमामपि कविः पुरुषार्थचतुष्टयमिव प्रकारचतुष्टयेन वर्गीकरणं करोतीति स्वत एवाग्रैः प्रदर्शितैः उपमाविधानैः सुस्पष्टं भविष्यति–

१. सजीवस्य सजीवेनोपमा
२. सजीवस्य निर्जीवेनोपमा
३. निर्जीवस्य सजीवेनोपमा
४. निर्जीवस्य निर्जीवेनोपमा

कविः क्वचित् पर्वतसानुसंश्लिष्टस्य कृष्णकृष्णस्य मेघस्योपमां वप्रक्रीडापरिणतेन गजेन सम्पादयति –

**आषाढस्य प्रथमदिवसे मेघमाश्लिष्टसानुं**
**वप्रक्रीडापरिणतगजप्रेक्षणीयं ददर्श॥**

कदाचित् आखण्डलधनुः खण्डप्रभासमन्वितो मेघः स्फुरितरुचिना चित्रविचित्रेण बर्हेण गोपवेषस्य भगवतो विष्णोः सादृश्यं धारयति –

**येन श्यामं वपुरतितरां कान्तिमापत्स्यते ते।**
**बर्हेणेव स्फुरितरुचिना गोपवेषस्य विष्णोः॥**

छन्नोपान्तः आम्रकूटपर्वतः कृष्णवर्णे मेघे शिखरमारूढे सति पृथिव्याः स्तन इव मध्ये श्यामः शेषविस्तारे च पाण्डुवर्णो भवति –

**छन्नोपान्तः परिणतफलद्योतिभिः काननाम्रैः**
**त्वय्यारूढे शिखरमचलः स्निग्धवेणीसवर्णे।**
**नूनं यास्यत्यमरमिथुनप्रेक्षणीयामवस्थां**
**मध्ये श्यामः स्तन इव भुवः**
**शेषविस्तारपाण्डुः॥**

उज्जयिन्यां शिप्रावातः स्त्रीणां सुरतग्लानिं तथैव हरति यथा प्रियतम चाटुकारः –

**शिप्रावातः प्रियतम इव प्रार्थना चाटुकारः।**

वेत्रवत्याश्चलोर्मि पयः सभ्रूभङ्गं नायिकामुखमिवास्ति –

**सभ्रूभङ्गं मुखमिव पयो वेत्रवत्याश्चलोर्मि।**

अलकापुर्याः नायिकया हिमालयस्य कैलाशस्य वा नायकेनोपमा अपूर्वचमत्कारमुत्पादयतीति नूनं दर्शनीयं–

**तस्योत्सङ्गे प्रणयिन इव स्रस्तगङ्गादुकूलाम्॥**

एवं ज्ञायते यन्मेघदूते कालिदासीयोपमा किमप्यनिर्वचनीयमेव सौन्दर्यमुत्पादयति येन सहृदयानां हृदयमाह्लादितं भवति। अस्मादेव सर्वैरपि विद्वद्भिः आलोचकैश्चैकस्वरेण स्वीकृतम् –

''उपमा कालिदासस्य'' इति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**मेघदूते अङ्गीरसः –**

मेघदूतमेकं खण्डकाव्यमस्ति। खण्डकाव्यस्य कृतेऽङ्गिनो रसस्य व्यवस्था नास्ति व्यवस्थापिता तथापि रससिद्धकवीश्वरेण कविताकामिनीविलासेन महाकविकालिदासेन मेघदूते विप्रलम्भशृङ्गाररसोऽङ्गीत्वेन प्रतिपादितोऽस्ति। काव्यादर्शकारेणाचार्य दण्डिना तु खण्डकाव्यस्याप्यस्य महाकाव्यत्वमेव प्रतिपादितमिति।

यक्षिणी साक्षाच्छरीरभूतैवास्ति विप्रलम्भस्य। वियोगिनी सा तथैव वर्णिता यथा रात्रौ चक्रवाकेन वियुक्ता चक्रवाकी। यक्षोऽपि प्रियावियोगेन कामप्यद्भुतामेवावस्थां वहति। मेघदूते महाकविकालिदासेन वर्णितो वियोगः बिम्बरूपः सर्वेषां वियोग प्रिय कवीनां मार्गदर्शकोऽस्ति। तद्यथा –

**त्वामालिख्य प्रणयकुपितां धातुरागैः**
**शिलाया–**
**मात्मानं ते चरणपतितं यावदिच्छामि कर्त्तुम्।**
**अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे**
**क्रूरस्तस्मिन्नपि न सहते सङ्गमं नौ कृतान्तः॥**

## मेघदूतस्य प्रमुखपात्राणां चरित्रचित्रणम्

**यक्षः –**

स्वकर्त्तव्यात् अनवधानतावशात् यक्षस्य नाम खण्डकाव्ये मेघदूते कुत्रापि न प्रस्तुतम्। 'कश्चित्' इति पदेन सः सम्बोधितः कविना। स एवास्य खण्डकाव्यस्य नायकः। असौ हि कलाप्रियो, दर्शनीयो, विलासप्रियः प्रकृत्या मधुरश्च वर्तते। अस्मात् नाट्यशास्त्रीयदृष्ट्याऽयं धीरललितनायकः। धीरललितनायकस्य लक्षणं साहित्यदर्पणकारेण एवमुक्तं –

**'निश्चितो मृदुरनिशं कलापरो धीरललितः स्यात्।'** भार्यां प्रति तस्य प्रेम नूनमतिशयेनोदात्तं वर्तते। अस्मादेव वियोगकाले सः पदे पदे तामेव स्मरति। महत्या खलु सूक्ष्मेक्षिकया मार्गवर्णनाद् भौगोलिकज्ञानेऽसाधारणवैभवं स्फुटं भवति। यक्षस्य आशावादिता जीवनं प्रत्यपि नूनं दर्शनीया। यथा हि–

**कस्यात्यन्तं सुखमुपनतं दुःखमेकान्ततो वा।**
**नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण॥**

मेघदूते नवोढस्य विरहिणो यक्षस्य वर्णनं पठित्वा स्वत एव सहानुभूतिरनुभूयते सहृदयैः।

**यक्षिणी –**

यक्षिणी खण्डकाव्यस्यास्य नायिका वर्तते। नाट्यशास्त्रीयदृष्ट्या सा स्वीया नायिका वर्तते, स्वीया–नायिकाया लक्षणमाचार्यविश्वनाथेन एवमुक्तं –

**विनयार्जवादियुक्ता गृहकर्मपरा पतिव्रता स्वीया।**

उत्तरमेघे सा परमसुन्दरीरूपेण वर्णिता –

**तन्वी श्यामा शिखरिदशना पक्वबिम्बाधरोष्ठी**
**मध्ये क्षामा चकितहिरणी प्रेक्षणा निम्ननाभिः।**
**श्रोणीभारादलसगमना स्तोकनम्रा स्तनाभ्यां**
**या तत्र स्याद्युवतिविषये सृष्टिराद्येव धातुः॥**

वीणावादने सा निपुणा वर्तते। यक्षस्य वियोगेन दन्दह्यमाना सा केशसंस्कारमपि न करोति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

इत्थं यक्षिण्या: आदर्शरमणीरूपे पवित्रचरित्रचित्रणे महाकविकालिदासस्य प्रतिभाविलासो नूनमतीव प्रशंसनीय:।

**मेघ: –**

मेघदूतनाम्नि खण्डकाव्ये मेघस्य सन्देशवाहकत्वेन वर्णनं प्राप्यते। यद्यपि मेघ: सामान्यरूपेण धूमज्योति: सलिलमरुतां सन्निपात: एवास्ति तथापि कालिदासेन मेघो दूततां गमित: इति जिज्ञासायाम् उत्तरमपि स्वयमेव तेन दत्तं–

**''कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु।''**

यक्षदृष्ट्या आदर्शदूतस्य सर्वेऽपि गुणा: तस्मिन् विराजन्ते। स: कुलीन: वर्तते, मघोन: कामरुप: प्रधानपुरुषश्चास्ति। सन्तप्तजनानां कृते तु स: शरणागतवत्सल: वर्णित:। तस्यान्त: करणं करुणया परिपूर्णमस्ति। स्त्रीजनानां कृते तु तस्य दाक्षिण्यं प्रसिद्धमेव। मेघ: शिवस्य परमभक्त: वर्तते। अस्मादेव उज्जयिन्यां महाकालमन्दिरे स: संन्ध्याकाले पटहकार्यमपि करोति। मेघदूते सखे–सौम्य–बन्धु–सुहृद् इति पदै: तस्य सम्बोधनत्वाद् तस्य उदारता अभिव्यक्ता भवति।

## मेघदूतस्य वैशिष्ट्यं यद्वा संस्कृतसाहित्ये मेघदूतस्य स्थानं –

मेघदूतमस्त्येकं खण्डकाव्यं – ''खण्डकाव्यं भवेत्काव्यस्यैकदेशानुसारि च'' इति लक्षणात्। आधुनिका: विद्वांस: खण्डकाव्यमेव गीतिकाव्यमिति नाम्ना व्यपदिशन्ति। रामायणाधारेण कृतमिदं खण्डकाव्यं प्रथमं दूतकाव्यरत्नमप्यस्ति।

मन्दाक्रान्तावृत्ते रचितोऽयं ग्रन्थ: किमप्यलौकिकं सहृदयाह्लादकं तत्त्वं रक्षति येन ''मेघे माघे गतं वय:'' इति सूक्ति: विद्वत्समवाये श्रूयते। मन्ये मेघदूते नवोढस्य विरहिणो यक्षस्य यादृशं वर्णनं प्रस्तुतं तदधीयानो जन: स्वचित्रमिव विलोक्य आत्मानमेव विस्मरति। इदमेव मेघदूतस्य वैशिष्ट्यं यत् पठनानन्तरमेव तत् पद्यान्यपि सद्य: मनोगतान् विरहिजनभावानभिव्यञ्जयन्ति।

मेघदूतमाश्रित्य अद्यावधि ७० सप्ततितोऽप्यधिका: टीका: समुल्लसन्ति। मेघदूतमादर्शं मत्वा संस्कृतभाषायां निबद्धा सन्देशकाव्यमाला सुप्रसिद्धा वर्तते। अस्य लोकप्रियता न केवलं स्वदेशे प्रत्युत विदेशेष्वप्यस्ति। मेघदूतं हि कालिदासस्य अनुपमप्रतिभाया विलासो वर्तते।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

महाकविकालिदासप्रणीतं

# मेघदूतम्

(पूर्वमेघः)

## रामगिरिपर्वतात् अलकापुरीपर्यन्तं मेघस्य मार्गवर्णनम्

### यक्षस्य आत्मकथनम्

**सन्दर्भः** – श्लोकोऽयं कविकुलकुञ्जरकेसरिणा काव्योभयविधरचनासमर्थेन सरस्वतीवरदपुत्रेण महाकविकालिदासेन 'अस्ति कश्चिद्वाग्विशेषः' इत्यस्य 'कश्चित्' इति पदमधिकृत्य कृतस्य विप्रलम्भशृङ्गारान्य-तमोदाहरणभूतस्य पूर्वोत्तरभागात्मकस्य विश्वविख्यातस्य मेघदूताख्यगीतिकाव्यस्य पूर्वमेघात् समुद्धृतोऽस्ति।

पूर्वमेघस्य कथावस्तुरूपेण रामगिरिपर्वतात् अलकापुरीपर्यन्तं मेघस्य मार्गवर्णनमेवास्ति। नवोढस्य विरहिणो यक्षस्य मार्मिकवर्णनादत्र विप्रलम्भशृङ्गाररसोऽङ्गीत्वेनास्ति। मन्दाक्रान्तावृत्तं सर्वत्र विराजते।

### श्लोकः १

**प्रसङ्गः** – कविकुलगुरुकालिदासो ग्रन्थादौ वस्तुनिर्देशात्मकमङ्गलाचरणं कुर्वन् स्वकर्त्तव्यासावधानहेतोः स्वस्वामिशापयुक्तस्य कस्यचिद् यक्षस्य भूलोकस्थितवासस्थानं प्रस्तौति –

**कश्चित् कान्ताविरहगुरुणा स्वाधिकारात्प्रमत्तः**
**शापेनाऽस्तङ्गमितमहिमा वर्षभोग्येण भर्तुः।**
**यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु**
**स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु॥१॥**

**अन्वयः**– स्वाधिकारात् प्रमत्तः कान्ताविरहगुरुणा वर्षभोग्येण भर्तुः शापेन अस्तङ्गमितमहिमा कश्चित् यक्षः जनकतनयास्नानपुण्योदकेषु स्निग्धच्छायातरुषु रामगिर्याश्रमेषु वसतिं चक्रे।

**व्याख्या – (क) पर्यायपदानि** – स्वाधिकारात् = स्वकीयात् कर्त्तव्यात्, प्रमत्तः = असावधानः, कान्ताविरहगुरुणा = कान्तायाः = पत्न्याः, विरहेण = वियोगेन, गुरुः असह्यः, तेन, पत्नीवियोगासहनीयेन, वर्षभोग्येण = वर्षं यावत् भोगयोग्येन, भर्तुः = स्वामिनः कुबेरस्य, शापेन = आक्रोशेन, दुरेषणया, अस्तङ्गमितमहिमा = नष्टसामर्थ्यः, कश्चित् = अनिर्दिष्टनामा, यक्षः = देवयोनिविशेषः, जनकतनयास्नानपुण्योदकेषु = सीतास्नानपवित्रीकृतजलेषु, स्निग्धच्छायातरुषु = घनीभूतच्छायावृक्षेषु, रामगिर्याश्रमेषु = रामगिरिनामकपर्वताश्रमेषु, चित्रकूटाश्रमेष्विति, वसतिं = वासं, चक्रे = कृतवान्।

**(ख) भावार्थः** – स्वकर्त्तव्यात् असावधानः कश्चिदज्ञातनामा यक्षः स्वामिनः कुबेरस्य भार्याविप्रलम्भवर्षभोग्यात् शापात् तमभिशप्तकालमतिवाहयितुं गहनमेरुवृक्षेषु रामगिरिनामकतपोवनेषु निवासं चकार॥१॥

**छन्दः** – मेघदूतेऽस्मिन् सर्वत्र मन्दाक्रान्ताच्छन्दः। तल्लक्षणं यथा –

**'मन्दाक्रान्ता जलधिषडगैर्म्भौ नतौ ताद् गुरू चेत्।'**

**अलङ्कारः** – अस्तङ्गमितमहिमा – इत्यत्र शापहेतुकत्वात् काव्यलिङ्गमलङ्कारः। तथा चात्र साभिप्रायविशेषणत्वात् परिकरालङ्कारः।

**विशेषांशः** – रामगिर्याश्रमेषु – रामगिरि+आश्रमेषु, यण् सन्धिः। अस्तङ्गमितमहिमा – अस्तङ्गमितो महिमा



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

यस्य सः (बहुव्रीहिः)।विद्याधरोऽप्सरसो यक्षरक्षोगन्धर्वकिन्नराः इत्यमरः।स्निग्धं तु मसृणे सान्द्रे इति शब्दार्णवः।

## श्लोकः २

**प्रसङ्गः** – कविताकामिनीविलासः महाकविकालिदासः प्रियाविरहिणो यक्षस्य वर्षर्तौ मेघदर्शनजातायाः मनोदशायाः वर्णनं प्रस्तौति –

**तस्मिन्नद्रौ कतिचिदबलाविप्रयुक्तः स कामी**
**नीत्वा मासान् कनकवलयभ्रंशरिक्तप्रकोष्ठः।**
**आषाढस्य प्रथमदिवसे मेघमाश्लिष्टसानुं**
**वप्रक्रीडापरिणतगजप्रेक्षणीयं ददर्श॥२॥**

**अन्वयः**– तस्मिन् अद्रौ अबलाविप्रयुक्तः कनकवलयभ्रंशरिक्तप्रकोष्ठः कामी सः कतिचित् मासान् नीत्वा आषाढस्य प्रथमदिवसे आश्लिष्टसानुं वप्रक्रीडापरिणतगजप्रेक्षणीयं मेघं ददर्श।

**व्याख्या – (क) पर्यायपदानि** – तस्मिन् = चित्रकूटे, अद्रौ = पर्वते , अबलाविप्रयुक्तः = वल्लभाविप्रलब्धः, कनकवलयभ्रंशरिक्तप्रकोष्ठः = सुवर्णकङ्कणपातशून्य–मणिबन्धः, कामी = कामुकः, सः = यक्षः, कतिचित् मासान् = कतिपय – त्रिंशद्दिनसमूहान्, नीत्वा = यापयित्वा, आषाढस्य = एतन्नाम्नः मासस्य, प्रथमदिवसे = आद्यदिने, आश्लिष्टसानुम् = आलिङ्गितपर्वतशृङ्गं वप्रक्रीडापरिणतगजप्रेक्षणीयम् = उत्खातकेलिति–र्यग्दन्तप्रहारहस्तिदर्शनीयं, मेघं = पयोदं, ददर्श = दृष्टवान्।

**(ख) भावार्थः** – तस्मिन् चित्रकूटाख्ये पर्वते प्रियाभार्याविरहाद्दौर्बल्येन च्युतकनककटकः कामुकः सः यक्षः कतिपयमासान् यापयित्वा आषाढमासस्य प्रथमदिवसे समालिङ्गितपर्वतशिखरं मेघं तथा ददर्श यथा वप्रक्रीडायां संलग्नः गजः दर्शनीयो भवति।

**छन्दः** – अत्र मन्दाक्रान्तावृत्तमस्ति।

**अलङ्कारः** – वप्रक्रीडापरिणतगजप्रेक्षणीयमित्यत्र औपम्यवाचकपदस्य लुप्तत्वात् लुप्तोपमाऽलङ्कारः।

**विशेषांशः** – तस्मिन्नद्रौ – तस्मिन्+अद्रौ, हल् सन्धिः। आश्लिष्टसानुम् – आश्लिष्टः सानुर्येन, तम् (बहुव्रीहिः)। प्रेक्षणीयम् – प्र + ईक्ष् + अनीयर्। आश्लिष्टः – आ+श्लिष्+क्तप्रत्ययः।"स्त्री योषिदबला योषा नारी सीमन्तिनी वधूः"इत्यमरः।

## श्लोकः ३

**प्रसङ्गः** – महाकविकालिदासोऽन्तर्वाष्पायमाणस्य विरहिणो यक्षस्य वर्णनं प्रस्तौति –

**तस्य स्थित्वा कथमपि पुरः कौतुकाधानहेतो–**
**रन्तर्वाष्पश्चिरमनुचरो राजराजस्य दध्यौ।**
**मेघालोके भवति सुखिनोऽप्यन्यथावृत्ति चेतः,**
**कण्ठाश्लेषप्रणयिनि जने किं पुनर्दूरसंस्थे॥३॥**

**अन्वयः**– राजराजस्य अनुचरः अन्तर्वाष्पः (सन्) कौतुकाधानहेतोः तस्य पुरः कथमपि स्थित्वा चिरं दध्यौ। मेघालोके सुखिनः अपि चेतः अन्यथावृत्ति भवति, कण्ठाश्लेषप्रणयिनि जने दूरसंस्थे (सति) किं पुनः ?

**व्याख्या – (क) पर्यायपदानि** – राजराजस्य = यक्षराजस्य कुबेरस्य, अनुचरः = सेवकः, अन्तर्वाष्पः = निरूद्धाऽश्रुः, (सन्) कौतुकाधानहेतोः = अभिलाषोत्पत्तिकारणीभूतस्य, तस्य = मेघस्य, पुरः = अग्रे,



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

कथमपि=केनापि प्रकारेण, स्थित्वा = आत्मानं स्थिरं कृत्वा, चिरं = बहुकालं यावत्, दध्यौ = चिन्तयामास स्वभार्यां चिन्तितवानिति भावः। मेघालोके = मेघदर्शने सति, सुखिनः अपि = सुखीजनस्यापि, प्रियजनयुक्तस्येति भावः, चेतः = चित्तम्, अन्यथावृत्ति = अन्यप्रकारकं, भवति = जायते, कण्ठाश्लेषप्रणयिनि = कण्ठालिङ्गनार्थिनि, जने = प्रियजने, दूरसंस्थे = दूरवर्तिनि, किं पुनः = किं वक्तव्यम्। अर्थात् संयोगिनोऽपि जनाः यदा मेघं दृष्ट्वा व्याकुलाः भवन्ति तु विरहिणः का कथा?

**( ख ) भावार्थः** – यक्षाधिपतेः कुबेरस्य सेवको यक्षः स्तम्भिताश्रुः सन् अभिलाषोत्पत्तिकारणभूतस्य तस्य मेघस्याग्रे महता प्रयत्नेन स्थित्वा बहुकालं यावत् स्वभार्याविषये चिन्तयामास। यतोहि मेघदर्शने सति प्रियजनसङ्गतोऽपि जनः विकृतचित्तो भवति, कण्ठालिङ्गनार्थिनि जने दूरवर्तिनि सति किं पुनः वक्तव्यम्? अर्थात् विरहिणां मेघदर्शनमतीवोद्दीपकं भवति।॥३॥

**छन्दः** – श्लोकेऽस्मिन् मन्दाक्रान्ता छन्दः। तल्लक्षणं पूर्ववदेव –

**अलङ्कारः** – अत्रोत्तरार्द्धेन पूर्वार्द्धस्थितचिन्तारूपपदार्थसमर्थनात् अर्थान्तरन्यासालङ्कारः।

**विशेषांशः** – सुखिनोऽप्यन्यथावृत्तिः – सुखिनः+अपि, पूर्वरूपसन्धिः+अन्यथावृत्तिः, यणसन्धिः। अन्तर्वाष्पः – अन्तः स्थितं वाष्पं यस्य सः (बहुव्रीहि समासः)। "राजराजो धनाऽधिपः" इत्यमरः। "चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः" इत्यमरः।

## श्लोकः ४

**प्रसङ्गः** – प्रियां प्रति स्वकुशलमयीं वार्तां प्रेषयितुकामः स यक्षो मेघस्य शिष्टाचारवशात् स्वागतं करोतीति वर्णयति महाकविकालिदासः –

**प्रत्यासन्ने नभसि दयिताजीवितालम्बनार्थी**
**जीमूतेन स्वकुशलमयीं हारयिष्यन्प्रवृत्तिम्।**
**स प्रत्यग्रैः कुटजकुसुमैः कल्पितार्घाय तस्मै**
**प्रीतः प्रीतिप्रमुखवचनं स्वागतं व्याजहार॥४॥**

**अन्वयः** – नभसि प्रत्यासन्ने दयिताजीवितालम्बनार्थी (अत एव) जीमूतेन स्वकुशलमयीं प्रवृत्तिं हारयिष्यन् प्रीतः प्रत्यग्रैः कुटजकुसुमैः कल्पितार्घाय तस्मै प्रीतिप्रमुखवचनं स्वागतं व्याजहार।

**व्याख्या – ( क ) पर्यायपदानि** – नभसि = श्रावणमासे, प्रत्यासन्ने = निकटवर्तिनि (सति), दयिताजीवितालम्बनार्थी = प्रियाप्राणधारणेच्छुकः, (सन्) जीमूतेन = मेघेन, स्वकुशलमयीं = निजक्षेमपूर्णां, प्रवृत्तिं = वार्तां, हारयिष्यन् = प्रापयिष्यन्, सः = यक्षः, प्रीतः = मुदितः सन्, प्रत्यग्रैः = नूतनैः, कुटजकुसुमैः = गिरिमल्लिकाप्रसूनैः, कल्पितार्घाय = अनुष्ठिपूजाविधये, तस्मै = मेघाय, प्रीतः = मुदितः (सन्) प्रीतिप्रमुखवचनं = प्रेमप्रधानभाषणं, स्वागतं = स्वागतवचनं, व्याजहार = जगाद।

**( ख ) भावार्थः** – प्रियायाः प्राणधारणोपायं चिकीर्षुः सः यक्षः श्रावणेमासे अत्यन्तं निकटवर्तिनि आगते सति मेघेन निजकुशलपूर्णां वार्तां प्रेषयितुम् अभिलषन् नूतनगिरि–मल्लिकादिपुष्पैः तं सम्पूज्य मुदितः सन् प्रीतिमधुरवचनैः तस्य मेघस्य स्वागतञ्चकार।

**छन्दः** – अत्र मन्दाक्रान्ता छन्दः वर्तते। तल्लक्षणञ्च पूर्ववदेव।

**अलङ्कारः** – अत्र अनुप्रासालङ्कारस्य वैशिष्ट्यं दर्शनीयमस्ति।

**विशेषांशः** – प्रत्यासन्ने – प्रति+आसन्ने, यण् सन्धिः। जीवनस्य जलस्य मूतः पटबन्धः जीमूतः तेन स्वागतम्



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

= शोभनम् आगतं, ततः कुगतिः समासः। नभः खं श्रावणो नभाः इत्यमरः। वार्ता प्रवृत्तिर्वृत्तान्तः इत्यमरः।

## श्लोकः ५

**प्रसङ्गः** – अचेतनमेघः कथं चेतनसाध्ये दौत्यसम्पादने समर्थ इति जिज्ञासायां महाकविकालिदासः समाधत्तेऽधोलिखिते श्लोके –

**धूमज्योतिः सलिलमरुतां सन्निपातः क्व मेघः**
**सन्देशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः।**
**इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं याचे,**
**कामाऽऽर्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु॥५॥**

**अन्वयः**– धूमज्योतिःसलिलमरुतां सन्निपातः मेघः क्व? पटुकरणैः प्राणिभिः प्रापणीयाः सन्देशार्थाः क्व? इति औत्सुक्यात् अपरिगणयन् गुह्यकः तं ययाचे, हि कामाऽऽर्ताः चेतनाचेतनेषु प्रकृतिकृपणाः (भवन्ति)।

**व्याख्या – (क) पर्यायपदानि** – धूमज्योतिः सलिलमरुतां = धूमाग्निजलवायूनां, सन्निपातः = समवायः, मेघः = जलदः, क्व = कुत्र? पटुकरणैः = समर्थेन्द्रियैः, प्राणिभिः = चेतनैः, प्रापणीयाः = प्रापयितव्याः, सन्देशाऽर्थाः = सन्देशस्य विषयाः, क्व = कुत्र?, इति = एवम्, औत्सुक्यात् = इष्टार्थोद्युक्तत्वात्, अपरिगणयन् = अविचारयन्, गुह्यकः = यक्षः, तं = मेघं, ययाचे = याचितवान्, हि = यतः, कामार्ताः = मदनातुराः, चेतनाचेतनेषु = सजीवनिर्जीवेषु, प्रकृतिकृपणाः = स्वभावदीनाः, भवन्तीति शेषः।

**(ख) भावार्थः** – धूमाग्निजलवायूनां मिश्रणरूपोऽचेतनो मेघः क्व? समर्थेन्द्रियैः चेतनैः प्रापयितव्याः सन्देशार्थाः क्व? इत्येवमिष्टार्थोद्युक्तत्वादविचारयन् यक्षः तं मेघं प्रार्थितवान् यतः कामातुराः पुरुषाः चेतनाचेतनेषु विवेकशून्या भवन्ति। वस्तुतः कामान्धाः उचितानुचितविवेकरहिता भवन्ति, तस्मात् अचेतनं मेघं प्रति यक्षस्य याचना स्वाभाविकीति भावः।

**छन्दः** – श्लोकेऽस्मिन् मन्दाक्रान्ता छन्दः वर्तते। तल्लक्षणञ्च पूर्वमेव वर्णितम्।

**अलङ्कारः** – अत्र चतुर्थचरणस्थसामान्यार्थेन विशेषार्थस्य समर्थनादर्थान्तरन्यासालङ्कारः।

**विशेषांशः** – चेतनाचेतनेषु – चेतन+अचेतनेषु, दीर्घसन्धिः। धूमज्योतिःसलिलमरुताम् – धूमश्च ज्योतिश्च सलिलं च मरुच्चेति धूमज्योति सलिलमरुतः, तेषां (इतरेतरद्वन्द्वः) ''प्राणि तु चेतनो जन्मी जन्तुजन्युशरीरिणः'' इत्यमरः। ''विद्याधराप्सरोयक्षरक्षोगन्धर्वकिन्नराः।

## श्लोकः ६

**प्रसङ्गः** – अत्र महाकविस्तत्र भवान् कालिदासः यक्षकृतं मेघस्तुतिकथनपूर्वकं तस्य याच्ञाप्रकारं दर्शयति –

**जातं वंशे भुवनविदिते पुष्कराऽवर्तकानां**
**जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः।**
**तेनार्थित्वं त्वयि विधिवशाद् दूरबन्धुर्गतोऽहं**
**याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा॥६॥**

**अन्वयः** – (हे मेघ) त्वां भुवनविदिते पुष्करावर्तकानां वंशे जातं मघोनः कामरूपं प्रकृतिपुरुषं जानामि। तेन विधिवशात् दूरबन्धुः अहं त्वयि अर्थित्वं गतः। अधिगुणे याच्ञा मोघा अपि वरम्, अधमे लब्धकामा अपि न (वरम्)।

**व्याख्या – (क) पर्यायपदानि** – (हे मेघ!) त्वां = भवन्तं, भुवनविदिते = जगत्प्रसिद्धे, पुष्कराऽवर्तकानां = पुष्करावर्तकाऽख्यानां प्रलयकालिकमेघानां, वंशे = कुले, जातम् = उत्पन्नं, कामरूपं = यथेच्छशरीरधारिणं,



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

दुर्गादिसंचारक्षममिति भावः, मघोनः = इन्द्रस्य, प्रकृतिपुरुषं = प्रधानपुरुषं, जानामि = अवगच्छामि। तेन = तव महाकुलप्रसूतिकारणेन, विधिवशात् = दैवयोगात्, दूरबन्धुः = वियुक्तभार्यः, अहं = यक्षः, त्वयि = भवति विषये, अर्थित्वं = याचकत्वं, गतः = प्राप्तः अस्मीति शेषः। ननु याचकस्य याच्ञा याच्यगुणोत्कर्षः कुत्रोपयुज्यत इति जिज्ञासायां सः कथयति, अधिगुणे = श्रेष्ठगुणवति पुरुषे, याच्ञा = प्रार्थना, मोघा = निष्फला, अपि, वरम् = ईषत् प्रियं (किन्तु) अधमे = निर्गुणे, लब्धकामा अपि = सफलीभूतमनोरथाऽपि, प्रार्थनेति शेषः न वरम् = ईषदपि प्रियं न भवतीत्यर्थः।

**(ख) भावार्थः** – हे मेघ! भुवनविदिते पुष्करावर्तकानां श्रेष्ठजलदानां कुलोत्पन्नम्, इच्छाधीनविग्रहम् इन्द्रस्य प्रधानपुरुषं त्वामहं जानामि। अतो दुर्भाग्यवशात् वियुक्तपत्नीकोऽहं यक्षः त्वयि याचकत्वेनागतोऽस्मि यतो हि अधिगुणे पुरुषे निष्फलाऽपि प्रार्थना श्रेष्ठा, एतद्विपरीतं निम्नगुणवति निर्गुणे वा जने सफलाऽपि प्रार्थना मनागपि श्रेष्ठा न भवति।

**छन्दः** – अत्र मन्दाक्रान्ता छन्दः अस्ति।

**अलङ्कारः** – अत्र चतुर्थचरणगतसामान्यार्थेन अर्थित्वगमनरूपविशेषार्थसमर्थनादर्थान्तरन्यासोऽलङ्कारः।

**विशेषांशः** – पुष्करावर्तकानाम् – पुष्कर+आवर्तकानाम्, दीर्घसन्धिः, अधिगुणे – अधिकागुणा यस्य तस्मिन्, बहुव्रीहि समासः। लब्धकामाः – लब्धः कामो यया सा बहुव्रीहि–समासः, इन्द्रो मरुत्वान् मघवा विडौजा पाकशासनः इत्यमरः।

## श्लोकः ७

**प्रसङ्गः** – श्लोकेऽस्मिन् महाकविः कालिदासो यक्षमुखात् मेघं प्रति सन्देशप्राप्तव्यं स्थानं प्रस्तौति –

**सन्तप्तानां त्वमसि शरणं तत्पयोद! प्रियायाः**
**सन्देशं मे हर धनपतिक्रोधविश्लेषितस्य।**
**गन्तव्या ते वसतिरलका नाम यक्षेश्वराणां**
**बाह्योद्यानस्थितहरशिरश्चन्द्रिकाधौतहर्म्या ॥७॥**

**अन्वयः** – हे पयोद! त्वं सन्तप्तानां शरणमसि, तत् धनपतिक्रोधविश्लेषितस्य मे सन्देशं प्रियायाः हर। ते बाह्योद्यानस्थितहरशिरश्चन्द्रिकाधौतहर्म्या अलका नाम यक्षेश्वराणां वसतिः गन्तव्या।

**व्याख्या – (क) पर्यायपदानि** – हे पयोद = हे मेघ!, त्वं = भवान्, सन्तप्तानां = सन्तापयुक्तानाम् आतपेन प्रवासविरहेण वा, शरणं = रक्षको पयोदानेन आतपत्रस्तानां प्रोषितानां स्वस्थानप्रेरणया च, धनपतिक्रोधविश्लेषितस्य = कुबेरक्रोधप्रियावियुक्तस्य, मे = मम यक्षस्य, सन्देशं = वार्तां, प्रियायाः = वल्लभायाः, यक्षिण्याः सकाशमिति शेषः, हर = नय। कुत्र सा वसतीति पृच्छसि चेत् शृणु – बाह्योद्यानस्थितहरशिरश्चन्द्रिकाधौतहर्म्या = बहिरूपवने स्थितस्य वर्तमानस्य हरस्य शिवस्य शिरसिचन्द्रिका ज्योत्स्ना तया धौतहर्म्या निर्मलधनिकभवना, अलकानाम = अलकाभिधेया पुरी, यक्षेश्वराणां = गुह्यकाधिपतीनां कुबेरस्य भावः, वसतिः = निवासस्थली, ते = तव, गन्तव्या = यातव्या।

**(ख) भावार्थः** – हे मेघ! त्वं आतपत्रस्तविप्रयुक्तजनानामाश्रयदाताऽसि। अतः कुबेरशापात् प्रियावियुक्तस्य मे यक्षस्य सन्देशं मत्प्रियायै निवेदय। त्वया कुत्र गन्तव्यमिति जिज्ञासायामहं मार्गं निर्दिशामि बहिरुद्यानशिव–चूडावलम्बिनश्चन्द्रमसः ज्योत्स्नया प्रक्षालिताट्टालिका यक्षाधिपानां वासभूमिरलका नाम पुरी त्वया गन्तव्याऽस्ति।

**छन्दः** – श्लोकेऽस्मिन् मन्दाक्रान्तावृत्तम्। तल्लक्षणं पूर्ववदेव।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**अलङ्कारः** – अत्र उदात्त अलङ्कारः वर्तते।

**विशेषांशः** – यक्षेश्वराणाम् – यक्ष+ईश्वराणाम् (गुणसन्धि)पयोदः – पयः ददातीति, उपपद समासः। सन्तप्तानाम् – सम् + तप + क्त। चन्द्रिकाकौमुदी ज्योत्स्ना इत्यमरः।

## श्लोकः ८

**प्रसङ्गः** – हे मेघ! आकाशारूढं त्वामालोक्य विरहिण्यः नूनमाश्वस्ता भविष्यन्तीति यक्षे झटिति गन्तुं निर्दिशति श्लोकेनानेन –

**त्वामारूढं पवनपदवीमुद्गृहीतालकान्ताः**
**प्रेक्षिष्यन्ते पथिकवनिताः प्रत्ययादाश्वसत्यः।**
**कः सन्नद्धे विरहविधुरां त्वय्युपेक्षेत जायां**
**न स्यादन्योऽप्यहमिव जनो यः पराधीनवृत्तिः॥८॥**

**अन्वयः**– पवनपदवीम् आरूढं त्वां पथिकवनिताः प्रत्ययात् आश्वसत्यः उद्गृहीतालकान्ताः (सत्यः) प्रेक्षिष्यन्ते। त्वयि सन्नद्धे (सति) अहम् इव यः जनः पराधीनवृत्तिः न स्यात् (सः) कः अन्य अपि विरहविधुरां जायाम् उपेक्षेत।

**व्याख्या – (क) पर्यायपदानि** – हे मेघ! पवनपदवीमारूढम् = आकाशारूढम्, आकाशमुद्गतं, त्वां = भवन्तं, पथिकवनिताः = प्रोषितभर्तृकाः, प्रत्ययात् = प्रियागमनविश्वासात्, आश्वसत्यः = विश्वसिताः, उद्गृहीतालकान्ताः (सत्यः) = दृष्टिप्रसारार्थमुन्नमय्य, धृतालकाग्राः सत्यः, प्रेक्षिष्यन्ते = द्रक्ष्यन्ति, त्वयि = भवति, सन्नद्धे = व्यापृते (सति), अहम् इव = मत्समः, यक्षसदृशः इति भावः। यः जनः = यः व्यक्तिः, पराधीनवृत्तिः = परायत्तजीविको, न स्यात् = नहि भवेत्, (सः), कः = प्रियाविलासानभिज्ञः, अन्योऽपि = अपरोऽपि, (जनः), विरहविधुरां = वियोगव्याकुलां, जायां = भार्याम्, उपेक्षेत = उपेक्षां कुर्यात्, मेघाच्छन्ने नभसि न कोऽपि स्वतन्त्रः प्रियाविलासज्ञः जनः प्रियायाः उपेक्षां करोतिति भावः।

**(ख) भावार्थः** – हे मेघ! आकाशमार्गेण गच्छन्तं त्वां प्रोषितभर्तृकाः स्त्रियः प्रियागमनविश्वासात् विश्वसिताः दृष्टिप्रसारार्थमलकाग्रभागानुद्धृत्यावलोकयिष्यन्ति। यतो हि त्वयि नभसि आच्छन्ने सति पराधीनं मादृशं जनं त्यक्त्वा नान्यः कश्चित् स्वाधीनः वियोगव्याकुलां भार्यामुपेक्षेत।

**छन्दः** – श्लोकेऽस्मिन् मन्दाक्रान्ताछन्दः। तल्लक्षणं पूर्ववदेव।

**अलङ्कारः** – अत्र सामान्येन विशेषसमर्थनादर्थान्तरन्यासोऽलङ्कारः।

**विशेषांशः** – प्रेक्षिष्यन्ते – प्र+एक्षिष्यन्ते (पररूपसन्धिः)

पराधीनवृत्तिः – पराधीना वृत्तिः यस्य सः (बहुव्रीहिसमासः)

जायते – जायते अस्यामिति जाया ताम् (बहुव्रीहिसमासः)

श्वसनः स्पर्शनो वायुर्मातरिश्वा सदागतिः इत्यमरः।

स्त्रीयोषिदबला योषा नारीसीमन्तिनीवधूः इत्यमरः।

## श्लोकः ९

**प्रसङ्गः** – श्लोकेऽस्मिन् महाकविकालिदासः मेघप्रयाणकाले सर्वाण्यपि शुभशकुनानि निर्दिशति –

**मन्दं मन्दं नुदति पवनश्चानुकूलो यथा त्वां**
**वामश्चायं नदति मधुरं चातकस्ते सगन्धः।**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**गर्भाधानक्षणपरिचयान्नूनमाबद्धमाला:**
**सेविष्यन्ते नयनसुभगं खे भवन्तं बलाका: ॥ ९ ॥**

**अन्वय:** – अनुकूल: पवन: यथा त्वां मन्दं मन्दं नुदति। ते वाम: अयं सगन्ध: चातक: च मधुरं नदति, गर्भाधानक्षणपरिचयात् खे आबद्धमाला बलाका नयनसुभगं भवन्तं नूनं सेविष्यन्ते।

**व्याख्या – ( क ) पर्यायपदानि** – अनुकूल: = अनुगुण:, पवन: = वायु:, त्वां = भवन्तं, मन्दं मन्दं = शनैः शनैः, यथा = सदृशं, भाविफलानुगुणं, नुदति = प्रेरयति, तथा च, अयं = सन्निकटस्थ:, सगन्ध: = सगर्व:, ते = तव, वाम: = दक्षिणेतरप्रदेशस्थ:, सुभगो वा, चातक: = सारङ्गपक्षिविशेष:, मधुरं = श्रव्यं यथा स्यात्तथा, नदति = शब्दायते, गर्भाधानक्षणपरिचयात् = गर्भधारणस्य सुखदकालज्ञानात्, खे = व्योम्नि, आबद्धमाला: = बद्धपंक्तय:, बलाका: = बकस्त्रिय:, नयनसुभगं = दृष्टिप्रियं, भवन्तं = त्वां मेघमिति भाव:, नूनं = सत्यं, सेविष्यन्ते = आश्रयिष्यन्ते। शकुनशास्त्रे अनुकूलमारुत–चातकशब्दितबलाका–दर्शनानां शुभसूचकत्वं प्रकटितम्।

**( ख ) भावार्थ:** – यक्ष: मेघं कथयति यत् प्रयाणकालस्यायं शुभद: कालोऽस्ति। यत: अनुकूलो वायु: त्वां शनै: शनै: गमनाय प्रेरयति, वामभागे च सगर्व: चातक: मधुरशब्दं करोति। गर्भधारणस्य सुखदकालज्ञानात् बकस्त्रिय: दृष्टिसुभगं त्वामाश्रयिष्यन्ते।

**छन्द:** – अत्र मन्दाक्रान्ता वृत्तमस्ति। तल्लक्षणं तु पूर्ववदेव।

**अलङ्कार:** – चतुर्षु अपि चरणेषु वर्णसाम्यवर्णनादत्र अनुप्रासालङ्कार: वर्तते।

**विशेषांश:** – चातकस्ते – चातक:+ते (विसर्गसन्धि:)।

आबद्धमाला: – आबद्धा: माला याभि: ता (बहुव्रीहिसमास:)।

'सारङ्गा: स्तोकश्चातक: समा:' इत्यमर:।

'संस्तव: स्यात् परिचय:' इत्यमर:।

## श्लोक: १०

**प्रसङ्ग:** – श्लोकेऽस्मिन् महाकविकालिदास: यक्षमुखात् मेघगमनस्य सार्थकत्वं यक्षिणीजीवनधारणपुर:सरं प्रस्तौति –

**तां चावश्यं दिवसगणनात्परामेकपत्नी–**
**मव्यापन्नामविहतगतिर्द्रक्ष्यसि भ्रातृजायाम्।**
**आशाबन्ध: कुसुमसदृशं प्रायशो ह्यङ्गनानां**
**सद्य:पाति प्रणयि हृदयं विप्रयोगे रुणद्धि ॥ १० ॥**

**अन्वय:**– (हे मेघ!) दिवसगणनातत्पराम् अव्यापन्नाम् एकपत्नीं भ्रातृजायां ताम् अविहतगति: (सन्) अवश्यं द्रक्ष्यसि। हि आशाबन्ध: विप्रयोगे सद्य:पाति कुसुमसदृशम् अङ्गनानां प्रणयि हृदयं प्रायशो रुणद्धि।

**व्याख्या – ( क ) पर्यायपदानि** – (हे मेघ!), दिवसगणनातत्परां = शापावसानदिनानां संख्याने तत्पराम् आसक्ताम्, अत एव, अव्यापन्नाम् = अमृतां शापावसाने मदागमनप्रत्याशया जीवन्तीमिति भाव:, एकपत्नीं = पतिव्रतां, भ्रातृजायां = भ्रातुर्मेजायां पत्नीम्, अविहतगति: = अबाधितगति: (सन्), त्वम्, अवश्यं = नूनमेव, द्रक्ष्यसि = अवलोकयिष्यसि, हि = यत:, आशाबन्ध: = आशारूपं बन्धनं, प्रणयि = प्रेमपरिपूर्णं, कुसुमसदृशं = पुष्पतुल्यं सुकुमारमिति भाव:, अत एव, विप्रयोगे = विरहे कान्तस्येति शेष:, सद्य:पति = सद्यो भ्रंशनशीलम्, अङ्गनानां = नारीणां, हृदयं = जीवितं, प्रायश: = प्रायेण, रुणद्धि = प्रतिबध्नाति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**( ख ) भावार्थः** – हे मेघ! शापावसानदिनानां गणनायामासक्तामतएव जीवितां पतिव्रतां त्वदग्रजसदृशस्य मम पत्नीमबाधितगतिः (सन्) त्वं नूनमेव अवलोकयिष्यसि, यतः आशारूपं बन्धनं प्रेमपूर्णं पुष्पसदृशं कोमलं सुकुमारं वा कान्तविरहेण झटित्येव भ्रंशनशीलमङ्गनानां जीवितं प्रायः प्रतिबध्नाति।

**छन्दः** – श्लोकेऽस्मिन् मन्दाक्रान्ता छन्दः। तल्लक्षणं पूर्ववदेव।

**अलङ्कारः** – कुसुमसदृशमित्यत्र लुप्तोपमाऽलङ्कारः।

**विशेषांशः** – प्रायशोह्यङ्गनानां – प्रायशः+हि (विसर्गसन्धिः) + अङ्गनानां (यण् सन्धि)

एकपत्नीम् – एकः पतिः यस्याः सा ताम् (बहुव्रीहिसमासः)।

चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः इत्यमरः।

## श्लोकः ११

**प्रसङ्गः** – श्लोकेनानेन महाकविस्तत्रभवान् कालिदासः मेघस्य मार्गे मानसरोवरं प्रति गमनायोद्यतानां राजहंसानामाकैलासात् साहचर्यं निर्दिशति –

**कर्तुं यच्च प्रभवति महीमुच्छिलीन्ध्रामवन्ध्यां**
**तच्छ्रुत्वा ते श्रवणसुभगं गर्जितं मानसोत्काः।**
**आ कैलासाद् बिसकिसलयच्छेदपाथेयवन्तः**
**सम्पत्स्यन्ते नभसि भवतो राजहंसाः सहायाः ॥११॥**

**अन्वयः** – यत् महीम् उच्छिलीन्ध्राम् अवन्ध्यां च कर्तुं प्रभवति तत् श्रवणसुभगं ते गर्जितं श्रुत्वा मानसोत्काः बिसकिसलयच्छेदपाथेयवन्तः राजहंसाः नभसि आ कैलासात् भवतः सहायाः सम्पत्स्यन्ते।

**व्याख्या – ( क ) पर्यायपदानि** – यत् = गर्जितं, महीं = पृथिवीं, उच्छिलीन्ध्राम् = उद्भुतकन्दलिकाम्, अवन्ध्यां = सफलां, च = तथा, कर्तुं = विधातुं, प्रभवति = शक्नोति, तत् = तथाविधं, श्रवणसुभगं = कर्णप्रियं, ते = तव मेघस्येति भावः, गर्जितं = स्तनितं, श्रुत्वा = आकर्ण्य, मानसोत्काः = मानस सरोवरं प्रति यातुमुत्कण्ठिताः, बिसकिसलयच्छेदपाथेवन्तः = मृणालाग्रशकलैः पथि भोज्यवन्तः, राजहंसाः = मरालाः हंसश्रेष्ठाः इत्यर्थः, नभसि = आकाशे, आकैलासाद् = कैलासपर्वतपर्यन्तं, भवतः = तव, सहायाः = सहयात्रिणः, सहायका वा, सम्पत्स्यन्ते = भविष्यन्ति।

**( ख ) भावार्थः** – हे मेघ! यद्गर्जितं पृथ्वीं सस्यादिभिः परिपूर्णां विधातुम् अत एव अवन्ध्यां कर्तुं समर्थं भवति, तदेव श्रोत्रसुखदं तव गर्जनं श्रुत्वा मानसरोवरं प्रति गन्तुमुत्सुकाः राजहंसा पाथेयत्वेन बिसकिसलयाग्रशकलानि गृहीत्वा आकाशे कैलासपर्वतपर्यन्तं त्वदीयाः सहगामिनः भविष्यन्ति।

**छन्दः** – श्लोकेऽस्मिन् मन्दाक्रान्ता छन्दः। लक्षणं पूर्ववदेव।

**अलङ्कारः** – अत्र विशेषोक्तिरलङ्कारः।

**विशेषांशः** – तत्+श्रुत्वा – तच्छ्रुत्वा (श्चुत्वसन्धिः)

अवन्ध्याम् – न वन्ध्या अवन्ध्या, ताम् (नञ् समासः)

सहायस्तु सयात्रः स्यात् इत्यमरः।

## श्लोकः १२

**प्रसङ्गः** – अत्र महाकविः यक्षमुखात् प्रियमित्रं रामगिरिमालिङ्ग्य अग्रे गन्तुमुपदिशति मेघम् –

**आपृच्छस्व प्रियसखममुं तुङ्गमालिङ्ग्य शैलं**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**वन्द्यैः पुंसां रघुपतिपदैरङ्कितं मेखलासु।**
**काले-काले भवति भवतो यस्य संयोगमेत्य**
**स्नेहव्यक्तिश्चिरविरहजं मुञ्चतो वाष्पमुष्णम्॥ १२॥**

**अन्वयः**- प्रियसखं तुङ्गं पुंसां वन्द्यैः रघुपतिपदैः मेखलासु अङ्कितम् अमुं शैलम् आलिङ्ग्य आपृच्छस्व। काले-काले भवतः संयोगम् एत्य चिरविरहजम् उष्णं वाष्पं मुञ्चतो यस्य स्नेहव्यक्तिः भवति॥ १२॥

**व्याख्या - ( क ) पर्यायपदानि** - प्रियसखं = अभीष्टमित्रं, तुङ्गं = उन्नतं, पुंसां = नराणां, वन्द्यैः = आराधनीयैः, रघुपतिपदैः = रामपदन्यासैः, मेखलासु = पर्वतमध्यभागेषु, कटकेषु, अंकितं = चिह्नितम्, अमुम् = एनं, शैलम् = अद्रिं रामगिरिं, चित्रकूटं, आलिङ्ग्य = आश्लिष्य, आपृच्छस्व = 'यामि' इति कथनेन, अनुगृहाण, काले - काले = समये-समये प्रतिवर्षाकालमिति भावः, भवतः = मेघस्य, संयोगं = सम्पर्कम्, एत्य = सम्प्राप्य, चिरविरहजं = दीर्घकालिकवियोगजन्यम्, उष्णं = अशीतलं, वाष्पम् = उष्माणं नेत्रजलं च, मुञ्चतः = परित्यजतः, यस्य = शैलस्य, रामगिरिपर्वतस्येति तात्पर्यं, स्नेहव्यक्तिः = प्रेमाविर्भावो, भवति = क्रियते॥ १२॥

**( ख ) भावार्थः**- हे मेघ! जगद्वन्द्यैः श्रीरामचन्द्रचरणैः पर्वतमध्यभागेषु चिह्नितं प्रियसखं रामगिरिपर्वतमाश्लिष्य 'अहं यामि' इति कथनेन अनुगृहाण। यतोहि प्रतिवर्षं वर्षाकाले भवत्समागमसुखमनुभूय उष्माणं वाष्पं परित्यजतो यस्य रामगिरेः मित्रस्नेहः प्रादुर्भवति॥ १२॥

**छन्दः** - श्लोकेऽस्मिन् मन्दाक्रान्ता छन्दः। तल्लक्षणं पूर्ववदेव।

**अलङ्कारः** - अत्र श्लेषालङ्कारः तदनुगृहीता प्रस्तुतप्रशंसा च।

**विशेषांशः** - रघुपतिपदैरङ्कितम् - रघुपतिपदैः+अङ्कितम् ( विसर्गसन्धिः )।

प्रियसखम् - प्रियश्चासौ सखा, प्रियसखः तम् ( कर्मधारयः )।

'वाष्पं नेत्रजलोष्मणोः' इत्यमरः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## अभ्यास-प्रश्नाः

### ( क ) वस्तुनिष्ठप्रश्नाः -

**निर्देशः** - निम्नाङ्कितप्रश्नेषु उचितविकल्पस्य वर्णाङ्कं कोष्ठके चिनुत -

१. मेघदूतखण्डकाव्ये नायकः वर्तते -
(क) कालिदासः (ख) मेघः
(ग) कश्चिद् यक्षः (घ) यक्षाधिपः कुबेरः ( )

२. मेघः समवायो विद्यते -
(क) धूमस्य (ख) धूमज्योतिः सलिलमरुताम्
(ग) जलस्य (घ) मरुताम् ( )

३. यक्षः शापावधिं यापयति -
(क) रामगिरौ (ख) अलकापुर्याम्
(ग) आम्रकूटगिरौ (घ) उज्जयिन्याम् ( )

४. अलकापुराधीशः अस्ति -
(क) यक्षः (ख) कुबेरः
(ग) मेघः (घ) कालिदासः ( )

५. आशाबन्धः .................................... प्रायशो ह्यङ्गनानाम्
(क) कुसुमसदृशं (ख) भ्रमरसदृशं
(ग) सुहृत्सदृशं (घ) रज्जुसदृशं ( )

६. अधिगुणे याच्ञा भवति -
(क) अमोघा (ख) मोघा
(ग) निम्ना (घ) मध्यमा

### ( ख ) अतिलघूत्तरात्मकप्रश्नाः -

**निर्देशः** - निम्नाङ्कितप्रश्नानाम् एकपङ्क्तावेव उत्तराणि लेख्यानि -

१. यक्षः कुत्र वसतिं चक्रे ?
२. चेतनाचेतनेषु प्रकृतिकृपणाः के भवन्ति ?
३. विप्रयोगे अङ्गनानां हृदयं कः रुणद्धि ?
४. किंविधाः बलाकाः मेघं सेविष्यन्ते ?
५. यक्षः मेघाय कस्य गिरेरापृच्छार्थं निवेदयति ?
६. मेघस्य मार्गे केषां साहचर्यं निर्दिष्टम् ?

### ( ग ) लघूत्तरात्मकप्रश्नाः -

**निर्देशः** - निम्नाङ्कितप्रश्नानां पञ्चषा पङ्क्तिषु उत्तराणि लेख्यानि -

१. रामगिरिपर्वतस्य महत्त्वं प्रतिपादनीयम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

२. मेघं दृष्ट्वा यक्षः किं चिन्तयामास ?
३. यक्षः मेघं प्रति याच्ञायाः किं कारणं निवेदयति ?
४. यक्षः मेघस्य प्रस्थानकाले किंविधमानुकूल्यं निर्दिशति ?

**( घ ) निबन्धात्मकाः प्रश्नाः –**

**निर्देशः** – निम्नाङ्कितश्लोकानां सप्रसङ्गं व्याख्या कार्या –

१. कश्चित् ................................................... रामगिर्याश्रमेषु ॥
२. तस्य स्थित्वा ........................................... पुनर्दूरसंस्थे ॥
३. तां चावश्यं .............................................. विप्रयोगे रुणद्धि ॥

**निर्देशः – निम्नाङ्कितश्लोकानां भावार्थः संस्कृते लेखनीयः –**

१. तस्मिन्नद्रौ ................................................ ददर्श ॥
२. मन्दं मन्दं ................................................ बलाकाः ॥
३. कर्तुं यच्च ................................................ सहायाः ॥
४. त्वामारुढं ................................................ पराधीनवृत्तिः ॥

**निर्देशः – निम्नाङ्कितसूक्तीनां सप्रसङ्गं भावार्थः संस्कृते लेखनीयः –**

१. कामार्त्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु ।
२. याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा ।
३. आशाबन्धः कुसुमसदृशं प्रायशो ह्यङ्गनानाम् ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## २. मार्गस्थपर्वतनदीवर्णनम्

### श्लोकः १३

**प्रसङ्गः** – अत्र महाकविस्तत्रभवान् कालिदासः सन्देशपूर्वं यक्षमुखादलकापुरीगमनमार्गं निर्दिशति –

**मार्गं तावच्छृणु कथयतस्त्वत्प्रयाणाऽनुरूपं**
**सन्देशं मे तदनु जलद! श्रोष्यसि श्रोत्रपेयम्।**
**खिन्नः खिन्नः शिखरिषु पदं न्यस्य गन्तासि यत्र**
**क्षीणः क्षीणः परिलघुः पयः स्रोतसां चोपभुज्य॥१३॥**

**अन्वयः**– हे जलद! तावत् कथयतः (मत्तः) त्वत्प्रयाणाऽनुरूपं मार्गं शृणु, तदनु श्रोत्रपेयं मे सन्देशं श्रोष्यसि। यत्र खिन्नः खिन्नः शिखरिषु पदं न्यस्य क्षीणः क्षीणः (सन्) स्रोतसां परिलघु पयश्च उपभुज्य गन्तासि।

**व्याख्या – (क) पर्यायपदानि** – हे जलद! = हे मेघ, तावत् = इदानीं, कथयतः = वदतः, मत्तः = यक्षादिति, त्वत्प्रयाणाऽनुरूपं = भवत्प्रस्थानानुकूलं, मार्गं = अध्वानं, शृणु = आकर्णय, तदनु = तदनन्तरं, श्रोत्रपेयं = श्रोत्राभ्यां पेयम् अर्थात् मधुरं कर्णप्रियं वा, मे = मम यक्षस्य, सन्देशं = वार्त्तां, श्रोष्यसि = आकर्णयिष्यसि। यत्र = मार्गे, खिन्नः खिन्नः = क्षीणबलः (सन्), शिखरिषु = पर्वतेषु, पदं = चरणं, न्यस्य = स्थापयित्वा, पुनर्बललाभार्थं, क्वचिद् विश्रम्य, क्षीणः क्षीणः = कृशकायः (सन्), स्रोतसां = नदीनां, परिलघु = सुपाच्यं, पयः= जलम्, उपभुज्य = पीत्वा, गन्तासि = गमिष्यसि।

**(ख) भावार्थः** – हे मेघ! पूर्वं तावत् अलकापुरीं प्रति प्रस्थानकाले मत्तः स्वयात्रानुकूलं मार्गमाकर्ण्य तत्परं श्रवणसुखदं कर्णप्रियं सन्देशं मे आकर्णयिष्यसि। यस्मिन् मार्गे श्रान्तः (जलवर्षणानन्तरं) सन् भवान् पर्वतशृङ्गेषु चरणं स्थापयित्वा अर्थात् किञ्चिद् विश्रम्य, जलन्यूनतया क्षीणः क्षीण अर्थात् अतिकृशकायः सन् मार्गस्थनदीनां सुपाच्यं जलं पीत्वा अग्रे गमिष्यसि।

**छन्दः** – मन्दाक्रान्तावृत्तमस्ति। तल्लक्षणं पूर्ववदेव।

**अलङ्कारः** – अस्मिन् श्लोके उत्तरार्द्धे कार्येण मेघे सामान्यपथिकस्य व्यवहार समारोपणात् समासोक्तिरलङ्कारः।

**विशेषांशः** – तावच्छृणु – तावत्+शृणु – श्चुत्वसन्धिः।
'पयः क्षीरं पयोऽम्बु च' इत्यमरः।

### श्लोकः १४

**प्रसङ्गः** – अत्र कविताकामिनीविलासः महाकविस्तत्रभवान् कालिदासः यक्षमुखात् अलकापुरीं गन्तुम् उत्तरमुखः (सन्) उत्पतनार्थं निर्दिशति।

**अद्रेः शृङ्गं हरति पवनः किंस्विदित्युन्मुखीभि-**
**र्दृष्टोत्साहश्चकितचकितं मुग्धसिद्धाङ्गनाभिः।**
**स्थानादस्मात्सरस निचुलादुत्पतोदङ्मुखः खं**
**दिङ्नागानां पथि परिहरन् स्थूलहस्तावलेपान्॥१४॥**

**अन्वयः** – पवनः अद्रेः शृङ्गं हरति किंस्वित् ?इति उन्मुखीभिः मुग्धसिद्धाङ्गनाभिः चकितचकितं दृष्टोत्साहः (सन्) सरसनिचुलात् अस्मात् स्थानात् पथि दिङ्नागानां स्थूलहस्तावलेपान् परिहरन् उदङ्मुखः (सन्) खम् उत्पत।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**व्याख्या - ( क ) पर्यायपदानि** - हे मेघ!, पवनः (वायुः), अद्रेः = पर्वतस्य, चित्रकूटस्य, शृङ्गं = शिखरं, हरति = नयति, किंस्वित्? = किम्? इति = इत्थम् आशङ्कयेति शेषः, उन्मुखीभिः = उन्नतमुखीभिः, मुग्धसिद्धाङ्गनाभिः = मूढाभिः सुन्दरीभिश्च, देवयोनिविशेषवनिताभिः, चकितचकितं = चकितप्रकारं यथा तथा, दृष्टोत्साहः = अवलोकितोद्योगः, सन् त्वं, सरसनिचुलात् = आर्द्रास्थलवेतसा यस्मिंस्तत्, अस्मात् = एतस्मात् रामगिर्याश्रमात्, पथि = अध्वनि, (आकाशमार्गे), दिङ्नागानां = दिग्गजानां, स्थूलहस्तावलेपान् = पीवरहस्ताक्षेपान्, परिहरन् = परित्यजन्, उदङ्मुखः = उत्तरदिगभिमुखः, (सन्), खं = आकाशम्, उत्पत = उद्गच्छ।

**( ख ) भावार्थः** - यक्षः कथयति यत् आकाशमार्गेण तीव्रगत्या गच्छन्तं भवन्तमवलोक्य मुग्धसिद्धाङ्गनाः आश्चर्यातिशयाद् त्वामवलोकयिष्यन्ति यत् किं वायुः पर्वतस्य शृङ्गमेव नीत्वा गच्छति। दिङ्नागानां प्रहारान् दूरीकुर्वन् उत्तरदिगभिमुखः सन् त्वम् आकाशमुद्गच्छ।

**छन्दः** - श्लोकेऽस्मिन् मन्दाक्रान्ता छन्दः। तल्लक्षणं पूर्ववदेव।

**अलङ्कारः** - अत्र स्वभावोक्तिरलङ्कारः वर्तते।

**विशेषांशः** - दृष्टोत्साहः - दृष्ट+उत्साहः (गुणसन्धिः)। उन्मुखीभिः - उद्गतानि मुखानि यासां ता उन्मुख्यः ताभिः (बहुव्रीहिसमासः)। हरति - हृ+तिप् (लट्)।

विद्याधराप्सरो यक्ष इत्यमरः।

## श्लोकः १५

**प्रसङ्गः** - श्लोकेऽस्मिन् कविकुलाऽलङ्कारभूतो महाकविस्तत्रभवान् कालिदासः यक्षमुखादेव प्रस्थानकालिकस्य मेघस्य आकाशे दर्शनीयतां प्रस्तौति -

**रत्नच्छायाव्यतिकर इव प्रेक्ष्यमेतत्पुरस्ता-**
**द्वल्मीकाग्रात् प्रभवति धनुःखण्डमाखण्डलस्य।**
**येन श्यामं वपुरतितरां कान्तिमापत्स्यते ते**
**बर्हेणैव स्फुरितरुचिना गोपवेषस्य विष्णोः॥१५॥**

**अन्वयः**- रत्नच्छायाव्यतिकर इव प्रेक्ष्यम् आखण्डलस्य एतत् धनुःखण्डं पुरस्तात् वल्मीकाग्रात् प्रभवति। येन ते श्यामं वपुः स्फुरितरुचिना बर्हेण गोपवेषस्य विष्णोः (श्यामं वपुः) इव अतितरां कान्तिम् आपत्स्यते।

**व्याख्या - ( क ) पर्यायपदानि** - (हे मेघ!) रत्नच्छायाव्यतिकरः = पद्मरागादिमणिप्रभासम्मिश्रणम्, इव = यथा, प्रेक्ष्यं = अवलोकनीयम्, आखण्डलस्य = इन्द्रस्य, एतत् = पुरोदृश्यमानं, वल्मीकाग्रात् = वामलू विवरात्, प्रभवति = प्रादुर्भवति येन = धनुःखण्डेन, ते = तव, श्यामं = श्यामवर्णं, वपुः = शरीरं, स्फुरितरुचिना = उज्ज्वलच्छविना, बर्हेण = पिच्छेन, गोपवेषस्य = गोपालवेषधारिणः, विष्णोः = हरेः कृष्णस्येत्यर्थः, इव = यथा, अतितराम् = अत्यन्तां, कान्तिं = द्युतिम्, आपत्स्यते = प्राप्स्यते।

**( ख ) भावार्थः** - (हे मेघ!) पद्मरागादिमणीप्रभासम्मिश्रणमिव दर्शनीयमिन्द्रस्य धनुः पुरतो वामलूरविवरादाविर्भवति, येन श्यामवर्णं ते शरीरं गोपवेषधारिणः कृष्णस्य इव सातिशयं शोभां प्राप्स्यते।

**छन्दः** - अत्र मन्दाक्रान्तावृत्तमस्ति। तल्लक्षणं पूर्ववदेव।

**अलङ्कारः** - अत्र प्रथमचतुर्थचरणयोः द्वे श्रोत्युपमे।

**विशेषांशः** -बर्हेणेव - बर्हेण+इव (गुणसन्धिः)।

धनुः खण्डम् - धनुषः खण्डम् (ष०तत्पुरुष समासः)।

'छाया सूर्यप्रिया कान्तिः' इत्यमरः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## श्लोकः १६

**प्रसङ्गः** – अत्र कविताकामिनीविलासः महाकविकालिदासः यक्षमुखात् निर्दिशति यत् सर्वमपि कृषिफलं मेघाधीनं वर्तते, अतः शीघ्रमेव तेन उत्तरदिशि गन्तव्यं –

**त्वय्यायत्तं कृषिफलमिति भ्रूविलासानभिज्ञैः**
**प्रीतिस्निग्धैर्जनपदवधूलोचनैः पीयमानः।**
**सद्यः सीरोत्कषणसुरभि क्षेत्रमारुह्य मालं**
**किञ्चित्पश्चाद् व्रज लघुगतिर्भूय एवोत्तरेण॥ १६॥**

**अन्वयः**– कृषिफलं त्वयि आयत्तम् इति प्रीतिस्निग्धैः भ्रूविलासानभिज्ञैः जनपदवधूलोचनैः, पीयमानः मालं क्षेत्रं सद्यः सीरोत्कर्षणसुरभिः (यथा स्यात्तथा) आरुह्य किञ्चित् पश्चात् लघुगतिः (सन्) भूयः उत्तरेण एव व्रज।

**व्याख्या – (क) पर्यायपदानि** – (हे मेघ!) कृषिफलं = हलकर्मणः फलं सस्यमित्यर्थः, त्वयि = मेघे, आयत्तम् = अधीनम्, इति = अस्मात् कारणात्, प्रीतिस्निग्धैः = अकृत्रिमप्रेमार्द्रैः, भ्रूविलासानभिज्ञैः = भ्रूविकारानभिज्ञैः, जनपदवधूलोचनैः = जनपदे वध्वः जनपदवध्वः तासां लोचनानि जनपदवधूलोचनानि, तैः (ष०त०) पीयमानः = सादरमवलोक्यमानः (सन्), मालं = मालनामकम्, उन्नतं, क्षेत्रं = प्रदेशं, सद्यः = तत्कालमेव, सीरोत्कषणसुरभिः = हलप्रवहणोत्पन्नसुगन्धिः, (यथा स्यात्तथा), आरुह्य = आरोहणं कृत्वा, तत्र वृष्टिं विधायेति भावः, किञ्चित् = स्वल्पं, पश्चात् = पश्चिमदिशि, व्रज = गच्छ, भूयः = पुनः, लघुगतिः (वृष्टिकारणात्), द्रुतगामी सन्, उत्तरेण = उत्तरमार्गेणैव, व्रज = गच्छ, याहि।

**(ख) भावार्थः** – हे मेघ! कृषिकर्मपरिणामस्वरूपं सस्यं तवाधीनमस्ति अस्मात् कारणात् प्रेमार्द्रैः भ्रूविलासानभिज्ञैः ग्राम्यकृषकवधूभिः वीक्ष्यमाणः सन्, त्वं तत्कालमेव हलोत्कषणजातसुरभि मालाख्यमुन्नतक्षेत्रं वृष्ट्या सनाथीकृत्य किञ्चित् कालानन्तरं द्रुतगत्या पुनरुत्तरेणैव मार्गेण गच्छ।

**छन्दः** – अत्र मन्दाक्रान्ता वृत्तमस्ति। तल्लक्षणं पूर्ववदेव।

**अलङ्कारः** – श्लोकेऽस्मिन् स्वभावोक्तिरलङ्कारः।

**विशेषांशः** – त्वय्यायत्तम् – त्वयि+आयत्तम् – यण्सन्धिः।

लघुगतिः – लघ्वी गतिः यस्य सः (बहुव्रीहिसमासः)।

'अधीनो निम्न आयत्तः' इत्यमरः।

## श्लोकः १७

**प्रसङ्गः** – श्लोकेऽस्मिन् महाकविस्तत्रभवान् कालिदासः यक्षमुखात् आम्रकूटगिरेः परिचयं प्रस्तौति –

**त्वामासारप्रशमितवनोपप्लवं साधु मूर्ध्ना**
**वक्ष्यत्यध्वश्रमपरिगतं सानुमानाम्रकूटः।**
**न क्षुद्रोऽपि प्रथमसुकृतापेक्षया संश्रयाय**
**प्राप्ते मित्रे भवति विमुख किं पुनर्यस्तथोच्चैः ॥१७॥**

**अन्वयः**– आम्रकूटः सानुमान् आसारप्रशमितवनोपप्लवम् अध्वश्रमपरिगतं त्वां साधु मूर्ध्ना वक्ष्यति। क्षुद्रः अपि संश्रयाय मित्रे प्राप्ते (सति) प्रथमसुकृतापेक्षया विमुखः न भवति। यः तथा उच्चैः (सः) किं पुनः।

**व्याख्या – (क) पर्यायपदानि** – (हे मेघ) आम्रकूटः = आम्रकूटाख्यः, सानुमान् = पर्वतः, आसारप्रशमितवनोपप्लवम् = आसारेण धारासंपातेन, प्रशमितो विनाशितो वनोपप्लवं दावाग्निः (कृतोपकारकम्),



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

अध्वश्रमपरिगतं = मार्गपरिक्लान्तं, त्वां = भवन्तं मेघमिति भावः, साधु = समीचीनं यथा स्यात्तथा, मूर्ध्ना = मस्तकेन, शिखरेणत्यर्थः, वक्ष्यति = धारयिष्यति। तथाहि, क्षुद्रोऽपि = कृपणोऽपि, सामान्योऽपि जन इति भावः, संश्रयाय = संश्रयणाय, मित्रे = सुहृदि, प्राप्ते = आगते (सति), प्रथमसुकृतापेक्षया = पूर्वोपकारपर्यालोचनया, विमुखः = पराङ्मुखः, न = नहि, भवति = जायते, यः = जनः, तथा = तेन प्रकारेण, उच्चैः = उन्नतः, श्रेष्ठः सः आम्रकूटः, किं पुनः = किं मुहुः, विमुखो न भविष्यति अपितु सादरं वक्ष्यत्येव।

**( ख ) भावार्थः** – हे मेघ! आम्रकूटपर्वतः धारावृष्ट्या विनाशितवनाग्निं, मार्गायासपरिपूर्णं त्वां सादरं शिरसा धारयिष्यति, यतः अधमोऽपि जनः पूर्वकृतोपकारवशाद् पराङ्मुखो न भवति, यस्तादृशः उन्नतः श्रेष्ठः आम्रकूटाख्यः गिरिः कदापि विमुखो भवितुं न शक्नोतीत्यर्थः।

**छन्दः** – अत्र मन्दाक्रान्ता छन्दः। लक्षणं तु पूर्ववदेव।

**अलङ्कारः** – अत्र पूर्वार्द्धगतार्थस्य उत्तरार्द्धेन समर्थनात् अर्थान्तरन्यासोऽलङ्कारः।

**विशेषांशः** – वक्ष्यत्ध्वश्रमपरिगतं – वक्ष्यति + अध्वश्रमपरिगतम् – यण् सन्धिः।

आम्रकूटः – आम्रकूटः – आम्राः कूटेषु यस्य सः (व्यधिकरण बहुव्रीहिसमासः)।

प्रशमितः – प्र+शम्+क्त+णिच्।

'आम्रश्चूतो रसालोऽसौ' इत्यमरः।

'धारासम्पात् आसारः' इत्यमरः।

## श्लोकः १८

**प्रसङ्गः** – श्लोकेऽस्मिन् महाकविस्तत्रभवान् कालिदासः आम्रकूटं मेघे प्राप्ते सति तस्य अपूर्वा काचित् शोभा सम्पत्स्यते इति कल्पयते –

> **छन्नोपान्तः परिणतफलद्योतिभिः काननाऽम्रै–**
> **स्त्वय्यारूढे शिखरमचलः स्निग्धवेणीसवर्णे।**
> **नूनं यास्यत्यमरमिथुनप्रेक्षणीयामवस्थां**
> **मध्ये श्यामः स्तन इव भुवः शेषविस्तारपाण्डुः॥१८॥**

**अन्वयः**– हे मेघ! परिणतफलद्योतिभिः काननाऽम्रैः छन्नोपान्तः अचलः स्निग्धवेणीसवर्णे त्वयि शिखरम् आरूढे (सति) मध्ये श्यामः शेषविस्तारपाण्डुः भुवः स्तन इव अमरमिथुनप्रेक्षणीयाम् अवस्थां नूनं यास्यति।

**व्याख्या – ( क ) पर्यायपदानि** –(हे मेघ!) परिणतफलद्योतिभिः = परिपक्वफलशोभिभिः, काननाम्रैः = वनरसालैः, छन्नोपान्तः = आवृत्तपार्श्वः, अचलः = आम्रकूटपर्वतः, स्निग्धवेणीसवर्णे = मसृणकेशबन्धतुल्यवर्णे श्यामवर्णे इत्यर्थः, त्वयि = भवति मेघे, शिखरं = शृङ्गम्, आरूढे = आरोहणे कृते (सति), मध्ये = अन्तरे, श्यामः = श्यामवर्णः, शेषविस्तारपाण्डुः = मध्यादन्यत्र विस्तारे परितः, पाण्डुर्हरिणः, भुवः = पृथिव्याः, स्तन = पयोधर, इव = यथा, अमरमिथुनप्रेक्षणीयां = देवयुगलदर्शनीयाम्, अवस्थां = दशां, यास्यति = प्राप्स्यति। यथा परिश्रान्तः कश्चित्कामी कामिनीनां कुचकलशे विश्रान्तः सन् स्वपिति तद्वत् भवानपि भुवो (नायिकायाः) स्तन इव ध्वनिः।

**( ख ) भावार्थः** – हे मेघ! परिपक्वफलशोभिभिः वनरसालवृक्षैः आवृत्तपार्श्व–आम्रकूटपर्वतः कृष्णवर्णे त्वयि शृङ्गमारूढे सति मध्ये श्यामोऽन्यत्र परितः पाण्डुरः पृथिव्याः स्तन इव देवयुगलैः दर्शनीयो भविष्यतीति।

**छन्दः** – अत्र मन्दाक्रान्ताछन्दः वर्तते। तल्लक्षणं तु पूर्ववदेव।

**अलङ्कारः** – श्लोकेऽस्मिन् उत्प्रेक्षालङ्कारः। स्निग्धवेणीसवर्णे इत्यत्र आर्थी – उपमालङ्कारः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## श्लोकः १९

**प्रसङ्गः** – श्लोकेऽस्मिन् महाकविस्तत्रभवान् कालिदासः यक्षमुखात् आम्रकूटानन्तरं विन्ध्याचलचरणे प्रसृतां रेवाख्यां नदीं वर्णयति –

**स्थित्वा तस्मिन् वनचरवधूभुक्तकुञ्जे मुहूर्तं**
**तोयोत्सर्गद्रुततरगतिस्तत्परं वर्त्म तीर्णः।**
**रेवां द्रक्ष्यस्युपलविषमे विन्ध्यपादे विशीर्णां**
**भक्तिच्छेदैरिव विरचितां भूतिमङ्गे गजस्य॥१९॥**

**अन्वयः**– (हे मेघ!) वनचरवधूभुक्तकुञ्जे तस्मिन् मुहूर्तं स्थित्वा तोयोत्सर्गद्रुततरगतिः(सन्) तत्परं वर्त्म तीर्णः (त्वम्) उपलविषमे विन्ध्यपादे विशीर्णां रेवां गजस्य अङ्गे भक्तिच्छेदैः विरचितां भूतिम् इव द्रक्ष्यसि।

**व्याख्या – (क) पर्यायपदानि** – (हे मेघ!) वनचरवधूभुक्तकुञ्जे = किरातवनितोपभुक्तलतागृहे, तस्मिन् = आम्रकूटे पर्वते, मुहूर्तम् = अल्पकालं, स्थित्वा = विश्रम्य, तोयोत्सर्गद्रुततरगतिः (सन्) = जलवृष्ट्यातिशीघ्रगामी (सन्), तत्परं = तस्मात् आम्रकूटात् परम् अनन्तरं, वर्त्म = मार्गं, तीर्णः (सन्) = अतिक्रान्तः, (सन्) उपलविषमैः = पाषाणैः निम्नोन्नते, विन्ध्यपादे = विन्ध्याचलचरणे, प्रत्यन्तपर्वते, विशीर्णां = समन्ततो विस्तृतां, रेवां = रेवाख्यां नदीं, नर्मदां, गजस्य = हस्तिनः, अङ्गे = शरीरे, भक्तिच्छेदैः = रेखाभङ्गिभिः, रचनाविशेषरेखाप्रभाभिः वा, विरचितां = निर्मितां, भूतिं = शृङ्गारम्, इव = यथा, द्रक्ष्यसि = अवलोकयिष्यसि।

**(ख) भावार्थः** – हे मेघ! किरातवनितोपभुक्तलतागृहे तस्मिनाम्रकूटपर्वते क्षणं विश्रम्य, जलवृष्टिकारणाद् द्रुततरगामी सन् आम्रकूटानन्तरं मार्गमतिक्रम्य, प्रस्तरैः निम्नोन्नते विन्ध्याचलचरणे समन्ततो विस्तृतां रेवाख्यां नदीं गजस्य शरीरे रेखाभङ्गिभिः निर्मितां सज्जामिव अवलोकयिष्यसि। इयमपि ते दृष्टिविनोदकारिणी भविष्यतीति तात्पर्यम्।

**छन्दः** – श्लोकेऽस्मिन् मन्दाक्रान्ता छन्दः। तल्लक्षणं पूर्ववदेव।

**अलङ्कारः** – अत्र रेवाविन्ध्ययोर्मध्ये लिङ्गकार्ययोः साम्यात् नायिकानायकयोश्च व्यवहारसमारोपणात् समासोक्तिः श्रौत्युपमा चालङ्कारः, तयोरङ्गाङ्गिभावात् सङ्करालङ्कारोऽत्र।

**विशेषांशः** – द्रक्ष्यस्युपलविषमे – द्रक्ष्यसि+उपलविषमे (यण् सन्धिः)

तत्परम् – तस्मात् परं तत् (पञ्चमी तत्पुरुष-समासः)

'मुहूर्तमल्पकाले स्याद् घटिका द्वितयेऽपि च' इति शब्दार्णवः।

'रेवा तु नर्मदा सोमोद्भवा मेकलकन्यका' इत्यमरः।

## श्लोकः २०

**प्रसङ्गः** – श्लोकेऽस्मिन् महाकविकालिदासः यक्षमुखात् मेघं रेवानद्याः तिक्तजलपानेन पूर्णत्त्वमाप्तुं निर्दिशति–

**तस्यास्तिक्तैर्वनगजमदैर्वासितं वान्तवृष्टि-**
**र्जम्बूकुञ्जप्रतिहतरयं तोयमादाय गच्छेः।**
**अन्तःसारं घन! तुलयितुं नानिलः शक्ष्यति त्वां**
**रिक्तः सर्वो भवति हि लघुः पूर्णता गौरवाय॥२०॥**

**अन्वयः**– हे घन! वान्तवृष्टिः तिक्तैः वनगजमदैः वासितं जम्बूकुञ्जप्रतिहतरयं तस्याः तोयम् आदाय गच्छेः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

अन्त:सारं त्वाम् अनिल: तुलयितुं न शक्ष्यति, हि रिक्त: सर्व: लघु: भवति, पूर्णता गौरवाय (भवति)।

**व्याख्या – (क) पर्यायपदानि** – हे घन = हे मेघ!, वान्तवृष्टि: = उद्गीर्णवर्ष:, (कृतवर्ष:) सन्, तिक्तै: = सुगन्धिभिस्तिक्तरसवद्भिश्च, वनगजमदै: = आरण्यकहस्तिदानजलै:, वासितं = सुगन्धितं, जम्बूकुञ्जप्रतिहतरयं = जम्बूवृक्षसमूहे अवरुद्धवेगं, तस्या: = नर्मदाया:, तोयं = जलम्, आदाय = गृहीत्वा, गच्छे: = व्रज। अन्त:सारम् = अन्तर्बलं (अन्तर्जलै: बलवन्त:), त्वां = मेघम्, अनिल: = आकाशवायु:, तुलयितुं = कम्पयितुं (इतस्तत: चालयितुं), न शक्ष्यति = नहि समर्थो भविष्यति, हि = यत:, रिक्त: = अन्त:सारशून्य:, सर्व: = सकल:, लघु = लाघवयुक्त:, प्रकम्पनीय: भवतीत्यर्थ:, भवति = वर्तते, पूर्णता = सारवत्ता, गौरवाय = गुरुत्वाय, अप्रकम्प्यत्वायेतिभाव: (भवति = जायते)।

**(ख) भावार्थ:** – हे मेघ! त्वं तत्र जल वृष्टिं विधाय सुगन्धिभिरारण्यकगजानां दानजलै: सुवासितं जम्बूकुञ्जप्रतिबद्धवेगं नर्मदानद्या: जलं गृहीत्वा गच्छ। एवमन्त:सारं त्वामाकाशवायु: कम्पयितुमितस्तत: भ्रामयितुं वा समर्थो न भविष्यति, यत: सर्वोऽपि लघुर्भवति अन्त: सार शून्य:, किन्तु पूर्णता गरिम्णे गौरवाय वा भवति।

**छन्द:** – श्लोकेऽस्मिन् मन्दाक्रान्ता छन्द:। तल्लक्षणं तु पूर्ववदेव।

**अलङ्कार:** – श्लोकेऽस्मिन् तृतीयपादगतविशेषार्थस्य चतुर्थपादगत सामान्यार्थेन समर्थनादर्थान्तरन्यासालङ्कार:।

**विशेषांश:** – नानिल: – न + अनिल: – दीर्घ सन्धि:।

वान्तवृष्टि:– वान्त: वृष्टि: येन स: (बहुव्रीहिसमास:)।

वृष्टि: – वृष्+क्तिन्+सु।

'सारो बले स्थिरांशे च' इत्यमर:।

## श्लोक: २१

**प्रसङ्ग:** – श्लोकेऽस्मिन् महाकविकालिदास: यक्षमुखात् कथयति – हे मेघ! पृथिव्या: गन्धं घ्रात्वा हरिणा: त्वां अग्रे मार्गं सूचयिष्यन्ति –

> **नीपं दृष्ट्वा हरितकपिशं केसरैरर्धरूढै –**
> **राविर्भूतप्रथममुकुला: कन्दलीश्चानुकच्छम्।**
> **जग्ध्वाऽरण्येष्वधिकसुरभिं गन्धमाघ्राय चोर्व्या:**
> **सारङ्गास्ते जललवमुच: सूचयिष्यन्ति मार्गम्॥२१॥**

**अन्वय:**– अर्धरूढै: केसरै: हरितकपिशं नीपं दृष्ट्वा अनुकच्छम् आविर्भूतप्रथममुकुला: कन्दली: च जग्ध्वा अरण्येषु ऊर्व्या: अधिकसुरभिं गन्धं च आघ्राय सारङ्गा: जललवमुच: ते मार्गं सूचयिष्यन्ति।

**व्याख्या – (क) पर्यायपदानि** – (हे मेघ!), अर्धरूढै: = एकदेशोद्गतै:, केसरै: = किञ्जलकै:, हरितकपिशं = पालाशकृष्णपीतं, नीपं = स्थलकदम्बपुष्पं, दृष्ट्वा = अवलोक्य, अनुकच्छं = जलप्रायदेशपार्श्वे, आविर्भूतप्रथममुकुला: = प्रथमोत्पन्ना मुकुला यासां ता:, कन्दलीश्च = भूकदली: च, जग्ध्वा = भक्षयित्वा, अरण्येषु = वनेषु, अधिकसुरभिम् = अतिसुगन्धयुक्तम्, ऊर्व्या: = पृथिव्या:, गन्धं = सुगन्धम्, आघ्राय = घ्रात्वा, सारङ्गा: = मृग-हस्ति-भ्रमरा:, जललवमुच: = वारिबिन्दुमोचकस्य, ते = तव, मेघस्य, मार्गं = पन्थानं, सूचयिष्यन्ति = अनुमापयिष्यन्ति।

**(ख) भावार्थ:** – हे मेघ! अर्धोत्पन्नकैसरे: हरितकृष्णपीतवर्णं हरितकृष्णलोहितवर्णं वा स्थलकदम्बपुष्पमवलोक्य जलप्रायभूभागे प्रकटीकृतकुड्मला: कन्दलीश्च भक्षयित्वा वनेषु पृथिव्या: अतिसुगन्धिगन्धं घ्रात्वा मृग-हस्ति भृङ्गा: वारिबिन्दुमोचकस्य मेघस्य मार्गं सूचयिष्यन्ति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**छन्दः** – श्लोकेऽस्मिन् मन्दाक्रान्ता छन्दः। तल्लक्षणं पूर्ववदेव।

**अलङ्कारः** – अत्र कार्यैर्नीपमुकुलप्रभृतिभिः वृष्टिरुपकारणमनुमीयते, अतोऽनुमानालङ्कारः।

**विशेषांशः** – चोर्व्याः – च + ऊर्व्याः (गुणसन्धिः)।

सारङ्गाः – साराणि अङ्गानि येषां ते (बहुव्रीहिसमासः)।

'सारङ्गः पशुपक्षिणोः' इत्यमरः।

'पलाशो हरितं हरित्' इत्यमरः।

## श्लोकः २२

**प्रसङ्गः** – श्लोकेऽस्मिन् महाकविस्तत्रभवान् कालिदासः यक्षमुखात् कथयति यत् तव गर्जनेन भीताः कम्पिता सिद्धस्त्रियः सिद्धेभ्यः आलिङ्गनसुखानि प्रदास्यन्ति –

**अम्भोबिन्दुग्रहणचतुरांश्चातकान् वीक्षमाणाः**
**श्रेणीभूताः परिगणनया निर्दिशन्तो बलाकाः।**
**त्वामासाद्य स्तनितसमये मानयिष्यन्ति सिद्धाः**
**सोत्कम्पानि प्रियसहचरीसम्भ्रमाऽलिङ्गितानि॥ २२॥**

**अन्वयः** – अम्भोबिन्दुग्रहणचतुरान् चातकान् वीक्षमाणाः श्रेणीभूताः बलाकाः परिगणनया निर्दिशन्तः सिद्धाः स्तनितसमये सोत्कम्पानि प्रियसहचरी संभ्रमाऽलिङ्गितानि आसाद्य त्वां मानयिष्यन्ति।

**व्याख्या – (क) पर्यायपदानि** – (हे मेघ!) अम्भोबिन्दुग्रहणचतुरान् = वृष्टिजलकणस्वीकरणनिपुणान्, चातकान् = सारङ्गान्, वीक्षमाणाः = पश्यन्तः, कौतुहलेनेति भावः, श्रेणीभूताः = बद्धपंक्तिः, बलाकाः = बकपङ्क्तिः, परिगणनया = एक द्वे त्रिस्र इति संख्यानेन, निर्दिशन्तः = हस्तेन दर्शयन्तः, सिद्धाः = देवयोनिविशेषाः, स्तनितसमये = त्वद्गर्जनकाले, स्वसम्भोग काले वा, सोत्कम्पानि = उत्कम्पपूर्वकाणि, प्रियसहचरीसंभ्रमाऽलिङ्गितानि = दयितसहचारिणीत्वराऽश्लेषान्, आसाद्य = प्राप्य, त्वां = भवन्तं, मानयिष्यन्ति = सत्करिष्यन्ति, शतशः धन्यवादं दास्यन्ति इति तात्पर्यम्।

**(ख) भावार्थः** – हे मेघ! वृष्टिजलकणस्वीकरणनिपुणान् कौतुकान् चातकान् पश्यन्तः बद्धपंक्तीः बिसकण्ठिकाः संख्यानेनाङ्गुलिना निर्दिशन्तः सिद्धास्तत्क्षणमेव तव गर्जनेन उत्कम्पपूर्वकाणि प्रियासहचरीत्वरालिङ्गतानि प्राप्य त्वां सत्करिष्यन्ति।

**छन्दः** – श्लोकेऽस्मिन् मन्दाक्रान्ता छन्दः। तल्लक्षणं पूर्ववदेव।

**अलङ्कारः** – अत्र प्रहर्षण अलङ्कारः वर्तते।

**विशेषांशः** – सोत्कम्पानि – स + उत्कम्पानि (गुणसन्धिः)

अम्भोबिन्दुग्रहणचतुरान् – अम्भसां बिन्दवः (षष्ठी तत्पुरुषसमासः) तेषां ग्रहणम् (ष०त०) तस्मिन् चतुराः (सप्तमी तत्पुरुषसमासः) तान्।

'सारङ्गाः स्तोकश्चातकः समाः' इत्यमरः।

'बलाकाः बकपंक्तिः स्यात्' इत्यमरः।

## श्लोकः २३

**प्रसङ्गः** – श्लोकेऽस्मिन् महाकविकालिदासः यक्षमुखात् मार्गे मयूरैः मेघाय करिष्यमाणं स्वागतं प्रस्तौति –

**उत्पश्यामि द्रुतमपि सखे मत्प्रियार्थं यियासोः**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**कालक्षेपं ककुभसुरभौ पर्वते पर्वते ते।**
**शुक्लापाङ्गैः सजलनयनैः स्वागतीकृत्य केकाः**
**प्रत्युद्यातः कथमपि भवान् गन्तुमाशु व्यवस्येत्॥ २३॥**

**अन्वयः** – हे सखे! मत्प्रियार्थं द्रुतं यियासोः अपि ते ककुभसुरभौ पर्वते-पर्वते कालक्षेपम् उत्पश्यामि। सजलनयनैः शुक्लापाङ्गैः केकाः स्वागतीकृत्य प्रत्युद्यातः भवान् कथमपि आशु गन्तुं व्यवस्येत्।

**व्याख्या – (क) पर्यायपदानि** – हे सखे ! = हे मित्र मेघ !, मत्प्रियार्थं = मद्वल्लभार्थं मदभीष्टसम्पादनार्थं वा, द्रुतं = क्षिप्रं, यियासोः = यातुमिच्छोः, अपि, ते = तव मेघस्येति भावः, ककुभसुरभौ = कुटज कुसुमसुगन्धिनि, पर्वते-पर्वते = अद्रौ-अद्रौ, कालक्षेपं = समययापनम्, उत्पश्यामि = अवलोकयामि, उत्प्रेक्षे इति भावः, कालयापनं त्यजता त्वया शीघ्रमेव गन्तव्यमतो हेतोः प्रार्थयते – सजलनयनैः = सानन्दाश्रुलोचनैः, शुक्लापाङ्गैः = मयूरैः, केकाः = स्ववाणीः, स्वागतीकृत्य = स्वागतवचनीकृत्य, प्रत्युद्यातः = मयूरवाणी कृतातिथ्यः (सन्), भवान् = मेघः, कथमपि = येन केनापि प्रकारेण, आशु = द्रुततरं, गन्तुं = यातुं, व्यवस्येत् = चेष्टेत, प्रयतेत्।

**(ख) भावार्थः** – हे मित्र मेघ! मत्प्रियासमीपं द्रुतं गन्तुमिच्छोरपि तव कुटजकुसुमसुगन्धिनि अद्रौ-अद्रौ समयविलम्बमुत्पश्यामि, शिखण्डिनः स्वकेकाभिः स्वागतीकृत्य भवन्तं प्रत्युद्गमिष्यन्ति, तथानि केनापि प्रकारेण शीघ्रं गमनायोद्योगं कुर्यात्।

**छन्दः** – श्लोकेऽस्मिन् मन्दाक्रान्ताः छन्दः। तल्लक्षणं पूर्ववदेव।

**अलङ्कारः** – श्लोकेऽस्मिन् केकायामारोपितस्य स्वागतवचनस्य प्रस्तुते प्रत्युद्गमने उपयोगत्वात्परिणामोऽलङ्कारः।

**विशेषांशः** – शुक्लापाङ्गैः – शुक्ल+अपाङ्गैः (दीर्घसन्धिः)

कालक्षेपम् – कालस्य क्षेपः तम् (षष्ठी तत्पुरुषसमासः)।

प्रत्युद्यातः – प्रति+उद्+या+क्त प्रत्ययः।

'केका वाणी मयूरस्य' इत्यमरः।

## श्लोकः २४

**प्रसङ्गः** – श्लोकेऽस्मिन् महाकविकालिदासः यक्षमुखात् कथयति यत् दशार्णदेशं प्राप्ते मेघे तस्य काचित् अपूर्वशोभा स्यात् तथा च हंसयुक्तत्वात् अति धवलितोऽपि स्यादित्युच्यते –

**पाण्डुच्छायोपवनवृतयः केतकैः सूचिभिन्नै-**
**र्नीडारम्भैर्गृहबलिभुजामाकुलग्रामचैत्याः ।**
**त्वय्यासन्ने परिणतफलश्यामजम्बूवनान्ताः**
**सम्पत्स्यन्ते कतिपयदिनस्थायिहंसा दशार्णाः॥ २४॥**

**अन्वयः**– (हे मेघ!) त्वयि आसन्ने (सति) दशार्णाः सूचिभिन्नैः केतकैः पाण्डुच्छायोपवनवृतयः गृहबलिभुजां नीडारम्भैः आकुलग्रामचैत्याः परिगतफलश्यामजम्बूवनान्ताः कतिपयदिनस्थायिहंसाः सम्पत्स्यन्ते।

**व्याख्या – (क) पर्यायपदानि** – (हे मेघ!) त्वयि = भवति, आसन्ने = सन्निकृष्टे (सति), दशार्णाः = दशार्णनामका देशाः, सूचिभिन्नैः = मुकुलाग्रविकसितैः, केतकैः = केतकीपुष्पैः, पाण्डुच्छायोपवनवृतयः = हरितवर्णोद्यान- कण्टकशाखावरणाः, गृहबलिभुजां = काकादिग्रामपक्षिणां, नीडारम्भैः = कुलायनिर्माणैः, आकुलग्रामचैत्याः = व्याप्तग्राममन्दिराः, परिणतफलश्यामजम्बूवनान्ताः = परिपक्वफलश्यामलजम्बूवृक्षसमूहैः,



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

रमणीया: (च) = तथा च, कतिपयदिनस्थायिहंसा: =किञ्चिद्दिवसस्थायिराजहंसा:, सम्पत्स्यन्ते = भविष्यन्ति।

**(ख) भावार्थ:** – हे मेघ! त्वयि समीपवर्तिनि सति दशार्णनामकदेशा: मुकुलाग्रविकसितै: केतकीकुसुमै: हरितोद्यान कण्टकशाखावरणा: गृहबलिभोजिनां काकादिग्रामपक्षिणां कुलायनिर्माणै: सङ्कीर्णग्रामवृक्षा: भविष्यन्ति। तत्रत्य वनप्रान्तप्रदेशा:, परिणतजम्बूफलै: श्यामला भविष्यन्ति, तत्रस्था: हंसाश्च कतिपयदिवसमेव यावत् स्थास्यन्ति।

**छन्द:** – श्लोकेऽस्मिन् मन्दाक्रान्ता छन्द:। तल्लक्षणं पूर्ववदेव।

**अलङ्कार:** – श्लोकेऽस्मिन् स्वभावोक्तिरलङ्कार:।

**विशेषांश:** – त्वय्यासन्ने – त्वयि+आसन्ने (यण् सन्धि:)।

दशार्णा: – दश ऋणानि येषां ते (बहुव्रीहि–समास:)।

हरित: पाण्डुर: इत्यमर:।

## श्लोक: २५

**प्रसङ्ग:** – श्लोकेऽस्मिन् महाकविकालिदास: यक्षमुखात् दशार्णराजधान्यां विदिशानगर्यां वेत्रवत्या: नद्या: वर्णनं प्रस्तौति –

**तेषां दिक्षु प्रथितविदिशालक्षणां राजधानीं**
**गत्वा सद्य: फलमविकलं कामुकत्वस्य लब्धा।**
**तीरोपान्तस्तनितसुभगं पास्यसि स्वादु यस्मात्**
**सभ्रूभङ्गं मुखमिव पयो वेत्रवत्याश्चलोर्मि॥२५॥**

**अन्वय:** – दिक्षु प्रथितविदिशालक्षणां तेषां राजधानीं गत्वा सद्य: कामुकत्वस्य अविकलं फलं लब्धा यस्मात् वेत्रवत्या: स्वादु चलोर्मि पय: सभ्रूभङ्गं मुखम् इव तीरोपान्तस्तनितसुभगं पास्यसि।

**व्याख्या – (क) पर्यायपदानि** – (हे मेघ!) दिक्षु = दिशासु, प्रथितविदिशालक्षणां = ख्यातविदिशेति नामधेयां, तेषां = दशार्णानां, राजधानीं = प्रधाननगरीं, गत्वा = सम्प्राप्य, सद्य: = तत्क्षणमेव, कामुकत्वस्य = विलासिताया:, कामुकताया:, अविकलं = सम्पूर्णं, फलं = प्रयोजनं, लब्धा = लप्स्यते (त्वया), यस्मात् = कारणात्, वेत्रवत्या: = वेत्रवतीनद्या:, स्वादु = मधुरं, चलोर्मि = तरङ्गितं, पय: = जलं, सभ्रूभङ्गं = (दशनपीडया) भ्रूकुटियुतं, मुखमिव = वदनमिव, तीरोपान्तस्तनितसुभगं = तटप्रान्तगर्जितमनोहरं यथा, तथा पास्यसि = पानं करिष्यसि।

**(ख) भावार्थ:** – हे मेघ! सर्वदिक्षु प्रसिद्धविदिशेति नामधेयां दशार्णानां राजधानीं गत्वा तत्क्षणमेव विलासिताया: समग्रं फलं लप्स्यसे। यस्मात् कारणात् मधुरं तरङ्गितं वेत्रवतीनद्या: मृदु तरङ्गयुक्तं च वारि कस्याश्चिन्नायिकाया: कटाक्षयुक्तमधरमिव तटप्रान्ते स्तनितानन्तरं पास्यसि।

**छन्द:** – श्लोकेऽस्मिन् मन्दाक्रान्ताछन्द:। तल्लक्षणं पूर्ववदेव।

**अलङ्कार:** – अत्र लिङ्गसाम्यात् नायक – नायिकाव्यवहारसमारोपात् समासोक्तिरलङ्कार:।

**विशेषांश:** – चलोर्मि – चल+उर्मि: (गुणसन्धि:)

राजधानीम् – राज्ञाम् धानी राजधानी ताम् (षष्ठी तत्पुरुष)।

'स्तनितं गर्जितं मेघनिर्घोषे रसितादि च' इत्यमर:।

## श्लोक: २६

**प्रसङ्ग:** – श्लोकेऽस्मिन् कविताकामिनीविलासो महाकविस्तत्रभवान् कालिदास: यक्षमुखात् वेत्रवती वर्णनं प्रस्तूय इदानीं मार्गस्थितस्य नीचैराख्यपर्वतस्य वर्णनं प्रस्तौति –



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**नीचैराख्यं गिरिमधिवसेस्तत्र विश्रामहेतो-**
**स्त्वत्सम्पर्कात् पुलकितमिव प्रौढपुष्पैः कदम्बैः।**
**यः पण्यस्त्रीपरिमलोद्गारिभिर्नागराणा-**
**मुद्दामानि प्रथयति शिलावेश्मभिर्यौवनानि॥ २६॥**

**अन्वयः** - (हे मेघ!) तत्र विश्रामहेतोः प्रौढपुष्पैः कदम्बैः त्वत्सम्पर्कात् पुलकितम् इव नीचैराख्यं गिरिम् अधिवसेः, यः पण्यस्त्रीरतिपरिमलोद्गारिभिः शिलावेश्मभिः नागराणाम् उद्दामानि यौवनानि प्रथयति।

**व्याख्या - (क) पर्यायपदानि** - (हे मेघ!) तत्र = तस्मिन् स्थले, विदिशासमीपे, विश्रामहेतोः = विश्रामार्थं खेदापनयनार्थं वा, प्रौढपुष्पैः = प्रस्फुटितकुसुमैः, कदम्बैः = नीपवृक्षैः, त्वत्सम्पर्कात् = तवसङ्गात्, पुलकितम् इव = सञ्जातपुलकमिव, नीचैराख्यं = नीचैरभिधानं, गिरिं = पर्वतम्, अधिवसेः = अधिवासं कुर्याः, नीचैराख्ये = गिरौ वसेरिति, यः = नीचैरचलः, पण्यस्त्रीरतिपरिमलोद्गादिभिः = वैश्यामैथुनोत्पन्नसुगन्धिप्रसारिभिः, शिलावेश्मभिः = कन्दरैः, नागराणां = पौराणाम्, उद्दामानि = उत्कटानि, यौवनानि = तारुण्यानि, प्रथयति = प्रकटयति।

**(ख) भावार्थः** - हे मेघ! तत्र विदिशायां मार्गपरिश्रमापनोदनार्थं विकसितकुसुमैः कदम्बवृक्षैः तवसम्पर्कात् सञ्जातरोमाञ्चमिव नीचैनमिकं पर्वते वासं कुर्याः, यो नीचैर्गिरिः वेश्यामैथुनोत्पन्नसुगन्धिप्रसारिभिः गुहाभिर्नागरिकाणा-मुत्कटयौवनानि प्रकटीकरोति।

**छन्दः** - श्लोकेऽस्मिन् मन्दाक्रान्ताछन्दः। तल्लक्षणं पूर्ववदेव।

**अलङ्कारः** - श्लोकेऽस्मिन् उत्प्रेक्षाऽलङ्कारः।

**विशेषांशः** - नीचैराख्यं - नीचैः + आख्यं (विसर्गसन्धिः)।

उद्दामानि - दाम्नः (मर्यादायाः) उद्गतानि (षष्ठी तत्पुरुषसमासः)।

'वारस्त्री गणिका वेश्या पण्यस्त्री रूपजीवनी' इति शब्दार्णवः।

## श्लोकः २७

**प्रसङ्गः** - महाकविकालिदासः अत्र वर्णयति यत् मेघः नीचैः पर्वते विश्रम्य जलकणैः यूथिकाजालानि सिञ्चन् आतपम्लानानि पुष्पावचायिकास्त्रीणां मुखानि छायादायानात् प्रसादयन् अग्रे गमिष्यति -

**विश्रान्तः सन् व्रज वननदीतिरजातानि सिञ्च-**
**न्नुद्यानानां नवजलकणैर्यूथिकाजालकानि।**
**गण्डस्वेदापनयनरुजाक्लान्तकर्णोत्पलानां**
**छायादानात् क्षणपरिचितः पुष्पलावीमुखानाम्॥ २७॥**

**अन्वयः** - विश्रान्तः सन् वननदीतीरजातानि उद्यानानां यूथिकाजालकानि नवजलकणैः सिञ्चन् गण्डस्वेदापनयनरुजाक्लान्तकर्णोत्पलानां पुष्पलावीमुखानां छायादानात् क्षणपरिचतः (सन्) व्रज।

**व्याख्या - (क) पर्यायपदानि** - हे मेघ!, विश्रान्तः सन् = तत्र नीचैः पर्वते अपनीताध्वश्रमः सन्, वननदीतीरजातानि = अरण्यसरित्तदोद्भूतानि, उद्यानानां = उपवनानां, यूथिकाजालकानि = मागधीकुसुमकुड्मलानि, नवजलकणैः = नूतनसलिलबिन्दुभिः, सिञ्चन् = आर्द्रीकुर्वन्, गण्डस्वेदापनयनरुजाक्लान्तकर्णोत्पलानां = कपोलघर्मबिन्दूनां दूरीकरणपीडया म्लानकर्णकमलानां, पुष्पलावीमुखानां = पुष्पावचायिकावदनानां, छायादानात् = अनातपवितरणात्, क्षणपरिचितः = किञ्चिद्कालज्ञातः, सन्, व्रज = गच्छ, कामुकदर्शनात्कामिनीनां मुखं प्रसन्नतामादधातीति भावः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**(ख) भावार्थः** -हे मेघ! नीचैः पर्वते विरम्य वननदीनां तीरेषु स्वयमेवोत्पन्नानि उपवनानां मागधीपुष्पकलिकाः नूतनजलकणैः सिञ्चन् पुष्पावचयनिका मुखानां गण्डस्वेददूरीकरणेन किञ्चित् कालाय परिचितः सन् अग्रे गच्छ।

**छन्दः** – श्लोकेऽस्मिन् मन्दाक्रान्ता छन्दः। तल्लक्षणं पूर्ववदेव।

**अलङ्कारः** – श्लोकेऽस्मिन् स्वभावोक्तिरलङ्कारः।

**विशेषांशः** – कर्णोत्पलानाम् – कर्ण+उत्पलानाम् (गुणसन्धिः)।

यूथिकाजालकानि – यूथिकानां जालकानि (षष्ठी तत्पुरुषसमासः)।

'अथ मागधी गणिका यूथिका' इत्यमरः।

'छाया सूर्यप्रियाकान्तिः प्रतिबिम्बनमनातपः' इत्यमरः।

## अभ्यास-प्रश्नाः

### (क) वस्तुनिष्ठप्रश्नाः –

**निर्देशः** – निम्नाङ्कितप्रश्नेषु उचितविकल्पस्य वर्णाङ्कं कोष्ठके चिनुत –

१. मेघेन पथि स्थूलहस्तावलेपाः परिहरणीयः –
(क) दिङ्नागानां (ख) सिद्धमुनीनां
(ग) सिद्धाङ्गनानां (घ) राजहंसानां ( )

२. गोपवेषस्य कान्तिमापत्स्यते –
(क) यक्षः (ख) कुबेरः
(ग) मेघः (घ) आम्रकूटः ( )

३. अध्वश्रमपरिगतं मेघं सानुमान् साधु मूर्ध्ना वक्ष्यति –
(क) रामगिरिः (ख) आम्रकूटः
(ग) देवगिरिः (घ) नीचैः ( )

४. रिक्तः सर्वो भवति –
(क) लघुः (ख) दीनः
(ग) गुरुः (घ) मध्यमः ( )

५. जललवमुचः मार्गं सूचयिष्यन्ति –
(क) सारङ्गाः (ख) मुकुलाः
(ग) मयूराः (घ) देवाङ्गनाः ( )

६. नागराणामुद्दामानि यौवनानि प्रथयति –
(क) नीचैः (ख) मेघः
(ग) आम्रकूटः (घ) यक्षः



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**( ख ) अतिलघूत्तरात्मकप्रश्नाः –**

**निर्देशः** – निम्नाङ्कितप्रश्नानाम् एकपङ्क्तावेव उत्तराणि लेख्यानि –

१. अद्रेः शृङ्गं कः हरति ?
२. वल्मीकाग्रात् कस्य धनुः खण्डं प्रभवति ?
३. मेघे किम् आयत्तम् ?
४. परिणतफलोभिः काननाम्रैः छन्नोपान्तः कः गिरिः वर्तते ?
५. विन्ध्यपादे का विशीर्णा वर्तते ?
६. दशार्णदेशस्य प्रथितलक्षणा राजधानी का वर्तते ?

**( ग ) लघूत्तरात्मकप्रश्नाः –**

**निर्देशः** – निम्नाङ्कितप्रश्नानां पञ्चषा पङ्क्तिषु उत्तराणि लेख्यानि –

१. यक्षः मेघं कथं गन्तुं निर्दिशति ?
२. आम्रकूट पर्वतस्य किंविध वैशिष्ट्यं मेघदूते प्रतिपादितम् ?
३. किंविधाः सारङ्गाः मेघस्य मार्गं सूचयिष्यन्ति ?
४. नीचैः पर्वतस्य महत्त्वं प्रतिपादनीयम्।
५. दशार्णदेशे मेघस्य प्रभावात् कानि प्राकृतिकपरिवर्तनानि भविष्यन्ति ?
६. प्राप्ते मित्रे क्षुद्रोऽपि कस्मात् विमुखो न भवति ?

**( घ ) निबन्धात्मकप्रश्नाः –**

**निर्देशः** – निम्नाङ्कितश्लोकानां सप्रसङ्गं व्याख्या कार्या –

१. रत्नछाया .................................................... विष्णोः ॥
२. छन्नोपान्तः ................................................ शेषविस्तापाण्डुः ॥
३. तस्यास्तिक्तैः ............................................ पूर्णता गौरवाय ॥

**निर्देशः – निम्नाङ्कितश्लोकानां भावार्थः संस्कृते लेखनीयः –**

१. त्वामासार ................................................ पुनर्यस्तथोच्चैः ॥
२. पाण्डुच्छायोपवन ........................................ हंसा दर्शाणाः ॥
३. नीचैराख्यं गिरिम ........................................ यौवनानि ॥
२. विश्रान्तः सन् ............................................ पुष्पलावीमुखानाम् ॥

**निर्देशः – निम्नाङ्कितसूक्तीनां सप्रसङ्गं भावार्थः संस्कृते लेखनीयः–**

१. रिक्तः सर्वो भवति हि लघुः पूर्णता गौरवाय।
२. प्राप्ते मित्रे भवति हि विमुखः किं पुनर्यस्तथोच्चैः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## ३. उज्जयिनी-नगरी-वर्णनम्

### श्लोकः २८

**प्रसङ्गः** – मेघं निर्दिशति यक्षमुखात् कालिदासः यत् उत्तरदिशां प्रति गच्छन् भवतः मार्गः यद्यपि वक्रः तथापि उज्जयिनी अवश्यं गन्तव्यं यतोहि तत्रत्याः ललनाः दर्शनीयाः –

**वक्रः पन्था यदपि भवतः प्रस्थितस्योत्तराशां**
**सौधोत्सङ्गप्रणयविमुखो मा स्म भूरुज्जयिन्याः।**
**विद्युद्दामस्फुरितचकितैस्तत्र पौराङ्गनानां**
**लोलापाङ्गैर्यदि न रमसे लोचनैर्वञ्चितोऽसि॥ २८॥**

**अन्वयः** – हे मेघ! उत्तराशां प्रस्थितस्य भवतः पन्था यदपि वक्रः तथापि उज्जयिन्याः सौधोत्सङ्गप्रणयविमुखः मा स्म भूः। तत्र विद्युद्दामस्फुरितचकितैः लोलापाङ्गैः पौराङ्गनानां लोचनैः न रमसे यदि (तर्हि) वञ्चितोऽसि।

**व्याख्या – (क) पर्यायपदानि** – उत्तराशाम् = उदीचिदिशं प्रति, प्रस्थितस्य = गच्छतः, भवतः = मेघस्य, पन्था = मार्गः, यदपि = यद्यपि, वक्रः = कुटिलः, (तथापि), उज्जयिन्याः = अवन्तिकायाः, सौधोत्सङ्गप्रणयविमुखः = प्रासादोर्ध्वप्रान्तपरिचयपराङ्मुखः, मा स्म भूः = न हि भव। तत्र = उज्जयिन्यां, विद्युद्दामस्फुरितचकितैः = तडिल्लतादीप्तिभीतैः, लोलापाङ्गैः = चञ्चलकटाक्षैः, पौराङ्गनानां = नागरिकयोषितां, लोचनैः = नयनैः, न रमसे = न क्रीडसि, यदि = चेत् (त्वम्) वञ्चितः = प्रतारितः, असि = वर्तसे, हतभाग्योऽसीति भावः, तव जनेर्वैफल्यं स्यादिति भावः।

**(ख) भावार्थः**– हे मेघ! उत्तरदिशां गन्तुमुद्यतस्य भवतः उज्जयिनीमार्गः यद्यपि वक्रोऽस्ति, तथापि उज्जयिन्याः प्रसादोर्ध्वभागेषु जायमानात् परिचयात् अनभिज्ञ मा भवतु भवान्। यतोहि तत्रोज्जयिन्यां पुरसुन्दरीणां विद्युल्लतास्फुरणेन चकितैः चञ्चलकटाक्षैः न दृष्टस्तर्हि जीवनवैफल्यमेव भवेत्।

**छन्दः** – मन्दाक्रान्ता। तल्लक्षणं पूर्ववदेव।

**अलङ्कारः** – विनोक्ति अलङ्कारः।

**विशेषांशः** – **1. सन्धिः** – प्रस्थितस्योत्तराशाम् – प्रस्थितस्य+उत्तराशाम् (गुणसन्धिः)। सौधोत्संग – सौध+उत्संग(गुणसन्धिः)। भूरुज्जयिन्याः – भूः+उज्जयिन्याः (विसर्गसन्धिः) चकितैः+तत्र (विसर्गसन्धिः), पौरांगनानाम् – पौर+अंगनानाम् (दीर्घसन्धिः)। लौलापाङ्गैः – लोल+अपाङ्गैः (दीर्घसन्धिः)। लोचनैर्वञ्चितोऽसि – लोचनैः+वञ्चितः+असि (विसर्ग पूर्वरूपश्च)।

**२. समासः** – उत्तराशाम् – उत्तरा आशा (कर्मधारय) ताम्। सौधोत्सङ्गप्रणयविमुखः – सौधानाम् उत्सङ्गा (षष्ठी तत्पुरुष) तेषु प्रणयः (सप्तमी तत्पुरुष) तस्मात् विमुखः (पंचमी तत्पुरुषः)। विद्युद्दामस्फुरितचकितैः – विद्युद्दाम्नः स्फुरितानि (षष्ठी तत्पुरुष) विद्युद्दामस्फुरितैः चकितानि तैः (तृतीया तत्पुरुषः)। लोलापाङ्गैः – लोलाः



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

अपाङ्गाः येषां तैः (बहुव्रीहिः)।

**कोषः** – ''सौधोऽस्त्री राजसदनं प्रासादो दावभूभुजाम्'' इत्यमरः। अपाङ्गस्त्वङ्गहीने स्यन्नेत्रान्ते तिलकेऽपि च इत्यमरः। तडित्सौदामिनी विद्युच्चञ्चला चपला अपि इत्यमरः।

## श्लोकः २९

**प्रसङ्गः** – मेघस्य उज्जयिनीगमनावसरे निर्विन्ध्याया औत्सुक्यमवलोक्य तस्याः रसास्वादयितुं प्रार्थ्यते यक्षमुखात् कविताकामिनी विलासो महाकविकालिदासः।

**वीचिक्षोभस्तनितविहगश्रेणिकाञ्चीगुणायाः**
**संसर्पन्त्याः स्खलितसुभगं दर्शितावर्तनाभेः**
**निर्विन्ध्यायाः पथि भव रसाऽभ्यन्तरः सन्निपत्य**
**स्त्रीणामाद्यं प्रणयवचनं विभ्रमो हि प्रियेषु॥२९॥**

**अन्वयः** – वीचिक्षोभस्तनितविहगश्रेणिकाञ्चीगुणायाः स्खलितसुभगं संसर्पन्त्याः दर्शितावर्तनाभेः निर्विन्ध्यायाः पथि सन्निपत्य रसाभ्यन्तरः भव, हि स्त्रीणां प्रियेषु विभ्रमः आद्यं प्रणयवचनम्।

**व्याख्या – (क) पर्यायपदानि** – हे मेघ! वीचिक्षोभस्तनितविहगश्रेणिकाञ्चीगुणायाः = तरङ्गचलनमुखरपक्षि-पङ्क्तिमेखलायाः, संसर्पन्त्याः = प्रवहन्त्याः, स्खलितसुभगं = स्खलनसुन्दरं, दर्शितावर्तनाभेः = प्रकटितजल-भ्रमरूपिनाभेः, निर्विन्ध्यायाः = नद्याः, पथि = मार्गे, सन्निपत्य = संगत्य, रसाभ्यन्तरः = जलाभ्यन्तरः, भव = स्याः, हि = यतः, स्त्रीणां = रमणीनां, प्रियेषु = प्रियतमेषु, विभ्रमः = विलासः, आद्यं = प्रथमं, प्रणयवचनं = प्रेमवाक्यं प्रार्थनावाक्यं वा भवति।

**(ख) भावार्थः** – यक्षः मेघं वदति यत् तरङ्गसञ्चलनेनमुखरितानां खगानां माला मेखलारूपेण धारयति निर्विन्ध्यानदी। मन्दं मन्दं प्रवहमाणातस्याः जलावर्तनाभिरपि दर्शनीया। निर्विन्ध्यानद्याः अन्तः प्रविश्य तद्रसास्वादं विधेहि यतोहि कामिनीनां प्रियेषु विलासप्रदर्शनमेव प्रथमं प्रार्थना वाक्यं भवति।

**छन्दः** – मन्दाक्रान्ता। तल्लक्षणं पूर्ववदेव।

**अलङ्कारः** – १. श्लेषः, २. अर्थान्तरन्यासः।

**विशेषांशः** – दर्शितावर्तनाभेः – दर्शिता+आवर्तनाभेः (दीर्घ०), रसाभ्यन्तरः – रस+अभ्यन्तरः (दीर्घ), सन्निपत्य – सम्+निपत्य (हल्सन्धि)।

वीचिक्षोभस्तनितविहगश्रेणिकाञ्चीगुणायाः – वीचीनां क्षोभः वीचिक्षोभः (ष०तत्पु०) वीचिक्षोभेण स्तनिताः वीचिक्षोभस्तनिताः (तृ०तत्पु०) वीचिक्षोभस्तनिताः विहगाः तेषां श्रेणी वीचीक्षोभस्तनितविहगश्रेणिः एव काञ्चीगुणः यस्याः सा तस्या (बहु०)। स्खलितसुभगं – स्खलितेन सुभगं (तृ०तत्पु०)। दर्शितावर्तनाभेः – दर्शितः आर्वत एव नाभिः यया तस्याः (बहु०)। प्रणयवचनम् – प्रणयस्य वचनम् (ष०तत्पु०)।

**कोषः** – 'स्त्रीकट्यां मेखला काञ्ची सप्तकी रशना तथा' इत्यमरः। 'शृङ्गारादौ विषे वीर्ये गुणे रागे द्रवे रसः' इत्यमरः। 'स्त्रियां वीचिरथोर्मिषु इत्यमरः।

## श्लोकः ३०

**प्रसङ्गः** – मेघः निर्विन्ध्यायाः विरहजन्यं कृशतां पाण्डुतां च तां सङ्गत्य हरेत् इति निवेदयति यक्षमुखात् कालिदासः –



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**वेणीभूतप्रतनुसलिलाऽसावतीतस्य सिन्धुः**
**पाण्डुच्छाया तटरुहतरुभ्रंशिभिर्जीर्णपर्णैः।**
**सौभाग्यं ते सुभग! विरहाऽवस्थया व्यञ्जयन्ति**
**कार्श्यं येन त्यजति विधिना स त्वयैवोपपाद्यः॥३०॥**

**अन्वयः**- वेणीभूतप्रतनुसलिला तटरुहतरुभ्रंशिभिः जीर्णपर्णैः पाण्डुच्छाया असौ सिन्धुः विरहाऽवस्थया अतीतस्य ते सौभाग्यं व्यञ्जयन्ती येन विधिना कार्श्यं त्यजति हे सुभग! स (विधिः) त्वया एव उपपाद्यः।

**व्याख्या - (क) पर्यायपदानि** - वेणीभूतप्रतनुसलिला = वेण्याकारस्वल्पजला, तटरुहतरुभ्रंशिभिः = तीरोत्पन्नवृक्षपातिभिः, जीर्णपर्णैः = शुष्कदलैः, पाण्डुच्छाया = पीतवर्णा, असौ = एषा, सिन्धुः = नदी, विरहाऽवस्थया = विप्रलम्भदशया, अतीतस्य = प्रोषितस्य, ते = तव, मेघस्य, सौभाग्यं = सुभगत्वं, व्यञ्जयन्ती = प्रकटयन्ती, येन विधिना = यादृशेन व्यवहारेण, कार्श्यं = विरहजन्यं कृशतां, त्यजति = मुञ्चति, सः = तादृशः, विधिः = वृत्तिः, त्वया = मेघेन, एव = निश्चयेन, उपपाद्यः = करणीयः।

**(ख) भावार्थः** - वेणीसदृशस्तोकजलवती निर्विन्ध्यानदी तटोत्पन्नविटपेभ्यः पतितैः जीर्णपर्णैः पीतवर्णा भूत्वा विरहजन्यकृशतया दूरदेशं गतस्य तव सौभाग्यं प्रकाशयति। सा यादृशेन तव कार्येण विरहजन्यकृशतां त्यजेत् तत् कार्यं वृष्टिरूपं सम्भोगरूपं वा त्वयैव करणीयम्।

**छन्दः** - मन्दाक्रान्ता। तल्लक्षणं पूर्ववदेव।

**अलङ्कारः** - समासोक्तिः।

**विशेषांशः** - वेणीभूतप्रतनुसलिलासावतीतस्य - वेणीभूतप्रतनुसलिल+असौ (दीर्घसन्धिः)+अतीतस्य (अयादि), पाण्डुच्छाया - पाण्डु+छाया (हल्सन्धिः), विरहावस्थया - विरह+अवस्थया (दीर्घ०) त्वयैवोपपाद्य - त्वया+एव (वृद्धि)+उपपाद्य (गुणसन्धिः)।

वेणीभूतप्रतनुसलिला - वेणीभूतम् प्रतनु सलिलं यस्या सा (बहुव्रीहि)। पाण्डुच्छायाः - पाण्डुः छाया यस्या सा (बहुव्रीहि)। तटरुहस्तरुभ्रंशिभिः - तटयोः रुहाः तटरुहाः (स०तत्पु०) तटरुहाश्च ते तरवः (कर्मधा०) तेभ्यः भ्रंश्यन्तीति (उपपद तत्पु०) तैः, जीर्णपर्णैः - जीर्णानि पर्णानि तैः (कर्मधारय)।

'वेणी प्रवेणी' इत्यमरः।

### श्लोकः ३१

**प्रसङ्गः** - अवन्तिप्रदेशं प्राप्य शोभायुतां विशालाम् उज्जयिनीम् अवश्यं गच्छेतिति कथयति यक्षः मेघं।

**प्राप्यावन्तीनुदयनकथाकोविदग्रामवृद्धान्**
**पूर्वोद्दिष्टामुपसर पुरीं श्रीविशालां विशालाम्।**
**स्वल्पीभूते सुचरितफले स्वर्गिणां गां गतानां**
**शेषैः पुण्यैर्हृतमिव दिवः कान्तिमत् खण्डमेकम्॥३१॥**

**अन्वयः** - उदयनकथाकोविदग्रामवृद्धान् अवन्तीन् प्राप्य सुचरितफले स्वल्पीभूते गां गतानां स्वर्गिणां शेषैः पुण्यैः हृतं कान्तिमत् एकं दिवः खण्डम् इव पूर्वोद्दिष्टां श्रीविशालां विशालां पुरीम् उपसर।

**व्याख्या - (क) पर्यायपदानि** - उदयनकथाकोविदग्रामवृद्धान् = वत्सराजोपाख्यानविज्ञजनपदवृद्धान्, अवन्तीन् = मालवजनपदान्, प्राप्य = सम्प्राप्य, सुचरितफले = सुकर्मफले, स्वल्पीभूते = अल्पावशिष्टे, गां = पृथिवीं, गतानां = प्राप्तानां, स्वर्गिणां = स्वर्गवासिनां, शेषैः = भुक्तवशिष्टैः, पुण्यैः = सुकृतैः, हृतम् = आनीतं, दिवः = स्वर्गस्य,



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

कान्तिमत् = उज्ज्वलम्, एकम् = अन्यतमं, खण्डमिव = शकलम् इव, पूर्वोद्दिष्टां = पूर्वोक्तां, श्रीविशालां = शोभायुक्तां विशालाम्, उज्जयिनीं, पुरीं = नगरीम्, उपसर = व्रज।

**( ख ) भावार्थः**– हे मेघ! यत्र ग्रामवृद्धाः उदयनकथाविषयविज्ञाः सन्ति, तान् मालवजनपदानासाद्य, पुण्यफले क्षीणे सति पृथ्वीलोकं समागतानां स्वर्गवासिनाम् अवशिष्टैः पुण्यफलैरानीतं स्वर्गस्यैकभव्यं खण्डमिव सम्पत्तिशोभापरिपूर्णां पूर्वोक्तां नगरीं गच्छ।

**छन्दः** – मन्दाक्रान्ता। तल्लक्षणं पूर्ववदेव।

**अलङ्कारः** – उत्प्रेक्षाऽलङ्कारः वर्तते।

**विशेषांशः** – प्राप्यावन्तीन् – प्राप्य+अवन्तीन् (दीर्घ०), पूर्वोद्दिष्टाम् – पूर्व+उद्दिष्टाम् (गुणसन्धि), पुण्यैर्हृतम् – पुण्यैः+हृतम् (विसर्गः) उदयनकथाकोविदग्रामवृद्धान् – उदयनस्य कथासु कोविदा ग्रामेषु वृद्धा येषु तान् (बहु०), पूर्वोद्दिष्टाम् – पूर्वमुद्दिष्टा ताम् (तत्पु०), सुचरितफले – सुचरितस्य फलं तस्मिन् (गति तत्पु०)।

प्राप्य – प्र+आप्+क्त्वा (ल्यप्)। उद्दिष्टाम् – उत्+दिश्+क्त+टाप्, हृतम् – हृ+क्त।

'विद्वान् विपश्चित् दोषज्ञः सन् सुधीः कोविदो बुधः' इत्यमरः। 'स्याद्धर्मस्त्रिपुण्यं श्रेयसी सुकृतं वृषः' इत्यमरः।'द्योदिवौ द्वे स्त्रियामभ्रं पुष्करमम्बरम्' इत्यमरः।'सम्पत्तिः श्रीश्च लक्ष्मीश्च' इत्यमरः।

## श्लोकः ३२

**प्रसङ्गः** – कविताकामिनीविलासो महाकविकालिदासः यक्षमुखात् कथयति यत् कमलगन्धेन सुरभितः शिप्रावायुः प्रियतमः इव स्त्रीणां सुरतपीडां दूरीं करोति –

**दीर्घीकुर्वन् पटुमदकलं कूजितं सारसानां**
**प्रत्यूषेषु स्फुटितकमलामोदमैत्रीकषायः।**
**यत्र स्त्रीणां हरति सुरतग्लानिमङ्गानुकूलः**
**शिप्रावातः प्रियतम इव प्रार्थनाचाटुकारः॥ ३२॥**

**अन्वयः** – यत्र प्रत्यूषेषु सारसानां पटु मदकलं कूजितं दीर्घीकुर्वन् स्फुटितकमलामोदमैत्रीकषायः अङ्गानुकूलः शिप्रावातः प्रार्थनाचाटुकारः प्रियतम इव स्त्रीणां सुरतग्लानिं हरति।

**व्याख्या** – **( क ) पर्यायपदानि** – यत्र = यत्र उज्जयिन्यां, प्रत्यूषेषु = प्रभातकालेषु, सारसानां = मरालश्रेष्ठानां, पटु = स्फुटं, मदकलम् = अव्यक्तमधुरं, कूजितं = रुतं, दीर्घीकुर्वन् = विस्तारयन्, स्फुटितकमलामोदमैत्री कषायः = प्रस्फुटितजलजरजसंसर्गसुरभिः, अङ्गानुकूलः = शरीरानुरूपः, शिप्रावातः = शिप्राख्यनदीपवनः, प्रार्थनाचाटुकारः = रमणार्थं प्रियवचनप्रयोक्ता, प्रियतमः = वल्लभ, इव = यथा, स्त्रीणां = कामिनीनां, सुरतग्लानिं = सम्भोगश्रमं, हरति = दूरीकरोति।

**( ख ) भावार्थः** – उज्जयिन्यां प्रभातकालेषु सारसपक्षिणां तीव्रमदेन अव्यक्तमधुरञ्च रुतं विस्तारयन् विकसित कमलानां सुरभिसंसर्गात् सुरभितो गात्रसुखद शिप्रावायुः रतियाचनायां प्रियवचनप्रयोक्ता प्रियतम इव ललनानां सम्भोगपरिश्रमं निवारयति।

**छन्दः** – मन्दाक्रान्ता। तल्लक्षणं पूर्ववदेव।

**अलङ्कारः** – उत्प्रेक्षा पूर्णोपमा च।

**विशेषांशः** – कमलामोद – कमल+आमोद (दीर्घ०) अङ्गानुकूल – अङ्ग+अनुकूल। मदकलम् – मदेन कलं (तृ०तत्पु०)। स्फुटितकमलामोदमैत्रीकषायः – स्फुटितानि कमलानि स्फुटितकमलानि तेषाम् आमोदः (ष०तत्पु०), तेन मैत्री (तृ०तत्पु०) तया कषायः (तृ०तत्पु०)। अङ्गानुकूलः – अङ्गानाम् अनुकूलः (ष०तत्पु०)।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

सुरतग्लानिं – सुरतस्य ग्लानिम् (ष०तत्पु०)।शिप्रावात: – शिप्राया: वात: (ष०तत्पु०)।

**व्याकरणम्** – दीर्घीकुर्वन् – दीर्घ+च्वि+कृ+शतृ। मैत्री – मित्र+अण्+ङीप्। ग्लानि – ग्लै+क्तिन्। प्रार्थना – प्र+अर्थ+युच्। प्रियतम: – प्रिय+तमप्+सु, चाटुकार: – चाटु+कृ+अण्।

प्रत्यूषोऽहर्मुखं कल्यम् इत्यमर:। ध्वनौ तु मधुराऽस्फुटे कल: इत्यमर:।

## श्लोक: ३३

**प्रसङ्ग:** – उज्जयिन्या: परं वैभवं वर्णयत्यत्र कविकुलगुरुकालिदास: –

**हारांस्तारांस्तरलगुटिकान् कोटिश: शंखशुक्ती:**
**शष्पश्यामान् मरकतमणीनुन्मयूखप्ररोहान्।**
**दृष्ट्वा यस्यां विपणिरचितान् विद्रुमाणाञ्च भङ्गान्**
**संलक्ष्यन्ते सलिलनिधयस्तोयमात्रावशेषा: ॥३३॥**

**अन्वय:**– यस्यां कोटिश: विपणिरचितान् तारान् तरलगुटिकान् हारान् शंखशुक्ती: शष्पश्यामान् उन्मयूखप्ररोहान् मरकतमणीन् च विद्रुमाणां भङ्गान् च दृष्ट्वा सलिलनिधय: तोयमात्रावशेषा: संलक्ष्यन्ते।

**व्याख्या – (क) पर्यायपदानि** – यस्याम् = उज्जयिन्यां, कोटिश: = कोटिसंख्यकान्, विपणिरचितान् = पण्यवीथिकासु प्रसारितान्, तारान् = शुद्धान्, तरलगुटिकान् = मध्यमणीभूतमहारत्नान्, हारान् = मौक्तिकमाला:, शंखशुक्ती: = कम्बुमुक्तास्फोटान्, शष्पश्यामान् = नवतृणश्यामलान्, उन्मयूखप्ररोहान् = उद्भूतकिरणाङ्कुरान्, मरकतमणीन् = गारुडरत्नानि, च = तथा, विद्रुमाणां = प्रवालान्, भङ्गान् = खण्डान्, दृष्टवा = अवलोक्य, सलिलनिधय: = रत्नाकारा:, तोयमात्रावशेषा: = जलमात्राऽवशिष्टा:, संलक्ष्यन्ते = उत्प्रक्ष्यन्ते।

**(ख) भावार्थ:** – यस्यामुज्जयिन्यां कोटिसंख्यकान् पण्यवीथिकासुप्रसारितान् विशुद्धान् बहुमूल्यहारान् शङ्खान् मुक्तास्फोटान् नीलवर्णान् प्रस्फुटित्किरणाङ्कुरान् प्रवालखण्डांश्च वीक्ष्य 'रत्नाकर: जल निधिमात्रो वर्तते' इति अनुमीयते।

**छन्द:** – मन्दाक्रान्ता। तल्लक्षणं पूर्ववदेव।

**अलङ्कार:** – उदात्तालङ्कार:।

**विशेषांश:** – हारांस्तारांस्तरलगुटिकान् – हारान्+तारान्+तरलगुटिकान् (हल्संधि:) सलिलनिधयस्तोय-मात्रावशेषा: – सलिलनिधय:+तोयमात्र+अवशेषा:। (विसर्ग, दीर्घ:)। विपणिरचितान् – विपणिषु रचितान् तान् (स०तत्पु०)। शंखशुक्ती: – शंखाश्च शुक्तयश्च ता: (द्वन्द्व:)। उन्मयूखप्ररोहान्– उद्गता मयूखप्ररोहा येषां तान् (बहुव्रीहि:)। तोयमात्रावशेषा: – तोयम् एव मात्रम् तोयमात्रम्, तत् अवशेषो येषां ते (बहुव्रीहि:)। प्ररोहान् – प्र+रुह्+घञ्। दृष्ट्वा – दृश्+क्त्वा, रचितान् – रच्+क्त। अवशेषा: – अव+शिष्+घञ्।

## श्लोक: ३४

**प्रसङ्ग:** – उज्जयिन्या: जना: आगन्तुकानां मनोविनोदाय वासवदत्ताहरणादि कथा: श्रावयन्तीति वर्ण्यतेऽत्र यक्षमुखात् महाकविकालिदासेन –

**प्रद्योतस्य प्रियदुहितरं वत्सराजोऽत्र जह्रे**
**हैमं तालद्रुमवनमभूदत्र तस्यैव राज्ञ:।**
**अत्रोद्भ्रान्त: किल नलगिरि: स्तम्भमुत्पाट्य दर्पा–**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**दित्यागन्तून् रमयति जनो यत्र बन्धूनभिज्ञः ॥३४॥**

**अन्वयः**- अत्र वत्सराजः प्रद्योतस्य प्रियदुहितरं जह्रे अत्र तस्यैव राज्ञः हैमं तालद्रुमवनम् अभूत्। अत्र नलगिरिः दर्पात् स्तम्भम् उत्पाट्य उद्भ्रान्तः किल'' इति अभिज्ञो जनः आगन्तून् बन्धून् यत्र रमयति।

**व्याख्या - ( क ) पर्यायपदानि** - अत्र = इह, वत्सराजः = वत्सदेशाधिपः, प्रद्योतस्य = उज्जयिन्या राज्ञः, प्रियदुहितरं = प्रियपुत्रीं वासवदत्तां, जह्रे = अपहृतवान्, अत्र = अस्मिन्नेव स्थाने, तस्यैव = नृपस्य एव, हैमं = सुवर्णमयं, तालद्रुमवनं = तालवृक्षोपवनम्, अभूत् = आसीत्, अत्र = अस्मिन् स्थाने, नलगिरिः = नलगिर्याभिधानः, किल = निश्चयेन, दर्पात् = मदात्, स्तम्भम् = आलानम्, उत्पाट्य = उद्धृत्य, उद्भ्रान्तः = अभ्रमत्, इति = एवं विधाभिः, अभिज्ञः = कथातत्त्वज्ञः, जनः = पुरुषः, आगन्तून् = प्रदेशान्तरादागतान्, बन्धून् = बान्धवान्, रमयति = विनोदयति।

**( ख ) भावार्थः** - हे मेघ ! अत्रोज्जयिन्यां वत्सराजेन प्रद्योतस्य प्रियपुत्री अपहृता। अत्रैव प्रद्योतस्य सुवर्णमयं तालवृक्षोपवनमासीत्। अस्यामेव नगर्यां नलगिरिः नामकः राज्ञः गजः मददर्पात् स्तम्भमुत्पाट्य भ्रमति स्म। एभिरुपारख्यानैरुज्जयिनी वास्तव्यो जनः देशान्तरादागतानां प्रियजनानां मनांसि रञ्जयति।

**छन्दः** - मन्दाक्रान्ता। तल्लक्षणं पूर्ववदेव।

**अलङ्कारः** - भाविकालङ्कारः। लक्षणम् -

अतीतानागते यत्र प्रत्यक्षत्वेन लक्षिते।
अत्यभ्दुतार्थ कथनाद् भाविकं तदुदाहृतम्॥

**विशेषांशः** - वत्सराजोऽत्र - वत्सराजः+अत्र (पूर्वरूप)। दर्पादित्यागन्तून् - दर्पादिति+आगन्तून् (यण् सन्धिः)। प्रियदुहितरम् - प्रिया चासौ दुहिता, ताम् (कर्मधारयः)। उत्पाट्य - उत्+पट्+णिच्। उदभ्रान्तः - उत्+भ्रम+क्त।

'दर्पोऽवलेपोऽहङ्कारः' इत्यमरः। 'प्रवीणे निपुणाभिज्ञविज्ञाननिष्णातशिक्षिताः' इत्यमरः।

## श्लोकः ३५

**प्रसङ्गः** - उज्जयिन्याः अश्वाः सूर्याश्ववत्, गजाः शैलसदृशाः विशालाः योद्धाश्च श्रेष्ठाः सन्तीति वर्ण्यते यक्षमुखात् कालिदासेन -

**पत्रश्यामा दिनकरहयस्पर्धिनो यत्र वाहाः**
**शैलोदग्रास्त्वमिव करिणो वृष्टिमन्तः प्रभेदाद्।**
**योधाग्रण्यः प्रतिदशमुखं संयुगे तस्थिवांसः**
**प्रत्यादिष्टाभरणरुचयश्चन्द्रहासव्रणाङ्कैः ॥३५॥**

**अन्वयः** - यत्र वाहाः पत्रश्यामाः दिनकरहयस्पर्धिनः, शैलोदग्राः करिणः प्रभेदात् त्वमिव वृष्टिमन्तः, योधाग्रण्यः संयुगे प्रतिदशमुखं तस्थिवांसः चन्द्रहासव्रणाङ्कैः प्रत्यादिष्टाभरणरुचयः।

**व्याख्या - ( क ) पर्यायपदानि** - यत्र = उज्जयिन्यां, वाहाः = अश्वाः, पत्रश्यामाः = पर्णवत्हरिताः, दिनकरहयस्पर्धिनः = सूर्याश्वप्रतिद्वन्द्विनः, वर्णतो वेगतश्च, करिणः = गजाः, शैलोदग्राः = पर्वतसमोन्नताः, प्रभेदात् = मदजलस्रवणाद्धेतोः, त्वमिव = मेघ इव, वृष्टिमन्तः = वर्षणशीलाः, योधाग्रण्यः = भटश्रेष्ठाः, संयुगे = युद्धे, प्रतिदशमुखं = रावणं सम्मुखं, तस्थिवांसः = तस्थुः, अत एव, चन्द्रहासवर्णाङ्कैः = रावणखड्गक्षतचिह्नैः, प्रत्यादिष्टाभरणरुचयः = प्रत्याख्यातालङ्कारद्युतयः।

**( ख ) भावार्थः** - यत्र उज्जयिन्यां सूर्याश्वसदृशाः हरितवर्णाः अश्वाः सन्ति गजाः पर्वतसदृशोन्नताः मदजलप्रवाहकारणात् भवत्सदृश वर्षणशीलाः श्रेष्ठभटाः युद्धे अभिरावणं स्थितवन्तः तथा



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

रावणस्यखड्गप्रहारक्षतचिह्नैः त्यक्तभूषणेच्छाः सन्ति।

**छन्दः** – मन्दाक्रान्ता। तल्लक्षणं पूर्ववदेव।

**अलङ्कारः** – भाविक अलङ्कारः।

**विशेषांशः** – दिनकरहयस्पर्धिनः – दिनं करोतीति दिनकरः, तस्य हयाः (ष०तत्पु०), तैः स्पर्धन्ते तच्छीलाः। चन्द्रहासव्रणाङ्कैः – चन्द्रहासस्य व्रणानि (ष०तत्पु०) तान्येव अङ्कास्तैः।

'वाजिवाहाऽर्वगन्धर्वहयसैन्धवसप्तयः' इत्यमरः। 'खड्गेनिस्त्रिंशः चन्द्रहासाऽसिरिष्टयः' इत्यमरः।

## श्लोकः ३६

**प्रसङ्गः** – यक्षः मेघं निवेदयति यत् उज्जयिन्याः प्रसादेषु सुन्दरीणां रागाङ्कितां पदशोभां विलोक्य श्रमं दूरीकरोतु –

**जालोद्गीर्णैरुपचितवपुः केशसंस्कारधूपै-**
**र्बन्धुप्रीत्या भवनशिखिभिर्दत्तनृत्योपहारः।**
**हर्म्येष्वस्याः कुसुमसुरभिष्वध्वखेदं नयेथाः**
**लक्ष्मीं पश्यंल्ललितवनितापादरागाङ्कितेषु॥ ३६॥**

**अन्वयः**– जालोद्गीर्णैः केशसंस्कारधूपैः उपचितवपुः, बन्धुप्रीत्या भवन शिखिभिः दत्तनृत्योपहारः, कुसुम– सुरभिषु ललितवनितापादरागाङ्कितेषु हर्म्येषु अस्याः लक्ष्मीं पश्यन् अध्वखेदं नयेथाः।

**व्याख्या – (क) पर्यायपदानि** – (हे मेघ!) जालोद्गीर्णैः = गवाक्षनिर्गतैः, केशसंस्कारधूपैः = बालप्रसाधनकसुगन्धिद्रव्यैः, उपचितवपुः = परिपुष्टतनुः, बन्धुप्रीत्या = बान्धवस्नेहेन, भवनशिखिभिः = पालितमयूरैः, दत्तनृत्योपहारः = प्रदत्तनृत्योपायनः, कुसुमसुरभिषु = पुष्पसुगन्धिषु, ललितवनितापादरागाङ्कितेषु = रम्यस्त्रीपादरञ्जन–द्रव्यचिह्नितेषु, हर्म्येषु = भवनेषु, अस्याः = उज्जयिन्याः, लक्ष्मीं = शोभां, पश्यन् = अवलोकयन्, अध्वखेदं = मार्गव्यथां, नयेथाः = अपनय।

**(ख) भावार्थः** – हे मेघ! वातायनभागैः निर्गतैः केशसंस्कृतिगन्धद्रव्यैः परिपुष्टवपुः मित्रस्नेहेन च भवनपालितमयूरैः नृत्यरूपम् उपायनं प्राप्तस्त्वं पुष्पसुरभिषु प्रमदालाक्षारसचिह्नितेषु धनिकभवनेषु उज्जयिन्याः शोभां विलोक्य मार्गव्यथामपनय।

**छन्दः** – मन्दाक्रान्ता। तल्लक्षणं पूर्ववदेव।

**अलङ्कारः** – उदात्त अलङ्कारः।

**विशेषांशः** – जालोद्गीर्णैरुपचितवपुः – जालोद्गीर्णैः+उपचितवपुः (विसर्गसन्धिः)। दत्तनृत्योपहारः – दत्तनृत्य+उपहारः (गुणसन्धिः)। कुसुमसुरभिष्वध्वखेदम् – कुसुमसुरभिषु+अध्वखेदम् (यण्सन्धिः)।

जालोद्गीर्णैः – जालेभ्यः उद्गीर्णाः तैः (पंचमी तत्पु.), उपचितवपुः– उपचितः वपुर्यस्यासौ (बहुव्रीहिः)। दत्तनृत्योपहारः – दत्तः नृत्यमेवोपहारः यस्मै सः (बहुव्रीहिः)। अध्वखेदम् – अध्वनि खेदः इति अध्वखेदः तम् (सप्तमी तत्पु०)।

'ताण्डवं नटनं नाट्यं लास्यं नृत्यं च नर्तने' इत्यमरः। 'उपायनमुपग्राह्यमुपहारस्तथोपदा' इत्यमरः। 'अयनं वर्त्ममार्गाऽध्वपन्थानः पदवीसृति' इत्यमरः।

## श्लोकः ३७

**प्रसङ्गः** – महाकविस्तत्रश्रीमान् कालिदासः यक्षमुखात् मेघं गन्धवती नदीमुत्तीर्य तत्तटे विद्यमानं द्वादशज्योतिर्लिङ्गान्यतमं महाकालं प्राप्तुं निर्दिशति –



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**भर्तुः कण्ठच्छविरिति गणैः सादरं वीक्ष्यमाणः**
**पुण्यं यायास्त्रिभुवनगुरोर्धाम चण्डीश्वरस्य।**
**धूतोद्यानं कुवलयरजोगन्धिभिर्गन्धवत्या-**
**स्तोयक्रीडानिरतयुवतिस्नानतिक्तैर्मरुद्भिः ॥३७॥**

**अन्वयः** - भर्तुः कण्ठच्छविः इति गणैः सादरं वीक्ष्यमाणः कुवलयरजोगन्धिभिः तोयक्रीडानिरतयुवति-स्नानतिक्तैः गन्धवत्याः मरुद्भिः धूतोद्यानं त्रिभुवनगुरोः चण्डीश्वरस्य पुण्यं धाम यायाः।

**व्याख्या - ( क ) पर्यायपदानि** - (हे मेघ!) भर्तुः = स्वामिनः, कण्ठच्छविः = गलद्युतिः, इति = अस्मात् कारणात्, गणैः = प्रथमादिभिः, सादरं = सम्मानसहितं, वीक्ष्यमाणः = दृश्यमानः, कुवलयरजोगन्धिभिः = कमलपरागसुरभितैः, गन्धवत्याः = गन्धवतीनामिकायाः, मरुद्भिः = पवनैः, धूतोद्यानं = कम्पिताऽरामं, त्रिभुवनगुरोः = त्रिलोकश्रेष्ठस्य, चण्डीश्वरस्य = महाकालस्वामिनः, शङ्करस्य, पुण्यं = पवित्रं, धाम = स्थानं महाकालाख्यं, यायाः = गच्छे।

**( ख ) भावार्थः** - हे मेघ! नीलकण्ठसमद्युतिमन्तं त्वां मेघं शिवगणाः उज्जयिन्यां सादरं द्रक्ष्यन्ति। त्वञ्च तत्र कमलकिञ्जल्कसुगन्धियुक्तैः जलक्रीडासक्तानां युवतीनां चन्दनादिगन्धद्रव्येण सुगन्धिभिः गन्धवत्या नद्याः वातैः कम्पितोद्यानं महाकालेश्वरस्य पावनस्थलं गच्छ।

**छन्दः** - मन्दाक्रान्ता। तल्लक्षणं पूर्ववदेव।

**अलङ्कारः** - प्रतीपः उदात्तश्च।

**विशेषांशः** - कण्ठच्छविरिति - कण्ठ+छविः (हल्सन्धिः)+इति (विसर्गसन्धिः)। चण्डीश्वरस्य - चण्डी+ईश्वरस्य (दीर्घ०) धूतोद्यानम् - धूत+उद्यानम् (गुणसन्धि)।

कण्ठच्छविः - कण्ठस्य छविः (ष०तत्पु०)। कुवलयरजोगन्धिभिः - कुवलयानां रजः तस्य गन्धः (ष०तत्पु०) तदस्ति येषां तैः। तोयक्रीडानिरतयुवतिस्नानतिक्तैः - तोयेषु क्रियमाणा क्रीडा, तोयक्रीडा तोयक्रीडासु निरताः तोय क्रीडानिरताः (स०तत्पु०) तोयक्रीडानिरताः युवतयः (कर्मधारयः)। स्नानैः तिक्तानि स्नानतिक्तानि (तृ०तत्पु०) तैः।

## श्लोकः ३८

**प्रसङ्गः** - महाकालमन्दिरे सूर्यास्तपर्यन्तं स्थित्वा सायंकालीन पूजादर्शनेन शिवपूजायाः फलं प्राप्नोतु इति निर्दिशति यक्षः -

**अप्यन्यस्मिस्मिञ्जलधर! महाकालमासाद्य काले**
**स्थातव्यं ते नयनविषयं यावदत्येति भानुः।**
**कुर्वन्सन्ध्याबलिपटहतां शूलिनः श्लाघनीया-**
**मामन्द्राणां फलमविकलं लप्स्यसे गर्जितानाम्॥ ३८॥**

**अन्वयः** - हे जलधर! अन्यस्मिन् अपि काले महाकालम् आसाद्य यावत् भानुः नयनविषयम् अत्येति (तावत्) ते स्थातव्यम्। शूलिनः श्लाघनीयां सन्ध्याबलिपटहतां कुर्वन् आमन्द्राणां गर्जितानाम् अविकलं फलं लप्स्यसे।

**व्याख्या - ( क ) पर्यायपदानि** - हे जलधर! = हे पयोद!, अन्यस्मिन् = संन्ध्यातिरिक्ते, अपि काले = अपि समये, महाकालं = चण्डीश्वरस्थलम्, आसाद्य = प्राप्य, ते = त्वया, स्थातव्यं = स्थानीयं, यावत् = यावत्कालपर्यन्तं,



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

भानुः = रविः, नयनविषयं = दृष्टिगोचरताम्, अत्येति = अतिक्रामति, शूलिनः = शिवस्य, श्लाघनीयां = प्रशंसनीयां, सन्ध्याबलिपटहतां = सायंकालीन पूजायां पटहध्वनिहतां, कुर्वन् = सम्पादयन्, आमन्द्राणाम् = ईषद्गम्भीराणां, गर्जितानां = गर्जनानाम्, अविकलं = अखण्डं, फलं = पुण्यं, लप्स्यसे = प्राप्स्यसि।

**( ख ) भावार्थः** – हे मेघ! सन्ध्यातिरिक्तेऽपि महाकालमन्दिरं सम्प्राप्य त्वं सूर्यास्तं यावत् तिष्ठ। सन्ध्यायां महाकालस्यारार्तिक्यकाले ईषद्गम्भीरं गर्जनं कुर्वाणस्त्वं पटहभावं सम्प्राप्य गर्जनानां सकलं पुण्यं लप्स्यसे।

**छन्दः** – मन्दाक्रान्ता। तल्लक्षणं पूर्ववदेव।

**अलङ्कारः** – काव्यलिङ्गम् अलङ्कारः।

**विशेषांशः** – अप्यन्यस्मिन् – अपि+अन्यस्मिन्, (यण्), अत्येति – अति+एति (यण् सन्धिः)।

नयनविषयम् – नयनयोः विषयः तम् (ष०तत्पु०)। सन्ध्याबलिपटहतां– सन्ध्यायां बलिः सन्ध्याबलि (स०तत्पु०)सन्ध्याबलिपटहता, ताम् (स०तत्पु०), अविकलम् – विगताः कलाः यस्मात् तत् विकलम्, न विकलमिति अविकलम् (नञ् समासः)।

'यावत्ताच्चसाकल्येऽवधौमानेऽवधारणे' इत्यमरः। 'शिवः शूली महेश्वरः' इत्यमरः।

## श्लोकः ३९

**प्रसङ्गः** – महाकविकालिदासः यक्षमुखात् कथयति यत् – हे मेघ! पूजाफलं प्राप्यस्त्वं महाकालमन्दिरे नृत्यरतानां वेश्यानां कटाक्षपातस्यानन्दमपि लप्स्यसे।

**पादन्यासैः क्वणितरशनास्तत्र लीलावधूतैः**
**रत्नच्छायाखचितवलिभिश्चामरैः क्लान्तहस्ताः।**
**वेश्यास्त्वत्तो नखपदसुखान् प्राप्य वर्षाग्रबिन्दू-**
**नामोक्ष्यन्ते त्वयि मधुकरश्रेणिदीर्घान्कटाक्षान्॥ ३९॥**

**अन्वयः**– तत्र पादन्यासैः क्वणितरशनाः लीलावधूतैः रत्नच्छायाखचितवलिभिः चामरैः क्लान्तहस्ताः वेश्याः त्वत्तः नखपदसुखान् वर्षाऽग्रबिन्दून् प्राप्य त्वयि मधुकरश्रेणिदीर्घान् कटाक्षान् आमोक्ष्यन्ते।

**व्याख्या – ( क ) पर्यायपदानि** – तत्र = महाकालमन्दिरे सन्ध्यापूजनसमये, पादन्यासैः = चरणविन्यासैः, क्वणितरशनाः = ध्वनितमेखलाः, लीलाऽवधूतैः = विलासचालितैः, रत्नच्छायाखचितवलिभिः = मणिकान्तिरुषितदण्डैः, चामरैः = प्रकीर्णकैः, वालव्यजनै, क्लान्तहस्ताः = खिन्नकराः, वेश्याः = वाराङ्गना, त्वत्तः = भवतः, नखपदसुखान् = नखक्षतसुखदायकान्, वर्षाऽग्रबिन्दून् = वर्षणाभिनवलवान्, प्राप्य = अवाप्य, त्वयि = मेघोपरि, मधुकरश्रेणिदीर्घान्= भ्रमरपङ्क्तिलम्बान्, कटाक्षान् = अपाङ्गान्, आमोक्ष्यन्ते = परित्यक्ष्यन्ति।

**( ख ) भावार्थः** – हे मेघ! तत्र महाकालमन्दिरे सन्ध्यार्चनावसरे नृत्यन्ती गणिका भवतो मेघात् नखक्षतस्थानेषु सुखोत्पादकान् वृष्टेः प्रथमकणाननुभूय भ्रमरावलिसमाः कटाक्षा आमोक्ष्यन्ते।

**छन्दः** – मन्दाक्रान्ता। तल्लक्षणं पूर्ववदेव।

**अलङ्कारः** – लुप्तोमपालङ्कारः।

**विशेषांशः** – रशनास्तत्र = रशनाः+तत्र (विसर्गसन्धिः), वर्षाग्रबिन्दून् – वर्षा+अग्रबिन्दून् (दीर्घसन्धिः)।

पादन्यासैः – पादानां न्यासः तैः (ष०तत्पु०)। क्वणितरशनाः – क्वणिताः रशनाः यासां, ताः (बहुव्रीहि)। रत्नच्छायाखचितवलिभिः – रत्नानां छाया, रत्नछाया (षष्ठी तत्पु०) रत्नच्छायया खचिताः वलयः येषां तैः (बहु०)। क्लान्तहस्ताः – क्लान्ताः हस्ताः यासां, ताः (बहु०)। नखपदसुखान् – नखपदेषु सुखान् (स०तत्पु०), वर्षाग्रबिन्दून्



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

– अग्राश्च बिन्दवः अग्रबिन्दवः (कर्म०) वर्षाया: अग्रबिन्दवः तान् (ष०तत्पु०)।

'पृषन्ति बिन्दु तृषतः पुमांसो विप्रुषः स्त्रियाम्' इत्यमरः।

## श्लोकः ४०

**प्रसङ्गः** – महाकविकालिदासः यक्षमुखात् उपदिशति यत् – हे मेघ! सन्ध्यार्चनानन्तरं ताण्डवनृत्यकाले शिवस्य रक्तरञ्जितस्य धर्मणाच्छादितौ भुजौ आच्छादयतु –

**पश्चादुच्चैर्भुजतरुवनं मण्डलेनाभिलीनः**
**सान्ध्यं तेजः प्रतिनवजपापुष्परक्तं दधानः।**
**नृत्यारम्भे हर पशुपतेरार्द्रनागाजिनेच्छां**
**शान्तोद्वेगस्तिमितनयनं दृष्टभक्तिर्भवान्याः ॥४०॥**

**अन्वयः**– पश्चात् पशुपतेः नृत्यारम्भे प्रतिनवजपापुष्परक्तं सान्ध्यं तेजः दधानः उच्चैः भुजतरुवनं मण्डलेन अभिलीनः भवान्याः शान्तोद्वेगस्तिमितनयनं दृष्टभक्तिः (त्वम्) आर्द्रनागाजिनेच्छां हर।

**व्याख्या – (क) पर्यायपदानि** – पश्चात् = सन्ध्यार्चनानन्तरं, नृत्यारम्भे = ताण्डवनृत्यारम्भे, पशुपतेः = शिवस्य, प्रतिनवजपापुष्परक्तम् = अभिनवजपाकुसुमारुणं, सान्ध्यं = सन्ध्याकालिकं, तेजः = प्रकाशं, दधानः = धारयन्, उच्चैः भुजतरुवनम् = उन्नतबाहुवृक्षारण्यं, मण्डलेन = मण्डलाकारेण, अभिलीनः = अभिव्याप्तः, भवान्या = शिवपत्न्या, पार्वत्या, शान्तोद्वेगस्तिमितनयनम् = अपगतभयनिश्चलनेत्रम्, आर्द्रनागाजिनेच्छां = रक्तक्लिन्नगजचर्मवाञ्छां, हर = अपनय।

**(ख) भावार्थः**– हे मेघ! सन्ध्यावन्दनान्तरं शिवताण्डवावसरे सायङ्कालिकं अरुणं तेजो धारयन् शिवस्योन्नतं बाहुवृक्षवनं मण्डलाकारेण व्याप्य नटराजस्य शोणितक्लिन्नगजचर्माऽभिलाषं निवर्तय, तस्मिन्नवसरे पार्वत्या अपगतभयस्तिमितलोचनाभ्यां शिवपूजकस्त्वं द्रक्ष्यसे।

**छन्दः** – मन्दाक्रान्ता। तल्लक्षणं पूर्ववदेव।

**अलङ्कारः** – उपमा, रूपकं, निदर्शना च अलङ्काराः।

**विशेषांशः** – उच्चैर्भुजतरुवनम् – उच्चैः+भुजतरुवनम् (विसर्ग सन्धिः), मण्डलेनाभिलीनः – मण्डलेन+अभिलीनः (दीर्घ०), शान्तोद्वेगस्तिमितनयनम् – शान्त+उद्वेगस्तिमितनयनम् (गुण०), भुजतरुवनम् – भुजतरूणां वनम् (ष०तत्पु०), नृत्यारम्भे – नृत्यस्य आरम्भे (ष०तत्पु०), आर्द्रनागाजिनेच्छाम् – आर्द्रं नागाजिनम् (कर्मधा०) आर्द्रनागाजिने इच्छा ताम् (स०तत्पु०), दृष्टभक्तिः – दृष्टा भक्तिः यस्य सः (बहुव्रीहि), 'नाटयं नृत्यञ्च नर्तने' इत्यमरः। 'प्रत्यग्रोऽभिनवो नव्यः' इत्यमरः।

## श्लोकः ४१

**प्रसङ्गः** – हे मेघ! उज्जयिन्यां प्रियनिवासस्थानं प्रति गच्छन्तीनाम् अभिसागरिकाणां मार्गदर्शनं करोतु इति निवेदयति यक्षः –

**गच्छन्तीनां रमणवसतिं योषितां तत्र नक्तं**
**रुद्धालोके नरपतिपथे सूचिभेद्यैस्तमोभिः।**
**सौदामन्या कनकनिकषस्निग्धया दर्शयोर्वीं**
**तोयोत्सर्गस्तनितमुखरो मा स्म भूर्विक्लवास्ताः ॥४१॥**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**अन्वयः** – तत्र नक्तं रमणवसतिं गच्छन्तीनां योषितां सूचिभेद्यैः तमोभिः रुद्धालोके नरपतिपथे कनकनिकषस्निग्धया सौदामन्या उर्वीं दर्शय। (किञ्च) तोयोत्सर्गस्तनितमुखरः मा स्म भूः, ताः विक्लवाः (भवन्ति)।

**व्याख्या – (क) पर्यायपदानि** – तत्र = तस्यामुज्जयिन्यां, नक्तं = निशायां, रमणवसतिं = प्रियवल्लभभवनं, गच्छन्तीनां = व्रजन्तीनां, योषिताम् = अभिसारिकाणां, सूचिभेद्यैः = सूचिभेदनीयैः, तमोभिः = अन्धकारैः, रुद्धालोके = आवृत्तदृष्टिप्रसारे, नरपतिपथे = राजमार्गे, कनकनिकषस्निग्धया = स्वर्णशाणरेखातेजसा, सौदामन्या = कनकलतया, उर्वीं = पृथ्वीं, दर्शय = प्रदर्शय, तोयोत्सर्गस्तनितमुखरः = वर्षगर्जितशब्दायमानः, मा स्म भूः = न हि भवतु, यतोहि, ताः = अभिसारिकाः, विक्लवाः = स्वभावतः भयकातराः भवन्ति।

**(ख) भावार्थः** – हे मेघ! रात्रौ उज्जयिन्यां कामिभवनगच्छन्तीनामभिसारिकाणां निविडतरैरन्धकारैः राजपथे दृष्टिनिक्षेपरहिते सति त्वं तडित्प्रकाशेन मार्गं दर्शय, परन्तु वर्षस्तनिते न कार्यत्वया यतः ताः स्वभावतः भयकातराः भवन्ति।

**छन्दः** – मन्दाक्रान्ता।

**अलङ्कारः** – काव्यलिङ्गसंसृष्टि–अलङ्कारश्च।

**विशेषांशः** – रुद्धालोके – रुद्ध+आलोके (दीर्घ०) दर्शयोर्वीम् – दर्शय+उर्वीम् (गुण०) तोयोत्सर्ग – तोय+उत्सर्ग (गुण०) भूविक्लावास्ताः – भूः+विक्लवाः+ताः (विसर्ग)। रमणवसितम् – रमणानां वसतिम् (ष०तत्पु०), रुद्धालोके – रुद्धः आलोकः यस्मिन् तस्मिन् (बहुव्रीहिः)। नरपतिपथे – नराणां पतिः नरपति (ष०तत्पु०) नरपतेः पन्थाः तस्मिन् (ष०तत्पु०)। 'दोषा च नक्तञ्च रजनाविति' इत्यमरः। 'आलोको दर्शनोद्योतौ' इत्यमरः। 'सर्वंसहा वसुमती वसुधोर्वी वसुन्धरा' इत्यमरः।

## श्लोकः ४२

**प्रसङ्गः** – यक्षः मेघं निवेदयति यत् उज्जयिन्यामेव कस्मिश्चिंत् विशालभवने रात्रिं व्यतीत्य सूर्योदयपूर्वमेव स्वमार्गप्रत्यभिमुखं भवतु –

**तां कस्याञ्चिद्भवनवलभौ सुप्तपारावतायां,**
**नीत्वा रात्रिं चिरविलसनात्खिन्नविद्युत्कलत्रः।**
**दृष्टे सूर्ये पुनरपि भवान् वाहयेदध्वशेषं,**
**मन्दायन्ते न खलु सुहृदामभ्युपेतार्थकृत्याः॥४२॥**

**अन्वयः** – चिरविलसनात् खिन्नविद्युतत्कलत्रः भवान् सुप्तपारावतायां कस्याञ्चिद् भवनवलभौ तां रात्रिं नीत्वा सूर्ये दृष्टे पुनः अपि अध्वशेषं वाहयेत्। सुहृदाम् अभ्युपेतार्थकृत्याः खलु न मन्दायन्ते।

**व्याख्या – (क) पर्यायपदानि** – (हे मेघ!) चिरविलसनात् = चिरविलासाद्, खिन्नविद्युत्कलत्रः = परिक्लान्तचपलाभार्यः, भवान् = मेघः, सुप्तपारावतायां = शयितकपोतायां, कस्याञ्चित् = कस्यामपि, भवनवलभौ = गृहाच्छादने, तां, रात्रिं = तां यामिनीं, नीत्वा = यापयित्वा, सूर्ये = भानौ, दृष्टे = अवलोकिते, पुनः अपि = भूयोऽपि, अध्वशेषं = मार्गवशेषं, वाहयेत् = गच्छेत्। यतः, सुहृदां = मित्राणाम्, अभ्युपेतार्थकृत्याः = स्वायत्तीकृतप्रयोजनकार्याः, न = नहि, खलु = निश्चयेन, मन्दायन्ते = शिथिलीभवन्ति।

**(ख) भावार्थः** – हे मेघ! बहुकालस्फुरणात् क्लान्तविद्युत्पत्नीको भवान् सुप्तकपोतायां कस्याञ्चित् गृहाट्टालिकायां तां निशां व्यतीय सूर्ये उदिते सति पुनरपि मार्गावशिष्टभागं पूरयतु यतो हि मित्राणाम् अङ्गीकृतप्रयोजनकार्याः जनाः निश्चयेन विलम्बिताः न भवन्ति।

**छन्दः** – मन्दाक्रान्ता। तल्लक्षणं पूर्ववदेव।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**अलङ्कारः** – रुपकम् अर्थान्तरन्यासश्च।

**विशेषांशः** – पुनरपि – पुनः+अपि (विसर्ग०), भवनवलभौ – भवनस्य वलभिः, तस्यां (ष०तत्पु०), चिरविलसनात् – चिरविलसनात् – चिरं विलसनं, तस्मात् (केवलसमास)। खिन्नविद्युत्कलत्रः – खिन्नं विद्युत् एव कलत्रं यस्य सः (बहुव्रीहिः)।'कलत्रं श्रोणिभार्ययो' इत्यमरः।'पारावतः कलरवः कपोतः' इत्यमरः।'चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः' इत्यमरः।

## श्लोकः ४३

**प्रसङ्गः** – यक्ष मेघं निर्दिशति यत् प्रातःकाले सूर्यस्य मार्गम् अवरोधयतु, यतोहि सः नलिनीमुखात् तुषारकणान् परिमार्क्ष्यति –

**तस्मिन्काले नयनसलिलं योषितां खण्डितानां**
**शान्तिं नेयं प्रणयिभिरतो वर्त्म भानोस्त्यजाशु।**
**प्रालेयास्रं कमलवदनात्सोऽपि हर्तुं नलिन्याः**
**प्रत्यावृत्तस्त्वयि कररुधि स्यादनल्पाभ्यसूयः॥४३॥**

**अन्वयः** – तस्मिन् काले प्रणयिभिः खण्डितानां योषितां नयनसलिलं शान्तिं नेयम्, अतः भानोः वर्त्म आशु त्यज। सः अपि नलिन्याः कमलवदनात् प्रालेयास्रं हर्तुं प्रत्यावृत्तः (सन्) त्वयि कररुधि अनल्पाभ्यसूयः स्यात्।

**व्याख्या – (क) पर्यायपदानि** – तस्मिन् काले = प्रातः काले, प्रणयिभिः = प्रियतमैः, खण्डितानाम् = एदत्संज्ञकानां नायिकानां, नयनसलिलं = नेत्रजलं, शान्तिं = शमं, नेयं = नेतव्यम्, अतः = अस्माद्धेतोः, भानोः = सूर्यस्य, वर्त्म = मार्गम्, आशु = शीघ्रं, त्यज = मुञ्च, अन्यथा, सःअपि = सूर्योऽपि, नलिन्याः = कमलिन्याः, कमलवदनात् = सरोजमुखात्, प्रालेयस्रं = तुषाररूपमश्रुं, हर्तुं = शमयितुं, प्रत्यावृत्तः = प्रत्यागतः, त्वयि = भवति, किरणरुधि = अंशुरोधके, अनल्पाभ्यसूयः = अत्यधिकविद्वेषः, स्यात् = भवेत्।

**(ख) भावार्थः**– हे मेघ! प्रातःकाले प्रियतमैः खण्डितानायिकानाम् अश्रुशमं नेतव्यम्। अस्माद्धेतोः सूर्यस्य मार्गं शीघ्रं मुञ्च, कमलिन्याः पद्मपुष्पमुखात् हिमाश्रु शमयितुं प्रत्यागतः सः भानुरपि त्वयि किरणरोधके सति अत्यधिकं विद्विषेत्।

**छन्दः** – मन्दाक्रान्ता। तल्लक्षणं पूर्ववदेव।

**अलङ्कारः** – काव्यलिङ्गं समासोक्तिः श्लेषाश्च।

**विशेषांशः** – भानोस्त्यजाशु – भानोः+त्यज (विसर्ग०)+आशु (दीर्घ०), सोऽपि – सः+अपि (पूर्वरूप), अनल्पाभ्यसूयः – अनल्प+अभि(दीर्घ०)+असूय (यण् सन्धिः)

नयनसलिलम् – नयनयोः सलिलम् (ष०तत्पु०)। प्रालेयास्रम् – प्रालेयम् एवास्रम् (कर्मधा०)। अनल्पाभ्यसूयः– न अल्पा इत्यनल्पा (नञ् तत्पु०), अनल्पा अभ्यसूया यस्य सः (बहुव्रीहिः)।

'अयनं वर्त्म मार्गाध्व पन्थानं पदवी सृतिः' इत्यमरः।'सलिलं कमलं जलम्' इत्यमरः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## अभ्यास-प्रश्नाः

### ( क ) वस्तुनिष्ठप्रश्नाः -

**निर्देशः** - निम्नाङ्कितप्रश्नेषु उचितविकल्पस्य वर्णाङ्कं कोष्ठके चिनुत -

१. लोलापाङ्गैर्यदि न रमसे लोचनैर्वञ्चितोऽसि -
(क) पौराङ्गनानाम् (ख) दशपुरवधूनाम्
(ग) देवाङ्गनानाम् (घ) पुष्पलावीमुखानाम् ( )

२. श्रीविशाला विशाला पुरी वर्तते -
(क) अलकापुरी (ख) विदिशा
(ग) उज्जयिनी (घ) दशार्णाः ( )

३. वत्सराजः कस्य प्रियदुहितरं जह्रे -
(क) प्रद्योतस्य (ख) रन्तिदेवस्य
(ग) नलगिरेः (घ) शार्ङ्गिणः ( )

४. त्रिभुवनगुरोः चण्डीश्वरस्य धामास्ति -
(क) ब्रह्मावर्तसंज्ञकम् (ख) महाकालसंज्ञकम्
(ग) दशपुरसंज्ञकम् (घ) कुरुक्षेत्रसंज्ञकम् ( )

५. अभ्युपेतार्थकृत्याः न मन्दायन्ते -
(क) सुहृदाम् (ख) स्त्रीणाम्
(ग) शत्रूणाम् (घ) महापुरुषाणाम् ( )

६. नलिन्याः कमलवदनात् प्रालेयास्रं हर्तुं प्रत्यावृत्तः -
(क) मेघः (ख) स्कन्दः
(ग) भानुः (घ) शिवः

### ( ख ) अतिलघूत्तरात्मकप्रश्नाः -

**निर्देशः** - निम्नाङ्कितप्रश्नानाम् एकपङ्क्तावेव उत्तराणि लेख्यानि -

१. प्रियेषु विभ्रमः कासामाद्यं प्रणयवचनमस्ति ?

२. उदयनकथाकोविदग्रामवृद्धाः कुत्र वसन्ति ?

३. विरहावस्थया का नाम सिन्धुः वेणीभूतप्रतनुसलिला जाता ?

४. मेघः कथम् आमन्द्राणां गर्जितानामविकलं फलं लप्स्यते ?

५. सलिलनिधयः कथं तोयमात्रावशेषाः ?

६. प्रियतम इव प्रार्थना चाटुकारः कः वर्तते ?

### ( ग ) लघूत्तरात्मकप्रश्नाः -

**निर्देशः** - निम्नाङ्कितप्रश्नानां पञ्चषा पङ्क्तिषु उत्तराणि लेख्यानि -

१. निर्विन्ध्यायाः किंविधं वैशिष्ट्यं मेघदूते प्रकटितम् ?



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

२. उज्जयिनीवर्णनं स्वशब्देषु प्रतिपादनीयम्।

३. शिप्रावातस्य वैशिष्ट्यं वर्णयत।

४. यक्षः मेघं शिवोपासनायाः कीदृक् फलं प्राप्तुं निर्दिशति?

५. उज्जयिन्यामभिसारिकाणां स्थितिं विवेचयत।

**( घ ) निबन्धात्मकाः प्रश्नाः –**

**निर्देशः** – निम्नाङ्कितश्लोकानां सप्रसङ्गं व्याख्या कार्या –

१. वक्रः पन्था .................................................... लोचनैर्वञ्चितोऽसि॥

२. दीर्घीकुर्वन् .................................................... प्रार्थना चाटुकारः॥

३. प्राप्यावन्तीन् ................................................ कान्तिमत्खण्डमेकम्॥

**निर्देशः – निम्नाङ्कितश्लोकानां भावार्थः संस्कृते लेखनीयः –**

१. वीचिक्षोभ ................................................ हि प्रियेषु॥

२. भर्तुः कण्ठ ....................................... विक्तैर्मरुद्भिः॥

३. तां कस्यां चिद् ....................................... मभ्युपेतार्थकृत्याः॥

४. प्रद्योतस्य ........................................... यत्र बन्धूनभिज्ञः॥

**निर्देशः – निम्नाङ्कितसूक्त्योः सप्रसङ्गं भावार्थः संस्कृते लेखनीयः –**

१. स्त्रीणामाद्यं प्रणयवचनं विभ्रमो हि प्रियेषु॥

२. मन्दायन्ते न खलु सुहृदामभ्युपेतार्थकृत्याः॥



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## ४. ब्रह्मावर्त-परिक्षेत्र-वर्णनम्

### श्लोकः ४४

**प्रसङ्गः** – श्लोकेऽस्मिन् महाकविकालिदासः यक्षमुखात् गम्भीराख्यायाः नद्याः नायिकारूपेण वर्णनं प्रस्तौति–

**गम्भीरायाः पयसि सरितश्चेतसीव प्रसन्ने**
**छायात्माऽपि प्रकृतिसुभगो लप्स्यते ते प्रवेशम्।**
**तस्मादस्याः कुमुदविशदान्यर्हसि त्वं न धैर्या–**
**न्मोघीकर्तुं चटुलशफरोद्वर्तनप्रेक्षितानि॥**
**४४॥**

**अन्वयः** – गम्भीरायाः सरितः चेतसि इव प्रसन्ने पयसि प्रकृतिसुभगः ते छायात्मा अपि प्रवेशं लप्स्यते। तस्मात् अस्याः कुमुदविशदानि चटुलशफरोद्वर्तनप्रेक्षितानि त्वं धैर्यात् मोघीकर्तुं न अर्हसि।

**व्याख्या – (क) पर्यायपदानि** – (हे मेघ!) गम्भीरायाः = गम्भीराख्यायाः, सरितः = नद्याः, उदात्तनायिकायाः, इति भावः, चेतसि = चित्ते, इव = यथा, प्रसन्ने = अतिनिर्मले, अनुरक्तत्वाद् दोषरहिते चेति भावः, पयसि = जले, प्रकृतिसुभगः = स्वभावेनैव सुन्दरः, ते = तव, छायात्मा = प्रतिबिम्बवपुः, अपि = च, प्रवेशं = निवेशं, लप्स्यते = प्राप्स्यति। तस्मात् = तस्मात् कारणात्, छायाद्वारापि, प्रवेशावश्यम्भावित्वात्, अस्याः = गम्भीरानद्याः, कुमुदविशदानि = कैरवधवलानि, चटुलशफरोद्वर्तनप्रेक्षितानि = चञ्चलमीनोल्लुण्ठनावलोकितानि, चटुलाः = चञ्चला, ये शफराः = मीनाः, तेषाम्, उद्वर्तनानि = धीरताकारणात्, मोघीकर्तुं = विफलीकर्तुं न अर्हसि = न शक्नोषि।

**(ख) भावार्थः** – हे मेघ! गम्भीरानाम्न्याः नद्या मानस इवाति निर्मले जलेऽनिच्छयापि स्वभावशरीरं तव बिम्बशरीरं प्रवेशं प्राप्स्यति, अस्मादेव कारणात् गम्भीरायाः कैरवधवलानि चञ्चलमीनोल्लुण्ठनावलोकितानि त्वं गाम्भीर्याद्विफलीकर्तुं योग्योऽसि।

**छन्दः** – श्लोकेऽस्मिन् मन्दाक्रान्ता छन्दः। तल्लक्षणं पूर्ववदेव।

**अलङ्कारः** – अत्र समासोक्तिरलङ्कारः। अपि च पयश्चेतसोः प्रेक्षितकुमुदानाञ्च मध्ये सादृश्यात् शाब्दी उपमा। गम्भीरायाः नायिका सह सादृश्यसम्बन्धात् एकदेशविवर्तिनी उपमा च। कुमुदविशदानि इत्यत्र लुप्तोपमा। उद्वर्तनेषु प्रेक्षितानामारोपात् रूपकालङ्कारः। एतेषामङ्गाङ्गिभावत्वात् सङ्करोऽलङ्कारोऽत्र।

**विशेषांशः** – कुमुदविशदान्यर्हसि – कुमुदविशदानि+अर्हसि (यण्सन्धिः), छायात्मा – छाया चासौ आत्मा च (कर्मधारयसमासः)। 'चित्तन्तु चेतो हृदयं स्वान्तो हृन्मानसं मनः' इत्यमरः। 'त्रिषु स्याच्चटुलं शीघ्रम्' इति विश्वः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## श्लोकः ४५

**प्रसङ्गः** – श्लोकेऽस्मिन् शृङ्गाररसिकः तत्रभवान् महाकविकालिदासः मेघः गाम्भीरा प्राप्य पुनः तां परित्यज्य गन्तुं सहसा समर्थो न भविष्यति इति यक्षमुखात् प्रेरयति –

**तस्याः किञ्चित्करधृतमिव प्राप्तवानीरशाखं**
**नीत्वा नीलं सलिलवसनं मुक्तरोधोनितम्बम्।**
**प्रस्थानं ते कथमपि सखे! लम्बमानस्य भावि**
**ज्ञातास्वादो विवृतजघनां को विहातुं समर्थः ॥ ४५ ॥**

**अन्वयः** – हे सखे! प्राप्तवानीरशाखं किञ्चित्करधृतम् इव मुक्तरोधोनितम्बं नीलं तस्याः सलिलवसनं नीत्वा लम्बमानस्य ते कथमपि प्रस्थानं भावि, ज्ञातास्वादः कः विवृतजघनां विहातुं समर्थः।

**व्याख्या ( क ) पर्यायपदानि** – हे सखे! = हे मित्र मेघ!, प्राप्तवानीरशाखं = गृहीतवेतसशाखम्, अत एव, किञ्चित् = ईषत्, करधृतं = हस्तगृहीतम्, इव = यथा मुक्तरोधोनितम्बं = परित्यक्ततटकटि, नीलं = नीलवर्णं, तस्याः = गम्भीरानद्याः, सलिलवसनं = जलवस्त्रं, नीत्वा = अपनीय, प्रस्थानसमये प्रेयसी पटग्रहणं विरहताप–विनोदार्थमिति प्रसिद्धं, लम्बमानस्य = जलभारावनतस्य, ते = तव मेघस्येति तात्पर्यं, प्रस्थानं = प्रयाणं, कथमपि = केनापि प्रकारेण, अति काठिन्येन, भावि = भविष्यति, यतोहि ज्ञातास्वादः = अनुभूतसम्भोगरसः, कः = पुरुषः, जनः, विवृतजघनां= प्रकटितकटिपूर्वभागाम् अथवा अनावृतजघनस्थलीं, रमणीं, विहातुं = परित्यक्तुं, समर्थः = सक्षमः, न कोऽपीति तात्पर्यम्।

**( ख ) भावार्थः**– यक्षः मेघं वदति यद् – हे मित्र मेघ! गम्भीरायाः नद्याः वेतसशाखाप्राप्ता ईषत्करधृतमिव त्यक्ततटरूपनितम्बं नीलवर्णं जलरूपवसनमपहृत्य तव प्रयाणं महत्कष्टजन्यं भविष्यति। यतः कामिनिसंभोगसुखानुभूतः एवं विधः कोऽपि जनः प्रकटितजघनां स्वप्रियां परित्यक्तुं समर्थो न भवति।

**छन्दः** – श्लोकेऽस्मिन् मन्दाक्रान्ता छन्दः। तल्लक्षणं पूर्ववदेव।

**अलङ्कारः** – करधृतमिव इत्यत्रोत्प्रेक्षाऽलङ्कारः। रोधसि नितम्बारोपात् सलिले वसनारोपाच्च रुपकम्। गम्भीरायां नद्यां नायिकायाः आर्थारोपादेकदेशविवर्तिरूपकम्। चतुर्थचरणेन त्रिपादानामर्थ समर्थनादर्थान्तरन्यासोऽप्यलङ्कारः। एतेषामलङ्कारामङ्गाङ्गिभावात् सङ्करोऽलङ्कारः।

**विशेषांशः** – मुक्तरोधोनितम्बम् – मुक्तरोधः + नितम्बम् (विसर्गसन्धि), ज्ञातास्वादः – ज्ञातः स्वादः येन सः (बहुव्रीहि समासः)। 'कूलं रोधश्च तीरश्च प्रतीरश्च तटं त्रिषु' इत्यमरः।

## श्लोकः ४६

**प्रसङ्गः** – श्लोकेऽस्मिन् कविकुलगुरुः तत्रभवान् महाकविकालिदासः देवगिरिगमनकाले शीतलावायुः मेघस्याधोभागे वास्यति, पृथिवी च सुगन्धिता स्यादित्यादि वर्ण्यतेऽत्र यक्षमुखात् –

**त्वन्निष्यन्दोच्छ्वसितवसुधागन्धसम्पर्करम्यः**
**स्रोतोरन्ध्रध्वनितसुभगं दन्तिभिः पीयमानः।**
**नीचैर्वास्यत्युपजिगमिषोर्देवपूर्वं गिरिं ते**
**शीतो वायुः परिणमयिता काननोदुम्बराणाम् ॥ ४६ ॥**

**अन्वयः**– त्वन्निष्यन्दोच्छ्वसितवसुधागन्धसम्पर्करम्यः स्रोतोरन्ध्रध्वनितसुभगं दन्तिभिः पीयमानः काननोदुम्बराणां परिणमयिता शीतः वायुः देवपूर्वं गिरिम् उपजिगमिषोः ते नीचैः वास्यति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**व्याख्या - (क) पर्यायपदानि** - हे मेघ! त्वन्निष्यन्दोच्छ्वसितवसुधागन्धसम्पर्करम्यः = त्वद्वृष्ट्युपबृंहित-भूमिगन्धसंर्गसुरभिः, स्रोतोरन्ध्रध्वनितसुभगं = नासाग्रकुहरशब्दमनोहरं, दन्तिभिः = हस्तिभिः, पीयमानः = आघ्रायमाणः, क्रियमाणपान इति भावः, काननोदुम्बराणां = वनजन्तुफलानां, परिणमयिता = परिपाकयिता, शीतः = शीतलः, वायुः = पवनः, देवपूर्वं = 'देव' शब्दपूर्वकं, गिरिं = पर्वतं, देवगिरिनामकम्, उपजिगमिषोः = उपयियासोः, ते = तव मेघस्य, नीचैः = शनैः, वास्यति = गमिष्यति त्वां बीजयिष्यतीत्यर्थः।

**(ख) भावार्थः** - हे मेघ! तव वृष्ट्या उपबृंहितायाः वसुधायाः सौरभसम्बन्धेन मनोहरः नासिकाग्रशब्दपूर्वकमाघ्रायमाणः आरण्यकजन्तुफलानां परिपाकयिता शीतलो वायुस्तव देवगिरिपर्वतमुपगन्तुमिच्छोः नीचैः वहन् त्वां बीजयिष्यति।

**छन्दः** - श्लोकेऽस्मिन् मन्दाक्रान्ता छन्दः। तल्लक्षणं पूर्ववदेव।

**अलङ्कारः** - अत्र स्वभावोक्तिरलङ्कारः वर्तते।

**विशेषांशः** - काननोदुम्बराणाम् - कानन+उदुम्बराणाम् (गुणसन्धिः)। देवपूर्वम् - देवः पूर्वो यस्मिन् तम् (बहुव्रीहिसमासः)। 'स्रोतोम्बुवेगेन्द्रिययोः'' इत्यमरः।

## श्लोकः ४७

**प्रसङ्गः** - श्लोकेऽस्मिन् महाकवि परमशैवस्तत्रभवान् श्रीमान् कालिदासः यक्षमुखात् देवगिरिपर्वतमधिष्ठातारं देवं शङ्करमूर्तिं शिवतनयं कार्तिकेयं प्रस्तौति -

**तत्र स्कन्दं नियतवसतिं पुष्पमेघीकृतात्मा**
**पुष्पासारैः स्नपयतु भवान्व्योमगङ्गाजलार्द्रैः।**
**रक्षाहेतोर्नवशशिभृता वासवीनां चमूना-**
**मत्यादित्यं हुतवहमुखे सम्भृतं तद्धि तेजः॥४७॥**

**अन्वयः** - तत्र नियतवसतिं स्कन्दं पुष्पमेघीकृतात्मा भवान् व्योमगङ्गाजलार्द्रैः पुष्पासारैः स्नपयतु। तत् हि वासवीनां चमूनां रक्षाहेतोः नवशशिभृता हुतवहमुखे सम्भृतम् अत्यादित्यं तेजः।

**व्याख्या - (क) पर्यायपदानि** - (हे मेघ!) तत्र = तस्मिन् देवगिरौ, नियतिवसतिं = नित्यसंनिहितं, स्कन्दं = कुमारं स्वामिनं, पुष्पमेघीकृतात्मा = कामरूपत्वात्, पुष्पवर्षकमेघीकृतविग्रहः, भवान् = त्वं मेघः, व्योमगङ्गाजलार्द्रैः = आकाशगङ्गाजलक्लिन्नैः, पुष्पासारैः = पुष्पसंपातैः, स्नपयतु = अभिषिञ्चतु। तत् हि = यतः सः स्कन्दः, भगवान् कार्तिकेयः, वासवीनां = ऐन्द्रीणाम् इन्द्रसम्बन्धिनीनां, चमूनां = सेनानां, रक्षाहेतोः = रक्षणार्थं, नवशशिभृता = बालचन्द्रधारिणा, भगवता चन्द्रशेखरेणेति तात्पर्यं, हुतवहमुखे = वह्निवदने, सम्भृतं = संचितम्, अत्यादित्यम् = आदित्यादपि, उत्कृष्टं, तेजः = धाम, साक्षाद्भगवतो हरस्यैव मूर्त्यन्तरमिति भावः अस्तीति शेषः।

**(ख) भावार्थः** - हे मेघ! देवगिरौ नित्यावासस्थानं कार्तिकेयं पुष्पवर्षकमेघीकृतविग्रहः सन् भवान् स्वयमेव आकाशगङ्गा जलक्लिन्नैः पुष्पवृष्टिभिः स्नपयतु, यतः भगवान् स्कन्दऐन्द्रीणां सेनानां रक्षार्थं भगवता चन्द्रशेखरेणाग्निमुखे सञ्चितं सूर्यादप्यधिकं वीर्यमस्ति।

**छन्दः** - अस्मिन् श्लोके मन्दाक्रान्ता छन्दः। तल्लक्षणं पूर्ववदेव।

**अलङ्कारः** - अर्थान्तरन्यासोऽलङ्कारः।

**विशेषांशः** - अत्यादित्यम् - अति + आदित्यम् (यण् सन्धिः)

नियतवसतिं - नियता वसतिर्यस्य सः (बहुव्रीहिसमासः)

'धारासम्पात आसारः' इत्यमरः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## श्लोकः ४८

**प्रसङ्गः** – श्लोकेऽस्मिन् कविताकामिनीविलासो महाकविस्तत्रभवान् कालिदासः यक्षमुखात् कार्तिकेयवाहनमयूर प्रसादनार्थं निर्दिशति –

**ज्योतिर्लेखावलयि गलितं यस्य बर्हं भवानि**
**पुत्रप्रेम्णा कुवलयदलप्रापि कर्णे करोति।**
**धौतापाङ्गं हरशशिरुचा पावकेस्तं मयूरं**
**पश्चादद्रिग्रहणगुरुभिर्गर्जितैर्नर्तयेथाः ॥४८॥**

**अन्वयः** – ज्योतिर्लेखावलयि गलितं यस्य बर्हं भवानी पुत्रप्रेम्णा कुवलयदलप्रापि कर्णे करोति। हरशशिरुचा धौतापाङ्गं पावकेः तं मयूरं पश्चात् अद्रिग्रहणगुरुभिः गर्जितैः नर्तयेथाः।

**व्याख्या – (क) पर्यायपदानि** – (हे मेघ!) ज्योतिर्लेखावलयि = तेजोराजिमण्डलयुक्तं, गलितं = भ्रष्टं, यस्य = मयूरस्य, बर्हं = पिच्छं, भवानी = गौरी, पुत्रप्रेम्णा = पुत्रस्नेहेन, कुवलयदलप्रापि = नीलकमलपत्रप्रापकं यथा स्यात्तथा, कर्णे = श्रवणे, करोति = विदधाति, दलेन सह धारयतीत्यर्थः। हरशशिरुचा = हरशिरश्चन्द्रिकया, धौतापाङ्गं = क्षालितनेत्रकोणं, पावकेः = स्कन्दस्य, (पावकस्य = अग्नेः अपत्यं पावकिः स्कन्दः, तस्य) तं = पूर्वोक्तं, मयूरं = बर्हिणं, पश्चात् = पुष्पवृष्टेरनन्तरम्, अद्रिग्रहणगुरुभिः = देवगिरिसंक्रमणमहद्भिः, देवगिरिगुहा–प्रतिध्वनितगुरुभिरिति तात्पर्यं, गर्जितैः = स्तनितैः, नर्तयेथाः = नृत्यं कारय। मार्दङ्गिकभावेन भगवन्तं कुमारमुपास्वेति भावः।

**(ख) भावार्थः** – हे मेघ! तत्र तेजोरेखामण्डलयुक्तं यस्य मयूरस्य पिच्छं पार्वती पुत्रस्नेहेन कुवलयदलधारणयोग्ये कर्णे धारयति, तस्य भगवतः स्कन्दस्य पूर्वोक्तं मयूरं देवगिरिगुहाप्रसारि दीर्घैः स्वगर्जनैः नर्तयेथाः।

**छन्दः** – अत्र मन्दाक्रान्ता छन्दः वर्तते। तल्लक्षणं पूर्ववदेव।

**अलङ्कारः** – श्लोकेऽस्मिन् उदात्तोऽलङ्कारः।

**विशेषांशः** – धौतापाङ्गम् – धौत+अपाङ्गम् (दीर्घसन्धिः)

धौतापाङ्गम् – धौतो अपाङ्गौ यस्य तम् (बहुव्रीहि)।

'पिच्छबर्हे नपुंसके' इत्यमरः।

## श्लोकः ४९

**प्रसङ्गः** – श्लोकेऽस्मिन् महाकविकालिदासः यक्षमुखादलकामार्गागतां चर्मण्वती नामिकां नदीं वर्णयति –

**आराध्यैनं शरवणभवं देवमुल्लङ्घिताध्वा**
**सिद्धद्वन्द्वैर्जलकणभयाद्वीणिभिर्मुक्तमार्गः।**
**व्यालम्बेथाः सुरभितनयालम्भजां मानयिष्यन्**
**स्रोतोमूर्त्या भुविपरिणतां रन्तिदेवस्य कीर्तिम्॥४९॥**

**अन्वयः** – एनं शरवणभवं देवम् आराध्यवीणिभिः सिद्धद्वन्द्वैः जलकणभयात् मुक्तमार्गः उल्लङ्घिताध्वा सुरभितनयालम्भजां भुवि स्रोतोमूर्त्या परिणतां रन्तिदेवस्य कीर्तिं मानयिष्यन् व्यालम्बेथाः।

**व्याख्या – (क) पर्यायपदानि** – (हे मेघ!) एनं = पूर्वोक्तं, शरवणभवं = बाणतृणारण्योत्पन्नं, देवं = सुरं, स्कन्दमित्यर्थः, आराध्य = समभ्यर्च्य, वीणिभिः = वीणावद्भिः, सिद्धद्वन्द्वैः = सिद्धमिथुनैः,जलकणभयात् = तोयबिन्दुत्रासात्, मुक्तमार्गः = त्यक्तवर्त्मा सन्, उल्लङ्घिताध्वा = अतिक्रान्तपथः, कियन्तमध्वानगत इत्यर्थः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

सुरभितनयालम्भजां = गवालम्भनजातां, भुवि = पृथिव्यां, स्रोतोमूर्त्या = प्रवाहरूपेण, परिणतां = परिवर्तितां, रन्तिदेवस्य = रन्तिदेवाऽख्यस्य दशपुराधीशस्य, कीर्तिं = यशः, 'चर्मण्वती' नामिकां नदीमिति भावः, मानयिष्यन् = सत्कारयिष्यन्, व्यालम्बेथाः = नीचैः भव, नम्रीभव, आलम्बस्ववेत्यर्थः।

**( ख ) भावार्थः** – हे मेघ! शरणभवम् एनं भगवन्तं स्कन्दमुपास्य तवं तदुपासनार्थमागतैः वीणावद्भिः सिद्धमिथुनैः तोयबिन्दुत्रासात् त्यक्तवर्त्मा सन् दशपुराधीश्वरस्य रन्तिदेवस्य कीर्तिविस्तारयन्तीं चर्मण्वतीनामनदीमालम्ब्य अवतरेः।

**छन्दः** – श्लोकेऽस्मिन् मन्दाक्रान्ता छन्दः। तल्लक्षणं पूर्ववदेव।

**अलङ्कारः** – अत्रापह्नुतिरलङ्कारः। अपि च कीर्तिचर्मण्वत्योर्मध्ये भेदसत्त्वेऽपि अभेदाध्यवसायादतिशयोक्तिरलङ्कारः।

**विशेषांशः** – व्यालम्बेथाः – वि+आलम्बेथाः (यण् सन्धिः)

मुक्तमार्गः – मुक्तः मार्गः यस्य सः (बहुव्रीहिसमासः)।

'शरजन्मा षडाननः'' इत्यमरः।

'अयनं वर्त्ममार्गाध्व' इत्यमरः।

## श्लोकः ५०

**प्रसङ्गः** – श्लोकेऽस्मिन् महाकविकालिदासः यक्षमुखात् चर्मण्वत्याः कामपि दर्शनीयां भाविनीं दशामुत्प्रेक्षमाणामाह–

**त्वय्यादातुं जलमवनते शार्ङ्गिणो वर्णचौरे**
**तस्याः सिन्धोः पृथुमपि तनुं दूरभावात्प्रवाहम्।**
**प्रेक्षिष्यन्ते गगनगतयो नूनमावर्ज्य दृष्टी–**
**रेकं मुक्तागणमिव भुवः स्थूलमध्येन्द्रनीलम्॥५०॥**

**अन्वयः** – शार्ङ्गिणः वर्णचौरे त्वयि जलम् आदातुम् अनवते (सति) पृथुम् अपि दूरभावात् तनुं तस्याः सिन्धोः प्रवाहं गगनगतयो दृष्टीः आवर्ज्य एकं स्थूलमध्येन्द्रनीलं भुवः मुक्तागुणम् इव प्रेक्षिष्यन्ते नूनम्।

**व्याख्या – ( क ) पर्यायपदानि** – (हे मेघ!) शार्ङ्गिणः = कृष्णस्य, वर्णचौरे = कान्तेः अपहारके, (कान्तिचौरे), त्वयि = भवति (मेघः इति तात्पर्यं) जलं = वारि, आदातुं = ग्रहीतुम्, अवनते = लम्बमाने सति, पृथुम् अपि = स्थूलमपि, दूरभावात् = विप्रकर्षात्, तनुं = सूक्ष्मतया प्रतीयमानं, तस्याः = पूर्वोक्तायाः, सिन्धोः = नद्याः चर्मण्वत्या इति भावः, प्रवाहं = वेगं, गगनगतयः = आकाशचारिणः, गन्धर्वसिद्धप्रभृतयः, दृष्टीः = नेत्राणि, आवर्ज्य = संनियम्य, एकम् = एकयष्टिकं, स्थूलमध्येन्द्रनीलं = पृथुमध्यमणीभूतेन्द्रनीलं, भुवः = पृथिव्याः, मुक्तागुणं = मौक्तिकहारम्, इव = यथा, नूनं = निश्चयेन, प्रेक्षिष्यन्ते = द्रक्ष्यन्ति।

**( ख ) भावार्थः** – हे मेघ! विष्णोः कान्त्यपहारके नीलवर्णे त्वयि चर्मण्वत्यामवनते (जलपानार्थं) सति स्थूलमपि दूरभावात् सूक्ष्मतया प्रतीयमानं चर्मण्वत्या नद्याः प्रवाहं व्योमचारिणः सिद्धगन्धर्वादयः नेत्राणि निक्षिप्यैकयष्टिकं पृथुमध्यमणियुक्तं भुवो मौक्तिकहारमिव निश्चयेन अवलोकयिष्यन्ति।

**छन्दः** – श्लोकेऽस्मिन् मन्दाक्रान्ता छन्दः। तल्लक्षणं पूर्ववदेव।

**अलङ्कारः** – श्लोकेऽस्मिन् वर्णचौर्यरूपासम्भववस्तुसम्बन्धो भवन्नपि शार्ङ्गिणो वर्णसाम्यप्रतिपादनान्नि–दर्शनालङ्कारः। अपि च कृष्णमेघयुक्तचर्मण्वती प्रवाहे पृथिवी कण्ठोस्थितस्थूलमध्येन्द्रनीलमुक्ताहारस्य सम्भावनात् उत्प्रेक्षालङ्कारः एवमलङ्कारद्वयस्याङ्गाङ्गिभावत्वात् सङ्करालङ्कारोऽत्र।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**विशेषांशः** – त्वय्यादातुम् – त्वयि+आदातुम् (यण्सन्धिः)।
गगनगतयः – गगने गतिः येषाम् ते (व्यधिकरणबहुव्रीहिसमासः)।
आदातुम् – आङ्+दा+तुमुन्।
'चापः शार्ङ्गिमुरारेस्तु' इत्यमरः।

### श्लोकः ५१

**प्रसङ्गः** – श्लोकेऽस्मिन् महाकविकालिदासो यक्षमुखात् कथयति यत् चर्मण्वतीमुत्तीर्य मेघः दशपुरवधूनां कौतूहलपूर्णनेत्राणां विषयो भूत्वा अग्रे गच्छेदिति –

**तामुत्तीर्य व्रज परिचितभ्रूलताविभ्रमाणां**
**पक्ष्मोत्क्षेपादुपरिविलसत्कृष्णशारप्रभाणाम्।**
**कुन्दक्षेपानुगमधुकरश्रीमुषामात्मबिम्बं**
**पात्रीकुर्वन्दशपुरवधूनेत्रकौतूहलानाम्॥५१॥**

**अन्वयः** – ताम् उत्तीर्य आत्मबिम्बं परिचितभ्रूलताविभ्रमाणां पक्ष्मोत्क्षेपात् उपरिविलसत्कृष्णशारप्रभाणां कुन्दक्षेपानुगमधुकरश्रीमुषां दशपुरवधूनेत्रकौतूहलानां पात्रीकुर्वन् व्रज।

**व्याख्या – (क) पर्यायपदानि** – (हे मेघ!) तां = चर्मण्वतीम्, उत्तीर्य = पारं गत्वा, आत्मबिम्बं = स्वमूर्तिं, परिचितभ्रूलताविभ्रमाणां = अभ्यस्तभ्रूवल्लीविलासानां, पक्ष्मोत्क्षेपात् = नेत्रलोमोन्नमनात्, उपरिविलसत्कृष्ण-शारप्रभाणाम् = ऊर्ध्वस्फुरमाणनीलशबलकान्तीनां, कुन्दक्षेपानुगमधुकरश्रीमुषां = माध्यकुसुमेतस्ततश्चलनाऽनुगभ्रमर समानां, दशपुरवधूनेत्रकौतूहलानां = रन्तिदेवनगरीकामिनीनयनाभिलाषाणां, पात्रीकुर्वन् = विषयीकुर्वन्, व्रज = गच्छ।

**(ख) भावार्थः** – हे मेघ! चर्मण्वतीमुत्तीर्य त्वं त्वदवलोकनायोर्ध्ववदनानां भ्रूविलासज्ञानां रन्तिदेवनगर दशपुरललनानां नेत्राणां कुतूहलं संवर्धयन् गच्छेः।

**छन्दः** – श्लोकेऽस्मिन् मन्दाक्रान्ता छन्दः। तल्लक्षणं पूर्ववदेव।

**अलङ्कारः** – अत्रोत्प्रेक्षालङ्कारः। असम्भववस्तुसम्बन्धात् सादृश्यबोधनात् निदर्शनालङ्कारः। अपि च केचिदुपमालङ्कार इति स्वीकुर्वन्ति।

**विशेषांशः** – पक्ष्मोत्क्षेपात् – पक्ष्म+उत्क्षेपात् – गुणसन्धिः।
आत्मबिम्बम् – आत्मनः बिम्बः तम् (षष्ठी तत्पुरुष समासः)
मधुकरः – मधु+कृ+टप्रत्ययः।
'वधूर्जायास्नुषा स्त्री च' इत्यमरः।

### श्लोकः ५२

**प्रसङ्गः** – श्लोकेऽस्मिन् महाकविकालिदासः दशपुरानन्तरं ब्रह्मावर्ते कुरुक्षेत्रनामके प्रसिद्धस्थले छायया प्रविशति मेघः इति यक्षमुखात् निर्दिशति –

**ब्रह्मावर्तं जनपदमथच्छायया गाहमानः**
**क्षेत्रं क्षत्रप्रधनपिशुनं कौरवं तद्भजेथाः।**
**राजन्यानां शितशरशतैर्यत्र गाण्डीवधन्वा**
**धारापातैस्त्वमिव कमलान्यभ्यवर्षन्मुखानि॥५२॥**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**अन्वयः**– अथ ब्रह्मावर्तं जनपदं छायया गाहमानः क्षत्रप्रधनपिशुनं तत् कौरवं क्षेत्रं भजेथाः। यत्र गाण्डीवधन्वा शितशरशतैः राजन्यानां मुखानि धारापातैः कमलानि त्वम् इव अभ्यवर्षत्।

**व्याख्या – ( क ) पर्यायपदानि** – हे मेघ !, अथ = अनन्तरं (दशपुरमतिक्रम्य), ब्रह्मावर्तं = ब्रह्मावर्तनामानं, जनपदं = प्रदेशं, छायया = प्रतिबिम्बेन, गाहमानः = प्रविशन्, क्षत्रप्रधनपिशुनं = क्षत्रियुद्धसूचकं, कौरवपाण्डवयुद्धसूचकं, तत् = प्रसिद्धं, कौरवं = कुरुकुलसम्बन्धि, क्षेत्रं = स्थानं, कुरुक्षेत्रमिति भावः, भजेथाः = सेवस्व, गच्छेति भावः, यत्र = यस्मिन् कुरुक्षेत्रे, गाण्डीवधन्वा = अर्जुनः, शितशरशतैः = अत्यन्ततीक्ष्णबाणैः, राजन्यानां = क्षत्रियाणां, मुखानि = वदनानि, त्वं = मेघः, धारापातैः = जलवृष्टिभिः, कमलानि = जलजानि, इव = यथा, अभ्यवर्षत् = अभिमुखं वृष्टवान्, प्रचुरबाणप्रहारैः राज्ञां क्षत्रियाणां शिरांसि चिच्छेदेत्यर्थः।

**( ख ) भावार्थः** – हे मेघ! दशपुरमतिक्रम्य त्वं ब्रह्मावर्तं नामकं प्रसिद्धं प्रदेशं प्रविश्य कुरुक्षेत्रं गच्छ। यस्मिन् कुरुक्षेत्रे गाण्डीवधन्वा अर्जुनः महाभारतयुद्धस्थले तीक्ष्णैः शतैरपि बाणैः क्षत्रियनृपाणां वदनानि अभ्यवर्षत्। यथा त्वं जलधारावृष्टिभिः कमलानां मुखानि अभ्यवर्षसि।

**छन्दः** – श्लोकेऽस्मिन् मन्दाक्रान्ता वृत्तमस्ति। तल्लक्षणं पूर्ववदेव।

**अलङ्कारः** – अत्रार्जुनबाणवृष्टिमेघजलवृष्टिसादृश्यादुपमाऽलङ्कारः।

**विशेषांशः** – शितशरशतैर्यत्र – शितशरशतैः + यत्र (विसर्ग सन्धिः)

गाण्डीवधन्वा – गाण्डीवं धनुर्यस्य सः (बहुव्रीहिसमासः)।

यत्र – यस्मिन्नर्थे यत्+ङि+त्रल्।

'नीवृज्जनपदो देशः' इत्यमरः।

## श्लोकः ५३

**प्रसङ्गः** – श्लोकेऽस्मिन् महाकविकालिदासः यक्षमुखात् मेघमलकामार्गक्रमागतायाः सरस्वत्याः जलं गृहीत्वाऽग्रेगन्तुमुपदिशति –

**हित्वा हालामभिमतरसां रेवतीलोचनाऽङ्कां**
**बन्धुप्रीत्या समरविमुखो लाङ्गली याः सिषेवे।**
**कृत्वा तासामभिगममपां सौम्य! सारस्वतीना-**
**मन्तः शुद्धस्त्वमपि भविता वर्णमात्रेण कृष्णः॥५३॥**

**अन्वयः**– बन्धुप्रीत्या समरविमुखः लाङ्गली अभिमतरसां रेवतीलोचनाऽङ्कां हालां हित्वा याः सिषेवे। हे सौम्य! त्वम् अपि तासां सारस्वतीनाम् अपाम् अभिगमं कृत्वा अन्तःशुद्धो वर्णमात्रेण कृष्णः भविता।

**पर्यायपदानि – ( क ) व्याख्या** – बन्धुप्रीत्या = बान्धवप्रेम्णा, पाण्डवकौरवप्रेम्णा, न तु भयात्, समरविमुखः = युद्धपराङ्मुखः, लाङ्गली = हलधरो बलरामः, अभिमतरसाम् = अभीप्सितस्वादयुक्तां, रेवतीलोचनाऽङ्कां = स्वभार्यां नयनलक्षणां, रेवतीकटाक्षतुल्यां मदोत्पादिकामिति, हालां = सुरां, हित्वा = त्यक्त्वा, याः अपः = सरस्वतीसम्बन्ध्यपः, सिषेवे = सेवितवान् पानमकरोदिति भावः, सौम्य! = हे साधो!, त्वं = भवान् मेघः, अपि, तासां = पूर्वकथितानां, सारस्वतीनां = सरस्वतीनदी सम्बन्धिनीनाम्, अपां = जलानाम्, अभिगमं = सम्मुखगमनं, पानमिति तात्पर्यं, कृत्वा = विधाय, अन्तःशुद्धः = अन्तर्निमलः, निर्दोषः सन्, वर्णमात्रेण = रूपमात्रेण, कृष्णः = श्यामलः, न तु पापकर्मणा, भविता = भविष्यति।

**( ख ) भावार्थः** – हे सुभग मेघ! स्वबान्धवानां कौरवपाण्डवानां प्रेम्णा बलरामः महाभारतसमरपराङ्गमुखो भूत्वा अभीष्टरसास्वादयुक्तां तथा च स्वप्रियायाः रेवत्याः नयनयोः चिह्नितां मदिरां परित्यज्य यस्याः सरस्वतीनद्याः



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

जलानां सेवनं कृतवान् तथा च अन्त: शुद्धो बभूव तस्या: एव जलमुपभुज्य भवानपि पवित्रान्त:करण: सन् वर्णमात्रेण कृष्णो भविष्यसि।

**छन्द:** – श्लोकेऽस्मिन् मन्दाक्रान्ता छन्द:। तल्लक्षणं पूर्ववदेव।

**अलङ्कार:** – श्लोकेऽस्मिन् उदात्त अलङ्कार:।

**विशेषांश:** – अभिमतरसाम् – अभिमत: रसो यस्या: सा ताम् (बहुव्रीहिसमास:)।

लाङ्गली – लाङ्गल+इनि (प्र०पु०एकवचनं)

'सुरा हलिप्रिया हाला' इत्यमर:।

## अभ्यास-प्रश्ना:

### (क) वस्तुनिष्ठप्रश्ना: -

**निर्देश:** – निम्नाङ्कितप्रश्नेषु उचितविकल्पस्य वर्णाङ्कं कोष्ठके चिनुत –

१. छायात्माऽपि प्रकृतिसुभगो प्रवेशं लप्स्यते –

(क) मेघस्य (ख) सरित:

(ग) गम्भीराया: (घ) यक्षस्य ( )

२. शीत: वायु: उपजगमिषो: ते नीचै: वास्यति –

(क) रामपूर्वं गिरिम् (ख) आम्रकूटगिरिम्

(ग) देवपूर्वं गिरिम् (घ) नीचैर्गिरिम् ( )

३. व्योमगङ्गाजलार्द्रै: पुष्पासारै: स्नपयतु –

(क) मेघम् (ख) हुतवहम्

(ग) अत्यादित्यम् (घ) स्कन्द: ( )

४. 'पावके:' विशेषणं प्रयुक्तमस्ति –

(क) चण्डिकायै (ख) इन्द्रदेवतायै

(ग) स्कन्ददेवतायै (घ) अग्निदेवतायै ( )

५. गाण्डीवधन्वा अस्ति –

(क) यक्ष: (ख) कौरव:

(ग) मेघ: (घ) अर्जुन: ( )

६. बन्धुप्रीत्या समरविमुखो बभूव –

(क) कृष्ण: (ख) लाङ्गली

(ग) अर्जुन: (घ) सौम्य:

### (ख) अतिलघूत्तरात्मकप्रश्ना: –

**निर्देश:** – निम्नाङ्कितप्रश्नानाम् एकपङ्क्तावेव उत्तराणि लेख्यानि –

१. विवृतजघनां को विहातुं समर्थो न भवति?

२. वासवीनां चमूनां रक्षाहेतो: केन हुतवहमुखे तेज: संभृतम्?

३. भवानी पुत्रप्रेम्णा का नदी वर्णिता?



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

४. रन्तिदेवस्य कीर्तिरूपा का नदी वर्णिता ?
५. कौरवं क्षत्रप्रधनपिशुनं क्षेत्रं किमस्ति ?
६. कासामपामधिगमं कृत्वा मेघः वर्णमात्रेण कृष्णः भविता ?

**( ग ) लघूत्तरात्मकप्रश्नाः –**

**निर्देशः** – निम्नाङ्कितप्रश्नानां पञ्चषा पङ्क्तिषु उत्तराणि लेख्यानि –

१. मेघः कथं गम्भीरायाः साक्षात्कारं मोघीकर्तुं नार्हति ?
२. देवगिरिपर्वतस्य वैशिष्ट्यं लिखत ।
३. पावकेः परिचयः स्वशब्देषु प्रतिपादनीयः ।
४. चर्मण्वत्या जलमादातुं लम्बमाने मेघे तस्य शोभां वर्णयत ।
५. दशपुरवधूनां किंविधं वैशिष्ट्यं कविना व्यक्तम् ?
६. यक्षः कथं मेघं कुरुक्षेत्रगमनार्थं निर्दिशति ?

**( घ ) निबन्धात्मकाः प्रश्नाः –**

**निर्देशः** – निम्नाङ्कितश्लोकानां सप्रसङ्गं व्याख्या कार्या –

१. तस्याः किञ्चित् ................................................. विहातुं समर्थः ॥
२. तत्र स्कन्दं ...................................................... तद्धि तेजः ॥
३. ब्रह्मावर्तं जन ..................................................... वर्षन्मुखानि ॥
३. हित्वा हालाम् ................................................ वर्णमात्रेण कृष्णः ॥

**निर्देशः – निम्नाङ्कितश्लोकानां भावार्थः संस्कृते लेखनीयः –**

१. ज्योतिर्लेखावलयि ............................................... नर्तयेथाः ॥
२. त्वय्यादातुं ....................................... स्थूलमध्येन्द्रनीलम् ॥
३. आराध्यैनं शरव ....................................... रन्तिदेवस्य कीर्तिम् ॥

**निर्देशः – निम्नाङ्कित सूक्तेः सप्रसङ्गं भावार्थः संस्कृते लेखनीयः –**

ज्ञातास्वादो विवृतजघनां को विहातुं समर्थः ॥



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## ५. कुरुक्षेत्रतः अलकापुरीपर्यन्तं वर्णनम्

### श्लोकः ५४

**प्रसङ्गः** – श्लोकेऽस्मिन् महाकविकालिदासः यक्षमुखादलकापुरीमार्गं प्रदर्शयन् हिमालयात् प्रवहन्त्याः गङ्गानद्याः वर्णनं प्रस्तौति –

**तस्माद् गच्छेदनुकनखलं शैलराजाऽवतीर्णां**
**जह्नोः कन्यां सगरतनयस्वर्गसोपानपङ्क्तिम्।**
**गौरीवक्त्रभ्रुकुटिरचनां या विहस्येव फेनैः**
**शम्भोः केशग्रहणमकरोदिन्दुलग्नोर्मिहस्ता॥५४॥**

**अन्वयः**– तस्मात् अनुकनखलं शैलराजावतीर्णां सगरतनयस्वर्गसोपानपङ्क्तिं जह्नोः कन्यां गच्छेः। या गौरीवक्त्रभ्रुकुटिरचनां फेनैः विहस्य इव इन्दुलग्नोर्मिहस्ता (सती) शम्भोः केशग्रहणम् अकरोत्।

**व्याख्या – (क) पर्यायपदानि** – (हे मेघ!) तस्मात् = कुरुक्षेत्रात्, अनुकनखलं= कनखलतीर्थपार्श्वे, शैलराजावतीर्णां = नगाधिराजात्, हिमालयात्, नीचैः आगतां, सगरतनयस्वर्गसोपानपक्तिं= सगरपुत्रद्युलोकारोहणनिःश्रेणीं, सगरपुत्रस्वर्गगमनसाधनभूतामिति तात्पर्यं, जह्नोः = जह्नुनाम्नः राज्ञः, कन्यां = पुत्रीं, जाह्नवीमिति भावः, गच्छेः = गच्छ। या जाह्नवी (गङ्गा) गौरीवक्त्रभ्रुकुटिरचनां = पार्वतीवदनभ्रूभङ्गकरणं, फेनैः = डिण्डीरैः, विहस्य = अवहस्य, इव = मन्ये, इन्दुलग्नोर्मिहस्ता = शशिव्यापृत तरङ्गकरा (सति) शम्भोः = शङ्करस्य, केशग्रहणं = कचग्राहम्, अकरोत् = कृतवती।

**(ख) भावार्थः** – हे मेघ! कुरुक्षेत्रात् अग्रे कनखलाख्याद्रिपार्श्वे हिमालयादवरूढां सगरपुत्राणां कृते स्वर्गस्य आरोहणसोपानमिव स्थितां गङ्गां गच्छ या गङ्गा सापत्न्यरोषात् पार्वत्याः मुखे जायमानां भ्रूभङ्गरचनां फेनैः उपहसन्तीव चन्द्रसंलग्रस्वतरङ्गमयैः हस्तैः शिवस्य केशग्रहणं कृतवती। अर्थात् पार्वत्याः सपत्नी भूत्वा भगवतः शिवस्य जटाजूटे एव स्थिता।

**छन्दः** – श्लोकेऽस्मिन् मन्दाक्रान्ता छन्दः।तल्लक्षणं पूर्ववदेव।

**अलङ्कारः** – विरहस्य इव इत्यत्र सम्भावनयोत्प्रेक्षा। ऊर्मय एव हस्ताः इत्यत्र रूपकमलङ्कारः। एतयोरलङ्कारयोः निरपेक्षतया स्थित्या संसृष्ट्यलङ्कारः।

**विशेषांशः** – विहस्येव – विहस्य + इव (गुणसन्धिः)

अनुकनखलम् – कनखलस्य समीपे (अव्ययीभावसमासः)।

'गङ्गा विष्णुपदी जह्नुतनया सुरनिम्नगा' इत्यमरः।

### श्लोकः ५५

**प्रसङ्गः** – श्लोकेऽस्मिन् महाकविकालिदासः गङ्गाजलं पातुं प्रवृत्ते मेघे गङ्गामेघयोः काञ्चिदपूर्वां शोभामुपस्थापयति–

**तस्याः पातुं सुरगज इव व्योम्नि पश्चार्द्धलम्बी**
**त्वं चेदच्छस्फटिकविशदं तर्कयेस्तिर्यगम्भः।**
**संसर्पन्त्या सपदि भवतः स्रोतसि छाययाऽसौ**
**स्यादस्थानोपगतयमुनासङ्गमेवाभिरामा ॥५५॥**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**अन्वयः** – सुरगज इव व्योम्नि पश्चार्द्धलम्बी त्वम् अच्छस्फटिकविशदं तस्याः अम्भः तिर्यक् पातुं तर्कयेः चेत्, सपदि स्रोतसि संसर्पन्त्या भवतः छायया असौ अस्थानोपगतयमुनासङ्गमा इव अभिरामा स्यात्।

**व्याख्या – ( क ) पर्यायपदानि** – (हे मेघ!) सुरगज इव = देवगज इव, ऐरावतसदृशः इति भावः, व्योम्नि = आकाशे, पश्चार्द्धलम्बी = पश्चिमार्द्धलम्बी सन्, त्वं = भवान् मेघः, अच्छस्फटिकविशदं = स्वच्छस्फटिकवत् अवदातम्, अम्भः = जलं, तिर्यक् = तिरश्चीनं, यथा तथा, पातुं = पानं कर्तुं, तर्कयेः = विचारयेः, चेत् = यदि, सपदि = तत्क्षणं, स्रोतसि = प्रवाहे, संसर्पन्त्याः = सङ्क्रामन्त्याः, भवतः = तव, छायया = प्रतिबिम्बेन, असौ = गङ्गा, अस्थानोपगतयमुनासङ्गमा इव = प्रयागेतर स्थानप्राप्तकालिन्दीसमागमा, इव = यथा, अभिरामा = मनोहरा, स्यात् = भवेत्।

**( ख ) भावार्थः** – हे मेघ! दिग्गज इवाकाशे पश्चिमार्द्धलम्बी सन्, पूर्वार्द्धेन जलोन्मुखस्त्वं गङ्गायाः निर्मलं स्फटिकवत् स्वच्छं जलं तिर्यक् पातुं विचारयेर्यदि तर्हि तत्क्षणं प्रवाहे सङ्क्रामन्त्या तव प्रतिबिम्बेनासौ गङ्गा प्रयागादन्यत्र स्थाने यमुनया सङ्गता इव मनोहारिणी भवेत्।

**छन्दः** – श्लोकेऽस्मिन् मन्दाक्रान्ता छन्दः। तल्लक्षणं पूर्ववदेव।

**अलङ्कारः** – अच्छस्फटिकविशदम् इत्यत्र लुप्तोपमालङ्कारः। अस्थानोपगतयमुना सङ्गमा इव इत्यत्रोत्प्रेक्षालङ्कारः।

**विशेषांशः** – सङ्गमेवाभिरामा – सङ्गम+इव +(गुणसन्धिः) अभिरामा (दीर्घसन्धिः)

तिर्यक – तिरः वक्रम् अञ्चति गच्छति इति तिर्यक् (उपपदतत्पुरुष)

छाया सूर्यप्रियाकान्तिः प्रतिबिम्बमनातपः इत्यमरः।

## श्लोकः ५६

**प्रसङ्गः** – श्लोकेऽस्मिन् महाकविस्तत्रभवान् कालिदासः यक्षमुखात् वर्णयति यत् हिमालयमारूढो मेघः काञ्चन विशिष्टां शोभां धारयिष्यति –

**आसीनानां सुरभितशिलं नाभिगन्धैर्मृगाणां**
**तस्या एव प्रभवमचलं प्राप्य गौरं तुषारैः।**
**वक्ष्यस्यध्वश्रमविनयने तस्य शृङ्गे निषण्णः**
**शोभां शुभ्रत्रिनयनवृषोत्खातपङ्कोपमेयाम्॥५६॥**

**अन्वयः**– आसीनानां मृगाणां नाभिगन्धैः सुरभितशिलं तस्या एव प्रभवं तुषारैः गौरम् अचलं प्राप्य अध्वश्रमविनयने तस्य शृङ्गे निषण्णः सन् शुभ्रत्रिनयनवृषोत्खातपङ्कोपमेयां शोभां वक्ष्यसि।

**व्याख्या – ( क ) पर्यायपदानि** – (हे मेघ!) आसीनानाम् = उपविष्टानां, मृगाणां = हरिणानां, कस्तूरिकामृगाणां, नाभिगन्धैः = कस्तूरीगन्धैः, सुरभितशिलं = सुगन्धितपाषाणं, तस्याः = गङ्गायाः एव, प्रभवं = कारणम्, उत्पत्तिस्थानमिति भावः, तुषारैः = हिमैः, गौरं = शुभ्रम्, अचलं = नगं, हिमालयमित्यर्थः, प्राप्य = आसाद्य, गत्वेति भावः अध्वश्रमविनयने = मार्गपरिश्रमापनोदके तस्य = हिमाद्रेः, शृङ्गे = सानौ, निषण्णः = उपविष्टः सन्, शुभ्रत्रिनयनवृषोत्खातपङ्कोपमेयां = धवलशिववृषभविदारितकर्दमकल्पां, शोभां = श्रियं, वक्ष्यसि = धारयिष्यसि।

**( ख ) भावार्थः**– हे मेघ! तदनन्तरमुपविष्टानां कस्तूरिकामृगाणां नाभिसौरभैः सुरभितपाषाणं, तस्याः गङ्गायाः उत्पत्तिकारणं तुषारधवलं हिमालयमासाद्य मार्गपरिश्रमापनोदके तस्य शिखरे समुपविष्टः सन् त्वं शुक्लहरवृषभविदारित-कर्दमसदृशीं शोभां धारयिष्यसि।

**छन्दः** – श्लोकेऽस्मिन् मन्दाक्रान्ता छन्दः। तल्लक्षणं पूर्ववदेव।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**अलङ्कारः** – हिमालयशिववृषभयोः मेघपङ्क्योश्च मध्ये सादृश्यादुपमालङ्कारोऽत्र।

**विशेषांशः** – वृषोत्खातः – वृष+उत्खात् (गुणसन्धिः)

अचलं – चलतीति चलः, न चलः अचलस्तम् (नञ् समासः)।

वक्ष्यसि – वह्+लृट् (म०पु०ए०व०)

मृगनाभिर्मृगमदः कस्तूरी च इत्यमरः।

## श्लोकः ५७

**प्रसङ्गः** – श्लोकेऽस्मिन् कविताकामिनीविलासः तत्रभवान् कालिदासः हिमाद्रौ लग्नां दावाग्निं शमयितुं मेघस्य वृष्टिक्रियायाः औचित्यपक्षं प्रस्तौति –

**तं चेद्वायौ सरति सरलस्कन्धसंघट्टजन्मा**
**बाधेतोल्काक्षपितचमरीबालभारो दवाग्निः।**
**अर्हस्येनं शमयितुमलं वारिधारासहस्रै-**
**रापन्नार्तिप्रशमनफलाः सम्पदो ह्युत्तमानाम्॥५७॥**

**अन्वयः**– वायौ सरति सरलस्कन्धसंघट्टजन्मा उल्काक्षपितचमरीबालभारः दवाग्निः तं बाधेत चेत् एनं वारिधारासहस्रैः अलं शमयितुम् अर्हसि हि उत्तमानां सम्पदः आपन्नार्तिप्रशमनफलाः (भवन्ति)।

**व्याख्या – (क) पर्यायपदानि** – (हे मेघ!) वायौ = वाति, पवने, सरति = वाति सति, सरलस्कन्धसंघट्टजन्मा = देवदारुप्रकाण्डसंघर्षणसम्भवः, उल्काक्षपितचमरीबालभारः = स्फुल्लिङ्गप्रदग्धचमरीकेशसमूहः, दावाग्निः = अरण्याग्निः, तं = हिमालयं, बाधेत चेत् = पीडयेत् यदि, (तर्हि), एनं = दावाग्निं, वारिधारासहस्रैः = जलधारासहस्रै, अलं = सम्यक्, शमयितुं = निर्वापयितुम्, अर्हसि = क्षमोऽसि। हि = यतः, उत्तमानां = महतां, सम्पदः = समृद्धयः, आपन्नार्तिप्रशमनफला = आर्तपीडानिवारणप्रयोजनाः भवन्तीति शेषः। अतो हिमालयस्य दावानलस्त्वया शमयितव्य इति भावः।

**(ख) भावार्थः** – हे मेघ! वनवाते वाति सति देवदारुप्रकाण्डसंघर्षणोत्पन्नः स्फुलिङ्गनिर्दग्धचमरीकेशस्तबकः दावानलो हिमालयं पीडयेत् चेत्तर्हि एनं दावाग्निं वारिधारासहस्रैः सम्यक् निर्वापयितुं त्वं सक्षमोऽसि, यतोहि महतां समृद्धयः आर्त्तपीडा निवारणप्रयोजना भवन्तीति। अतो हिमालयस्य दावानलस्त्वया शमयितव्य इति भावः।

**छन्दः** – श्लोकेऽस्मिन् मन्दाक्रान्ता छन्दः। तल्लक्षणं पूर्ववदेव।

**अलङ्कारः** – अत्र चतुर्थचरणेन तृतीयचरणस्यार्थसमर्थनात् अर्थान्तरन्यासोऽलङ्कारः।

**विशेषांशः** – ह्युत्तुमानाम् – हि+उत्तमानाम् (यण्सन्धिः)

दवाग्निः – दवस्य अग्निः (षष्ठी तत्पुरुषसमासः)।

शमयितुम् – शम्+णिच्+तुमुन्।

उल्का स्यान्निर्गतज्वाला इत्यमरः।

## श्लोकः ५८

**प्रसङ्गः** – श्लोकेऽस्मिन् महाकविकालिदासः हिमाद्रौ शरभाणां बाहुल्यवर्णनं प्रकटयति –

**ये संरम्भोत्पतनरभसाः स्वाङ्गभङ्गाय तस्मिन्**
**मुक्ताध्वानं सपदि शरभा लङ्घयेयुर्भवन्तम्।**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**तान्कुर्वीथास्तुमुलकरकावृष्टिपातावकीर्णान्**
**के वा न स्युः परिभवपदं निष्फलारम्भयत्नाः ॥५८॥**

**अन्वयः**– तस्मिन् संरम्भोत्पतनरभसाः ये शरभाः मुक्ताध्वानं भवन्तं सपदि स्वाङ्गभङ्गाय लङ्घयेयुः, तान् तुमुलकरकावृष्टिपातावकीर्णान् कुर्वीथाः। निष्फलारम्भयत्नाः के वा परिभवपदं न स्युः ?

**व्याख्या – (क) पर्यायपदानि** – (हे मेघ!) तस्मिन् = हिमाद्रौ, संरम्भोत्पतनरभसाः = क्रोधोत्प्लवनवेगशालिनः, ये, शरभाः = अष्टापदमृगविशेषाः, मुक्ताध्वानं = परित्यक्तपथं, भवन्तं = त्वां मेघं, सपदि = झटिति, स्वाङ्गभङ्गाय = स्ववपुर्विनाशाय, लङ्घयेषु = अतिक्रमणं कुर्युः, तर्हि, तान् = शरभान्, तुमुलकरकावृष्टिपातावकीर्णान् = प्रचण्डोपलवर्षणविकीर्णान्, कुर्वीथाः = कुरुष्व तथाहि, निष्फलारम्भयत्नाः = विफलव्यापारनिरताः, के वा = प्राणिनः, परिभवपदं = तिरस्कारभाजनं, न = नहि, स्युः = भवेयुः, सर्वेऽपि प्राणिनः तिरस्कारभाजनानि भवन्तीत्यर्थः।

**(ख) भावार्थः** – हे मेघ! तस्मिन् हिमाद्रौ कोपोत्प्लवनवेगिनो ये शरभाः त्यक्तमार्गं त्वां तत्क्षणं स्वाङ्गविनाशायातिक्रामेयुः त्वं तान् हिमोत्पलानां प्रचण्डवृष्टिपातैः विप्रकीर्णान् कुरुष्व। व्यर्थव्यापारव्यापृताः के प्राणिनः तिरस्कारभाजनाः न भवन्ति अर्थात् सर्वेऽपि प्राणिनः भवन्त्येवेति भावः।

**छन्दः** – श्लोकेऽस्मिन् मन्दाक्रान्ता छन्दः। तल्लक्षणं पूर्ववदेव।

**अलङ्कारः** – अत्र चतुर्थचरणेन तृतीयचरणार्थस्य समर्थनादर्थान्तरन्यासालङ्कारः।

**विशेषांशः** – मुक्ताध्वानम् – मुक्त+अध्वानम् (दीर्घसन्धिः)

परिभवपदं – परिभवस्य पदम् (षष्ठी तत्पुरुषसमासः)

'संरम्भः संभ्रमे कोपे' इत्यमरः।

## श्लोकः ५९

**प्रसङ्गः** – श्लोकेऽस्मिन् महाकविकालिदासपरमशैवः शिवचरणन्यासचिह्नितशिलायाः प्रदक्षिणां कर्तुं मेघमुपदिशति –

**तत्र व्यक्तं दृषदि चरणन्यासमर्धेन्दुमौलेः**
**शश्वत् सिद्धैरुपचितबलिं भक्तिनम्रः परीयाः।**
**यस्मिन् दृष्टे करणविगमादूर्ध्वमुद्धूतपापाः**
**कल्पिष्यन्ते स्थिरगणपदप्राप्तये श्रद्दधानाः ॥५९॥**

**अन्वयः**– तत्र दृषदि व्यक्तं शश्वत् सिद्धैः उपचितबलिम् अर्धेन्दुमौलेः चरणन्यासं भक्तिनम्रः परीयाः यस्मिन् दृष्टे उद्धूतपापाः श्रद्दधानाः करणविगमात् ऊर्ध्वं स्थिरगणपदप्राप्तये कल्पिष्यन्ते।

**व्याख्या – (क) पर्यायपदानि** – (हे मेघ!) तत्र = हिमालये, दृषदि = कस्याञ्चिद् शिलायां, व्यक्तं = प्रकटं, शश्वत् = सदा, सिद्धैः = योगिभिः, उपचितबलिं = विरचितपूजाविधिम्, अर्धेन्दुमौलेः = चन्द्रचूडस्य शिवस्येत्यर्थः, चरणन्यासं = पादचिह्नं, भक्तिनम्रः = पूजाभावनया नमनशीलः (सन्), परीयाः = प्रदक्षिणां कुर्याः, यस्मिन् = पादन्यासे, दृष्टे = अवलोकिते सति, उद्धूतपापाः = मुक्तकिल्विषा (सन्तः), श्रद्दधानाः = श्रद्धां कुर्वाणाः विश्वसन्तः, करणविगमात् = वपुस्त्यागात्, ऊर्ध्वम् = अनन्तरं, स्थिरगणपदप्राप्तये = शाश्वतप्रमथादिस्थानोपलब्धये, कल्पिष्यन्ते = समर्थाः भविष्यन्ति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**( ख ) भावार्थः** – हे मेघ! तस्मिन् हिमालये कस्याश्चित् शिलायां प्रकटं सदा सिद्धैर्नित्यं विहितसपर्यं शिवपादचिह्नं भक्तिभावनया प्रदक्षिणी कुरु, यद्दर्शनादेव भक्ताः निष्कल्मषाः सन्तः शिवस्य प्रमथादिगणेषु शश्वत्पदं प्राप्तुं समर्थाः भवन्ति।

**छन्दः** – श्लोकेऽस्मिन् मन्दाक्रान्ता छन्दः। तल्लक्षणं पूर्ववदेव।

**अलङ्कारः** – कार्ये प्रस्तुते कारणस्याभिधानादत्राप्रस्तुतप्रशंसालङ्कारः।

**विशेषांशः** – सरंभोत्पतनरभसा – संरम्भ + उत्पतनरभसाः (गुणसन्धिः)

उपचितबलिम् – उपचितः बलिः यस्य सः, तम् (बहुव्रीहिसमासः)।

'पाषाणप्रस्तरग्रावोपलश्मानः शिला दृषत्' इत्यमरः।

## श्लोकः ६०

**प्रसङ्गः** – श्लोकेऽस्मिन् महाकविकालिदासः यक्षमुखात् हिमालयस्य वंश-गुहा-किन्नरीणां मनोज्ञं प्राकृतिकं वर्णनं प्रस्तौति –

**शब्दायन्ते मधुरमनिलैः कीचकाः पूर्यमाणाः**
**संसक्ताभिस्त्रिपुरविजयो गीयते किन्नरीभिः।**
**निर्ह्रादस्ते मुरज इव चेत्कन्दरेषु ध्वनिः स्यात्**
**सङ्गीतार्थो ननु पशुपतेस्तत्र भावी समग्रः॥६०॥**

**अन्वयः**– अनिलैः पूर्यमाणाः कीचकाः मधुरं शब्दायन्ते। संसक्ताभिः किन्नरीभिः त्रिपुरविजयः गीयते। कन्दरेषु ते निर्ह्रादः मुरजे ध्वनिः इव स्यात् चेत् (तर्हि) ततः पशुपतेः संगीतार्थः सम्रगः भावी ननु॥

**व्याख्या – ( क ) पर्यायपदानि** – (हे मेघ!) अनिलैः = पवनैः, पूर्यमाणाः = पूरिताः, कीचकाः = वेणुविशेषाः, मधुरं = श्रुतिसुखं यथा तथा, शब्दायन्ते = शब्दं कुर्वन्ति, संसक्ताभिः = संयुक्ताभिः, किन्नरीभिः = किन्नराङ्गनाभिः, त्रिपुरविजयः = त्रिपुरदाहाख्यः, प्रबन्धः, गीयते = गानं क्रियते, कन्दरेषु = गुहासु, ते = तव मेघस्येति, निर्ह्रादः = निर्घोषः, मुरजे = मृदङ्गे, ध्वनिः = शब्दः, इव = यथा, मृदङ्गशब्द इवेति भावः, स्यात् = भवेत् चेत् = यदि, तर्हि = तत्र = चरणन्याससमीपे, पशुपतेः = भगवतः त्रिनेत्रस्य, संगीतार्थ = संगीतवस्तुः, समग्रः = सम्पूर्णः, भावी = भविष्यति, ननु = खलु॥

**( ख ) भावार्थ** – हे मेघ! वायुभिः पूर्यमाणाः सच्छिद्रवंशाः कीचकाः कर्णप्रियं शब्दं कुर्वन्ति, संसक्ताः स्त्रियः (किन्नरस्त्रियः) त्रिपुरविजयं गायन्ति, कन्दरासु तव गर्जनं मृदङ्गे ध्वनिरिव भवेच्चेत् तर्हि नूनं शङ्करस्य सङ्गीतवस्तु सम्पूर्णो भविष्यति।

**छन्दः** – श्लोकेऽस्मिन् मन्दाक्रान्ता छन्दः। तल्लक्षणं पूर्ववदेव।

**अलङ्कारः** – मुरजे ध्वनिः इव इति प्रयोगात् उपमालङ्कारः।

**विशेषांशः** – पशुपतेस्तत्र – पशुपतेः+तत्र (विसर्गसन्धिः)

त्रिपुरविजयः – त्रयाणां पुराणां समाहारस्त्रिपुरम् (द्विगु समासः) त्रिपुरस्य विजयः (ष०तत्पुरुष समासः)।

'दरी तु कन्दरो वा स्त्री' इत्यमरः।

## श्लोकः ६१

**प्रसङ्गः** – श्लोकेऽस्मिन् महाकविस्तत्रभवान् कालिदासो यक्षमुखात् मेघं भगवदवतारपरशुरामबिद्धक्रौञ्चविवरात् मानसरोवरं गन्तुं निर्दिशति –



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**प्रालेयाद्रेरुपतटमतिक्रम्य तांस्तान्विशेषान्**
**हंसद्वारं भृगुपतियशोवर्त्म यत्क्रौञ्चरन्ध्रम्।**
**तेनोदीचीं दिशमनुसरेस्तिर्यगायामशोभी**
**श्यामः पादो बलिनियमनाऽभ्युद्यतस्येव विष्णोः॥**
**६१॥**

**अन्वयः**- प्रालेयाद्रेः उपतटं तान् तान् विशेषान् अतिक्रम्य हंसद्वारं भृगुपतियशोवर्त्म यत् क्रौञ्चरन्ध्रं तेन बलिनियमनाऽभ्युद्यतस्य विष्णोः श्यामः पाद इव तिर्यगायामशोभी (सन्) उदीचीं दिशम् अनुसरेः।

**व्याख्या - (क) पर्यायपदानि** - (हे मेघ!) प्रालेयाद्रेः = तुषाराद्रेः, हिमालयस्येति भावः, उपतटं = तटपार्श्वे, तान्-तान् = दर्शनीयान् (प्रसिद्धान्) पदार्थान्, अतिक्रम्य = उल्लंध्य, हंसद्वारं = मानसरोवरं प्रति गन्तर्गीं, राजहंसानां प्रवेशद्वारं, भृगुपतियशोवर्त्म = परशुरामकीर्तिमार्गभूतं, भृगुपतेः = जामदग्न्यस्य परशुरामस्य, यशसः = कीर्तेः, वर्त्मः = मार्गः, तदिव, यत् क्रौञ्चरन्ध्रं = क्रौञ्चपर्वतस्य छिद्रविशेषः, क्रौञ्चपर्वतविवरं, तेन = क्रौञ्चविवरेण, बलिनियमनाऽभ्युद्यतस्य = बलिवशीकरणतत्परस्य, (बलेः = दैत्यस्य, नियमने = बन्धने, अभ्युद्यतस्य = उद्यतस्य) विष्णोः = हरेः, श्यामः = कृष्णवर्णः, पादः = चरणः, इव = यथा, तिर्यगायामशोभी = तिरश्चीनदैर्घ्यशोभी, सन् त्वम्, उदीचीम् = उत्तरां, दिशम् = आशाम्, अनुसरेः = अनुगमनं कुरु।

**(ख) भावार्थः**- हे मेघ! हिमालयतटपार्श्वे द्रष्टव्यान् पदार्थान् वीक्ष्य हंसानां मानससरोमर्त्यलोकगतागतयोर्मार्गभूतं परशुरामकीर्तिमार्गभूतं यत् क्रौञ्चपर्वतच्छिद्रमस्ति, तेन क्रौञ्चरन्ध्रेण त्वं बलिवशीकरणतत्परस्य वामनावतारस्य नारायणस्य वक्रायातश्यामपाद इव शोभायमानः सन् उत्तराभिमुखं दिशमनुसर।

**छन्दः** - श्लोकेऽस्मिन् मन्दाक्रान्ता छन्दः। तल्लक्षणं पूर्ववदेव।

**अलङ्कारः** - 'यशोवर्त्म' इत्यत्रारोपाद्रूपकः। 'विष्णोः पाद इव' इत्यत्र श्रौत्युपमाऽलङ्कारः। इत्थं तयोः निरपेक्षस्थितित्वात् संसृष्टिरलङ्कारः।

**विशेषांशः** - तेनोदीचीम् - तेन+उदीचीम् (गुणसन्धिः)
प्रालेयाद्रेः - प्रालेयस्य अद्रिः, तस्य (षष्ठी तत्पुरुषः)।
अतिक्रम्य - अति+क्रम+क्त्वा स्थाने ल्यप् आदेशे।
'प्रालेयं मिहिका च' इत्यमरः।

## श्लोकः ६२

**प्रसङ्गः** - श्लोकेऽस्मिन् यक्षः सन्निकृष्टं गिरीशनिवासभूतमुज्ज्वलकैलासं गन्तुं मेघमुपदिशति-

**गत्वा चोर्ध्वं दशमुखभुजोच्छ्वासितप्रस्थसन्धेः**
**कैलासस्य त्रिदशवनितादर्पणस्यातिथिः स्याः।**
**शृङ्गोच्छ्रायैः कुसुमविशदैर्यो वितत्य स्थितः खं**
**राशीभूतः प्रतिदिनमिव त्र्यम्बकस्याट्टहासः॥६२॥**

**अन्वयः** - ऊर्ध्वं च गत्वा दशमुखभुजोच्छ्वासितप्रस्थसन्धेः त्रिदशवनितादर्पणस्य कैलासस्य अतिथिः स्याः। यः कुमुदविशदैः शृङ्गोच्छ्रायैः खं वितत्य प्रतिदिनं राशीभूतः त्र्यम्बकस्य अट्टहास इव स्थितः।

**व्याख्या - (क) पर्यायपदानि** - (हे मेघ!) ऊर्ध्वम् = उपरि, च = तथा, गत्वा = व्रजित्वा,



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

दशमुखभुजोच्छ्वासितप्रस्थसन्धेः = रावणबाहुविश्लेषितशृङ्गसन्धेः, त्रिदशवनितादर्पणस्य = सुरयोषिन्मुकुरभूतस्य, कैलासस्य स्फटिकत्वाद् रजतत्वाद्वा बिम्बग्राहित्वेनेदमुक्तम्। कैलासस्य = कैलासपर्वतस्य, अतिथिः = आगन्तुकः, स्याः = भवेः। यः = कैलासः, कुमुदविशदैः = श्वेतपद्मधवलैः, शृङ्गोच्छ्रायैः = शिखरोन्नत्ये, खम् = आकाशं, विततय = व्याप्य 'विस्तीर्य' प्रतिदिनं = प्रतिदिवसं, राशीभूतः = एकत्रीभूतः, त्र्यम्बकस्य = त्रिलोचनस्य, अट्टहासः = अतिशयहासः, इव = यथा, स्थित = विद्यमानः अस्तीति शेषः।

**(ख) भावार्थः** – हे मेघ! त्वं क्रौञ्चबिलनिर्गमनान्तरमुपरि च गत्वा रावणबाहुविश्लेषितशृङ्गसन्धेः देवाङ्गनामुकुरभूतस्य कैलासस्यातिथिर्भव यः कैलासः कुमुदवत् स्वच्छैः शिखराणाम् औन्नत्यैः आकाशं व्याप्य स्थितः सन् शिवस्य प्रतिदिनम् एकत्रीभूतस्य हासस्य राशिरिव विद्यमानोऽस्ति।

**छन्दः** – श्लोकेऽस्मिन् मन्दाक्रान्ता छन्दः। तल्लक्षणं पूर्ववदेव।

**अलङ्कारः** – 'कुमुदविशदैः' इत्यत्रोपमालङ्कारः। 'अट्टहास इव' इत्यत्रोत्प्रेक्षालङ्कारः। इत्थं तयोरङ्गाङ्गिभावेन स्थितित्वात् सङ्करालङ्कारोऽत्र।

**विशेषांशः** – चोर्ध्वम् – च+ऊर्ध्वम् (गुणसन्धिः)

प्रतिदिनम् – दिनं दिनं प्रति इति प्रतिदिनम् (अव्ययीभाव समासः)

'अमरा निर्जरा देवास्त्रिदशा विबुधाः सुराः' इत्यमरः।

## श्लोकः ६३

**प्रसङ्गः** – श्लोकेऽस्मिन् महाकविकालिदासः मेघे शिखरारूढे सति कैलासस्य शोभा नीलवसनधारी बलराम इव दर्शनीया भवेदिति यक्षमुखात् प्रस्तौति –

**उत्पश्यामि त्वयि तटगते स्निग्धभिन्नाञ्जनाभे**
**सद्यः कृत्तद्विरददशनच्छेदगौरस्य तस्य।**
**शोभामद्रेः स्तिमितनयनप्रेक्षणीयां भवित्री-**
**मंसन्यस्ते सति हलभृतो मेचके वाससीव॥६३॥**

**अन्वयः** – स्निग्धभिन्नाञ्जनाभे त्वयि तटगते सद्यः कृत्तद्विरददशनच्छेदगौरस्य तस्य अद्रेः मेचके वाससि अंसन्यस्ते सति हलभृत इव स्तिमितनयनप्रेक्षणीयां शोभां भवित्रीम् उत्पश्यामि।

**व्याख्या – (क) पर्यायपदानि** – (हे मेघ!) स्निग्धभिन्नाञ्जनाभे = मसृणमर्दितकज्जलद्युतौ, त्वयि = भवति, तटगते = शिखरारूढे (सति), सद्यः = तत्कालं, कृत्तद्विरददशनच्छेदगौरस्य = छिन्नकरिदन्तशुभ्रस्य, तस्य = पूर्वोपात्तस्य, अद्रेः = नगस्य, कैलासस्येति भावः, मेचके = कृष्णे, वाससि = अम्बरे, अंसन्यस्ते = स्कन्धस्थापिते, सति, हलभृतः = बलरामस्य, इव = यथा, स्तिमितनयनप्रेक्षणीयां = निश्चलनेत्रावलोकनीयां, शोभां = द्युतिं, भवित्रीं = भाविनीम्, उत्पश्यामि = तर्कयामि सम्भावयामि वा। अर्थात् नीलवसनधारिणो बलरामस्य शोभा इव तव शोभा भाविनी इति उत्प्रेक्षे इत्याशयः।

**(ख) भावार्थः**– हे मेघ! मसृणकज्जलकान्तौ त्वयि कैलासशिखरम् आरूढे सति सद्यः छिन्नगजदन्तस्य खण्डवत् कैलासपर्वतस्य श्यामले वस्त्रे स्कन्धप्रावृत्ते सति बलभद्रस्येव निश्चलनेत्रदर्शनीयां कान्तिं भाविनीमुत्प्रेक्षेऽहम्।

**छन्दः** – श्लोकेऽस्मिन् मन्दाक्रान्ता छन्दः। तल्लक्षणं पूर्ववदेव।

**अलङ्कारः** – कज्जलजलदयोः, कृष्णाम्बरमेघयोः बलरामकैलासयोश्च सादृश्यादत्रोपमाऽलङ्कारः।

**विशेषांशः** – वाससीव – वाससि + इव (दीर्घसन्धिः)

हलभृतः– हलं बिभर्तीति हलभृत् तस्य (उपपद तत्पु०)।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

प्रेक्षणीयाम् – प्र+ईक्ष्+अनीयर्+टाप्।

'चिक्कणं मसृणं स्निग्धम्' इत्यमरः।

## श्लोकः ६४

**प्रसङ्गः** – श्लोकेऽस्मिन् यक्षः मेघं कैलासे स्वच्छन्दं विचरतोः शिवपार्वत्योः शृङ्गारोहणक्रियायां सोपानत्वमधिगन्तुमुपदिशति –

**हित्वा तस्मिन्भुजगवलयं शम्भुना दत्तहस्ता**
**क्रीडाशैले यदि च विचरेत्पादचारेण गौरी।**
**भङ्गीभक्त्या विरचितवपुः स्तम्भितान्तर्जलौघः**
**सोपानत्वं कुरु मणितटाऽरोहणायाग्रयायी॥६४॥**

**अन्वयः** – तस्मिन् क्रीडाशैले शम्भुना भुजगवलयं हित्वा दत्तहस्ता (सती) गौरी यदि पादचारेण विचरेत् (तर्हि) अग्रयायी स्तम्भितान्तर्जलौघः भङ्गीभक्त्या विरचितवपुः मणितटारोहणाय सोपानत्वं कुरु।

**पर्यायपदानि – (क) व्याख्या** – (हे मेघ!) तस्मिन् = पूर्वोक्ते, क्रीडाशैले = केलिपर्वते, कैलास इति भावः, शम्भुना = भगवता शिवेन, भुजगवलयं = सर्पकङ्कणं, हित्वा = परित्यज्य, गौरीभीतिनिवारणायेति शेषः, दत्तहस्ता = समर्पितकरा सती, गौरी = पार्वती, यदि = चेत्, पादचारेण = चरणसंचारेण, विचरेत् = विहरेत्, तर्हि, अग्रयायी = पुरोगतः तथा स्तम्भितान्तर्जलौघः = प्रतिरुद्धान्तर्वारिधारः, भङ्गीभक्त्या = पर्वरचनया, विरचितवपुः = निर्मितशरीरः 'कल्पितदेहः' सन्, मणितटारोहणाय = मणितटाख्यस्थानम् आरोढुं, सोपानत्वं = सोपानकार्यं, कुरु = विधेहि, सोपानरूपो भवेति तात्पर्यम्।

**(ख) भावार्थः**– हे मेघ! तस्मिन् क्रीडापर्वते कैलासे भगवता शङ्करेण देव्यास्त्रासनिवारणार्थं भुजगवलयं परित्यज्य अवलम्बितकरा सती पार्वती पादसञ्चारेण विहरेत् चेत्तर्हि त्वं पुरोगामी सन् प्रतिरुद्धान्तर्वारिप्रवाहः पर्वरचनया कल्पितशरीरत्वं मणितटारोहणाय सोपानकार्यं कुरु।

**छन्दः** – श्लोकेऽस्मिन् मन्दाक्रान्ता छन्दः। तल्लक्षणं पूर्ववदेव।

**अलङ्कारः** – अत्र भुजगे वलयारोपात् रूपकमलङ्कारः।

**विशेषांशः** – जलौघः – जल+ओघः = जलौघः (वृद्धिसन्धिः)

भङ्गीभक्त्या – भङ्गीनां भक्तिः तया (षष्ठी तत्पुरुषः)। विरचितवपुः – विरचितं वपुः येन सः (बहुव्रीहिः)। स्तम्भितान्तर्जलौघः – स्तम्भितः अन्तः जलौघः येन सः (बहुव्रीहिः)। दत्तहस्ता – दत्तः हस्तः यया, सा (बहुव्रीहिसमासः)।

'आरोहणं स्यात् सोपानम्' इत्यमरः।

## श्लोकः ६५

**प्रसङ्गः** – श्लोकेऽस्मिन् यक्षः निदाघलब्धं मेघं गर्जितुमुपदिशति यस्माद्धेतोः देवाङ्गनास्तं मेघं मुञ्चन्तु –

**तत्रावश्यं वलयकुलिशोद्घट्टनोद्गीर्णतोयं**
**नेष्यन्ति त्वां सुरयुवतयो यन्त्रधारागृहत्वम्।**
**ताभ्यो मोक्षस्तव यदि सखे! घर्मलब्धस्य न स्यात्**
**क्रीडालोलाः श्रवणपरुषैर्गर्जितैर्भाययेस्ताः॥६५॥**

**अन्वयः**– तत्र अवश्यं सुरयुवतयः वलयकुलिशोद्घट्टनोद्गीर्णतोयं त्वां यन्त्रधारागृहत्वं नेष्यन्ति। सखे! यदि



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

घर्मलब्धस्य तव ताभ्य: मोक्ष: न स्यात्, (तर्हि) क्रीडालोला: ता: श्रवणपरुषै: गर्जितै: भाययेः।

**व्याख्या – ( क ) पर्यायपदानि** – (हे मेघ!) तत्र = तस्मिन् अद्रौ (कैलासे), सुरयुवतयः = देवाङ्गनाः, वलयकुलिशोद्घट्टनोद्गीर्णतोयं = कङ्कणाग्रप्रहारोत्सृष्टवारिं, त्वां = मेघम्, अवश्यं = नूनमेव, यन्त्रधारागृहत्वं = कृत्रिमधारागृहत्वं, नेष्यन्ति = प्रापयिष्यन्ति, हे सखे! = हे सुहृद्!, यदि = चेत्, घर्मलब्धस्य = निदाघप्राप्तस्य, तव = भवत: मेघस्य, ताभ्यः = सुरवनिताभ्यः, मोक्षः= मुक्तिः, न = नहि, स्यात् = भवेत्, तर्हि, क्रीडालोलाः = केलिचपलाः, ताः = देवाङ्गनाः, श्रवणपरुषैः = श्रुतिकटुभिः, गर्जितैः = निर्घोषैः, भाययेः = त्रासयेः।

**( ख ) भावार्थ:**– हे मेघ! तस्मिन् कैलासाद्रौ कटककोटिप्रहारोत्सृष्टजलं त्वामवश्यं कृत्रिमधारागृहत्वं विधास्यन्ति। हे मित्र! यदि तव ताभ्यो देववनिताभ्यो मुक्तिर्न भवेत्तर्हि क्रीडाचञ्चला: ता: युवतय: श्रुतिकटुभि: स्तनितै: त्रासयेः।

**छन्दः** – श्लोकेऽस्मिन् मन्दाक्रान्ता छन्दः। तल्लक्षणं पूर्ववदेव।

**अलङ्कार:** – श्लोकेऽस्मिन् परिणामोऽप्रस्तुतप्रशंसा चालङ्कारः।

**विशेषांश:** – मोक्षस्तव – मोक्षः + तव (विसर्गसन्धिः) वलयकुलिशोद्घट्टनोदगीर्णतोयम् – वलयकुलिशानाम् उद्घट्टमानिं वलयकुलिशोद्घट्टनानि (ष०तत्पुरुषः) तैः उद्गीर्णं तोयं येन सः तम् (बहुव्रीहिः) सुरयुवतयः – सुराणां युवतयः (षष्ठी तत्पुरुष समासः)।

'कटको वलयोऽस्त्रियाम्' इत्यमरः।

'अथ मित्रं सखा सुहृद्' इत्यमरः।

## श्लोक: ६६

**प्रसङ्गः** – श्लोकेऽस्मिन् महाकविकालिदासः यक्षमुखात् मेघं ज्ञापयति यत् कैलासस्य सम्पूर्णमुपभोगं स्वेच्छया कुरु –

**हेमाम्भोजप्रसवि सलिलं मानसस्याददानः**
**कुर्वन्कामं क्षणमुखपटप्रीतिमैरावतस्य।**
**धुन्वन्कल्पद्रुमकिसलयान्यंशुकानीव वातै–**
**र्नानाचेष्टैर्जलद! ललितैर्निर्विशेस्तं नगेन्द्रम्॥ ६६॥**

**अन्वय:** – हे जलद! हेमाम्भोजप्रसवि मानसस्य सलिलम् आददानः ऐरावतस्य क्षणमुखपटप्रीतिं कुर्वन् अंशुकानि इव कल्पद्रुमकिसलयानि वातैः धुन्वन् नानाचेष्टैः ललितैः तं नगेन्द्रं कामं निर्विशेः।

**व्याख्या – ( क ) पर्यायपदानि** – हे जलद! = हे मेघ!, हेमाम्भोजप्रसवि = सुवर्णपद्मजनकं, मानसस्य = मानसरोवरस्य, सलिलं = जलम्, आददानः = गृह्णन् पिबन्निति तात्पर्यम्, ऐरावतस्य = ऐरावतस्य = इन्द्रगजस्य, क्षणमुखपटप्रीतिं = मुहूर्तवदनाच्छादनाम्बरप्रणयं, कुर्वन् = विदधत्, अंशुकानि = सूक्ष्मवस्त्राणि इव = यथा, कल्पद्रुमकिसलयानि = देवदारुपल्लवान्, वातैः = पवनैः, धुन्वन् = कम्पयन्, नानाचेष्टैः = विविधव्यापारैः, ललितैः = क्रीडाविलासैः, तं = पूर्वोक्तं, नगेन्द्रं = पर्वतराजं कैलासमिति भावः, कामं = यथेष्टं, निर्विशेः = उपभुङ्क्ष्व।

**( ख ) भावार्थ:**– हे मित्र! त्वं स्वर्णकमलजनकं मानसरोवरस्य जलं पिबन् किञ्चिन्मुहूर्तं यावत् इन्द्रगजस्यैरावतस्य वदनावगुण्ठनवस्त्रं भूत्वाऽवगुण्ठनाऽऽनन्दं प्रयच्छन् सूक्ष्मवस्त्राणीव कल्पद्रुमकिसलयानि पवनैः कम्पयन् नानाविधैः व्यापारैः क्रीडितैः पर्वतराजं कैलासं यथेष्टम् उपभुङ्क्ष्व।

**छन्दः** – श्लोकेऽस्मिन् मन्दाक्रान्ता छन्दः। तल्लक्षणं पूर्ववदेव।

**अलङ्कार:** – 'अंशुकानि इव' इत्यत्रोत्प्रेक्षाऽलङ्कारः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**विशेषांश:** – किसलयान्यंशुकानि – किसलयानि + अंशुकानि (यण्सन्धि:)
नानाचेष्टै: – नाना (बहुविधा:) चेष्टा: येषु तै: (बहुव्रीहि)
'निर्वेशो भृतिभोगयो:' इत्यमर:।

## श्लोक: ६७

**प्रसङ्ग:** – श्लोकेऽस्मिन् कविताकामिनीविलास: महाकविस्तत्रभवान् शृङ्गाररसिक: कालिदास: कैलासोत्सङ्गे नायिकेव स्रस्तगङ्गादुकूलामलकां वर्णयति –

**तस्योत्सङ्गे प्रणयिन इव स्रस्तगङ्गादुकूलां**
**न त्वं दृष्ट्वा न पुनरलकां ज्ञास्यसे कामचारिन्।**
**या व: काले वहति सलिलोद्गारमुच्चैर्विमाना**
**मुक्ताजालग्रथितमलकं कामिनी वाभ्रवृन्दम्॥६७॥**

**अन्वय:** – हे कामचारिन्! प्रणयिन इव तस्य उत्सङ्गे स्रस्तगङ्गादुकूलाम् अलकां दृष्ट्वा त्वं पुन: न ज्ञास्यसे (इति) न। उच्चैर्विमाना या व: काले सलिलोद्गारम् अभ्रवृन्दं कामिनी मुक्ताजालग्रथितम् अलकम् इव वहति।

**व्याख्या – (क) पर्यायपदानि** – हे कामचारिन्! = हे स्वेच्छासञ्चरणशील मेघ!, प्रणयिन: = वल्लभस्य, इव = यथा, तस्य = कैलासाख्यपर्वतस्य, उत्सङ्गे = क्रोडे, ऊर्ध्वभागे, स्रस्तगङ्गादुकूलां = च्युतगङ्गाशुभ्रवस्त्राम्, अलकाम् = एतन्नाम्नीं कुबेरपुरीं, दृष्ट्वा = अवलोक्य, न = नहि, ज्ञास्यसे = अवगतो भविष्यसि, (इति = एवं), न = नहि (अर्थात् नूनं ज्ञास्यस्येव) उच्चैर्विमाना = उन्नतसप्तभूमिकप्रासादा, या = अलका, व: = युष्माकं, काले = समये (वर्षाकाले इत्यर्थ:) सलिलोद्गारं = स्रवज्जलधारम्, अभ्रवृन्दं = मेघसमूहं, कामिनि = रमणी स्त्री, मुक्ताजालग्रथितं = मौक्तिकसरगुम्फितम्, अलकं = चूर्णकुन्तलं, केशपाशमिति तात्पर्यम्, इव = यथा, वहति = बिभर्ति।

**संस्कृत-भावार्थ:** – हे स्वेच्छाचारिन् मेघ! प्रियतमस्येव तस्य कैलासस्योत्सङ्गे च्युतभागीरथीदुकूलामलकापुरीं कामिनीमिव दृष्ट्वा त्वं पुन: ज्ञास्यस्येव, सप्तोन्नतभवना या अलका वर्षर्तौ स्रवज्जलधारं मेघसमूहं कामिनी मौक्तिकसरगुम्फितं चूर्णकुन्तलमिव बिभर्ति।

**छन्द:** – श्लोकेऽस्मिन् मन्दाक्रान्ता छन्द:। तल्लक्षणं पूर्ववदेव।

**अलङ्कार:** – अत्र कैलासे प्रणयि साम्यं वाच्यं तथा च अलकाया प्रणयिनी साम्यं गम्यमस्ति। अतोऽत्र एकदेशविवर्तिनी उपमा श्लोकोत्तरार्द्धे श्रौत्युपमा। इत्थं तयो: निरपेक्षस्थितित्वात् संसृष्टिरलङ्कार:। एवं चोत्सङ्गे विमाने च श्लेषालङ्कार:। एवं श्लेषोपमयोरङ्गाङ्गिभावत्वादत्र सङ्करालङ्कार:।

**विशेषांश:** – सलिलोद्गारम् – सलिल + उद्गारम् (गुणसन्धि:)
अभ्रवृन्दम् – अभ्राणां वृन्दम् (षष्ठी तत्पुरुषसमास:)।
'अलकारश्चूर्णकुन्तला:' इत्यमर:।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## अभ्यास-प्रश्नाः

### (क) वस्तुनिष्ठप्रश्नाः –

**निर्देशः** – निम्नाङ्कितप्रश्नेषु उचितविकल्पस्य वर्णाङ्कं कोष्ठके चिनुत –

१. शम्भोः केशग्रहणम् अकरोत् –

(क) अलका (ख) देवाङ्गना

(ग) जह्नोः कन्या (घ) सगरतनया ( )

२. शुभ्रत्रिनयनवृषोत्खातपङ्कोपमेयां शोभां वक्ष्यति –

(क) मेघः (ख) स्कन्दः

(ग) यक्षः (घ) शिवः ( )

३. हिमालये कस्य समग्रः सङ्गीतार्थः भावी ननु –

(क) स्कन्दस्य (ख) विष्णोः

(ग) पशुपतेः (घ) मानसस्य ( )

४. हेमाम्भोजप्रसवि सलिलमस्ति –

(क) गङ्गायाः (ख) निर्विन्ध्यायाः

(ग) रेवायाः (घ) मानसस्य ( )

५. सरलस्कन्धसंघट्टजन्मा वर्तते –

(क) शिप्रावातः (ख) दावाग्निः

(ग) वाडवाग्निः (घ) जठराग्निः ( )

६. त्रिपुरविजयः गीयते –

(क) देवाङ्गनाभिः (ख) पौराङ्गनाभिः

(ग) सिद्धवनिताभिः (घ) किन्नरीभिः ( )

### (ख) अतिलघूत्तरात्मकप्रश्नाः –

**निर्देशः** – निम्नाङ्कितप्रश्नानाम् एकपङ्क्तावेव उत्तराणि लेख्यानि –

१. जह्नोः कन्या का आसीत् ?

२. उत्तमानां सम्पदः किंविधाः भवन्ति ?

३. हिमालये मेघस्याध्वानं के लङ्घयेयुः ?

४. दृषदि कस्य चरणन्यासं व्यक्तम् ?

५. बलिनियमनाभ्युद्यतस्य कस्य श्यामः पादः इव मेघः वर्णितः ?

६. कस्योत्सङ्गे स्रस्तगङ्गादुकूला अलकापुरी वर्तते ?

### (ग) लघूत्तरात्मकप्रश्नाः –

**निर्देशः** – निम्नाङ्कितप्रश्नानां पञ्चसु पङ्क्तिषु उत्तराणि लेख्यानि –



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

१. गङ्गानद्या: वैशिष्ट्यं स्वशब्देषु वर्णयत।
२. मेघेन शरभाणां प्रतीकार: कथं करणीय: ?
३. क्रौञ्चपर्वतस्य किंविधं वैशिष्ट्यं मेघदूते वर्णितम् ?
४. कैलासपर्वतस्य वर्णनं प्रतिपादनीयम्।
५. अलकापुर्या: सौन्दर्यं महाकविना कथं वर्णितम् ?

**( घ ) निबन्धात्मकप्रश्ना: –**

**निर्देश:** – निम्नाङ्कितश्लोकानां सप्रसङ्गं व्याख्या कार्या –

१. तस्माद् गच्छे .................................................. लग्नोर्मिहस्ता ॥
२. शब्दायन्ते ...................................................... भावी समग्र: ॥
३. तस्योत्सङ्गे .................................................... याऽभ्रवृन्दम् ॥

**निर्देश: – निम्नाङ्कितश्लोकानां भावार्थ: संस्कृते लेखनीय: –**

१. तं चेद्वायौ ................................................ संपदो ह्युत्तमानाम् ॥
२. ये संरम्भोत्पतन ...................................... निष्फलारम्भयत्ना: ॥
३. प्रालेयाद्रे ...................................... नगेन्द्रम् ॥

**निर्देश: – निम्नाङ्कितसूक्तयो: सप्रसङ्गं भावार्थ: संस्कृते लेखनीय:–**

१. आपन्नार्तिप्रशमनफला: सम्पदो ह्युत्तमानाम् ॥
२. के वा न स्यु: परिभवपदं निष्फलारम्भयत्ना: ॥



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## पूर्वमेघे सूक्तय:

| सूक्तय: | | श्लोकसंख्या: |
|---|---|---|
| १. | मेघालोके भवति सुखिनोऽप्यन्यथावृत्तिचेत:। | |
| | कण्ठाश्लेषप्रणयिनि जने किं पुनर्दुरसंस्थे॥ | ३ |
| २. | कामार्त्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु। | ५ |
| ३. | याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा। | ६ |
| ४. | क: सन्नद्धे विरहविधुरां त्वय्युपेक्षेत जायाम्। | |
| | न स्यादन्योऽप्यहमिव जनो य: पराधीनवृत्ति:॥ | ८ |
| ५. | आशाबन्ध: कुसुमसदृशं प्रायशो ह्यङ्गनानाम्। | |
| | सद्य: पाति प्रणयि हृदयं विप्रयोगे रुणद्धि॥ | ९ |
| ६. | न क्षुद्रोऽपि प्रथमसुकृतापेक्षया संश्रयाय। | |
| | प्राप्ते मित्रे भवति विमुख: किं पुनर्यस्तथोच्चै:॥ | १७ |
| ७. | रिक्त: सर्वो भवति हि लघु: पूर्णता गौरवाय। | २० |
| ८. | स्त्रीणामाद्यं प्रणयवचनं विभ्रमो हि प्रियेषु। | २९ |
| ९. | मन्दायन्ते न खलु सुहृदामभ्युपेतार्थकृत्या:। | ४२ |
| १०. | ज्ञातास्वादो विवृतजघनां को विहातुं समर्थ:। | ४५ |
| ११. | आपन्नार्तिप्रशमनफला: सम्पदो ह्युत्तमानाम्। | ५७ |
| १२. | के वा न स्यु: परिभवपदं निष्फलारम्भयत्ना:। | ५८ |

## अकारादिक्रमेण श्लोकानुक्रमणिका

| क्रमसंख्या | श्लोकाद्याक्षर: | श्लोकसंख्या |
|---|---|---|
| १. | अद्रे शृङ्गे हरति | १४ |
| २. | अप्यन्यस्मिन् जलधर | ३८ |
| ३. | अम्भोबिन्दु ग्रहण | २२ |
| ४. | आपृच्छस्व प्रियसखममुम् | १२ |
| ५. | आराध्यैनं शरवणभवं | ४९ |
| ६. | आसीनानां सुरभितशिलं | ५६ |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## भासस्य जीवनवृत्तम्

महाकविकालिदाससदृशं तथा च भारविसदृशं भासेन अपि स्वजीवनसम्बन्धे कुत्रापि उल्लेखः न कृतः। तस्य रूपकाणाम् अध्ययनेन ज्ञायते यत् भासः वर्णाश्रमव्यवस्थायाः आश्रमव्यवस्थायाः च पूर्णसमर्थकः आसीत्। सः विद्वान्, सत्यवादी, धर्मप्रियः नाटककारः च आसीत्। भासः साहित्यशास्त्रस्य मर्मज्ञः तु आसीदेव सहैव वेदपुराणानां, रामायणस्य, महाभारतस्य, अर्थशास्त्रस्य, राजनीतिशास्त्रस्य धर्मशास्त्रस्य च ज्ञाता आसीत्।

## भासस्य स्थितिकालः

१. महाकविना कालिदासेन ''मालविकाग्निमित्रम्'' नाटके भासस्य उल्लेखः कृतः। कालिदासस्य समयः ई०पू० प्रथमशताब्दी अस्ति। अतः भासः निश्चितरूपेण कालिदासात् पूववर्ती प्रसिद्धः नाटककर्त्ता आसीत्।

२. अश्वघोषेन रचितेन 'बुद्धचरितम्' महाकाव्यस्य त्रयोदशतमसर्गस्य सप्तमपद्यं भासस्य 'प्रतिमानाटकस्य' प्रथमाङ्कस्य अष्टादशतमेन पद्येन सह साम्यतां स्थापयति, अतः भासः अश्वघोषात् पूर्ववर्ती आसीत् इति अनुमीयते।

३. भासस्य रूपकाणां मूलाधारः रामायणं, महाभारतं, श्रीमद्भागवद् लोककथाश्च सन्ति। राजा उदयनः, प्रद्योतः दर्शकश्च ई०पू० षष्ठीशताब्द्याः ऐतिहासिकपुरुषाः आसन्। अतः भासस्य समयः ई०पू० षष्ठी शताब्दी इति सिद्धः भवति।

४. अविमारकं, प्रतिज्ञायौगन्धारणं स्वप्नवासवदत्तं च एतेषु नाटकेषु ऐतिहासिकतथ्यानि प्राप्यन्ते। राजगृहस्य राजधानीरुपेण पाटलिपुत्रस्य साधारणनगररूपेण वर्णनमस्ति। अतः भासस्य समयः पञ्चमीशताब्दी स्वीकर्तुं शक्यते।

निष्कर्षतः अन्तः एवं बाह्यसाक्ष्याधारेण नाटककर्तुः भासस्य स्थितिकालः ई०पू० तृतीय तथा च ई०पू० चतुर्थीशताब्दी मध्ये आसीत् इति युक्तियुक्तः प्रतीयते।

## भासस्य नाटकानि

कविताकामिन्याः मधुरहासः महाकविभासः संस्कृतनाटकलेखकेषु अग्रगण्यः सर्वश्रेष्ठनाटककर्ता च अस्ति। भासः संस्कृतसाहित्येतिहासे गीर्वाणवाण्याः तादृशः अमरः कविः अस्ति, यस्य कृतीनां नामानि अद्यतनवैज्ञानिकयुगेऽपि प्राथम्येनागच्छति। वस्तुतः संस्कृतनाट्यकलाक्षेत्रे भासस्य महत्त्वपूर्णं स्थानं वर्तते। भासः विश्वनाट्यकलायाः अनुपमशृङ्गारः अस्ति।

महाकवेः भासस्य त्रयोदशरूपकाणि प्राप्तानि सन्ति। विषयानुसारम् एतेषां रूपकाणां पञ्चप्रकारेण विभाजनं कृतमस्ति। नाटकद्वयं रामायणाश्रितं सप्तनाटकानि महाभारताश्रितं नाटकद्वयञ्च उदयनस्य चरित्रसम्बन्धि नाटकद्वयं कल्पनाश्रितं पुनश्च एकं नाटकं भागवत्कथाश्रितमस्ति। भासस्य सर्वेषु नाटकेषु मौलिकतायाः कल्पनाशक्तेश्च दर्शनं प्रचुरमात्रायां भवति।

भासस्य नाटकानां संक्षिप्तपरिचयः निम्न प्रकारेण अस्ति –

**१. अभिषेकनाटकम्** – षडङ्कानां नाटकमिदं रामायणमाश्रित्य अस्ति। एतस्मिन् नाटके किष्किन्धाकाण्डतः रामस्य राज्याभिषेकपर्यन्तं कथायाः वर्णनमस्ति। रामस्य राज्याभिषेककथाकारणात् एव एतस्य नाटकस्य नाम ''अभिषेकनाटकम्'' इति कृतम्।

**२. प्रतिमानाटकम्** – सप्ताङ्कानां रामायणमाश्रित्य लिखितम् इदं नाटकं घटनाप्रधानम् अस्ति। अस्मिन् नाटके रामवनगमनतः रावणवधपर्यन्तं सम्पूर्णा घटना संक्षिप्तरूपेण वर्णिता अस्ति। तृतीयाङ्के भरतः मातुलगृहात् आगत्य इक्ष्वाकुवंशीयराज्ञां प्रतिमामन्दिरं गच्छति। एतां घटनामेव आधारीकृत्य अस्य नाटकस्य नाम प्रतिमानाटकं स्थापितम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**३. पञ्चरात्रम्** – अत्र त्रयः अङ्काः सन्ति तथा च महाभारतस्य कथाम् आधारीकृत्य लिखितमेतत् नाटकं समवकारः अस्ति।

**४. मध्यमव्यायोगः** – महाभारतस्य कथामाधारीकृत्य लिखितेऽस्मिन् नाटके एकः एव अङ्कः अस्ति। एषः व्यायोगः अस्ति। भीमः स्वकीयपुत्रघटोत्कचात् एकस्य ब्राह्मणपुत्रस्य रक्षां करोति। व्यायोगस्यान्ते भीमस्य (मध्यमस्य)। हिडिम्बायाः (भीमस्य पत्न्याः) तथा च घटोत्कचस्य (भीमस्य पुत्रस्य) परस्परं मधुरमेलनं भवति।

**५. उरुभङ्गम्** – महाभारतस्य कथामाधारीकृत्य लिखितमेतत् दुःखदनाटकम् एकांकि एव। भीमसेनदुर्योधनयोः अन्तिम महायुद्धस्य मार्मिकं वर्णनमत्र कृतमस्ति।

**६. कर्णभारम्** – एतदपि महाभारतस्य कथाम् आधारीकृत्य एकांकिरूपकमेव। अत्र दानवीरकर्णस्योदात्तचरित्रं वर्णितमस्ति।

**७. दूतवाक्यम्** – महाभारतस्य कथानकमाधारीकृत्य अयमेकांकी व्यायोगः अस्ति। अस्मिन् भगवान् श्रीकृष्णः पाण्डवपक्षतः सन्धिप्रस्तावं संधार्य कौरवानां शिविरं गच्छति।

**८. दूतघटोत्कचम्** – महाभारतस्य कथामाधारीकृत्य इदमपि एकांकिरूपकमेव। अस्य कथा अर्जुनपुत्र-अभिमन्योः मृत्योः अनन्तरं प्रारब्धा भवति। अभिमन्योः मृत्योः कारणं जयद्रथं मत्वा अर्जुनः तं मारयितुं प्रतिज्ञां करोति। श्रीकृष्णः भीमपुत्रं घटोत्कचं दूतरूपेण कौरवनरेशस्य धृतराष्ट्रस्य समीपं प्रेषयति।

**९. बालचरितम्** – पञ्चाङ्कानां भगवदाश्रितं रूपकमिदम्। अस्मिन् नाटके भगवतः श्रीकृष्णस्य जन्मतः कंसवधपर्यन्तं कथा वर्णितास्ति। मुख्यरूपेण भगवतः श्रीकृष्णस्य बालसुलभक्रीडायाः वर्णनकारणात् एतस्य नाम बालचरितं स्थापितम्।

**१०. प्रतिज्ञायौगन्धरायणम्** – एतस्मिन् नाटके चत्वारः अङ्काः सन्ति। अस्मिन् राजानम् उदयनं उज्जैनस्य राज्ञः प्रद्योतात् मुक्तं कारयितुम् उदयनस्य मंत्री यौगन्धरायणः प्रतिज्ञां करोति। अन्ते यौगन्धरायणस्य प्रतिज्ञा सफला भवति। अतः अस्य नाटकस्य नाम प्रतिज्ञायौगन्धरायणम् इति जातम्।

**११. स्वप्नवासवदत्तम्** – षड्-अङ्कानां नाटकमिदं भासस्य नाटकेषु प्रसिद्धमस्ति। एतस्य नाटकस्य कथाऽपि प्रतिज्ञायौगन्धरायणवत् उदयनसम्बन्धिनी एव अस्ति।

**१२. अविमारकम्** – षड्-अङ्कयुक्तमिदं कल्पनाश्रितमेव। अस्मिन् राज्ञः कुन्तिभोजस्य पुत्र्याः कुरङ्ग्याः तथा च राज्ञः सौवीरराजस्य पुत्रस्य विष्णुसेनस्य प्रणयप्रसङ्गः वर्णितः अस्ति। विष्णुसेनस्य एव अपरं नाम अविमारकः अस्ति।

**१३. चारुदत्तम्** – कल्पनामूलके एतस्मिन् प्रकरणे चत्वारः अङ्काः सन्ति। अस्मिन् निर्धनस्य किन्तु उदारब्राह्मणस्य चारुदत्तस्य तथा च उज्जैनस्य गणिकायाः वसन्तसेनायाः सात्विकप्रेम्णः वर्णनमस्ति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# महाकविश्रीभासप्रणीतं प्रतिमानाटकं
## प्रमुखपात्राणां चरित्र-चित्रणम्

### रामः

प्रतिमानाटकस्य नायको ऽस्ति मर्यादापुरुषोत्तमः श्रीरामः। सः सर्वगुणसम्पन्नो धीरोदात्तनायकः। धीरोदात्तनायकस्य लक्षणम् आचार्यविश्वनाथेन उक्तम् –

**''अविकत्थनः क्षमावानतिगम्भीरो महासत्त्वः।**
**स्थेयान्निगूढमानो धीरोदात्तो दृढव्रतः कथितः॥''**

रामः निष्कामभावनया जीवनस्य कठोरकार्यक्षेत्रे अवतीर्य अन्ते अद्भुतवीरतया दृढसंकल्पेन सह लङ्कायाः साम्राज्यं प्राप्य पुनः दैन्यवशात् मित्राय विभीषणाय सम्पूर्णं राज्यं समर्पयति। रामः प्रकृत्या एव पराक्रमी, धीरः, गम्भीरः सुशीलतायाश्च प्रतिमूर्तिरस्ति। सः कैकेय्या प्रदत्तं चतुर्दशवर्षाणां वनवासं सहर्षं स्वीकरोति। सः त्यागी, भ्रातृस्नेही पितृभक्तः च अस्ति। ''मर्यादा पुरुषोत्तमः'' इति विशेषणं सार्थकतां प्रददाति। सः प्रजायाः पालनं स्वकीय-कुलव्रतमिति विचिन्त्य धर्मम् आचरति।

**''धर्मेण लोकपरिरक्षम् अभ्युपेतम्''**

### सीता

''सीता'' भासकृतप्रतिमानाटकस्य नायिका अस्ति। सा भूमेः उत्पन्ना मिथिला नरेशस्य जनकस्य पुत्री अस्ति। सीता उदारतायाः, कोमलतायाः, शीलतायाः, संयमितायाः, मधुरतायाः, गंभीरतायाः, धीरतायाः संवेदनशीलतायाश्च प्रतिमूर्तिः अस्ति। रामेण सह वनगनमकाले अपि सा एतावद् एव कथयति यत् –

**''ननु सहधर्मचारिणी खल्वहम्''**

सा पतिपरायणा स्त्री अस्ति। वनवासकाले यदा रामः वनगमनात् सीतां वारयति तदा सा वदति –

**''तत् ( वनं ) तु मे प्रासादः।''**

दशरथः अपि रोदनं कुर्वन् वदति –

**''हा साध्वि मैथिलि पतिस्थितचित्तवृत्ते।''**

षष्ठे अङ्के भरतः अपि सीतायाः विषये वदति –

**''अपि दुष्टं द्विधाभूतम् अरुन्धतीचारित्रम्।''**

सप्तमे अङ्के स्वयं मर्यादापुरुषोत्तमः रामः सीतायाः विषये कथयति –

**''जगति गुणसमग्रां प्राप्य सीतां विशुद्धाम्।''**

महाकवि भासेन प्रतिमानाटके सीता आदर्श नारीरूपेण स्थापिता अस्ति।

### लक्ष्मणः

लक्ष्मणस्य चरित्रम् आदर्शचरित्रमस्ति। यदा स ज्ञातवान् यत् सर्वेषाम् अनर्थानां मूलकारणं कैकेयी अस्ति तदा अकारणमेव रामस्य वनगमनेन क्षुब्धो भूत्वा सः सम्पूर्णं संसारमेव स्त्रीरहितं कर्तुमिच्छति –

**''युवति रहितं लोकं कर्तुम्''**

ज्येष्ठभ्रातरं रामं प्रति लक्ष्मणस्य अत्यधिकः स्नेहः अस्ति। सः रामाय परामर्शं ददाति यत् धनुर्विद्यायाः प्रयोगं कृत्वा रामः राज्यं प्राप्नुयात्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**धनुः स्पृश मा दया ..................... क्रम प्राप्ते हस्ते राज्ये।**

लक्ष्मणस्य चरित्रे त्यागशीलता, भ्रातृप्रेम, आत्मविश्वासः, वीरता, उत्साहः, सजीवता, स्वाभाविकता आदि गुणाः सन्ति।

## भरतः

दशरथस्य तृतीयायाः भार्यायाः कैकेय्याः पुत्रः अस्ति भरतः। रामं प्रति तस्य स्नेहः, श्रद्धा भक्तिभावः च अद्वितीयः अस्ति।

भरतः तातेन दशरथेन सह अपि हार्दिकस्नेहं करोति। मातुलगृहात् आगत्य यदा सः प्रतिमागृहे महाराजदशरथस्य प्रतिमां पश्यति तदा किमपि अनिष्टं विचित्य मोहमुपगच्छति। यदा सः ज्ञातवान् यत् रामस्य राज्याभिषेकस्य स्थाने तस्य वनगमनम् अभूत्। ततश्चः परिणामस्वरूपं तातस्य मरणं कैकेय्याः कारणात् अभूत् तदा सः कोपेन कौसल्या-सुमित्रयोः मध्ये स्थितां कैकेयीं गंगा-यमुनयोः मध्ये क्षुद्रनदी इव वदति -

**मम मातुश्च मातुश्च मध्यस्था त्वं न शोभसे।**
**गङ्गायमुनयोर्मध्ये कुनदीव प्रवेशिता॥**

परन्तु कालान्तरे षष्ठाङ्के यदा सः ज्ञातवान् यत् अन्धऋषेः (श्रवणस्य तातस्य) श्रापकारणात् तातस्य पुत्रवियोगेन मृत्युः सञ्जातः तथा च वशिष्ठादीनाम् ऋषीणाम् अनुमतिं स्वीकृत्य एव कैकेयी रामं वनवासं प्रेषितवती तदा भरतः शिशुवत् मातुः समक्षे क्षमायाचनां करोति -

"अम्ब! यद् भ्रातृस्नेहात् समुत्पन्नमन्युना मया दूषितात्र भवती तत् सर्वं मर्षयितव्यम्।"

## दशरथः

महाराजदशरथः अयोध्यायाः प्रजापालकः इक्ष्वाकुवंशीयमहाराजस्य अजस्य पुत्रः मर्यादापुरुषोत्तमस्य रामस्य च तातः अस्ति। एतस्य चत्वारः पुत्राः सन्ति - रामः, लक्ष्मणः, भरतः शत्रुघ्नश्च। किन्तु रामस्योपरि एतस्य विशेषरूपेण स्नेहः अस्ति। पुत्रस्नेहकारणात् एव रामं वनं प्रेषयितुं संकोचं करोति -

"सत्यवचनरक्षणपरं राममरण्यः गच्छन्तमुपावर्तयितुमशक्तः पुत्रविरहशोकाग्निना दग्ध हृदय उन्मत्त इव बहु प्रलपन् समुद्रगृहके शयानः।"

स्वप्रतिज्ञानुसारं सः रामं वनं तु प्रेषयति, किन्तु पुत्रवियोगात् उत्पन्नात् शोककारणात् स्वप्राणान् त्यजति -

**"राम-वैदेही-लक्ष्मण। अहमितः पितर्गीं सकाशं गच्छामि।"**

दशरथः वीरयोद्धा अस्ति। सः देवासुरसंग्रामे देवपक्षात् युद्धं करोति।

इत्थं प्रकारेण राजादशरथः न केवलं पुत्रप्रेमी अपितु साहसी, प्रजापालकः, कर्त्तव्यपालकः तथा च दृढप्रतिज्ञः अस्ति।

## सुमन्त्रः

प्रतिमानाटकस्य सर्वाणि पात्राणि सुमन्त्रेण सह प्रत्यक्षाप्रत्यक्षरूपेण वा सम्बन्धितानि सन्ति। महाराज्ञाः कैकेय्याः आदेशं प्राप्य सुमन्त्रः एव महाराजस्य दशरथस्य श्रापग्रस्तघटनायाः रहस्योद्घाटनं करोति -

"श्रूयतां - पुरमृगयां गतेन महाराजेन कस्मिंश्चित् सरसि कलशं पूरयमाणो वनगजबृंहितानुकारिशब्द समुत्पन्नवनगजशङ्कया शब्दबेधिना शरेण विपनचक्षुषो महर्षेश्चक्षुर्भूतो मुनितनयोर्हिंसितः। इति।

प्रथमाङ्के राज्याभिषेकावसरे यत्र सुमन्त्रस्य प्रसन्नतायाः दर्शनं भवति तत्रैव अरण्यात् आगत्य सीताहरणस्य दुःखदघटनां श्रावयन् काले स्वकीयदीर्घायोः उपरि रोदनं करोति -

**अन्वास्मानश्चिरंजीवदोषैः कृतघ्नभावेन विडम्ब्यमानः।**
**अहं हि तस्मिन् नृपतौ विपन्ने जीवामि शून्यस्य रथस्य सूतः॥**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# महाकविश्रीभासप्रणीतं प्रतिमानाटकं
## पात्र – परिचयः

### पुरुषपात्राणि

| | | | |
|---|---|---|---|
| 1. | सूत्रधारः | – | नाटकस्य स्थापकः। |
| 2. | राजा | – | अयोध्यापतिः दशरथः। |
| 3. | रामः | – | दशरथस्य ज्येष्ठात्मजः नाटकनायकः। |
| 4. | लक्ष्मणः | – | रामानुजः सुमित्रातनयः दशरथस्य तृतीयात्मजः। |
| 5. | भरतः | – | कैकेयीनन्दनः, दशरथस्य द्वितीयात्मजः। |
| 6. | शत्रुघ्नः | – | सुमित्रातनयः लक्ष्मणस्य सहोदरः। |
| 7. | सुमन्त्रः | – | दशरथस्य अमात्यः (मन्त्री) सारथिश्च। |
| 8. | सूतः | – | भरतस्य सारथिः। |
| 9. | रावणः | – | नाटकस्य प्रतिनायकः लङ्काधिपः। |
| 10. | देवकुलिकः | – | प्रतिमागृहस्य देवपूजकः। |
| 11. | वृद्धतापसौ | – | युद्धदर्शकौ। |
| 12. | नन्दिलकः | – | तपस्विपरिजनः। |
| 13. | तपसः | – | दण्डकारण्यतपस्वी। |
| 14. | भटः | – | राजपुरुषः। |
| 15. | सुधाकारः | – | प्रतिमागृहस्य सुधालेपकः। |
| 16. | काञ्चुकीयः | – | अन्तःपुरस्थः वृद्धसेवकः। |

### स्त्रीपात्राणि

| | | | |
|---|---|---|---|
| 1. | नटी | – | सूत्रधारस्य स्त्री। |
| 2. | कौसल्या | – | दशरथस्य प्रथमपत्नी रामस्य जननी। |
| 3. | कैकेयी | – | दशरथस्य द्वितीयपत्नी भरतस्य माता। |
| 4. | सुमित्रा | – | दशरथस्य तृतीयपत्नी लक्ष्मणस्य शत्रुघ्नस्य च माता। |
| 5. | सीता | – | मिथिलाधिपतिजनकस्य पुत्री रामस्य भार्या च। |
| 6. | अवदातिका | – | सीतायाः सखी। |
| 7. | प्रतिहारी | – | अन्तःपुरस्थ द्वारपालिका। |
| 8. | विजया | – | कैकेय्याः अन्तःपुरस्थ प्रतिहारी। |
| 9. | नन्दिनिका | – | कैकेय्याः परिचारिका। |
| 10. | तापसी | – | दण्डकारण्यस्य तपस्विनी। |
| 11. | चेटी | – | सीतायाः दासी। |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# महाकविश्रीभासप्रणीतं प्रतिमानाटकस्य
# कथासार:

**प्रथमोऽङ्कः –**

प्रथमाङ्कस्य प्रारम्भे सूत्रधार: रंगमञ्चोपरि आगत्य नाटकीयकथावस्तु सूचयन् प्रस्तावनां करोति। अयोध्यास्थितमहाराजस्य दशरथस्य राजप्रासादे राज्याभिषेकस्य सिद्धता प्रचलति। प्रतिहारी महाराजस्य दशरथस्य आशाविषये काञ्चुकीत: सम्पूर्णवार्तां ज्ञातुमिच्छति। राजछत्रं राजसिंहासनं हेममया: घटाश्च अभिषेकस्थले निवेशिता: सन्ति।

अन्यत्र जानकी परिचारिकाभि: सह मनोविनोदं कुर्वती अस्ति। एतस्मिन् एव समये सीताया: एका परिचारिका नाट्यशालाया: संरक्षिकाम् अनुक्त्वा एव नाट्यशालात: एकं वल्कलवस्त्रं स्वीकृत्य तत्रागच्छति। सीता परिचारिकां वल्कलं प्रत्यावर्तितुमादिशति किन्तु कौतुकवशात् सीता स्वयं तत्वल्कलं धरति। अपरस्मिन् भागे राजपण्डिता: राज्याभिषेकार्थं महाराजदशरथस्य आदेशस्य प्रतीक्षां कुर्वन्त: आसन्। अकस्मादेव वाद्ययन्त्राणां मङ्गलध्वनि: पिहित:, सम्पूर्णराजभवनम् औदासीन्येन पूरितम्। तदनन्तरं राम: सीताया: समीपम् आगच्छति। सीता अपि राज्याभिषेक- स्थगनस्य कारणं ज्ञात्वा स्तब्धा भवति। तस्मिन्नेव समये महाराजदशरथ: मोहमुपगत:। एष: समाचार: सर्वत्र प्रसरति तथापि राम: तातस्य वचनं पालयितुं सहर्षं वनं गन्तुं सिद्ध: भवति। पुन: सीताया: लक्ष्मणस्य च अनुरोधं श्रुत्वा राम: सीतया लक्ष्मणेन च सह वनं प्रति प्रस्थानं करोति।

**द्वितीयोऽङ्कः –**

एतस्मिन् अङ्के शोकेन पीडितस्य महाराजदशरथस्य मार्मिकचित्रणम् अस्ति। रामस्य वनगमनं वारयितुं असमर्थ: महाराजदशरथ: शोकोन्मत्त: सञ्जात: पुन: पुनश्च मोहमुपगच्छति। स भूमौ जलरहितं मीनवत् व्याकुलो भवति। कौशल्या सुमित्रा च महाराजाय धैर्यं धारयत:। तदा एव रामं, लक्ष्मणं सीतां च अयोध्यायात् बहि: परिव्रज्य सुमन्त्र: आगच्छति। सुमन्त्रस्य आगमनस्य तथा च रामस्य वनगमनस्य समाचारं श्रुत्वा महाराजदशरथ: मूर्छितो भूत्वा पतति प्राणान् त्यजति च।

**तृतीयोऽङ्कः –**

भरत: द्वादशवर्षानन्तरं तातस्य अस्वस्थताया: समाचारं श्रुत्वा मातुलगृहात् अयोध्याम् आगच्छन् अस्ति। दिवङ्गतानां रघुवंशिराज्ञां यस्मिन् स्थले प्रतिमा: स्थापिता: सन्ति तस्य एव स्थानस्य स्वच्छताकार्यं चलति। दिवङ्गतस्य महाराजदशरथस्य प्रतिमा स्थापिता भवन्ती आसीत्। एतस्मिन् अवसरे सर्वा: अपि राज्य: राजप्रासादात् प्रतिमागृहम् आमन्त्र्य: आसन्। भरत: ''शुभवेलायाम् अयोध्यायां प्रवेश: कर्त्तव्य:'' इति गुरुजनानाम् आदेशं प्राप्य अयोध्याया: सीमाप्रान्ते निर्मितं प्रतिमागृहं विश्रान्तिं कर्तुं गच्छति। स: तत्र गत्वा दिवंगतानां राज्ञां प्रतिमा: प्रणमति। तदा देवकुलिक: आगत्य भरतं वदति यत् एता: देवप्रतिमा: न अपितु इक्ष्वाकुवंशीयदिवङ्गतानां राज्ञां प्रतिमा: सन्ति। एतासां प्रतिमानां दर्शनकाले देवकुलिक: भरताय क्रमश: दिलीपस्य, रघो:, अजस्य दशरथस्य च परिचयं कारयति, दशरथस्य प्रतिमां दृष्ट्वा भरत: मोहमुपगच्छति। भरत: यदा चेतनां प्राप्नोति तदा रामस्य वनगमनं दशरथस्य मरणं च श्रुत्वा पुन: चेतनाशून्य: भवति। एतस्मिन्नेव समये कौशल्या, सुमित्रा कैकेयी चापि प्रतिमागृहमागच्छन्ति। भरत: सम्पूर्णदोषारोपणं स्वकीय-अम्बाया: कैकेय्या: उपरि एव करोति। अत एव कौसल्याया: सुमित्राया: च अभिवादनं करोति किन्तु



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

कैकेय्या: अभिवादनं न करोति। स: कैकेय्या: उपालम्भनं करोति। अंकस्य अन्ते रामम् अरण्यात् पुन: अयोध्यामानेतुं भरत: सुमन्त्रेण सह अयोध्यात: प्रस्थानं करोति।

**चतुर्थोऽङ्क: –**

राम: सीतया लक्ष्मणेन च सह दण्डकारण्ये तपस्विरूपेण निवसति। यदा सुमन्त्रेण सह भरत: रामस्य पर्णकुटीरम् आगच्छति तदा भरतस्य स्वरेण भरतं परिज्ञाय राम: तेन सह मेलितुम् उत्सुको: सञ्जात:। भरत: रामं प्रार्थयति यत् स: अपि रामेण सहैव वने निवासं कुर्यात्। किन्तु राम: स्वकीयां चरणपादुकां प्रदाय भरतं बोधयित्वा अयोध्यां प्रेषयितुम् इच्छति। भरत: प्रतिज्ञां करोति यत् यावत् चतुर्दशवर्षानन्तरं रामस्य वनवासव्रतस्य समाप्ति: न भविष्यति तावत्कालपर्यन्तं भवत: पादुकयो: आज्ञाकारिरूपेण स्थास्यामि तथा च चतुर्दशवर्षान्ते भवान् पुन: राज्यं प्रतिग्रहीष्यति इति। विषयद्वयस्य कृते रामस्य स्वीकृतिं स्वीकृत्य भरत: अयोध्यां गन्तुम् अनुमतिं स्वीकरोति।

**पञ्चमोऽङ्क: –**

राम: चिन्तित: अस्ति यत् अरण्ये तातस्य दशरथस्य संवत्सरश्राद्धविधि: विधिपूर्वकं कथं भविष्यति? तदा एव परिव्राजकवेषरूपेण रावण: तत्र आगच्छति। वार्तालापक्रमे स: आत्मानं शास्त्रज्ञ: वदति। यदा राम: ज्ञातवान् यत् एष: प्राचेतस: श्राद्धकल्पं जानाति तदा राम: परिव्राजकं पृच्छति यत् ''भगवन्! निर्वपनक्रियाकाले (पिण्डदानकाले) केन पितॄंस्तर्पयामि''? तदा रावण: वदति यत् हिमवत: सप्तमे शृङ्गे काञ्चनपार्श्वा नाम मृगा: निवसन्ति। तै: काञ्चनपार्श्वहरिणै: सन्तुष्टा: पितृगणा: पुत्रोत्पत्तिप्रयोजनं प्राप्नुवन्ति। तदा राम: तान् मृगान् आनेतुं हिमालयं गन्तुं सिद्ध: भवति। तस्मिन् एव समये रावण: स्वमायया काञ्चनपार्श्वमृगं तत्रैव प्रकटीकरोति। राम: तं मृगमनुसृत्य दूरं गच्छति तथा च लक्ष्मण: पूर्वकालादेव तीर्थयात्रात: उपावर्तमानकुलपते: स्वागतार्थं कुटीरात् बहि: गत: आसीत्। अतिथिसत्कारार्थं सीता कुटीरात् बहि: एव आसीत्। छद्मरूपकधारक: रावण: सीतायै स्वकीयं वास्तविकं परिचयं ददाति तथा च भयम् उत्पाद्य बलात् तस्या: अपहरणं करोति। अपहृताया: सीताया: करुणक्रन्दनं श्रुत्वा जटायु: सीताया: रक्षां कर्तुमागच्छति।

**षष्ठोऽङ्क: –**

रावणेन सह युद्धं कुर्वन् जटायु: वीरगतिं प्राप्नोति। दण्डकारण्यस्य द्वौ तपस्विजनौ सीताहरणं जटायुमरणं च घटनां श्रावयितुं रामस्यान्वेषणं कुरुत:। पुन: रामस्य समाचारं ज्ञातुं दण्डकारण्यमायात: सुमन्त्र: अपि अयोध्याम् आगत्य रावणेन सीता अपहृता तथा च राम: ऋष्यमूकपर्वतं गत: इति सूचनां भरताय ददाति। सीताहरणेन शोकाकुलो भूत्वा भरत: कैकेय्या: उपरि एव कोपं प्रकटयति किन्तु कैकेय्या: अनुमतिं प्राप्य सुमन्त्र: अन्धमुनिना दशरथाय य: शाप: दत्त:, तस्य सम्पूर्णवार्त्तां श्रावयति। एतत् श्रुत्वा भरतस्य कोप: शान्त: भवति। पुन: कैकेयी वदति यत् व्याकुलतावशात् तस्या: मुखात् चतुर्दशदिनानि स्थाने चतुर्दशवर्षाणि निर्गतं तथा च वशिष्ठादि ऋषिजनानाम् आज्ञानुसारमेव सा एतत् कार्यं कृतवती। भरत: कैकेय्या: वचनात् सन्तुष्टो भूत्वा रावणस्योपरि आक्रमणं कर्त्तुं सैन्यशक्तिम् एकत्रितं करोति।

**सप्तमोऽङ्क: –**

रावणं समूलं नाशयित्वा विशुद्धां सीतां तथा च लक्ष्मणं स्वीकृत्य राम: पुन: दण्डाकारण्यम् आगच्छति। तत्रागत्य ते सर्वे पुरातनानि दिनानि संस्मृत्य सुखम् अनुभवन्ति। पुन: किञ्चिदग्रे गत्वा सैन्यसहितं मातृभि: सह भरत: आगच्छति। तत्र सर्वेषां मधुरमेलनं भवति। चतुर्दशवर्षाणां वनवास-अवधि: समागत:। अत: भरत: राज्यभारं ग्रहीतुं रामं प्रार्थयति। कैकेय्या: अनुमतिं स्वीकृत्य राम: स्वकीयं राज्याभिषेकं कारयति। तत्पश्चात् पुष्पकविमानम् आरुह्य ते सर्वे अयोध्यां प्रति प्रस्थानं कुर्वन्ति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**महाकविश्रीभासप्रणीतं**

# 'प्रतिमानाटकम्'

## अथ प्रथमोऽङ्कः

(नान्द्यन्ते ततः प्रविशति सूत्रधारः।)

**सूत्रधारः** -

**सीताभवः पातु सुमन्त्रतुष्टः सुग्रीवरामः सह लक्ष्मणश्च।**
**यो रावणार्यप्रतिमश्च देव्या विभीषणात्मा भरतोऽनुसर्गम्॥ १॥**

**प्रसङ्गः** - प्रस्तुतश्लोके सूत्रधारः कथयति यत् सीतासुमन्त्रसुग्रीवलक्ष्मणविभीषणभरतसहितं रामः अस्माकं रक्षां कुर्यात्।

**अन्वयः** - यः देव्याः रावणार्यप्रतिमः, विभीषणात्मा सीताभवः, सुमन्त्रतुष्टः सह लक्ष्मणः भरतः च सुग्रीवरामः अनुसर्गं पातु।

**व्याख्या - (क) पर्यायपदानि** - यः = रामः, देव्याः = सीतायाः, रावणार्यप्रतिमः = सीतापहरणकारणेन रावणस्य शत्रुः, अप्रतिमः = निरूपमः, विभीषणात्मा = रावणस्यानुजस्य प्रियकर्त्ता, भयङ्करस्वरूपश्च, सीताभवः = सीतायाः भवः, क्षेमकारकः, सुमन्त्रतुष्टः = शोभनमन्त्रेण, तुष्टः = मुदितः, यद्वा सुमन्त्रनाम्ना दशरथसारथिभूतेन सचिवेन तुष्टः सह लक्ष्मणः = लक्ष्मण सहितः, भरतः च = भरणकर्ता, भरतेन सह वा, सुग्रीवरामः = सुग्रीवश्चांसौ रामश्च शोभनकण्ठश्च रामः, अनुसर्गं = सर्गे-सर्गे, जन्मनि-जन्मनि, प्रादुर्भाववानसौ रामः, पातु = विघ्नापनयनपूर्वकमस्मान् सामाजिकांश्च रक्षतु।

**(ख) भावार्थः** - यः मर्यादापुरुषोत्तमः रामः जानक्याः क्षेमकारकः, शोभनमन्त्रैः मुदितः (सन्तुष्टः) अथवा सुमन्त्रनाम्नासारथिना तुष्टः, लक्ष्मणेन सह वर्तमानः अथवा शोभनचिह्नयुक्तः, सीतापहरणकारणेन रावणस्य शत्रुः अप्रतिद्वन्द्वी रावणानुजस्य प्रियकर्त्ता अथवा दुष्टानां कृते भयंकरस्वरूपश्च, भरणकर्त्ता अथवा भरतेन सह शोभनकण्ठो राघवः अथवा सुग्रीवसहितः रामः सर्वदा (विघ्नापनयनपूर्वकं) युष्मान् अस्मांश्च (सामाजिकांश्च) रक्षतु।

**विशेषः** - अस्मिन् श्लोके उपजातिछन्दः अस्ति। उपजातिछन्दसि इन्द्रवज्रा उपेन्द्रवज्रा चानयोः मिश्रणं भवति। लक्षणमिदं -

स्यादिन्द्रवज्रा यदि तौ जगौ गः।
उपेन्द्रवज्रा जतजास्ततो गौ॥
अनन्तरोदीरित लक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः।

अत्र हेतु-अलङ्कारः परिकरालङ्कारश्च स्तः।

साहित्यदर्पणकारेण उक्तम् -

**नान्दी** - आशीर्वचनसंयुक्ता स्तुतिर्यस्मात् प्रयुज्यते।
देवद्विजनृपादीनां तस्मान्नन्दीति संज्ञिता॥

**सूत्रधारः** - सूत्रं धारयतीति सूत्रधारः।

**उक्तं च** - नाट्यस्य यदनुष्ठानं तत्सूत्रं स्यात् सबीजकम्।
सङ्गदैवतपूजाकृत्सूत्रधार उदीरितः॥

**अपि च** - वर्तनीयतया सूत्रं प्रथमं येन सूच्यते।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

सङ्गभूमिं समाक्रम्य सूत्रधारः स उच्यते।

(नेपथ्याभिमुखमवलोक्य)

आर्ये ! इतस्तावत्

(प्रविश्य)

**नटी** – अय्य ! इअह्मि। [आर्य ! इयमस्मि]

**सूत्रधारः** – आर्ये ! इममेवेदानीं शरत्कालमधिकृत्य गीयतां तावत्।

**नटी** – अय्य ! तह [आर्य ! तथा।] (गायति)

**सूत्रधारः** – अस्मिन् हि काले,

**चरति पुलिनेषु हंसी काशांशुकवासिनी सुसंहृष्टा।**

(नेपथ्ये)

अय्य ! अय्य ! [आर्य ! आर्य !]

(आकर्ण्य)

**सूत्रधारः** – भवतु विज्ञातम्।

**मुदिता नरेन्द्रभवने त्वरिता प्रतिहाररक्षीव॥ २॥**

**प्रसङ्गः** – प्रस्तुतश्लोके सूत्रधारः शरत्ऋतोः वर्णनं कुर्वन् अस्ति।

**अन्वयः** – काशांशुकवासिनी सुसंहृष्टा हंसी पुलिनेषु मुदिता त्वरिता प्रतिहाररक्षी इव नरेन्द्रभवने चरति॥

**व्याख्या –( क ) पर्यायपदानि** – काशांशुकवासिनी = काशांशु काशपुष्पप्रभा कवासिनी, जलवासिनी च, अथवा श्वेतकुसुमवस्त्रावृत्तं नदीतीरं तत्र वासिनी, सुसंहृष्टा = अतीव प्रसन्ना, हंसी = वरटा, पुलिनेषु = नदीसैकतस्थलीषु। मुदिता = सन्तुष्टा, त्वरिता = कार्यवशात् सञ्जातत्वरा, प्रतिहाररक्षीव = द्वाराधिकृतेव, (सा = हंसी) नरेन्द्रभवने = नरेन्द्रस्य दशरथस्य भवने, चरति = गमनागमनं करोति।

**( ख ) भावार्थः** – श्वेतकुसुमवस्त्रेणावृत्तं जलवासिनी अतीव प्रसन्ना वरटा (हंसी) नदीबालुकास्थलेषु विहरति। यथा नृपस्य – दशरथस्य भवने (शुभ्रवसना) प्रसन्ना ससभ्रमा (शीघ्रतापूर्वकं) द्वारपालिका भ्रमति।

**विशेषः** – श्लोकेऽस्मिन् आर्या छन्दोऽस्ति। अस्य लक्षणमिदं –

यस्याः पादे प्रथमे द्वादशमात्रास्तथा तृतीयेऽपि।
अष्टादश द्वितीये चतुर्थके पञ्चदश सार्या॥

(निष्क्रान्तौ)

स्थापना

(प्रविश्य)

**प्रतिहारी** – अय्य ! को इह कञ्चुईआणां सण्णिहिदो। [आर्य ! क इह काञ्चुकीयानां सन्निहितः।]

(प्रविश्य)

**काञ्चुकीयः** – भवति अयमस्मि। किं क्रियताम्?

**प्रतिहारी** – अय्य! महाराओ देवासुरसङ्गामेसु अप्पडिहदमहारहो दसरहो आणवेदि – सिग्धं



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

भट्टिदारअस्स रामस्स रज्जप हासङ्घाअकारआ अहिसेअसम्भारा आणीअन्तुत्ति। [आर्य! महाराजो देवासुरसङ्ग्रामेष्वप्रतिहतमहारथो दशरथ आज्ञापयति – शीघ्रं भर्तृदारकस्य रामस्य राज्यप्रभावसंयोगकारका अभिषेकसम्भारा आनीयन्तामिति।]

**काञ्चुकीयः** – भवति! यदाज्ञप्तं महाराजेन तत् सर्वं सङ्कल्पितम्। पश्य –

**छत्रं सव्यजनं सनन्दिपटहं भद्रासनं कल्पितं**
**न्यस्ता हेममयाः सदर्भकुसुमास्तीर्थाम्बुपूर्णाः घटाः।**
**युक्तः पुष्यरथश्च मन्त्रिसहिताः पौराः समभ्यागताः**
**सर्वस्यास्य हि मङ्गलं स भगवान् वेद्यां वसिष्ठः स्थितः॥३॥**

**प्रसङ्गः** – प्रस्तुतश्लोके महाराजदशरथस्य आज्ञानुसारं राजकुमाररामस्य राज्याभिषेकस्य सिद्धतायाः वर्णनं कृतमस्ति।

**अन्वयः** –छत्रं, सव्यजनं, सनन्दिपटहं, भद्रासनं (च) कल्पितम्। सदर्भकुसुमाः तीर्थाम्बुपूर्णाः हेममया घटाः न्यस्ताः। पुष्यरथश्च युक्तः। मन्त्रिसहिताः पौराः समभ्यागताः। अस्य सर्वस्य हि मंगलं स भगवान् वसिष्ठः वेद्यां स्थितः अस्ति।

**व्याख्या – ( क ) पर्यायपदानि** – छत्रं = राजधारणीयं, धवलमातपत्रं, सव्यजनं = वीजनसाधनसहितं, सचामरं, सनन्दिपटहं = नन्दिरानन्दस्तस्य तत्कालोपयुक्तः पटहो नन्दिपटहस्तत्सहितं, भद्रासनं = सिंहासनं, कल्पितम् = उपस्थापितं, सदर्भकुसुमाः = दर्भैः = कुशैः, कुसुमैः = पुष्पैश्च सहिताः, तीर्थाम्बूपूर्णाः = गंगादितीर्थविशेषोदकपूर्णाः, हेममयाः = सौवर्णाः, घटाः = कलशाः, न्यस्ताः = अभिषेकभूमौ निवेशिताः। पुष्यरथश्च = क्रीडाविहारप्रयोजनो रथविशेषश्च, युक्तः = योजितः। मन्त्रिसहिताः = सचिवैः संयुक्ताः, पौराः = नगरवासिनो जनाः, समभ्यागताः = अभिषेकदर्शनेन निजाक्षीणि सफलयितुमुपस्थिताः। अस्य = पूर्वकथितस्य, सर्वस्य = मंगलोपकरणस्य, हि = यतः, मंगलं = कुशलकारणं, सः = असौ, भगवान् वसिष्ठः = गुरुवसिष्ठः, वेद्याम् = अनुष्ठानस्थाने, स्थितः = अनुष्ठापकत्वेन वर्तमान इति।

**( ख ) भावार्थः** – चामरसहितं राजधारणीयं धवलतमालपत्रं माङ्गलिककपटहवाद्ययुक्तं राजसिंहासनम् उपस्थापितमस्ति। कुशैः पुष्पैश्च सहिता गङ्गादितीर्थविशेषोदकपूर्णाः सौवर्णाः कलशाः अभिषेकभूमौ निवेशिताः सन्ति। क्रीडाविहारप्रयोजनो रथविशेषः अश्वैः संयुक्तो विलसति। सचिवैः युक्ताः नगरवासिनो जनाः राज्याभिषेकदर्शनार्थम् उपस्थिताः। (राज्याभिषेकदर्शनेन निजाक्षीणि सफलयितुमुपस्थिताः) पूर्वकथितस्य मङ्गलोपकरणस्य निश्चयेन क्षेमकारणं प्रसिद्धः सङ्ैश्वर्यवान् पूज्यगुरुवशिष्ठः अनुष्ठानस्थले अनुष्ठापकत्वेन विराजते।

**विशेषः** – श्लोकेऽस्मिन् शार्दूलविक्रीडितं छन्दः। अस्य लक्षणमिदं –

'सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम्।'

अत्र स्वाभाविकवर्णनकारणात् स्वभावोक्तिरलङ्कारोऽपि अस्ति।

**प्रतिहारी** – जइ एव्वं, सोहणं किदम्। [यद्येवं शोभनं कृतम्]

**काञ्चुकीयः** – हन्त भोः!

**इदानीं भूमिपालेन कृत्कृत्याः कृताः प्रजा।**
**रामाभिधानं मेदिन्यां शशाङ्कमभिषिञ्चता॥४॥**

**प्रसङ्गः** – एतस्मिन् श्लोके राजकुमाररामस्य राज्याभिषेकस्य तथा च प्रजायाः प्रसन्नतायाः वर्णनमस्ति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**अन्वय:** –इदानीं भूमिपालेन मेदिन्यां रामाभिधानं, शशांकम् अभिषिञ्चता प्रजा: कृतकृत्या: कृता: ।

**व्याख्या – ( क ) पर्यायपदानि** – इदानीम् = अधुना, भूमिपालेन = राज्ञा, मेदिन्यां = पृथिव्यां, रामाभिधानं = रामनामकं, शशांकं = चन्द्रमसम्, अभिषिञ्चता = राज्ये अभिषेच्यता, प्रजा: = जना:, कृतकृत्या: = फलितमनोरथा:, कृता: = विहिता: ।

**( ख ) भावार्थ:** – अधुना पृथिव्यां रामनामकं चन्द्रमसं सिंहासने राज्ये अभिषेञ्चता राज्ञा दशरथेन प्रजाजना: कृतकृत्या: फलितमनोरथा: विहिता: ।

**विशेष:** – अस्मिन् श्लोके अनुष्टुप् छन्द: रूपकालङ्कारश्च अस्ति ।

**प्रतिहारी** – तुवरदु तुवरदु दाणिं अय्यो । [ त्वरतां त्वरतामिदानीमार्य: ]

**काञ्चुकीय:** – भवति ! इदं त्वर्यते ।

( निष्क्रान्त: )

**प्रतिहारी** – अय्य ! संभवअ ! संभवअ ! गच्छ, तुवं वि महाराअवअणेण अय्यपुरोहिदं जहोपआरेण तुवारेहि । सारसिए ! सारसिए ! सङ्गीदसालं गच्छिअ नाडईआणं विष्णवेहि – कालसंवादिणा णाडएण सज्जा होहत्ति । जाव अहं वि सव्वं किदं त्ति महाराअस्स णिवेदेमि । (परिक्रम्यावलोक्य) [आर्य ! सम्भवक ! सम्भवक ! गच्छ, त्वमपि महाराजवचनेनार्यपुरोहितं यथोपचारेण त्वरय । (अन्यतो गत्वा) सारसिके ! सारसिके ! सङ्गीतशालां गत्वा नाटकीयानां विज्ञापय – कालसंवादिना नाटकेन सज्जा भवतेति । यावदहमपि सर्वं कृतमिति महाराजाय निवेदयामि ।]

( निष्क्रान्ता )

( तत: प्रविशत्यवदातिका वल्कलं गृहीत्वा)

**अवदातिका** – अहो अच्चाहिदं परिहासेण वि इमं वक्कलं उवणअन्तीए मम एत्तिअं भअं आसी, किं पुण लोभेण परधणं हरन्तस्स । हसिदुं विअ इच्छामि । ण खु एआइणीए हसिदव्वं । [अहो अत्याहितम् । परिहासेनापीमं वल्कलमुपनयन्त्या ममैतावद् भयमासीत्, किं पुनर्लोभेन परधनं हरत: । हसितुमिवेच्छामि । न खल्वेकाकिन्या हसितव्यम् ।]

(तत: प्रविशति सीता सपरिवारा)

**सीता** – हञ्जे ! ओदादिआ परिसङ्किदवण्णा विअ दिस्सइ । किंणुहु विअ एदं । [हञ्जे ! अवदातिका परिशङ्कितवर्णेव दृश्यते । किन्नु खल्वितैतत् ।]

**चेटी** – भिट्टिणि ! सुलहावराहो परिअणो णाम । अवरज्झा भविस्सदि । [भट्टिनि ! सुलभापराध: परिजनो नाम । अपराद्धा भविष्यति ।]

**सीता** – णहि णहि, हसिदुं विअ इच्छदि । [नहि नहि, हसितुमिवेच्छति ।]

**अवदातिका** – (उपसृत्य) जेदु भट्टिणि । भट्टिणि ! ण खलु अहं अवरज्झा । [जयतु भट्टिनि, भट्टिनि ! न खल्वहमपराद्धा ।]

**सीता** – का तुमं पुच्छदि । ओदादिए ! किं एदं वामहत्थ परिगहिदं । [का त्वां पृच्छति । अवदातिके ! किमेतद् वामहस्तपरिगृहीतम् ।]

**अवदातिका** – भट्टिणि ! इदं वक्कलं । [भट्टिनि ! इदं वल्कलम् ।]



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**सीता** – वक्कलं किस्स आणीदं। [वल्कलं कस्मादानीतम्]

**अवदातिका** – सुणादु भट्टिणि। णेवच्छपालिणी अय्यरेवा णिव्वुत्त रङ्गप्पओअणं असोहरुक्खस्स एकं किसलअं अह्मेहि जाइदा आसि। ण अ ताए दिण्णं। तदो अरिहदि अवराहो त्ति इदं गहिदं। [शृणोतु भट्टिनि। नेपथ्यपालिन्यार्य रेवा निवृत्तरङ्गप्रयोजनमशोकवृक्षस्यैकं किसलयमस्माभिर्याचितमासीत्। न च तया दत्तम् ततोऽर्हत्यपराध इतीदं गृहीतम्।]

**सीता** – पावअं किदं! गच्छ, णिय्यादेहि। [पापकं कृतम्। गच्छ, निर्यातय।]

**अवदातिका** – भट्टिणि! परिहासनिमित्तं खु मए एदं आणीदं। [भट्टिनि! परिहासनिमित्तं खलु मयैतदानीतम्।]

**सीता** – उन्मत्तिए! एव्वं दोसो वड्ढइ। गच्छ, णिय्यादेहि णिय्यादेहि। [उन्मत्तिके? एवं दोषो वर्धते। गच्छ, निर्यातय निर्यातय।]

**अवदातिका** – जं भट्टिणि आणवेदि। [यद् भट्टिन्याज्ञापयति।] (प्रस्थातुमिच्छति)

**सीता** – हला एहि दाव। [हला एहि तावत्।]

**अवदातिका** – भट्टिणि! इअह्मि। [भट्टिनि! इयमस्मि।]

**सीता** – हला! किंणुहु मम वि दाव सोहदि। [हला! किन्नु खलु ममापि तावत् शोभते।]

**अवदातिका** – भट्टिणि! सव्वसोहणीअं सुरूवं णाम। अलङ्करोतु भट्टिणि। [भट्टिनि! सर्वशोभनीयं सुरूपं नाम। अलङ्करोतु भट्टिनि।]

**सीता** – आणेहि दाव! हला! पेक्ख, किं दाणि सोहदि? [आनय तावत् (गृहीत्वालंकृत्य) हला! पश्य, किमिदानीं शोभते?]

**अवदातिका** – तव खु सोहदि णाम। सौवण्णिअं विअ वक्कलं संवुत्तं। [तव खलु शोभते नाम। सौवर्णिकमिव वल्कलं संवृत्तम्।]

**सीता** – हञ्जे! तुवं किञ्चि ण भणसि। [हञ्जे! त्वं किञ्चिन्न भणसि।]

**चेटी** – णत्थि वाआए पओअणं। इमे पहरिसिदा तणूरुहा। [नास्ति वाचा प्रयोजनम्। इमानि प्रहृषितानि तनूरुहाणि।]

**सीता** – हञ्जे! आदंसअं दाव आणेहि। [हञ्जे! आदर्शं तावदानय।]

**चेटी** – जं भट्टिणि आणवेदि। [यद् भट्टिन्याज्ञापयति।] (निष्क्रम्य प्रविश्य)

भट्टिणि! अजं आदंसओ। [भट्टिनि! अयमादर्शः।]

**सीता** – (चेटीमुखं विलोक्य) चिट्ठदु दाव आदंसओ। तुवं किं वि वत्तुकामा विअ। [तिष्ठतु तावदादर्शः। त्वं किमपि वक्तुकामेव।]

**चेटी** – भट्टिणि! एवं मए सुदं। अय्यबालाई कंचुई भणादि अहिसेओ अहिसेओ त्ति। [भट्टिनि! एवं मया श्रुतम्। आर्यबालाकिः कञ्चुकी भणति अभिषेकोऽभिषेक इति।]

**सीता** – को वि भट्टा रज्जे भविस्सदि। [कोऽपि भर्ता राज्ये भविष्यति।]

(प्रविश्यापरा)

**चेटी** – भट्टिणि! पिअक्खाणिअं पिअक्खाणिअं। [भट्टिनि! प्रियाख्यानिकं प्रियाख्यानिकम्।]



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**सीता** – किं किं पडिच्छिअ मन्तेसि। [किं किं प्रतीष्य मन्त्रयसे।]

**चेटी** – भट्टिदारिओ किल अहिसिञ्चीअदि। [भर्तृदारकः किलाभिषिच्यते।]

**सीता** – अवि तादो कुसली। [अपि तातः कुशली।]

**चेटी** – महाराएण एव्व अहिसिञ्चीअदि। [महाराजेनैवाभिषिच्यते।]

**सीता** – जइ एव्वं, दुदीअं में पिअं सुदं। विसालदरं उच्छङ्गं करेहि। [यद्येवं, द्वितीयं मे प्रियं श्रुतम्। विशालतरमुत्सङ्गं कुरु।]

**चेटी** – भट्टिणि! तह। [भट्टिनि! तथा।] (तथा करोति)

**सीता** – आभरणन्यवमुच्य ददाति।

**चेटी** – भट्टिणि! पटहसद्दो विअ। [भट्टिनि! पटहशब्द इव।]

**सीता** – सो एव्व। [स एव।]

**चेटी** – एक्कपदे ओघट्टिअतुह्णीओ पटहसद्दो संवुत्तो। [एकपदे अवघट्टिततूष्णीकः पटहशब्दः संवृत्तः।]

**सीता** – कोणु खु उग्घादो अहिसेअस्स। अहव बहुवुत्तन्ताणि राअउलाणि णाम। [को नु खलूद्घातोऽभिषेकस्य। अथवा बहुवृत्तान्तानि राजकुलानि नाम।]

**चेटी** – भट्टिणि! एवं मए सुदं – भट्टिदारअं अहिसिञ्चअ महाराओ वर्ण गमिस्सदित्ति। [भट्टिनि! एवं मया श्रुतं भर्तृदारकमभिषिच्य महाराजो वनं गमिष्यतीति।]

**सीता** – जइ एव्वं, ण सो अहिसेदओ, मुहोदअं णाम। [यद्येवं, न तदभिषेकोदकं मुखोदकं नाम।]

(ततः प्रविशति रामः)

**रामः** – हन्तः भोः!

**आरब्धे पटहे स्थिते गुरुजने भद्रासने लङ्घिते**
**स्कन्धोच्चारणनम्यमानवदनप्रच्योतितोये घटे।**
**राज्ञाहूय विसर्जिते मयि जनो धैर्येण मे विस्मितः**
**स्वः पुत्रः कुरुते पितुर्यदि वचः कस्तत्र भोः! विस्मयः॥५॥**

**प्रसङ्गः** – प्रस्तुतश्लोके रामस्य राज्याभिषेककार्यक्रमः चलति। तस्मिन् एव अवसरे रामस्य पितृभक्तिः आज्ञाकारिता च दर्शिता अस्ति।

**अन्वयः** – पटहे आरब्धे गुरुजने स्थिते भद्रासने लंघिते घटे स्कन्धोच्चारणनम्यमानवदनप्रच्योतितोये।(सति) राज्ञा आहूय विसर्जिते मयि जनः मे धैर्येण विस्मितः। भोः यदि स्वः पुत्रः पितुः वचः कुरुते तत्र कः विस्मयः।

**व्याख्या -(क) पर्यायपदानि** – पटहे = वाद्यभेदे, आरब्धे = अवघट्टिते सति, गुरजने स्थिते = अभिषेकदर्शनोत्सुकत्वेन गुरुजने उपस्थिते, भद्रासने = सिंहासने, लंघिते = मया रूढे सति, घटे = कलशे, स्कन्धोच्चारणनम्यमानवदनप्रच्योतितोये = स्कन्धोच्चारणेन शिरसि आवर्जनसौकर्याय स्कन्धादूर्ध्वं उत्थाप्य नम्यमानात् वदनात् प्रच्योतितुं शीलमस्येति तथाभूतं, तोयं जलं यस्य तस्मिन् तथाभूते सति, राज्ञा = महाराजेन, आहूय = आकारयित्वा, विसर्जिते = भद्रासनादवतार्य गच्छत्यादिष्टे, मयि = रामे, जनः = लोकः, मे = मम, धैर्येण = गाम्भीर्येण, विस्मितः = आश्चर्यं गतः। भोः यदि = स्यात्, स्वः = औरसः, पुत्रः = सुतः, पितुः = जनकस्य, वचः = वचनं, कुरुते =



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

प्रतिपालयति, तत्र = पित्राज्ञापालने, को विस्मयः, न कोऽपीत्यर्थः।

**( ख ) भावार्थः** – मङ्गलवाद्यभेदे प्रारब्धवादने सति अभिषेकदर्शनोत्सुकत्वेन वशिष्ठादिगुरुजने मन्त्रोपरि विराजमाने राजसिंहासनमपि (रामे) आरूढे सति स्कन्धे अंसे उन्नयनं नम्रीक्रियमाणं मुखं तस्मात् पातोन्मुखतीर्थसलिले नृपेण दशरथेन आकारयित्वा मयि (रामे) सिंहासनादवतार्य गच्छेत्यादिष्ट (सति) जनाः मम धीरतापूर्णाचरणेन आश्चर्यचकिताः जाताः। किन्तु रामः लोकान् पृच्छति यत् भोः लोकाः! यदि स्वकीय–औरसः पुत्रः पितुः (जनकस्य) आदेशं पालयति (अनुसरति) तत्र पित्राज्ञापालने किमाश्चर्यम्? किमप्याश्चर्यं वास्ति इति भावः।

**विशेषः** – श्लोकेऽस्मिन् शार्दूलविक्रीडितम् छन्दः अस्ति। अस्य लक्षणमिदं –

"सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम्"।

अत्र अर्थान्तरन्यासनामकः अलङ्कारोऽपि अस्ति।

विश्रम्यतामिदानीं पुत्रेति स्वयं राज्ञा विसर्जितस्यापनीतभारोच्छ्वसितमिव मे मनः। दिष्ट्या स एवास्मि रामः, महाराज एव महाराजः। (प्रकाशं) यावदिदानीं मैथिलीं पश्यामि।

**अवदातिका** – भट्टिणि! भट्टिदारओ खु आअच्छइ। णावणीदं वक्कलं। [भट्टिनि! भर्तृदारकः खल्वागच्छति। नापनीतं वल्कलम्।]

**रामः** – मैथिलि! किमास्यते।

**सीता** – हं अय्यउत्तो। जेदु अय्यउत्तो। [हम् आर्यपुत्रः! जयत्वार्यपुत्रः]

**रामः** – मैथिलि! आस्यताम्। (उपविशति)

**सीता** – जं अय्यउत्तो आणवेदि। [यद् आर्यपुत्र आज्ञापयति।] (उपविशति)

**अवदातिका** – भट्टिणि! सो एव्व भट्टिदारिअस्स वेसो। अलिअं विअ एवं भवे। [भट्टिनि! स एव भर्तृदारकस्य वेषः। अलीकमिवैतद् भवेत्।]

**सीता** – तादिसो जणो अलिअं ण मन्तेदि। अहव बहुवुत्तन्ताणि राअउलाणि णाम। [तादृशो जनोऽलीकं न मन्त्रयते। अथवा बहुवृत्तान्तानि राजकुलानि नाम।]

**रामः** – मैथिलि! किमिदं कथ्यते?

**सीता** – णखु किञ्चि। इअं दारिका भणादि – अहिसेओ अहिसेओ त्ति। [न खलु किञ्चित्। इयं दारिका भणति – अभिषेकोऽभिषेक इति।]

**रामः** – अवगच्छामि ते कौतूहलम्। अस्त्यभिषेकः। श्रूयताम्।

अद्यास्मि महाराजेनोपाध्यायामात्यप्रकृतिजनसक्षमेकप्रकारसंक्षिप्तं कोसलराज्यं कृत्वा बाल्याभ्यस्तमङ्कमारोप्य मातृगोत्रं स्निग्धमाभाष्य पुत्र! राम! प्रतिगृह्यतां राज्यम्' इत्युक्तः।

**सीता** – तदाणीं अय्यउत्तेण किं भणिदं। [तदानीमार्यपुत्रेण किं भणितम्?]

**रामः** – मैथिलि! त्वं तावत् किं तर्कयसि?

**सीता** – तक्केमि अय्यउत्तेण अभणिअ किञ्च दिग्घं णिस्ससिअ महाराअस्स पादमूलेसु पडिअं ति। [तर्कयाम्यार्यपुत्रेणाभणित्वा किञ्चिद् दीर्घं निःश्वस्य महाराजस्य पादमूलयोः पतितमिति।]

**रामः** – सुष्ठु तर्कितम्। अल्पं तुल्यशीलानि द्वन्द्वानि सृज्यन्ते। तत्र हि पादयोरस्मि पतितः।

**समं बाष्पेण पतता तस्योपरि ममाप्यधः।**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**पितुर्मे क्लेदितौ पादौ ममापि क्लेदितं शिरः ॥६॥**

**प्रसङ्गः** – प्रस्तुतश्लोके पिता-पुत्रयोः स्वाभाविकस्नेहस्य वर्णनं कृतमस्ति।

**अन्वयः** – समं तस्य वाष्पेण ममोपरि पतता मम अधः पतता मम शिरः क्लेदितं मे पितुः पादौ क्लेदितौ च।

**व्याख्या – ( क ) पर्यायपदानि** – समं = युगपत्, तस्य = पितुः, वाष्पेण = अश्रुजलेन, ममोपरि = रामस्य शिरसि, पतता = प्रवहता, मम = रामस्य, अधः = अधो भागे, पतता = प्रवहमानेनाश्रुणा, मम = रामस्य, शिरः = मस्तकं, क्लेदितम् = आर्द्रतां, गमितं = मे = मम, पितुः = जनकस्य, पादौ = चरणौ, क्लेदितौ = आर्द्रितौ।

**( ख ) भावार्थः** – एकस्मिन् एव समये मे शिरसः ऊर्ध्वदेशे मम पितुरपि अधोभागे पादप्रदेशे प्रवाहमानेन अश्रुणा मम मस्तकम् आर्द्रतां गतं मम पितुः चरणौ अपि प्रक्षालितौ।

**विशेषः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति। अत्र स्वाभाविकस्नेहवर्णनकारणात् स्वाभावोक्तिरलंकारोऽपि अस्ति।

**सीता** – तदो तदो। [ततस्ततः]

**रामः** – ततोऽप्रतिगृह्यमाणेष्वनुनयेषु आसन्नजरादोषैः स्वैः प्राणैरस्मि शापितः।

**सीता** – तदो तदो। [ततस्ततः]

**रामः** – ततस्तदानीम्

**शत्रुघ्नलक्ष्मणगृहीतघटेऽभिषेके**
**छत्रे स्वयं नृपतिना रुदता गृहीते।**
**सम्भ्रान्त्या किमपि मन्थरया च कर्णे**
**राज्ञः शनैरभिहितं च न चास्मि राजा ॥७॥**

**प्रसङ्गः** – प्रस्तुतश्लोके रामः कथयति यत् राज्याभिषेककाले भरतस्य मातुः परिचारिका मन्थरा राज्ञः दशरथस्य कर्णे शनैः किमपि वदति।

**अन्वयः** – शत्रुघ्नलक्ष्मणगृहीतघटे अभिषेके रुदता नृपतिना स्वयं छत्रे गृहीते सम्भ्रान्तया मन्थरया राज्ञः कर्णे शनैः किमप्यभिहितं न च राजा अस्मि।

**व्याख्या – ( क ) पर्यायपदानि** – शत्रुघ्नलक्ष्मणगृहीतघटे = शत्रुघ्नलक्ष्मणाभ्यां, गृहीतः = करधृतः, घटः = तीर्थकलशो यस्य तस्मिन् = तथाभूते सति, अभिषेके = राज्याभिषेककार्ये प्रवर्तमाने, रुदता = आनन्दाश्रुविमुंचता, नृपतिना = नरपतिना, स्वयम् = आत्मना, छत्रे = श्वेतातपत्रे, गृहीते = धृते सति, सम्भ्रान्ततया = त्वरया समुपसर्पन्त्या, मन्थरया = तदाख्यया भरत मातुः परिचारिकया, राज्ञः = दशरथस्य, कर्णे = श्रवणे, शनैः = यथाऽन्ये न शृणुयुः तथा, किमपि = किंचिदपि, अभिहितं = कथितं, न = नहि, च = पुनः, राजा = नृपः, अस्मि = भवामीति।

**( ख ) भावार्थः** – राज्याभिषेकारम्भे शत्रुघ्नलक्ष्मणाभ्यां धृतः तीर्थकलशः आनन्दाश्रुविमुञ्चिता नरपतिना आत्मा श्वेतातपत्रे धृते (च सति) त्वरया समुपसर्पन्त्या कैकेयीपरिचारिकया महाराजदशरथस्य श्रोत्रे यथा अन्ये न शृणुयुः तथा मन्दम् अनिर्वचनीयं किमपि उक्तं तथा अहं (रामः) पुनः भूपतिः न भावमि।

**विशेषः** – अस्मिन् श्लोके वसन्ततिलकाछन्दः अस्ति। अस्य लक्षणमिदम् –

"उक्ता वसन्ततिलका तभजा जगौ गः"।

**सीता** – पिअं मे। महाराओ एव्व महाराओ, अय्यउत्तो एव्व अय्यउत्तो। [प्रियं मे! महाराज एव महाराजः, आर्यपुत्र एवार्यपुत्रः।]



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**रामः** – मैथिलि ! किमर्थं विमुक्तालङ्कारासि ?

**सीता** – ण खु दाव आबज्झामि। [न खलु तावदाबध्नामि।]

**रामः** – न खलु। प्रत्यग्रावतारितैर्भूषणैर्भवितव्यम्। तथाहि –

**कर्णौ त्वरापहृतभूषणभुग्नपाशौ**
**संस्रंसिताभरणगौरतलौ च हस्तौ।**
**एतानि चाभरणभारनतानि गात्रे**
**स्थानानि नैव समतामुपयान्ति तावत्॥८॥**

**प्रसङ्गः** – प्रस्तुतश्लोके रामः सीतायाः आभूषणरहितं शरीरं दृष्ट्वा चिन्तयति यत् सद्यः एव आभरणानि अवतारितानि एवं प्रतीयते।

**अन्वयः** – कर्णौ त्वरापहृतभूषणभुग्नपाशौ हस्तौ च संस्रंसिताभ्रणगौरतलौ गात्रे आभरणभारनतानि एतानि स्थानानि तावत् समतां नैव उपयान्ति।

**व्याख्या – ( क ) पर्यायपदानि** – कर्णौ = श्रवणौ, त्वरया = शीघ्रतया, अपहृतानि = अपनीतानि, भूषणानि = आभरणानि, ययोस्तादृशैः, अत एव भुग्नः = वक्रतामापन्नः पाशो ग्रन्थितुल्यो भूषणधारणस्थानं ययोस्तौ तथाभूतौ, च = पुनः, हस्तौ = करौ, संस्रंसिताभरणौ = दूरीकृतालंकरणौ, अत एव गौरतलौ = कटकादिभूषण स्रंसनसम्भवं बाहुभागगौर त्वमधुनापि विद्यमानभूषणापगमस्यानतिचिरनिर्वृत्ततां प्रत्याययति। गात्रे = शरीरे, आभरणभारनतानि = भूषणभरणनिम्नीभूतानि स्थानानि, तावत् इत्यवधारणे, समताम् आगन्तुकनतत्वपरिहारेण स्वभावावस्थितिं, नैव उपयान्ति = नैव प्राप्नुवन्ति।

**( ख ) भावार्थः** – श्रवणौ शीघ्रतया अपनीतानि आभरणानि वक्रतां प्राप्तः कोमलाग्रभागः पुनः करौ कटकादिभूषणस्रंसनसम्भवं बहुभारगौरत्वमधुनापि विद्यमानभूषणापगमस्यानतिचिरं लोहिततलौ भवतः। शरीरे आभूषणानां धारणभारेण नतानि कोमलप्रदेशाः स्वाभाविकीस्थितिं नैव प्राप्नुवन्ति।

**विशेषः** – अस्मिन् श्लोके वसन्ततिलका छन्दः स्वभावोक्तिरलङ्कारश्चास्ति।

**सीता** – पारेदि अय्यउत्तो अलिअं विअं सच्चं मन्तेदुं। [पारयत्यार्यपुत्रोऽलीकमपि सत्यमिव मन्त्रयितुम्।]

**रामः** – तेन हि अलङ्क्रियताम्। अहमादर्शं धारयिष्ये। (तथा कृत्वा निर्वण्य) तिष्ठ।

**आदर्शे वल्कलानीव किमेते सूर्यरश्मयः।**
**हसितेन परिज्ञातं क्रीडेयं नियमस्पृहा॥९॥**

**प्रसङ्गः** – सखीभिः सह परिहासकाले एव सीता वल्कलवस्त्रं धारणं कृतवती। तां दृष्ट्वा रामः सीतां प्रति यद् वदति, तस्यात्र वर्णनं कृतमस्ति।

**अन्वयः** – आदर्शे वल्कलानि इव एते सूर्यरश्मयः किम्? हसितेन परिज्ञातम् इयं क्रीडा (उत) नियमस्पृहा।

**व्याख्या – ( क ) पर्यायपदानि** – आदर्शे = दर्पणे, वल्कलानि = वल्कलवस्त्राणि, त्वयाधृतानीव प्रतिभासन्ते, एते सूर्यरश्मयः किं = पूरोवर्तिभास्करकिरणानि किम्? विशेषदर्शनेन निर्णयमधिगम्यमाह, तव हसितेन = हास्येन, परिज्ञातम् = अवगतं, सूर्यरश्मिताया संदिह्यमानं वस्तु वल्कलत्वेन निश्चितमित्यर्थः। इयं क्रीडा = कौतुकलीला, उत = अथवा, तव नियमस्पृहा = प्रत्यक्षतः संन्यासपालनेच्छा वा वर्तते।

**( ख ) भावार्थः** – दपर्णे वल्कलवस्त्राणि त्वया धृतानीव प्रतिभासन्ते यथा एते भानुकिरणाः स्युः। सीतायाः



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

हासेन अवगतं यत् वल्कलवस्त्रमिदं कौतुकलीलया धृतम् अथवा व्रतपालनेच्छेति जिज्ञासा।

**विशेषः** – अस्मिन् श्लोके अनुष्टुप् छन्दो विद्यते।

अवदातिके ! किमेतत्।

**अवदातिका** – भट्ट ! किण्णु हु सोहदि ण सोहदि त्ति कोदूहलेण आवज्झा। [भर्तः ! किन्नु खलु शोभते न शोभते इति कौतुहलेनाबद्धानि।]

**रामः** – मैथिलि ! किमिदम्। इक्ष्वाकूणां वृद्धालङ्कारस्त्वया धार्यते। अस्त्यस्माकं प्रीतिः। आनय।

**सीता** – माखु माखु अय्यउत्तो अमङ्गलं भणादु। [मा खलु मा खल्वार्यपुत्रोऽमङ्गलं भणतु।]

**रामः** – मैथिलि ! किमर्थं वारयसि ?

**सीता** – उज्झिदाहिसे अस्य अय्यउत्तस्य अमङ्गलं विअ मे पडिहादि। [उज्झिताभिषेकस्यार्यपुत्रस्यामङ्गलमिव मे प्रतिभाति।]

**रामः** –

**मा स्वयं मन्युमुत्पाद्य परिहासे विशेषतः।**
**शरीरार्धेन मे पूर्वमाबद्धा हि यदा त्वया॥ १०॥**

**प्रसङ्गः** – प्रस्तुतश्लोके रामः सीतां कथयति यत् भवती मम अर्धाङ्गिनी अस्ति। यदि भवती वल्कलवस्त्राणि धृतवती तर्हि ममापि वल्कलधरणेन का हानिः ?

**अन्वयः** – परिहासे स्वयं मन्युं मा उत्पाद्य विशेषतः हि यदा मे शरीरार्धेन त्वया पूर्वम् आबद्धाः।

**व्याख्या – (क) पर्यायपदानि** – परिहासे = उपहासे अर्थात् त्वद्धृतवल्कलयाचनरूपे मम परिहासवचने, विशेषतः = विशेषेण, स्वयम् = आत्मना, मन्युं = क्रोधं, मा = इति निषेधे, दुःखं = क्लेशम्, उत्पाद्य = विधाय, हि = यतः, यदा मे = मम, शरीरार्धेन = देहार्द्धभूतया, त्वया = सीतया, पूर्वमाबद्धाः = पूर्वमेव वल्कलाः धारिताः।

**(ख) भावार्थः** – विशेषरूपेण मनोविनोदवचनेन त्वया क्लेशः न करणीयः। यतः मम अर्धाङ्गिनीत्वेन भवत्या प्रथममेव वल्कलं धृतम्। अर्थात् यथा त्वया धारितानि वल्कलवस्त्राणि न सन्त्यमङ्गलानि तथैव मया धारितान्यपि इमानि मङ्गलदायकान्येव भविष्यन्ति। अस्मादर्धाङ्गिन्या त्वया अमङ्गलशब्दाः न कार्या इति।

**विशेषः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति। अत्र सन्देहालंकारः चापि विद्यते।

(नेपथ्ये)

हा हा महाराजः।

**सीता** – अय्यउत्त ! किं एवं। [आर्यपुत्र ! किमेतत्।]

**रामः** – (आकर्ण्य)

**नारीणां पुरुषाणां च निर्मर्यादो यदा ध्वनिः।**
**सुव्यक्तं प्रभवामीति मूले दैवेन ताडितम्॥ ११॥**

**प्रसङ्गः** – अस्मिन् श्लोके नेपथ्ये हाहाकारस्य ध्वनिं श्रुत्वा रामः सीतां प्रति कथयति।

**अन्वयः** – नारीणां पुरुषाणां च यदा निर्मर्यादः ध्वनिः प्रभवामि इति दैवेन भूले ताडितम् इति सुव्यक्तम्।

**व्याख्या – (क) पर्यायपदानि** – नारीणां = वनितानां, पुरुषाणां = नराणां, च = पुनः, यदा = यत्, निर्मर्यादः = उच्चत्वसीमातीतः, ध्वनिः = करुणशब्दः, तदा प्रभवामि = सर्वत्र मेऽप्रतिहतं सामर्थ्यं कर्त्तुकर्त्तुमन्यथाकर्त्तु



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

वा सर्वथा मे शक्तिः क्रमते इति मनसि कृत्वा, इति = इत्थं, दैवेन = विधात्रा, मूले = प्रधानस्थाने, ताडितं = प्रहृतं, न तु शाखायां स्कन्धे वा कृतः प्रहार इति सुव्यक्तम्।

**(ख) भावार्थः** – यस्मिन् काले वनितानां नराणां च करुणस्वरः सीमान्तम् अतिक्रान्तः आकर्ण्यते। तस्मिन् समये विधात्रा प्रधानसमये महाराजदशरथस्योपरि प्रहृतम् इत्थं स्पष्टरूपेण अहम् अवगन्तुं शक्नोमि।

**विशेषः** – अस्मिन् श्लोके अनुष्टुप् छन्दः अस्ति। अत्र काव्यलिङ्गनामकोऽलङ्कारोऽपि विद्यते।

तूर्णं ज्ञायतां शब्दः।

(प्रविश्य)

**काञ्चुकीयः** – परित्रायतां परित्रायतां कुमारः।

**रामः** – आर्य! कः परित्रातव्यः?

**काञ्चुकीयः** – महाराजः।

**रामः** – महाराज इति। आर्य, ननु वक्तव्यम् एकशरीरसंक्षिप्ता पृथिवी रक्षितव्येति। अथ कुत उत्पन्नोऽयं दोषः?

**काञ्चुकीयः** – स्वजनात्।

**रामः** – स्वजनादिति। हन्त! नास्ति प्रतीकारः।

**शरीरेऽरिः प्रहरति हृदये स्वजनस्तथा।**
**कस्य स्वजनशब्दो मे लज्जामुत्पादयिष्यति॥१२॥**

**प्रसङ्गः** – प्रस्तुतश्लोके काञ्चुकीयस्य "परित्रायतां कुमारः" एतं शब्दं श्रुत्वा रामः काञ्चुकीयं पृच्छति।

**अन्वयः** – अरिः शरीरे प्रहरति तथा स्वजनः हृदये (प्रहरति)। कस्य स्वजनशब्दः मे लज्जाम् उत्पादयिष्यति।

**व्याख्या – (क) पर्यायपदानि** – अरिः = शत्रुः, शरीरे = देहे, प्रहरति = ताडयति, तथा = तेन प्रकारेण, स्वजनः = परिजनः, हृदये = मनसि (प्रहरति)। शरीर-प्रहाराच्च हृदयप्रहारो दुस्सह इति तमसहमानस्य महाराजदशरथस्य विपत्प्राप्तिरतीव सम्भाविनीति भावः। कस्य स्वजनशब्दः = स्वजनशब्दवाच्येषु बहुषु जनेषु मध्ये कतमं मत्पितृशोकोत्पादकं विषयीकुर्वन् 'स्वजन' इत्ययं शब्दः, मे = मम, लज्जां = संकोचम्, उत्पादयिष्यति = उत्पन्नं करिष्यति।

**(ख) भावार्थः** – शत्रुः देहे प्रहारं करोति आत्मीयजनः च मनसि ताडयति (प्रहारं करोति)। अर्थात् शरीरप्रहाराद् हृदयप्रहारोऽतिशयेन दुःसहो भवति। अयं स्वजनशब्दः मम (रामस्य) व्रीडाम् (संकोचम्) उत्पन्नं करिष्यति।

**विशेषः** – अस्मिन् श्लोके अनुष्टुप् छन्दः अस्ति।

**काञ्चुकीयः** – तत्रभवत्याः कैकेय्याः।

**रामः** – किमम्बायाः? तेन हि उदर्केण गुणेनात्र भवितव्यम्।

**काञ्चुकीयः** – कथमिव?

**रामः** – श्रूयताम् –

**यस्याः शक्रसमो भर्ता मया पुत्रवती च या।**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**फले कस्मिन् स्पृहा तस्या येनाकार्यं करिष्यति ॥ १३ ॥**

**प्रसङ्गः** – प्रस्तुतश्लोके कैकेयीं प्रति श्रद्धां प्रकटयन् रामः वदति।

**अन्वयः** – यस्याः शक्रसमः भर्त्ता या च मया पुत्रवती। तस्याः कस्मिन् फले स्पृहा येन अकार्यं करिष्यति।

**व्याख्या** – **( क ) पर्यायपदानि** – यस्याः = कैकेय्याः, शक्रसमः = इन्द्रवत्, भर्त्ता = भरणकर्त्ता पतिः, या = कैकेयी, च = पुनः, मया पुत्रवती = यस्याहं पुत्रोऽस्मि। तस्याः = इन्द्रसमस्वामिना सनाथायाः पुत्रवत्याः अम्बायाः, कस्मिन् फले = कस्मिन्साध्ये, स्पृहा = इच्छा, येन = लब्धुमिष्यमाणेन फलेन हेतुभूतेन, अकार्यं = भर्तृव्यसनरूपं, करिष्यति = विधास्यति।

**( ख ) भावार्थः** – यस्याः कैकेय्याः स्वामी (भरणकर्ता) इन्द्रतुल्यः पुनश्च यस्याः अहं पुत्रोऽस्मि। तस्याः (इन्द्रसमस्वामिना सनाथायाः पुत्रवत्याः अम्बायाः) अलम्भे वस्तूनि इच्छा कदापि भवितुं न शक्नोति। यस्मात् तादृशम् अकार्यं न करिष्यति।

**विशेषः** – अस्मिन् श्लोकेऽनुष्टुप् छन्दः अस्ति। अत्र उपमा काव्यलिङ्गञ्च अलंकारौ स्तः।

**काञ्चुकीयः** – कुमार ! अलमुपहतासु स्त्रीबुद्धिषु स्वमार्जवमुपनिक्षेप्तुम्। तस्या एव खलु वचनाद् भवदभिषेको निवृत्तः।

**रामः** – आर्य ! गुणाः खल्वत्र।

**काञ्चुकीयः** – कथमिव ?

**रामः** – श्रूयताम् –

**वनगमननिवृत्तिः पार्थिवस्यैव ताव–**
**न्मम पितृपरवत्ता बालभावः स एव।**
**नवनृपतिविमर्शे नास्ति शङ्का प्रजाना–**
**मथ च न परिभोगैर्वञ्चिता भ्रातरो मे ॥ १४ ॥**

**प्रसङ्गः** – रामस्य राज्याभिषेकस्य कार्यक्रमः स्थगितः तदा काञ्चुकीयं प्रति रामः कथयति यत् एतस्मिन् कर्मणि अपि मम लाभः एव अस्ति।

**अन्वयः** – तावत् पार्थिवस्यैव वनगमननिवृत्तिः मम पितृपरवत्ता, स एव बालभावः नवनृपतिविमर्शे, प्रजानां शंका नास्ति। अथ च मे भ्रातरः परिभोगैः वंचिताः न (भविष्यन्ति)।

**व्याख्या** – **( क ) पर्यायपदानि** – तावत् = आदौ, पार्थिवस्यैव = महाराजस्यैव, वनगमननिवृत्तिः = अरण्यगमनाद्विरामः, मम = रामस्य, पितृपरवत्ता = जनकपराधीनता, पितृपारतन्त्र्यलक्षणस्वास्थ्यं सर्वथाभिलाषितमिति, स एव = चिरानुवृत्तः, बालाभावः = शिशुभावः, नवनृपतिविमर्शे = नवीनस्य राज्ञः विचारे, प्रजानां = जनानां, शंका = विचिकित्सा, नास्ति = नहि वर्तते, अथ च = किंच, मे = मम, भ्रातरः = भरतादयः, परिभोगैः = राजसुखादिभोगैः, न वंचिताः = न वञ्चनां प्राप्ताः।

**( ख ) भावार्थः** – सर्वप्रथमः लाभः तु एषः एव यत् महाराजदशरथस्य अरण्यगमनात् विरामः सञ्जातः द्वितीयः लाभः च मम (रामस्य) जनकपराधीनता, तृतीयो लाभः चिरानुवृत्तः शिशुभावः अर्थात् बाल्यकालस्य आनन्दः तथैव मेलिष्यति। नवीनस्य राज्ञः विचारे जनानां विचिकित्सा नास्ति इति चतुर्थो गुणः। तदनन्तरं (किञ्च) मम भरतादयः अनुजाः राजसुखादिभोगैः न वञ्चिता इति पञ्चमो गुणः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**काञ्चुकीयः** – अथ च तयानाहूतोपसृतया भरतोऽभिषिच्यतां राज्य इत्युक्तम्। अत्राप्यलोभः ?

**रामः** – आर्य ! भवान् खल्वस्मत्पक्षपातादेव नार्थमवेक्षते। कुतः –

**शुल्के विपणितं राज्यं पुत्रार्थे यदि याच्यते।**
**तस्याः लोभोऽत्र नास्माकं भ्रातृराज्यापहारिणाम्॥ १५॥**

**प्रसङ्गः** – प्रस्तुतश्लोके रामः काञ्चुकीयं वदति यत् यदि माता कैकेयी भरतनिमित्तं राज्याभिषेकम् इच्छति तर्हि तस्याः निन्दा न कर्त्तव्या।

**अन्वयः** – शुल्के पुत्रार्थे विपणितं राज्यं यदि याच्यते अत्र तस्याः लोभः। भ्रातृराज्यापहारिणाम् अस्माकं (लोभः) न।

**व्याख्या – (क) पर्यायपदानि** – शुल्के = विवाहकाले, कन्यादेयत्वेन, पुत्रार्थे = कन्याजनिष्यमाणपुत्रनिमित्ते, विपणितं = विशेषेण संभावितं, राज्यं = साम्राज्यं, यदि = चेत्, याच्यते = प्रार्थ्यते, तर्हि तस्याः = मध्यमाम्बायाः, अत्र = अस्मिन् विषये, लोभः कः ?न कोऽपि इति भावः। भ्रातृराज्यपहारिणां = भ्रातुः भरतस्य, राज्यं, पित्रा पणीकृत्य दातुं प्रतिज्ञातं, ततश्चैव स्वभूतं हर्तुं स्वायत्तीकर्तुं शीलं येषां तेषां परराज्यगृध्नूनाम्, अस्माकं लोभो न समर्थ्यते।

**(ख) भावार्थः** – विवाहकाले कन्यादेयत्वेन कन्याजनिष्यमाणपुत्रनिमित्तं विशेषेण सम्भावितं साम्राज्यं चेत् प्रार्थ्यते अस्मिन् विषये ममाम्बायाः कैकेय्याः अविवेककारित्वं स्यात् किन्तु भ्रातुः भरतस्य राज्यं पित्रा पणीकृत्य दातुं प्रतिज्ञातम्। अतः अत्र अस्माकं लोभः नास्ति। रामस्य कथनस्य भावः अस्ति यत् पितुः वचनानुसारं राज्यं भरतस्यैव अस्ति अतः तस्मै एव दातव्यम्। इतः परम् अहं मातुः अपवादं श्रोतुं न इच्छामि।

**विशेषः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति।

**काञ्चुकीयः** – अथ ........।

**रामः** – अतः परं न मातुः परिवादं श्रोतुमिच्छामि। महाराजस्य वृत्तान्तस्तावदभिधीयताम्।

**काञ्चुकीयः** – ततस्तदानीं –

**शोकादवचनाद् राज्ञा हस्तेनैव विसर्जितः।**
**किमप्यभिमतं मन्ये मोहं च नृपतिर्गतः॥ १६॥**

**प्रसङ्गः** – यदा रामः वदति यत् अहं मातुः कैकेय्याः अपवादं श्रोतुं न इच्छामि पितुः समाचारं च श्रावयतु तदा काञ्चुकीयः दशरथस्य स्थितिं वर्णयति।

**अन्वयः** – राज्ञा शोकात् अवचनात् हस्तेन एव विसर्जितः नृपतिः च किमपि अभिमतं मोहं गतः (इति) मन्ये।

**व्याख्या – (क) पर्यायपदानि** – राज्ञा = दशरथेन, शोकात् = दुःखात्, अवचनात् = किमपि, अनुक्त्वैव, हस्तेन = करेणैव, एव विसर्जितः = गन्तुमाज्ञप्तः, नृपतिः = राजा दशरथस्तु, च किमपि = किंचिदपि, अभिमतं = स्वाभिमतं, किंचिदिष्टत्वेन मन्यमानः, मोहं = सर्वेन्द्रियसंज्ञालोपं, च = पुनः, गतः = प्राप्तः, इति, मन्ये = अनुमीयते।

**(ख) भावार्थः** – नृपेन दशरथेन दुःखाधिक्यात् किमपि अनुक्त्वैव करसङ्केतेनैव गन्तुम् आज्ञप्तः। राजा दशरथः किञ्चिदपि स्वाभिमतं किञ्चिदिष्टत्वेन मन्यमानः सर्वेन्द्रियसंज्ञालोपं च पुनः प्राप्तः इति अनुमीयते।

**विशेषः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति।

**रामः** – कथं मोहमुपगतः ?

(नेपथ्ये)



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

कथं कथं मोहमुपगत इति।

यदि न सहसे राज्ञो मोहं धनु: स्पृश मा दया।

**राम:** – (आकर्ण्य पुरतो विलोक्य)

**अक्षोभ्य: क्षोभित: केन लक्ष्मणो धैर्यसागर:।**
**येन रुष्टेन पश्यामि शताकीर्णमिवाग्रत:॥१७॥**

**प्रसङ्ग:** – प्रस्तुतश्लोके नेपथ्यात् लक्ष्मणस्य क्रोधपूर्णवचनं श्रुत्वा राम: वदति।

**अन्वय:** – अक्षोभ्य: धैर्यसागर: लक्ष्मण: केन क्षोभित: ?रुष्टेन येन अग्रत: शताकीर्णमिव पश्यामि।

**व्याख्या – (क) पर्यायपदानि** – अक्षोभ्य: = अकोप्य:, धैर्यसागर: = गांभीर्यपयोनिधि:, लक्ष्मण: = सुमित्रानन्दन:, केन = पुरुषविशेषेण, क्षोभित: = क्षोभम् उत्पादित: ?, रुष्टेन = क्रुद्धेन, येन = लक्ष्मणेन, अग्रत: = पुरत:, शताकीर्णमिव = जनशतसान्द्रमिव, पश्यामि = अवलोकयामि।

**(ख) भावार्थ:** – क्षोभयितुमासाध्य: (अकोप्य:) गाम्भीर्यपयोनिधि: सौमित्रनन्दन: केन पुरुषविशेषेण क्षोभित: ?कुपितेन लक्ष्मणेन पुरत: जनशतव्याप्तमिव अवलोकयामि।

**विशेष:** – श्लोकेऽस्मिन् अनुष्टुप् छन्द: अस्ति।

(तत: प्रविशति धनुर्बाणापाणिर्लक्ष्मण:)

**लक्ष्मण:** – (सक्रोधं) कथं कथं मोहमपुगत इति –

**यदि न सहसे राज्ञो मोहं धनु: स्पृश मा दया**
**स्वजननिभृत: सर्वोऽप्येवं मृदु: परिभूयते।**
**अथ न रुचितं मुञ्च त्वं मामहं कृतनिश्चयो**
**युवतिरहितं लोकं कर्तुं यतश्छलिता वयम्॥१८॥**

**प्रसङ्ग:** – अस्मिन् श्लोके लक्ष्मण: हस्ते धनुर्बाणं स्वीकृत्य कोपेन रामं वदति।

**अन्वय:** – यदि राज्ञ: मोहं न सहसे (तर्हि) धनु: स्पृश दया मा। स्वजननिभृत: मृदु: सर्व: एवं परिभूयते। अथ न रुचितं त्वं मां मुञ्च। अहं लोकं युवतिरहितं कर्तुं कृतनिश्चय:। यत: वयं छलिता:।

**व्याख्या – (क) पर्यायपदानि** – यदि = चेत्, राज्ञ: = पितु:, मोहं = विसंज्ञभावं, न = नहि, सहसे = मर्षयसि, (तर्हि) धनु: = चापं, स्पृश = मोहभूते जने व्यापारय। दया = कृपा, मा = न कार्या, स्वजननिभृत: = स्वजने क्षमाशील: सर्वोऽपि भवादृश:, मृदु = शान्त:, क्षमावान् एवम्, अधिकार प्राप्तराज्यभ्रंशादिना, परिभूयते = तिरस्क्रियते। अथ = अथवा, न रुचितं = स्वजनविषये स्वयं धनुनुर्व्यापारणं ते न रोचते चेत् त्वं मां = लक्ष्मणं, मुञ्च = स्वजनविषये स्वयं धनु:स्पृशन्तमनुजानीहि। अहं = लक्ष्मण:, लोकं = संसारं, युवतिरहितं = युवतिजात्या हीनं, कर्तुं = विधातुं, कृतनिश्चय: = कृतसंकल्पोऽस्मि। यत: = यस्मात् कारणात्, वयं छलिता: = निजहावभावादिभिर्कर्तृवशीकरण-द्वारा वंचिता: = राज्यात् भ्रंशिता:।

**(ख) भावार्थ:** – यदि (भवान्) पितु: विसंज्ञमानं नहि मर्षयसि तर्हि चापं धारय कृपा नैव कार्या। स्वजने क्षमाशील: सकलोऽपि भवादृश: कोमलस्वभावो जन: अधिकारप्राप्तराज्यभ्रंशादिना तिरस्क्रियते। अथवा आत्मीये धनुर्व्यापारस्ते न रोचते चेत् भवान् मां लक्ष्मणं धनुर्व्यापारार्थं त्यज। अहं लक्ष्मण: सकलसंसारं युवतिविहीनं विधातुं कृतसंकल्प: अस्मि यस्मात् कारणात् नृपदशरथादय: सर्वेऽपि राज्याद् वञ्चिता:।

**विशेष:** – अस्मिन् श्लोके हरिणी छन्द: अस्ति। लक्षणमिदमस्य –



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

न समरसला ग: षड्वेदैर्हयैर्हरिणी मता।

पुनश्चात्र काव्यलिङ्गनामक: अलंकारोऽपि विद्यते।

**सीता** – अय्यउत्त! रोदिदव्वे काले सोमित्तिणा धणूगहीदं। अपुव्वो खु से आआसो। [आर्यपुत्र! रोदितव्ये काले सौमित्रिणा धनुर्गृहीतम्। अपूर्व: खल्वस्यायास:]

**राम:** – सुमित्रामात:! किमिदम्?

**लक्ष्मण:** – कथं कथं किमिदं नाम –

**क्रमप्राप्ते हृते राज्ये भुवि शोच्यासने नृपे।**
**इदानीमपि सन्देह: किं क्षमा निर्मनस्विता॥१९॥**

**प्रसङ्ग:** – प्रस्तुतश्लोके लक्ष्मण: क्रोधपूर्वकं रामं वदति यत् इदानीं कैकेय्या: प्रतिकारे संशय: न कर्त्तव्य:।

**अन्वय:** – क्रमप्राप्ते राज्ये हृते नृपे भुवि शोच्यासने इदानीमपि संदेह:। किं क्षमा निर्मनस्विता (अस्ति)।

**व्याख्या – (क) पर्यायपदानि** – क्रमप्राप्ते = क्रमेण पितुरनन्तरं ज्येष्ठपुत्रेण राज्यं प्राप्तव्यमिति न्यायोचितेन क्रमेण प्राप्ते = अधिगते, राज्ये = साम्राज्ये, हृते = अपहृते, नृपे = राजनि, भुवि = भूतले, शोच्यासने = शोच्यमासनं यस्य तस्मिन् तथाभूते स्थिते सति, इदानीमपि = अस्यामपि महापकारप्राप्तिदशायां, सन्देह: = प्रतिक्रियां प्रति अनध्यवसाय:। क्षमा नाम निर्मनस्विता = आत्माभिमानशून्यता।

**(ख) भावार्थ:** – क्रमेण पितुरनन्तरं ज्येष्ठपुत्रेण राज्यं प्राप्तव्यमिति न्यायोचितक्रमेण अधिगते साम्राज्ये अपहृते राजनिभूतले चिन्तनीयावस्थायां भूमौ मूर्च्छिते स्थिते सति अस्यां शोच्यावस्थायामपि कैकेय्या: प्रतीकारे संशय: वर्तते। आत्माभिमानशून्यतैव क्षान्तिरित्युच्यते।

**विशेष:** – श्लोकेऽस्मिन् अनुष्टुप् छन्द: समुच्चयालंकारश्च अस्ति।

**राम:** – सुमित्रामात:! अस्मद्राज्यभ्रंशो भवत उद्योगं जनयति। आ:! अपण्डित: खलु भवान्।

**भरतो वा भवेद् राजा वयं वा ननु तत् समम्।**
**यदि तेऽस्ति धनु: श्लाघा स राजा परिपाल्यताम्॥२०॥**

**प्रसङ्ग:** – राम: लक्ष्मणं वदति यत् भरत: अथवा अहं कोऽपि राजा भवेत् भवत: कृते समानमेव।

**अन्वय:** – भरतो वा राजा भवेत् वयं वा (भवेम) ननु तत् समम्। यदि ते धनु:श्लाघा अस्ति, स राजा परिपाल्यताम्।

**व्याख्या – (क) पर्यायपदानि** – भरत: = कैकेयीसुत:, वा = अथवा, राजा = नृप: भवेत् = स्यात्, वयं = रामो वा भवेम, तद् = अन्तराभिषेचनं, ननु समं = त्वद् विषये तुल्यमेव, यदि ते = तव, धनु:श्लाघा = धानुष्कत्वाहंकार:, अस्ति = वर्तते, स राजा = नवीनो राजा स भरत:, परिपाल्यतां = सहायीभूय रक्ष्यताम्।

**(ख) भावार्थ:** – कैकेयीसुत: नृप: स्यात् अथवा रामादयो वा अन्यतराभिषेकचनं निश्चयेन तुल्यमेव। यदि तव धनुर्धरत्वगर्व: विद्यते तर्हि नवीनो नृप: स भरत: सहायीभूय रक्ष्यताम्।

**विशेष:** – अस्मिन् श्लोकेऽनुष्टुप् छन्द: अस्ति।

**लक्ष्मण:** – न शक्नोति रोषं धारयितुम्। भवतु भवतु। गच्छामस्तावत्। (प्रस्थित:)

**राम:** –

**त्रैलोक्यं दग्धुकामेव ललाटपुटसंस्थिता।**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**भ्रुकुटिर्लक्ष्मणस्यैषा नियतीव व्यवस्थिता ॥ २१ ॥**

**प्रसङ्गः** – प्रस्तुतश्लोके लक्ष्मणस्य क्रोधं दृष्ट्वा रामः वदति।

**अन्वयः** – त्रैलोक्यं दग्धुकामेव ललाटपुटसंस्थिता एषा लक्ष्मणस्य भ्रुकुटिः नियतीव, व्यवस्थिता।

**व्याख्या – ( क ) पर्यायपदानि** – त्रयो लोकाः एव त्रैलोक्यं = भुवनत्रयं, दग्धकामेव = दग्धुं काम इच्छा यस्याः सेव, ललाटपुटसंस्थिता = ललाटपुटे भाले, संस्थिता कोपातिरेकेण ललाटपर्यन्तमुपगता एषा = प्रत्यक्षदृश्या, लक्ष्मणस्य = सुमित्रानन्दस्य, भ्रुकुटिः = भ्रूवक्रता, नियतीव = विधिरिव, व्यवस्थिता = स्थिरनिश्चया।

**( ख ) भावार्थः** – भुवनत्रयं दग्धुम् इच्छन्तीव भाले संस्थिता कोपातिरेकेन ललाटपर्यन्तमुपगता दृश्यमाना सुमित्रानन्दनस्य भ्रूलता भाग्यरेखा इव (यथा) स्थिरा जाता प्रतीयते।

**विशेषः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः उपमाऽलंकारश्चास्ति।

सुमित्रामातः ! इतस्तावत्।

लक्ष्मणः – आर्य ! अयमस्मि।

**रामः** – भवतः स्थैर्यमुत्पादयता मयैवमभिहितम्। उच्यतामिदानीं –

**ताते धनुर्नमयि सत्यमवेक्षमाणे**
**मुञ्चानि मातरि शरं स्वधनं हरन्त्याम्।**
**दोषेषु बाह्यमनुजं भरतं हनानि**
**किं रोषणाय रुचिरं त्रिषु पातकेषु ॥ २२ ॥**

**प्रसङ्गः** – प्रस्तुतश्लोके रामः लक्ष्मणस्य कोपं शान्तं कर्त्तुं वदति।

**अन्वयः** – सत्यम् अवेक्षमाणे ताते धनुः नमयि स्वधनं हरन्त्यां मातरि शरं मुंचानि दोषेषु बाह्यम् अनुजं भरतं हनानि त्रिषु पातकेषु रोषणाय किं रुचिरम् ?

**व्याख्या – ( क ) पर्यायपदानि** – सत्यम् = स्वप्रतिश्रुतभरताभिषेकान्यथाभावम्, अवेक्ष्यमाणे = प्रतीक्षमाणे, ताते = दशरथे, धनुः = चापः, नमयि = नमयानि, एवं स्थिते स्वधनं = स्वभर्तृप्रतिश्रुतं राज्यं, हरन्त्याम् = आददानायां, मातरि = कैकय्यां, शरं = बाणं, मुंचानि = मुचेयं, दोषेषु = मद्राज्यप्राप्तिप्रतिन्धकादिषु, बाह्यं = निर्वोशम्, अनुजं = भरतं, हनानि = हन्यां, त्रिषु = त्रिसंख्यकेषु, पातकेषु = पितृमातृभ्रातृवधलक्षणेषु महापापेषु, रोषणाय = कोपनाय, तुभ्यं किं = कतमं, पातकं, रूचिरं = रूचिप्रदम्।

**( ख ) भावार्थः** – स्वप्रतिश्रुतभरताभिषेकरूपं तथ्यं प्रतीक्षमाणे पितरि चापं नमयानि (योजये), स्वभर्तुप्रतिश्रुतं राज्यम् उपपदानामां (ग्रहन्त्यां) जनन्यां कैकेयां बाणं मुचेयं (पातयानि), मद्रान्यप्राप्तिप्रतिबन्धनादिषु दोषशून्यं लघुभ्रातरं कैकेयीपुत्रभरतं हन्यां (मारयाणि)। त्रिसंख्यकेषु पितृमातृभ्रातृवधलक्षणेषु महापापेषु कोपनाय त्वत् कृते कतमं पातकं रुचिप्रदम्।

**विशेषः** – श्लोकेऽस्मिन् वसन्ततिलका छन्दः परिकरनाम अलङ्कारश्चास्ति।

**लक्ष्मणः** – (सवाष्पं) हा धिक् ! अस्मान् अविज्ञायोपालभसे।

**यत्कृते महति क्लेशे राज्ये मे न मनोरथः।**
**वर्षाणि किल वस्तव्यं चतुर्दश वने त्वया ॥ २३ ॥**

**प्रसङ्गः** – प्रस्तुतश्लोके लक्ष्मणः स्वदुःखस्य कारणं रामं वदति।

**अन्वयः** – यत्कृते महति क्लेशे राज्ये मे मनोरथः न। चतुर्दशवर्षाणि त्वया वने वस्तव्यं किल।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**व्याख्या – ( क ) पर्यायपदानि** – यत्कृते = यच्च कारणभूते सति, महती = दुरन्ते, क्लेशे = दु:खे, राज्ये = राजपदे, मे = मम, मनोरथ: = अभिलाष: न = नहि। चतुर्दशवर्षाणि = चतुर्दशवर्षपर्यन्तं, त्वया = रामेण, वने = अरण्ये, वस्तव्यं = स्थातव्यं, किल = निश्चयेन।

**( ख ) भावार्थ:** – इदानीं मदीये मानसे अतीव कष्टप्रदे राज्यपदप्राप्तिविषये चिन्ता नास्ति। वास्तविकी चिन्ता तु इयं वर्तते यत् कैकेय्या: वचनानुसारेण भवता चतुर्दशवर्षाणि यावत् महता क्लेशेन सह अरण्ये स्थातव्यमिति। अस्मादेवाहमतीव कुपिताऽभवमिति तात्पर्य: ।

**विशेष:** – अस्मिन् श्लोके अनुष्टुप् छन्द: परिकरोऽलङ्कारश्च अस्ति।

**राम:** – अत्र मोहमुपगतस्तत्रभवान्। हन्त ! निवेदितमप्रभुत्वम्। मैथिलि ! –

**मङ्गलार्थेऽनया दत्तान् वल्कलांस्तावदानय।**
**करोम्यन्यैर्नृपैर्धर्मं नैवाप्तं नोपपादितम्॥ २४॥**

**प्रसङ्ग:** – प्रस्तुतश्लोके राम: सीतां वदति यत् सेविका अवदातिका भवत्यै यानि वल्कलवस्त्राणि दत्तवती तानि वस्त्राणि आनयतु।

**अन्वय:** – अनया दत्तान् वल्कलान् तावत् मंगलार्थे आनय। अन्यै: नृपै: नैवाप्तं नोपपादितं धर्मं करोमि।

**व्याख्या – ( क ) पर्यायपदानि** – अनया = अनवदातिकया, दत्तान् = प्रदत्तान्, वल्कलान् = तरूत्वक्कल्पितानि, वसनानि, मंगलार्थे = मंगलकर्मानुष्ठानार्थम्, आनय, तावत् = मह्यमर्पय। अन्यै: = पूर्वजै:, नृपै: = राजभि:, नैवाप्तं = न लब्धं, नोपपादितम् = अननुष्ठितं च, धर्मं करोमि = तपश्चरामि।

**( ख ) भावार्थ:** – अवदातिकया प्रदत्तानि वल्कलवस्त्राणि मङ्गलकर्मानुष्ठानार्थं मह्यम् अर्पय। पूर्वै: भूपै: (राजभि:) यत् एतस्यामवस्थायां न लब्धं न आचरितं (न अनुष्ठितं) च, तत् धर्ममिहं तपश्चरामि।

**सीता** – गृह्णदु अय्यउत्तो। [गृह्णात्वार्यपुत्र:]
**राम:** – मैथिलि ! किं व्यवसितम्?
**सीता** – णं सहधम्म आरिणी क्खु अहं [ननु सहधर्मचारिणी खल्वहम्]।
**राम:** – मयैकाकिना किल गन्तव्यम्।
**सीता** – अदो णु खु अणुगच्छामि। [अतो नु खल्वनुगच्छामि]।
**राम:** – वने खलु वस्तव्यम्।
**सीता** – तं खु मे पासादो। [तत् खलु मे प्रासाद:]
**राम:** – श्वश्रूश्वशुरशुश्रूषापि च ते निर्वर्तयितव्या।
**सीता** – णं उद्दिसिअ देवदाणं पणामो करीअदि। [एनामुद्दिश्य देवतानां प्रणाम: क्रियते।]
**राम:** – लक्ष्मण ! वार्यतामियम्।
**लक्ष्मण:** – आर्य ! नोत्सहे श्लाघनीये काले वारयितुमत्रभवतीम्। कुत: –

**अनुचरति शशांकं राहुदोषेऽपि तारा**
**पतति च वनवृक्षे याति भूमिं लता च।**
**त्यजति न च करेणु: पंकलग्नं गजेन्द्र:**
**व्रजतु चरतु धर्मं भर्तृनाथा हि नार्य:॥ २५॥**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**प्रसङ्गः** – प्रस्तुतश्लोके यदा सीता रामेण सह वनं गन्तुं हठं करोति तदा रामः लक्ष्मणं सीतां वारयितुं वदति। तस्मिन् एव काले लक्ष्मणः सीतायाः उत्साहं वर्धयन् वदति।

**अन्वयः** – राहुदोषेऽपि तारा शंशाकम् अनुचरति। वनवृक्षे पतति लता च भूमिं याति। करेणुः च पंकलग्नं गजेन्द्रं न त्यजति। व्रजतु, धर्मं चरतु हि नार्यः भर्तृनाथाः (भवन्ति)।

**व्याख्या – (क) पर्यायपदानि** – राहुदोषेऽपि = राहुग्रसनदशायामपि, शशांकं = चन्द्रं, तारा = चन्द्रभार्या, अनुचरति = अनुगच्छत्येव। वनवृक्षे = अरण्यद्रुमे, पतति सति लता = वल्लरी, च भूमिं = धरणीं, याति = पतति। करेणुः = हस्तिनी, च, पंकलग्नं = कर्दमे मग्नं, गजेन्द्रं = हस्तिनं, न = नहि, त्यजति = जहाति। व्रजतु = गच्छतु, धर्मं चरतु = पत्यनुगमनं करोतु। हि = यतोहि, नार्यः = स्त्रियः, भर्तृनाथाः = स्वामिपरतन्त्रा भवन्ति।

**(ख) भावार्थः** – राहुदर्शनकालेऽपि चन्द्रभानो रोहिणी इन्दुम् अनुगच्छति अरण्यद्रुमे पतति सति वल्लरीपृथ्वीं गच्छति (पतति) हस्तिनी च कर्दमेमग्नं हस्तिराजं नहि जहाति। अतः भ्रातृजाया सीताऽपि वनं गच्छतु धर्मं च पालयतु, यतोहि स्त्रियः स्वाम्यधीनाः भवन्ति।

**विशेषः** – श्लोकेऽस्मिन् मालिनी छन्दः अस्ति। लक्षणमिदमस्य –

न न म य य युतेयं मालिनी भोगिलोकैः।

पुनश्चात्र अर्थान्तरन्यासोऽलंकारोऽपि अस्ति।

(प्रविश्य)

**चेटी** – जेदु भट्टिणि। णेवच्छपालिणी अय्यरेवा पणमिअ विण्णवेदि–आदादिआए सङ्गीदसालादो आच्छिन्दिअ कक्कला आणीदा। इमा अवरा आणणुहूदा वक्कला। णिव्वत्तीअदु दाव किल पओअणं त्ति। [जयतु भट्टिनी। नेपथ्यपालिन्यार्यरेवा प्रणम्य विज्ञापयति – अवदातिकया सङ्गीतशालाया आच्छिद्य वल्कला आनीताः। इमेऽपरा अननुभूता वल्कलाः। निर्वर्त्यतां तावत् किल प्रयोजनमिति।]

**रामः** – भद्रे! आनय, सन्तुष्टैषा। वयमर्थिनः।

**चेटी** – गहदु भट्टा। [गृह्णातु भर्ता।] (तथा कृत्वा निष्क्रान्ता)

(रामो गृहीत्वा परिधत्ते)

**लक्ष्मणः** – प्रसीदत्वार्यः।

**निर्योगाद् भूषणान्माल्यात् सर्वेभ्योऽर्धं प्रदाय मे।**
**चिरमेकाकिना बद्धं चीरे खल्वसि मत्सरी॥ २६॥**

**प्रसङ्गः** – प्रस्तुतश्लोके यदा रामः एकाकी एव वल्कलवस्त्रं धारणं कृतवान् तदा लक्ष्मणः रामं वदति।

**अन्वयः** – निर्योगाद् भूषणात् माल्यात् सर्वेभ्यः मे अर्द्धं प्रदाय एकाकिना चीरं बद्धम्। चीरे खलु मत्सरी अस्ति।

**व्याख्या – (क) पर्यायपदानि** – निर्योगाद् = वस्त्रादेः, भूषणात् = अलंकारात्, माल्यात् = पुष्पादिस्रजः, सर्वेभ्यः = सकलेभ्यः, मे = मम लक्ष्मणम्, अर्द्धं = समांशं, प्रदाय = दत्त्वा, एकाकिना = अद्वितीयेन, चीरं = वल्कलं, बद्धं = परिहितम्। चीरे = वल्कले, खलु = निश्चयेन, मत्सरी = स्वार्थी, असि = भवसि।

**(ख) भावार्थः** – वस्त्रादेः अलङ्कारात् (आभूषणात्) पुष्पादिस्रजः सकलेभ्यः मह्यं (लक्ष्मणाय) समांशं दत्त्वा अधुना भवतैव केवलं वल्कलं गृहीतम्। वल्कले निश्चयेन एव स्वार्थी ईर्ष्यान्वितः भवसि। अर्थात् लक्ष्मणस्य कथनस्य अभिप्रायः अस्ति यत् अर्धं वल्कलं मह्यमपि ददातु। अहमपि भवता सह वनं गन्तुमिच्छामि।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**विशेषः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दो विद्यते।

**रामः** – मैथिलि! वार्यतामयम्।

**सीता** – सौमित्ते! णिवत्तीअदु किल। [सौमित्रे! निवर्त्यतां किल]।

**लक्ष्मणः** – आर्ये!

**गुरोर्मे पादशुश्रूषां त्वमेका कर्तुमिच्छसि।**
**तवैव दक्षिणः पादो मम सव्यो भविष्यति॥२७॥**

**प्रसङ्गः** – प्रस्तुतश्लोके सीता वनं गन्तुं लक्ष्मणं वारयति तदा लक्ष्मणः सीतां वदति।

**अन्वयः** – त्वम् एका मे गुरोः पादशुश्रूषां कर्त्तुम् इच्छसि। दक्षिणः पादः तव एव, मम सव्यः (पादः) भविष्यति।

**व्याख्या – (क) पर्यायपदानि** – त्वं = सीता, एका = केवला, मे = मम, गुरोः = रामस्य, पादशुश्रूषां = चरणानां सेवां, कर्त्तुं = विदधातुम्, इच्छसि = वाञ्छसि। दक्षिणः = सव्येतरः, पादः = चरणं, तवैव = भवदीयैव। मम तु = लक्ष्मणस्य, सव्यः = वामः, पादः भविष्यति = मेलिष्यति।

**(ख) भावार्थः** – भवती एकाकिनी मम (लक्ष्मणस्य) पूज्यभ्रातुः श्रीरामस्य चरणसेवां विधातुम् अभिलषसि। सव्येतरः चरणः भवत्याः एव सेवार्थमस्ति। मम (लक्ष्मणस्य) कृते तु वामः चरणः सेवार्थं मेलिष्यति अर्थात् लक्ष्मणस्य अभिप्रायः अस्ति यत् अहं भवत्याः अधिकारे बाधको न भूत्वा केवलं भ्रातुः श्रीरामस्य वामचरणमेव सेवितुम् इच्छामि। एतस्मात् एव कारणात् अहं वनं गन्तुमिच्छामि।

**विशेषः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति।

**सीता** – दीअदु खु अय्यउत्तो। सन्तप्पदि सोमत्ती। [दयतां खल्वार्यपुत्रः। संतप्यते सौमित्रिः।]

**रामः** – सौमित्रे! श्रूयताम्। वल्कलानि नाम –

**तपः सङ्ग्रामकवचं नियमद्विरदांकुशः।**
**खलीनमिन्द्रियाश्वानां गृह्यतां धर्मसारथिः॥२८॥**

**प्रसङ्गः** – यदा लक्ष्मणः वनं गन्तुं हठं करोति तदा रामः वल्कलवस्त्राणां महत्त्वं प्रतिपादयन् लक्ष्मणं वदति।

**अन्वयः** – तपः संग्रामकवचं नियमद्विरदाङ्कुशः इन्द्रियाश्वानां खलीनं धर्मसारथिः गृह्यताम्।

**व्याख्या – (क) पर्यायपदानि** – तपः संग्रामकवचं = तपोरूपे संग्रामे युद्धे धर्त्तव्यं कवचं वर्म, नियमद्विरदाङ्कुशः = नियमो व्रतमेव द्विरदो गजरतस्य अंकुशः वशीकरणसाधनम्, इन्द्रियाश्वानाम् = इन्द्रियाणि अश्वाः इव तेषां, खलीनं = नियन्त्रणप्रग्रहः, धर्मसारथिः = धर्मस्य रथस्य, सारथिः = चारकः, गृह्यतां = स्वीक्रियताम्।

**(ख) भावार्थः** – तपोरुपे संग्रामे युद्धे कवचं धर्तव्यम्। नियमो व्रतमेव गजः तस्य वशीकरणसाधनं, नेत्रादीनि सर्वेन्द्रियाणि घोटकाः तेषां कृते नियन्त्रणप्रग्रहः धर्मरथस्य स्यूतः इत्येवं मूलानि वल्कलानि वर्तन्ते। अतः स्वीक्रियताम्।

**विशेषः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः रूपकालंकारश्चास्ति।

**लक्ष्मणः** – अनुगृहीतोऽस्मि। (गृहीत्वा परिधत्ते)

**रामः** – श्रुतवृत्तान्तैः पौरैः सन्निरुधो राजमार्गः। उत्सार्यतामुत्सार्यतां तावत्।

**लक्ष्मणः** – आर्य! अहमग्रतो यास्यामि। उत्सार्यतामुत्सार्यताम्।

**रामः** – मैथिलि! अपनीयतामवगुण्ठनम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**सीता** – जं अय्यउत्तो आणवेदि। [यदार्यपुत्र आज्ञापयति।] (अपनयति)

**रामः** – भोः भोः पौराः ! शृण्वन्तु शृण्वन्तु भवन्तः ! –

**स्वैरं हि पश्यन्तु कलत्रमेतद् वाष्पाकुलाक्षैर्वदनैर्भवन्तः।**
**निर्दोषदृश्या हि भवन्ति नार्यो यज्ञे विवाहे व्यसने वने च॥२९॥**

**प्रसङ्गः** – यदा लक्ष्मणरामाभ्यां सह सीता वनं गच्छति तदा सर्वे नगरवासिनः एकत्रिताः सञ्जाताः। तस्मिन्नेव अवसरे रामः सीताम् अवगुण्ठनम् अपसारितुं वदति यतः सर्वे नगरवासिनः सीतां सम्यक्तया द्रष्टुं शक्नुयुः।

**अन्वयः** – वाष्पाकुलाक्षैः वदनैः भवन्तः एतत् कलत्रं स्वैरं पश्यन्तु। हि नार्यः यज्ञे विवाहे व्यसने वने च निर्दोषदृश्याः हि भवन्ति।

**व्याख्या – (क) पर्यायपदानि** – वाष्पाकुलाक्षैः = अश्रुपरिप्लुतनयनैः, वदनैः = मुखैः, भवन्तः = नगरवासिनः, एतत् = पुरतो वर्त्तमानं, कलत्रं = पत्नीं, स्वैरं = यथेच्छं, पश्यन्तु = अवलोकयन्तु। हि = यतः, नार्यः = स्त्रियः, यज्ञे = यज्ञकर्मणि, विवाहे = पाणिग्रहणविधौ, व्यसने = आपत्तिकाले, वने = अरण्ये, च = पुनः, निर्दोषदृश्याः = निर्दोषं दोषरहितं यथास्यात्तथा = दृश्याः दर्शनीयाः, भवन्ति = जायन्ते।

**(ख) भावार्थः** – (भोः पौराः) अश्रुपूरितनेत्रैः मुखैः नगरवासिनः पुरतो विद्यमानां पत्नीं (रामस्य भार्यां) सीतां निश्चयेन यथेच्छं विलोकयन्तु। यतः स्त्रियः यागकर्मणि, पाणिग्रहणविधौ, विपत्तौ (आपत्तिकाले) अरण्ये च निरपराधदृष्ट्या दर्शनीयाः जायन्ते। अर्थात् चतुर्षु स्थानेषु निर्मलभावनया स्त्रीदर्शने दोषः भवति।

**विशेष– उपजाति छन्दः, दीपकः अर्थान्तरन्यासश्च अलंकारः।**

(प्रविश्य)

**काञ्चुकीयः** – कुमार ! न खलु न खलु गन्तव्यम्। एष हि महाराजः।

**श्रुत्वा ते वनगमनं वधूसहायं**
**सौभ्रात्रव्यवसितलक्ष्मणानुयात्रम्।**
**उत्थाय क्षिवितलरेणुरूषिताङ्गः**
**कान्तारद्विरद इवोपयाति जीर्णः॥३०॥**

**प्रसङ्गः** – अत्र सीतया लक्ष्मणेन सह वनं गन्तुं रामं वारयितुं काञ्चुकीयः दशरस्थस्य स्थितिं च वर्णयन् वदति।

**अन्वयः** – वधूसहायं सौभ्रात्रव्यवसितलक्ष्मणानुयात्रं ते वनगमनं श्रुत्वा जीर्णः क्षिततलरेणुरूषितांगः कान्तारद्विरद इव उपयाति।

**व्याख्या – (क) पर्यायपदानि** – वधूसहायं = वधूः सीता, सहाया द्वितीया यस्मिन् तत् तथाभूतं, सौभ्रात्रव्यवसितलक्ष्मणानुयात्रं = सौभ्रात्रेण, भ्रातृस्नेहमहिम्ना, व्यवसिता संकल्पिता लक्ष्मणानुयात्रा लक्ष्मणानुममनं, यत्र तथाभूतं, ते = तव, रामस्य, वनगमनं = वनं प्रति प्रस्थानं, श्रुत्वा = निशम्य, जीर्णः = जरसाग्रस्तः, क्षिवितलरेणुरूषितांगः = क्षिवितलरुणेभिः धरातलधूलिभिः रूषिताङ्गः धूसरशरीरः, कान्तारद्विरद इव = वन्यकरीव, राजा उपयाति = इत आगच्छति।

**(ख) भावार्थः** – वधूसीतासहलक्ष्मणानुगमनं तव अरण्याय प्रस्थानम् आकर्ण्य (निशम्य) भूमेः उत्थितो भूत्वा धरातलधूलिभिः व्याप्तावयवाः यस्य तादृशः महाराजदशरथः वृद्धवन्यकरीव (अरण्यगजः यथा) अत्रैव आगच्छति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**विशेषः- उपमा परिकरालंकारश्च।**

**लक्ष्मणः** – आर्य!

**चीरमात्रोत्तरीयाणां किं दृश्यं वनवासिनाम्।**

**रामः** –

**गतेष्वस्मासु राजा नः शिरःस्थानानि पश्यतु॥३१॥**

**प्रसङ्गः** – वनगमनकाले काञ्चुकीयः रामं लक्ष्मणं च वदति यत् महाराजदशरथः भवन्तौ दर्शनार्थमत्र आगच्छति तदा द्वावपि भ्रातरौ वदतः।

**अन्वयः** – चीरमात्रोत्तरीयाणां वनवासिनां किं दृश्यम्? राजा अस्मासु गतेषु न शिरः स्थानानि पश्यतु।

**व्याख्या – (क) पर्यायपदानि** – चीरमात्रं = वल्कलमात्रम्, उत्तरीयं = दुकूलादिकं, येषां तथाभूतानामस्माकं, वनवासिनाम् = अरण्यप्रस्थानोन्मुखानां, किं दृश्यं = दर्शनीयम्? न किमपीत्यर्थः। राजा = दशरथः, अस्मासु, गतेषु = अप्रतीक्ष्यैव राजानं वनं प्रस्थितेषु, नः = अस्माकं, शिरःस्थानानि = प्रधानवासस्थानानि, पश्यतु = विलोकयतु।

**(ख) भावार्थः** – वल्कलमात्रं दुकूलादिकम् अरण्यप्रस्थानोत्सुकानाम् अस्माकं किम् अवलोकनीयम्? नृपो दशरथः रामादिषु वनं गतेषु अस्माकं मुख्यावासस्थानानि विलोकयतु।

**विशेषः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति।

(इति निष्क्रान्ताः सर्वे)

**इति प्रथमोऽङ्कः**

## अथ द्वितीयोऽङ्कः

(ततः प्रविशति काञ्चुकीयः)

**काञ्चुकीयः** – भोः भोः प्रतीहारव्यापृताः! स्वेषु स्थानेष्वप्रमत्ता भवन्तु भवन्तः।

(प्रविश्य)

**प्रतीहारी** – अय्य किं एदं? [आर्य! किमेतत्?]

**काञ्चुकीयः** – एष हि महाराजः सत्यवचनरक्षणपरो राममरण्यं गच्छन्तमुपावर्तयितुमशक्तः पुत्रविरहशोकाग्निना दग्धहृदय उन्मत्त इव बहु प्रलपन् समुद्रगृहके शयानः –

**मेरुश्चलन्निव युगक्षयसन्निकर्षे**
**शोषं व्रजन्निव महोदधिरप्रमेयः।**
**सूर्यः पतन्निव च मण्डलमात्रलक्ष्यः**
**शोकाद् भृशं शिथिलदेहमतिर्नरेन्द्रः॥१॥**

**प्रसङ्गः** – एतस्मिन् श्लोके रामस्य वनगमनानन्तरं महाराजदशरथस्य वनगतपुत्रशोकावस्थायाः वर्णनं कुर्वन् काञ्चुकीयः वदति।

**अन्वयः** – युगक्षयसन्निकर्षे चलन् मेरुः इव शोषं व्रजन् अप्रमेयः महोदधिः इव पतन्, मण्डलमात्रलक्ष्यः सूर्य इव नरेन्द्रः शोकात् भृशं शिथिलदेहमतिः (वर्तते)।

**व्याख्या – (क) पर्यायपदानि** – युगक्षयसन्निकर्षे = युगस्य क्षयो युगान्तस्तस्य सामीप्योपसृतौ, चलन् =



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

गच्छन्, मेरुः = तन्नामा स्वर्गगिरिः, इव = यथा, शोषं = शुष्कतां, व्रजन् = प्राप्नुवन्, अप्रमेयः = परिच्छेत्तुमशक्यः, महोदधिः = महांश्चासौ उदधिरिति महोदधि महासागरः, इव = यथा, पतन् = तेजोविहीनः, सन् अस्तमुपगच्छन्, मण्डलमात्रलक्ष्यः = उपसंहृतरश्मितया केवलमण्डलमात्रमेव लक्ष्यः अर्थात् प्रशान्तप्रतापः, सूर्यः = रविः, इव = यथा, नरेन्द्रः = भूपेन्द्रः, दशरथः, शोकात् = पुत्रविरहजन्यक्लेशात्, भृशम् = अत्यर्थं, शिथिलदेहमतिः = अवसन्नकाय-बुद्धिः वर्तते।

**( ख ) भावार्थः** – युगस्य क्षयो सामीप्योपसृतौ गच्छन् सुमेरुनामकपर्वतः यथा शुष्कतां गच्छन्, परिच्छेतुमशक्यः (अगाधजलः) महासागर : यथा तेजोविहीनः सन् अस्तमुपगच्छन् उपसंहृतकिरणतया मण्डलमात्रदर्शनीयः (शान्तप्रतापः) भानुः यथा महाराजः पुत्रविरहजन्मक्लेशात् अत्यन्तम् अवसन्नकायबुद्धिः वर्तते।

**विशेषः** – अस्मिन् श्लोके वसन्ततिलका छन्दः, मालोपमालङ्कारश्चास्ति।

**प्रतीहारी** – हा हा एवं गतो महाराओ। [हा हा एवं गतो महाराजः]।

**काञ्चुकीयः** – भवति ! गच्छ।

**प्रतीहारी** – अय्य ! तह ! (निष्क्रान्ता)। [आर्य ! तथा]।

**काञ्चुकीयः** – (सर्वतो विलोक्य) अहो नु खलु रामनिर्गमनदिनादारभ्य शून्यैवेयमयोध्या संलक्ष्यते। कुतः –

**नागेन्द्रा यवसाभिलाषविमुखाः सास्त्रेक्षणा वाजिनो**
**ह्रेषाशून्यमुखाः सवृद्धवनिताबालाश्च पौरा जनाः।**
**त्यक्ताहारकथाः सुदीनवदनाः क्रदन्त उच्चैर्दिशा**
**रामो याति यया सदारसहजस्तामेव पश्यन्त्यमी॥ २॥**

**प्रसङ्गः** – प्रस्तुते श्लोके काञ्चुकीयः वदति यत् रामस्य वनगमनादनन्तरम् अयोध्यायां शून्यता दृश्यते।

**अन्वयः** – अमी यवसाभिलाषविमुखी नागेन्द्राः सास्त्रेक्षणाः ह्रेषाशून्यमुखाः वाजिनः, त्यक्ताहारकथाः सुदीनवदनाः उच्चैः क्रदन्तः सवृद्धवनिताबालाः पौराः जनाः च यया दिशा सदारसहजः रामः याति, ताम् एव (दिशं) पश्यन्ति।

**व्याख्या – ( क ) पर्यायपदानि** – अमी = पुरोदृश्यमानाः, सर्वेऽपि इमे, यवसाभिलाषविमुखाः कोमलघासप्रासपराङ्मुखाः, नागेन्द्राः = गजश्रेष्ठाः, सास्त्रेक्षणाः = सवाष्पनयनाः, ह्रेषाशून्यमुखाः = ह्रेषा अश्वशब्दः, तेन शून्यानि मुखानि येषां ते तथाभूताः, अर्थात् घोटकशब्दरहितवदनाः, वाजिनः = अश्वाः, त्याक्ताहारकथाः = विसृष्टभोजनवार्त्ताः, अत एव दीनानि दैन्ययुक्तानि, वदनानि मुखानि येषां ते सुदीनवदनाः = अतिदैन्यमुखाः, उच्चैः = तारस्वरैः, क्रन्दन्तः = रुदन्तः, सवृद्धवनिताबालाः = वृद्धैर्वनिताभिर्बालैश्च सहिताः, पौराः = पुरवासिनः, जनाः = लोकाः, च = पुनः, यया दिशा = यस्मिन् दिशि, सदारसहजः = दारैः पत्न्या सहजेन भ्रात्रा सहित इति सदारसहजः, रामः = रघुकूलश्रेष्ठः उदारपुरुषः, याति = गच्छति, तामेव दिशं पश्यन्ति = विलोकयन्ति।

**( ख ) भावार्थः** – पुरोदृश्यमाना (सर्वेऽपि इमे) सवाष्पनयनाः गजश्रेष्ठाः कोमलहासग्रासपराङ्गमुखाः (सञ्जाताः) अश्वाः घोटकध्वनिरहितवदनाः, विसृष्टभोजनवार्ताः अतिदीनमुखाः तारस्वरेण रुदन्तः वृद्धैर्वनिताभिबलैश्च सहिताः पुरवासिनः जनाः पुनः यस्यां दिशि पत्न्या सीतया सहजेन सहोदरेण भ्रात्रा लक्ष्मणेन च सह रघुकूलश्रेष्ठः उदारपुरुषः रामचन्द्रः गच्छति सर्वेऽपि इमे तामेव दिशम् अवलोकयन्ति।

**विशेषः** – श्लोकेऽस्मिन् शार्दूलविक्रीडतं छन्दः अस्ति। पुनश्चात्र स्वभावोक्तिः परिकरश्चालङ्कारौ स्तः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

यावदहमपि महाराजस्य समीपवर्ती भविष्यामि। (परिक्रम्यावलोक्य) अये! अयं महाराजो महादेव्या सुमित्रया च सुदु:सहमपि पुत्रविरहसमुद्भवं शोकं निगृह्यात्मानमेव संस्थापयन्तीभ्यामन्वास्यमानस्तिष्ठति। कष्टा खल्ववस्था वर्तते। एष एष महाराजः –

**पतत्युत्थाय चोत्थाय हा हेत्युच्चैर्लपन् मुहुः।**
**दिशं पश्यति तामेव यया यातो रघूद्वहः॥ ३॥**

**प्रसङ्गः** – प्रस्तुतश्लोके महाराजदशरथस्य पुत्रवियोगजन्यदु:खदावस्थायाः वर्णनं कृतमस्ति।

**अन्वयः** – उत्थाय च उत्थाय हा हा इति मुहुः उच्चैः लपन् पतति। यया रघूद्वहः यातः तामेव दिशं पश्यति।

**व्याख्या – ( क ) पर्यायपदानि** – उत्थाय चोत्थाय = प्रयत्नपूर्वकेणोत्तिष्ठति, हा हेति = दीनतासूचकान् शब्दान्, मुहुः = वारं वारम्, उच्चैः = तार–स्वरेण, लपन् = उच्चारयन्, पतति = स्खलनं याति, यया = दिशा, रघूद्वहः = रघुवंशश्रेष्ठः, यातः = गतः, तामेव दिशं = दिशां, पश्यति = अवलोकयति।

**( ख ) भावार्थः** – हा हा इत्थं दीनता सूचकान् शब्दान् पुनः पुनः तारस्वरेण उच्चारयन् उत्तिष्ठति पुनश्च भूमौ स्खलनं याति। यया दिग्विभागेन रघुवंशश्रेष्ठः रामचन्द्रः गतः तामेव दिशं विलोकयति।

**विशेषः** – अस्मिन् श्लोके अनुष्टुप् छन्दः अस्ति।

(निष्क्रान्तः)

मिश्रविष्कम्भकः।

(ततः प्रविशति यथानिर्दिष्टो राजा देव्यौ च)

**राजा –**

**हा वत्स! राम! जगतां नयनाभिराम!**
**हा वत्स! लक्ष्मण! सलक्षणसर्वगात्र!**
**हा साध्वि! मैथिलि! पतिस्थितचित्तवृत्ते!**
**हा हा गताः किल वनं वत मे तनूजाः॥ ४॥**

**प्रसङ्गः** – प्रस्तुतश्लोके वनगमनात् परं महाराजः दशरथः रामस्य, लक्ष्मणस्य सीतायाः च पुनः पुनः स्मरणं कुर्वन् वदन् अस्ति।

**अन्वयः** – हा वत्स! जगतां नयनाभिराम! राम! हा वत्स सलक्षणसर्वगात्र! लक्ष्मण! हा साध्वि! पतिस्थितचित्तवृत्ते! मैथिलि! वत मे तनूजाः हा हा किल वनं गताः।

**व्याख्या – ( क ) पर्यायपदानि** – हा = इति कष्टे, वत्स = पुत्र राम, जगतां = लोकानां, नयनाभिराम = नयनरमणीय, हा वत्स = लक्ष्मण, सलक्षणसर्वगात्र = उत्तमपुरुषयुक्त, लक्षणसर्वांग, हा साध्वि = मैथिलि पतिव्रते सीते, पतिस्थितचित्तवृत्ते = पत्यौ स्थिता आसक्ता चित्तवृत्तिर्यस्यास्तस्याः संबुद्धिः, मैथिलि = जनकसुते, वत = इति खेदे, मे = मम, तनूजाः = पुत्राः, हा हा, किल = निश्चयेन, वनम् = अरण्यं, गताः = याताः।

**( ख ) भावार्थः** – अहो लोकानां लोचनरोचन (नयनरमणीयः) अतिशयप्रियः राघव! उत्तमपुरुषयुक्तलक्षणसर्वाङ्ग सौमित्रे! हे स्वामिसंलग्नहृदये पतिव्रते जनकसुते! हा हा निश्ययेन महत्दु:खं यत् मम दशरथस्य पुत्राः अरण्यं प्रस्थिताः।

**विशेषः** – श्लोकेऽस्मिन् वसन्ततिलका छन्दः अस्ति। परिकरालङ्कारोऽपि अस्ति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

चित्रमिदं भो: ! यद् भ्रातृस्नेहात् पितरि विमुक्तस्नेहमपि लक्ष्मणं द्रष्टुमिच्छामि। वधु वैदेहि !

**रामेणापि परित्यक्तो लक्ष्मणेन च गर्हित:।**
**अयशोभाजनं लोके परित्यक्तस्त्वयाप्यहम्॥५॥**

**प्रसङ्गः** – प्रस्तुतश्लोके भ्रातृस्नेहात् पितरि विमुक्तस्नेहमपि लक्ष्मण: गत: इति उक्त्वा दशरथस्य आत्मग्लानि: भवति।

**अन्वयः** – रामेण अपि परित्यक्त:, लक्ष्मणेन च गर्हित:, त्वया अपि (अधुना) परित्यक्त: अहं लोके अयशोभाजनम् (जात:)।

**व्याख्या – (क) पर्यायपदानि** – रामेणापि = ज्येष्ठसुतेनापि, परित्यक्त: = परित्याग: कृत:, च = पुन:, लक्ष्मणेन = सुमित्रानन्दनेन, गर्हित: = मत्परित्यागपूर्वकभ्रात्रनुगमनभंग्या निन्दित:, त्वया अपि = सीतया अपि, परित्यक्त: = संत्यक्त:, अहं = दशरथ:, अधुना, लोके = संसारे, अयश: = अपकीर्त्ते:, भाजनं = पात्रं जात:।

**(ख) भावार्थः** – दशरथ: ज्येष्ठपुत्रेणाऽपि परित्यक्त: पुन: सुमित्रानन्दनेन मत्परित्यागपूर्वकं भ्रातुरनुगमनं मया निन्दित: इत्थं सीतया अपि उज्झित: सन् अधुना पुत्रत्यागेनाहं संसारे अपकीर्ते: पात्रं जात:।

**विशेषः** – अस्मिन् श्लोके अनुष्टुप् छन्द: अस्ति।

पुत्र राम ! वत्स लक्ष्मण ! वधु वैदेहि ! प्रयच्छत मे प्रतिवचनं पुत्रका:। शून्यमिदं भो: ! न मे कश्चित् प्रतिवचनं प्रयच्छति। कौसल्यामात: क्वासि ?

**सत्यसन्ध! जितक्रोध! विमत्सर! जगत्प्रिय!**
**गुरुशुश्रूषणे युक्त! प्रतिवाक्यं प्रयच्छ मे॥६॥**

**प्रसङ्गः** – अस्मिन् श्लोके रामस्य स्मरणं कृत्वा दशरथ: वदति।

**अन्वयः** – सत्यसन्ध ! जितक्रोध ! विमत्सर ! जगत्प्रिय ! गुरुशुश्रूषणे युक्त ! प्रतिवाक्यं प्रयच्छ।

**व्याख्या – (क) पर्यायपदानि** – सत्यसन्ध = अवितथप्रतिज्ञ, जितक्रोध = आत्मवशीकृतकोपवेग, विमत्सर = विगत: मत्सर: अन्यशुभद्वेषो यस्य तत्सम्बुद्धौ, अत एव जगत्प्रिय = संसारप्रेमास्पद, गुरुशुश्रूषणे युक्त = गुरुणां पूजनीयानां पित्रादीनां शुश्रूषणे सेवायां युक्त: = तत्पर:, मे = मम, प्रतिवाक्यं = प्रत्युत्तरं, प्रयच्छ = देहि।

**(ख) भावार्थः** – हे अवितथप्रतिज्ञ। आत्मवशीकृतकोपवेगमात्सर्यशून्य ! संसारप्रेमास्पद ! गुरुजनानां पित्रादीनां सेवायां तत्पर: मम कृते प्रत्युत्तरं देहि।

**विशेषः** – श्लोकेऽस्मिन् अनुष्टुप् छन्द: अस्ति।

हा क्वासौ सर्वजनहृदयनयनाभिरामो राम: ? क्वासौ मयि गुर्वनुवृत्ति: ? क्वासौ शोकार्तेष्वनुकम्पा ? क्वासौ तृणावदगणितराज्यैश्वर्य: ? पुत्र ! राम ! वृद्धं पितरं मां परित्यज्य किमसम्बद्धेन धर्मेण ते कृत्यम्। हा धिक्। कष्टं भो: !

**सूर्य इव गतो राम: सूर्यं दिवस इव लक्ष्मणोऽनुगत:।**
**सूर्यदिवसावसाने छायेव न दृश्यते सीता॥७॥**

**प्रसङ्गः** – प्रस्तुतश्लोके वनगमनात् परं महाराजदशरथ: रामस्य स्मरणं कृत्वा वदति।

**अन्वयः** – राम: सूर्य: इव गत:, दिवस इव लक्ष्मण: सूर्यम् अनुगत:। सूर्यदिवसावसाने छाया इव सीता न दृश्यते।

**व्याख्या – (क) पर्यायपदानि** – राम: = कौशल्यानन्दन:, सूर्य: = रवि:, इव = यथा, गत: =



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

दृष्टिगोचरादपेतः, दिवस इव, लक्ष्मणः = सुमित्रानन्दनः, सूर्यम्, अनुगतः = रामस्य पश्चाद् गतः। सूर्यादिवसावसाने = प्रदोषकाले, छाया इव सीता = मैथिली, न दृश्यते।

**( ख ) भावार्थः** – कौसल्यानन्दनः रामचन्द्रः आदित्य इव दृष्टिगोचरादपेतः। अस्तमितं दिवस इव सुमित्रानन्दनः रामस्य पश्चात् गतः। प्रदोषकाले (सूर्यस्य दिवसस्य च अवसाने अन्ते) छाया इव मैथिली नावलोक्यते।

**विशेषः** – अस्मिन् श्लोके आर्याछन्दः अस्ति।

(ऊर्ध्वमवलोक्य) भोः कृतान्तहतक!

**अनपत्या वयं रामः पुत्रोऽन्यस्य महीपतेः।**
**वने व्याघ्री च कैकेयी त्वया किं न कृतं त्रयम्॥८॥**

**प्रसङ्गः** – प्रस्तुतश्लोके दशरथः पुत्रवियोगे व्याकुलो भूत्वा यमराजं प्रति वदति।

**अन्वयः** – वयम् अनपत्याः, रामः अन्यस्य महीपतेः पुत्रः, कैकेयी वने व्याघ्री च, त्वया त्रयं किं न कृतम्।

**व्याख्या – ( क ) पर्यायपदानि** – वयं = दशरथादयः, अनपत्याः =नास्ति अपत्यं सन्ततिर्येषां ते तादृशाः, न कृता इति शेषः, रामः = कौशल्यासुतः, अन्यस्य = मद्भिन्नस्य, महीपतेः = राज्ञः, पुत्रः = सुतः न कृतः। कैकेयी = भरतमाता, वने = अरण्ये, च = पुनः, व्याघ्री = क्रूरस्वभावा व्याघ्रभार्या (न कृता)। त्वया = विधात्रा, त्रयम् = एतत्त्रयं, किं = कस्मात् कारणात् न, कृतं = विहितम्।

**( ख ) भावार्थः** – भवता दशरथादयः सन्तानहीनाः (किं न कृताः), कौसल्यासुतः राघवः मद्भिन्नस्य नृपस्य तनयः (किं न कृतः), भरतमाता पुनः अरण्ये क्रुरस्वभावा व्याघ्रभार्या (किं न कृता)। विधात्रा एतत् त्रयं कस्मात् कारणात् न विहितम्?

**विशेषः** – अस्मिन् श्लोके अनुष्टुप् छन्दः अस्ति।

**कौसल्या** – (सरुदितम्) अलं दाणि महाराओ अदिमत्तं सन्तप्पिअ परवसं अत्ताणं कादुं। णं सा ते आ कुमारा महाराअस्स समआवसाणे पेक्खिदव्वा भविस्सन्ति। [अलमिदानीं महाराजोऽतिमात्रं सन्तप्य परवशमात्मनं कर्त्तुम्। ननु सा तौ च कुमारौ महाराजस्य समयावसाने प्रेक्षितव्या भविष्यन्ति।]

**राजा** – का त्वं भोः?

**कौसल्या** – असिणिद्धपुत्तप्पसविणी खु अहं। [अस्निग्धपुत्रप्रसविनी खल्वहम्।]

**राजा** – किं किं सर्वजनहृदयनयनाभिरामस्य जननी त्वमसि कौसल्या?

**कौसल्या** – महाराअ! सा एव मन्दभाइणी खु अहं। [महाराज! सैव मन्दभागिनी खल्वहम्।]

**राजा** – कौसल्ये! सारवती खल्वसि। त्वया हि खलु रामो गर्भे धृतः।

**अहं हि दुःखमत्यन्तमसह्यं ज्वलनोपमम्।**
**नैव सोढुं न संहर्तुं शक्नोमि मुषितेन्द्रियः॥९॥**

**प्रसङ्गः** – प्रस्तुतश्लोके रामस्य वियोगजन्यदुःखकारणात् दशरथस्य इन्द्रियाणां शक्तिः नष्टा भवति इति वर्णितम् अस्ति।

**अन्वयः** – अहं हि मुषितेन्द्रयः (सन्) अत्यन्तम् असह्यं ज्वलनोपमं दुःखं नैव सोढुं नैव संहर्त्तुं शक्नोमि।

**व्याख्या – ( क ) पर्यायपदानि** – अहं = दशरथः, हि = इति निश्चये, मुषितेन्द्रियः = मुषितानि उपहतसामर्थ्यानि इन्द्रियाणि ज्ञानकर्मोभयेन्द्रियाणि यस्य तथाभूतः, अत्यन्तम् = अत्यधिकम्, असह्यं = सोढुमशक्यं,



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

ज्वलनोपमम् = अग्नितुल्यं, दु:खं = कष्टं, नैव सोढुं = न सहनं कर्त्तुं, नैव = न च संहर्त्तुं = विनाशं कर्त्तुं, शक्नोमि = समर्थोऽस्मि।

**( ख ) भावार्थ:** – दशरथ: शिथिलेन्द्रिय: सन् अनलतुल्यम् अत्यधिकं सोढुमशक्यं पुत्रवियोगजन्यं कष्टं प्रतीकारेण अपनेतुं समर्थोनास्ति।

**विशेष:** – श्लोकेऽस्मिन् अनुष्टुप् छन्द: अस्ति। पुनश्चात्र उपमालङ्कारोऽपि अस्ति।

(सुमित्रां विलोक्य) इयमपरा का ?

**कौसल्या** – महाराअ ! वच्छलक्ष्मण: – (इत्यर्धोक्ते) [महाराज ! वत्स लक्ष्मण.......]

**राजा** – (सहसोत्थाय) क्वासौ क्वासौ लक्ष्मण: ?न दृश्यते। भो: कष्टम्।

(देव्यौ ससंभ्रममुत्थाय राजानमवलम्बेते)

**कौसल्या** – महाराअ! वच्छलक्खणस्स जणणी सुमित्तेति वत्तुं मए उवक्कन्दं। [महाराज! वत्सलक्ष्मणस्य जननी सुमित्रेति वक्तुं मयोपक्रान्तम्।]

**राजा** – अयि सुमित्रे !

**तवैव पुत्र: सत्पुत्रो येन नक्तन्दिवं वने।**
**रामो रघुकुलश्रेष्ठश्छाययेवानुगम्यते॥१०॥**

**प्रसङ्ग:** – प्रस्तुतश्लोके दशरथ: लक्ष्मणस्य मातरं सुमित्रां दृष्ट्वा वदति।

**अन्वय:** – तव पुत्र: एव सत्पुत्र:, येन वने रघुकूलश्रेष्ठ: राम: नक्तन्दिवं छायया इव अनुगम्यते।

**व्याख्या – ( क ) पर्यायपदानि** – तव = सुमित्राया:, पुत्र = सुत:, एव, सत्पुत्र: = प्रशंसाभाजनं तनय:, येन = लक्ष्मणेन, वने = अरण्ये, रघुकूलक्षेष्ठ: = रघुवंशावतंस:, राम: = कौशल्यासुत:, नक्तदिवं = दिवानिशं, छायया इव, अनुगम्यते = अनुसरणं क्रियते।

**( ख ) भावार्थ:** – सुमित्राया: सुत: लक्ष्मण: एव सुतनय: अस्ति। यतोहि लक्ष्मणेन विपिने रघुवंशशिरामणि राघव: दिवानिशम् अनातपेन यथा अनुस्रियते अर्थात् सर्वजनप्रियेण रामेण सह छायेव तव पुत्र: लक्ष्मण: तिष्ठति।

**विशेष:** – श्लोकेऽस्मिन् अनुष्टुप् छन्द: अस्ति। पुनश्च उपमालङ्कारोऽपि अत्रास्ति।

(प्रविश्य)

**काञ्चुकीय:** – जयतु महाराज:। एष खलु तत्रभवान् सुमन्त्र: प्राप्त:।

**राजा** – (सहसोत्थाय सहर्षम्) अपि रामेण।

**काञ्चुकीय:** – न खलु रथेन।

**राजा** – कथं कथं रथेन केवलेन ?(इति मूर्च्छित: पतति)

**देव्यौ** – महाराअ! समस्ससिहि समस्ससिहि। (गात्राणि परामृशत:) [महाराज! समाश्वसिहि, समाश्वसिहि।]

**काञ्चुकीय:** – भो ! कष्टम्। ईदृग्विधा: पुरुषविशेषा ईदृशीमापदं प्राप्नुवन्तीति विधिरनतिक्रमणीय:। महाराज ! समाश्विसिहि समाश्वसिहि।

**राजा** – (किञ्चित् समाश्वस्य) बालाके ! सुमन्त्र एक एव ननु प्राप्त:।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**काञ्चुकीयः** – महाराज ! अथ किम् ?

**राजा** – कष्टं भो !

**शून्यः प्राप्तो यदि रथो भग्नो मम मनोरथः ।**
**नूनं दशरथं नेतुं कालेन प्रेषितो रथः ॥ ११ ॥**

**प्रसङ्गः** – यदा सुमन्त्रः रामं वनं परिव्रज्य एकाकी एव रथेन आगतः तदा रामेण रहितं रथं दृष्ट्वा दशरथः चिन्तयति इत्यत्र वर्णितमस्ति ।

**अन्वयः** – यदि रथः शून्यः प्राप्तः (तर्हि) मम मनोरथः भग्नः । नूनं दशरथं नेतुं कालेन रथः प्रेषितः ।

**व्याख्या – (क) पर्यायपदानि** – यदि = स्यात्, रथः = स्यन्दनः, शून्यः = रामविरहितः, प्राप्तः = आयातस्तर्हि, मम = दशरथस्य, मनोरथः = शोकपर्याकुलं, मां ज्ञात्वा कदाचिद्रामः प्रतिनिवर्त्तेत इत्यात्मकः, भग्नः = त्रुटितः । नूनं = निश्चयेन दशरथं = मां, नेतुम् = आनयितुं, कालेन = यमेन, रथः = स्यन्दनः, प्रेषितः ।

**(ख) भावार्थः** – स्यन्दनः यदि रामसीतादिविरहितः आयातः तर्हि मम (दशरथस्य) मनोकामना त्रुटिता । पुनश्च निश्चयेन एवं प्रतीयते यत् माम् (दशरथम्) आनेतुं यमेन स्यन्दनः प्रेषितः ।

**काञ्चुकीयः** – यदाज्ञापयति महाराजः । (निष्क्रान्तः) श्लेष, उत्प्रेश्रा, अनुरूप छन्दः

**राजा** –

**धन्याः खलु वने वातास्तटाकपरिवर्तिनः ।**
**विचरन्तं वने रामं ये स्पृशन्ति यथासुखम् ॥ १२ ॥**

**प्रसङ्गः** – दशरथः रामस्य वनगमनात् परम् अत्यन्तो व्याकुलो भूत्वा यद् वदति, तदत्र वर्णितमस्ति ।

**अन्वयः** – वने तटाकपरिवर्तिनः वाताः धन्याः खलु, ये वने विचरन्तं रामं यथासुखं स्पृशन्ति ।

**व्याख्या – (क) पर्यायपदानि** – वने = अरण्ये, तटाकपरिवर्तिनः = पद्माकरे विचरणशीलाः, वाताः = काननमारुताः, धन्याः = सौभाग्यभाजाः, खलु = निश्चयेन, ये = वाताः, वने = कानने, विचरन्तं = विरहन्तं, रामं = दशरथात्मजं, यथासुखं = यथेच्छं, स्पृशति = आलिंगन्ति ।

**(ख) भावार्थः** – अरण्ये कमलाकरे विचरणशीलाः वनपवनाः निश्चयेन सौभाग्यवन्तः ये पवनाः (वाताः) कानने विहरन्तं कौशल्यानन्दनं राघवं यथेच्छम् आलिङ्गन्ति ।

**विशेषः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति । अत्र अप्रस्तुतप्रशंसालङ्कारोऽपि अस्ति ।

(ततः प्रविशति सुमन्त्रः)

**सुमन्त्रः** – (सर्वतो विलोक्य सशोकम्)

**एते भृत्याः स्वानि कर्माणि हित्वा स्नेहाद् रामे जातवाष्पाकुलाक्षाः ।**
**चिन्तादीनाः शोकसन्दग्धदेहा विक्रोशन्तं पार्थिवं गर्हयन्ति ॥ १३ ॥**

**प्रसङ्गः** – रामं वनं परित्यज्य अयोध्याम् आगतः सुमन्त्रः राजभवनस्य सेवकान् दृष्ट्वा यद् वदति, तदत्र वर्णितमस्ति ।

**अन्वयः** – एते भृत्याः रामे स्नेहात् जातवाष्पाकुलाक्षाः, चिन्तादीनाः शोकसंदग्धदेहाः स्वानि कर्माणि हित्वा विक्रोशन्तं पार्थिवं गर्हयन्ति ।

**व्याख्या – (क) पर्यायपदानि** – ए ते भृत्याः = सेवकाः, रामे स्नेहात् = रामं प्रति अनुरागात्,



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

जातवाष्पाकुलाक्षाः = जातैः = उत्पन्नैः, वाष्पैः = अश्रुभिः, आकुले व्याप्ते अक्षिणी येषां ते जातवाष्पाकुलाक्षाः, चिन्तादीनाः = चिन्तया रामः कीदृशो वने भविष्यतीतयादिरूपया दीनाः = आर्त्ताः, शोकसन्दग्धदेहाः = शोकेन क्लेशेन, सन्दग्धः सम्यक् भस्मीभूतः देहो येषां ते तादृशाः, स्वानि = स्वकीयानि, कर्माणि = कार्याणि, हित्वा = परित्यज्य, विक्रोशन्तं = राम रामेति विलपन्तं, पार्थिवं = नृपं, गर्हयन्ति = निन्दन्ति।

**( ख ) भावार्थः** – इमे सेवकाः रामचन्द्रे अनुरागात् उत्पन्नैः अश्रुभिः व्याप्ते नेत्रे, रामः वने कीदृशो भविष्यति इति चिन्त्या पीडिताः दुःखेन विनष्ट शरीरयुक्ताः स्वकीयानि कार्याणि परित्यज्य भो रामेति विलपन्तं नृपं दशरथं निन्दति।

**विशेषः** – श्लोकेऽस्मिन् शालिनी छन्दः अस्ति। अस्य लक्षणमिदं –

मत्तौ गौ चेच्छालिनी वेदलोकैः॥

परिक्ररालङलंकारः

(उपेत्य) जयतु महाराजः।

**राजा** – भ्रातः। सुमन्त्र! क्व मे ज्येष्ठो रामः?

नहि, नहि युक्तमभिहितं मया।

**क्व ते ज्येष्ठो रामः प्रियसुत! सुतः सा क्व दुहिता**
**विदेहानां भर्तुर्निरतिशयभक्तिर्गुरुजने।**
**क्व वा सौमित्रिर्मां हतपितृकमासन्नमरणं**
**किमप्याहुः किं ते सकलजनशोकार्णवकरम्॥१४॥**

**प्रसङ्गः** – कौसल्यानन्दनं वनं परित्यज्य राजभवनम् आगतं सुमन्त्रं राजादशरथः यद् वदति तदत्र वर्णितमस्ति।

**अन्वयः** – प्रियसुत ते ज्येष्ठः सुतः रामः क्व? सा गुरुजने निरतिशयभक्तिः विदेहानां भर्तुः दुहिता क्व? सौमित्रिः वा क्व? किं ते सकलजनशोकार्णवकरम् आसन्नमरणं हतपितृकं मां किमपि आहुः?

**व्याख्या – ( क ) पर्यायपदानि** – हे प्रियसुत = प्रियसुत अर्थात् राम एव यस्य तस्य संबुद्धिः, ते = तव, ज्येष्ठः = प्रथमः, सुतः = पुत्रः, रामः = कौशल्यानन्दनः, क्व = कुत्रास्ति? सा = जानकी, गुरुजने = श्वशुरादौ, निरतिशयभक्तिः = सर्वातिशायिभक्तिसंवलिता, विदेहानां = मिथिलानामकदेशविशेषाणां, भर्तुः = स्वामिनः, दुहिता = पुत्री, क्व = कुत्र, सौमित्रिः = सुमित्रानन्दनः, वा = अथवा, क्व = कुत्र? किं ते = रामादयः, सकलजनशोकार्णवकरम् = अखिललोकखेदसमुद्रोत्पादकम्, आसन्नमरणम् = आसन्नं सन्निहितं मरणं यस्य तं, हतपितृकम् = अभाग्यभाजनं निजं जनकं, मां = दशरथं, किमप्याहुः = किमपि संदिदिशुः?

**( ख ) भावार्थः** – रामाय आत्मनः प्रियसुतवत् स्नेप्रदात्तु तव सुमन्त्रस्य प्रथमः पुत्रः कौसल्यानन्दनः रामः कुत्र अस्ति? श्वशुरादौ सर्वातिशयिभक्तिसंवलिता मिथिलानामकदेशस्य स्वामिनः महाराजजनकस्य पुत्री सीता कुत्र अस्ति? अथवा सुमित्रानन्दनः लक्ष्मणः कुत्र अस्ति? अखिललोकखेदसमुद्रोपपादकं यस्य मृत्युः समीपे एव अस्ति तादृशं दुर्भाग्यशाली (अभाजभाजनं) स्वजनकं दशरथं ते रामादयः किमपि संदेशं प्रेषितवन्तः किम्?

**विशेषः** – श्लोकेऽस्मिन् शिखरिणी छन्दः अस्ति। अस्य लक्षणमिदं –

रसै रुद्रैश्छिन्ना यमनसभलागः शिखरिणी।

पुनश्चात्र रूपकनामकः अलङ्कारोऽपि अस्ति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**सुमन्त्रः** – महाराज! मा मैवमङ्गलवचनानि भाषिष्ठाः। अचिरादेव तान् द्रक्ष्यसि।

**राजा** – सत्यमयुक्तमभिहितं मया। नायं तपस्विनामुचितः प्रश्नः। तत् कथ्यताम्। अपि तपस्विनां तपो वर्धते ?अप्यरण्यानि स्वाधीनानि विचरन्ती वैदेही न परिखिद्यते ?

**सुमित्रा** – सुमन्तः ! बहुवक्कलालङ्किदसरीरा बाला वि अबालचारित्ता भत्तुणो सहधम्मआरिणी अह्म महाराअं किञ्चि णालवदि। [सुमन्त्र! बहुवल्कलालङ्कृतशरीरा बालाप्यबालचारित्रा भर्तुः सहधर्मचारिणी अस्मान् महाराजं च किञ्चिन्नालपति।]

**सुमन्त्रः** – सर्व एव महाराजम् –

**राजा** – न न। श्रोत्ररसायनैमर्म हृदयातुरौषधैस्तेषां नामधेयैरेव श्रावय।

**सुमन्त्रः** – यदाज्ञापयति महाराजः। आयुष्मान् रामः।

**राजा** – राम इति। अयं रामः। तन्नामश्रवणात् स्पृष्ट इव मे प्रतिभाति। ततस्ततः।

**सुमन्त्रः** – आयुष्मान् लक्ष्मणः।

**राजा** – अयं लक्ष्मणः। ततस्ततः।

**सुमन्त्रः** – आयुष्मती सीता जनकराजपुत्री।

**राजा** – इयं वैदेही। रामो लक्ष्मणो वैदेहीत्ययमक्रमः।

**सुमन्त्रः** – अथ कः क्रमः ?

**राजा** – रामो वैदेही लक्ष्मण इत्यभिधीयताम्।

**रामलक्ष्मणयोर्मध्ये तिष्ठत्वत्रापि मैथिली।**
**बहुदोषाण्यरण्यानि सनाथैषा भविष्यति॥ १५॥**

**प्रसङ्गः** – प्रस्तुतश्लोके दशरथस्य सीताविषयकः स्नेहातिशयो व्यक्तः कृतोऽस्ति।

**अन्वयः** – अत्रापि मैथिली रामलक्ष्मणयोर्मध्ये तिष्ठतु। (यतः) अरण्यानि बहुदोषाणि (भवन्ति) एषा सीता सनाथा भविष्यति।

**व्याख्या – (क) पर्यायपदानि** – अत्रापि = नामनिर्देशेऽपि, मैथिली = जानकी, रामलक्ष्मणयोर्मध्ये = अग्रे रामः पश्चात् लक्ष्मणः, तयोः मध्ये अन्तराले, तिष्ठतु = वसतु। अरण्यानि = वनानि, बहुदोषाणि = विघ्नाः, एषा = इयं, सीता = जनकनन्दिनी, अनेन प्रकारेण सनाथा = संरक्षकयुक्ता, भविष्यति।

**(ख) भावार्थः** – नामनिर्देशक्रमे वैदेही सीता राघवसुमित्रासुतयोः मध्ये एव भवतु (वसतु)। यतोहि वनेषु नैकोपद्रवयुतानि भवन्ति। (रामः–सीता–लक्ष्मणः) अनेन प्रकारेण सीता संरक्षकयुक्ता भविष्यति।

**विशेषः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति। पुनश्चात्र काव्यलिङ्गालंकारः अपि अस्ति।

**सुमन्त्रः** – यथाज्ञापयति महाराजः। आयुष्मान् रामः।

**राजा** – अयं रामः।

**सुमन्त्रः** – आयुष्मती जनकराजपुत्री।

**राजा** – इयं वैदेही।

**सुमन्त्रः** – आयुष्मान् लक्ष्मणः।

**राजा** – अयं लक्ष्मणः। राम! वैदेहि! लक्ष्मण! परिष्वजध्वं मां पुत्रकाः!



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**सकृत् स्पृशामि वा रामं सकृत् पश्यामि वा पुनः।**
**गतायुरमृतेनेव जीवामीति मतिर्मम॥१६॥**

**प्रसङ्गः** – अत्र सुमन्त्रस्य अयोध्याम् आगमनात् परं दशरथः रामस्य स्मरणं कृत्वा यद् वदति, तस्य वर्णनं कृतमस्ति।

**अन्वयः** – सकृत् रामं स्पृशामि वा पुनः सकृत् (तं) पश्यामि। गतायुः अमृतेनेव जीवामि इति मम मतिः।

**व्याख्या – (क) पर्यायपदानि** – सकृत् = एकवारं, रामं = ज्येष्ठसुतं, स्पृशामि = आलिंगामि, वा = अथवा, पुनः सकृत् (तं) पश्यामि = अवलोकयामि। गतायुः = गतं समाप्तम् आयुर्यस्य सः, मुमुर्षुः यथा अमृतेन = सुधया, इव = यथा, जीवामि = जीवेयम्, इति मम = मे, मतिः = निश्चयात्मिका बुद्धिः।

**(ख) भावार्थः** – (यदि अहम्) एकवारं राघवम् आलिङ्गामि अथवा पुनः एकवारं तं रामम् अवलोकयामि (तर्हि) सुधया मुमुर्षः यथा पुनः जीवनं लप्स्यते तथैव अहमपि जीविष्यामि इति मम निश्चयात्मिका बुद्धिरस्ति।

**विशेषः**– श्लोकेऽस्मिन् उपमाअलङ्कारः, अनुष्टुप् छन्दः

**सुमन्त्रः** – शृङ्गवेरपुरे रथादवतीर्यायोध्याभिमुखाः स्थित्वा सर्व एव महाराजं शिरसा प्रणम्य विज्ञापयितुमारब्धाः।

**कमप्यर्थं चिरं ध्यात्वा वक्तुं प्रस्फुरिताधराः।**
**वाष्पस्तम्भितकण्ठत्वादनुक्त्वैव वनं गताः॥१७॥**

**प्रसङ्गः** – प्रस्तुतश्लोके सुमन्त्रः राजानं दशरथं निवेदयति यत् यदा ते सर्वे (रामः, लक्ष्मणः सीताश्च) भवन्तं किमपि वक्तुमिच्छन्ति तदैव तेषां कण्ठः अवरुद्धः सञ्जातः।

**अन्वयः** – चिरं कम् अपि अर्थं वक्तुं प्रस्फुरिताधराः (ते) वाष्पस्तम्भितकण्ठत्वात् अनुक्त्वा एव वनं गताः।

**व्याख्या – (क) पर्यायपदानि** – चिरं = चिरकालं, कमपि अर्थं = कमपि कथनीयं, वक्तुं = कथयितुं, प्रस्फुरिताधराः = चपलोष्ठपुटाः, वाष्पस्तम्भितकण्ठत्वात् = अश्रुरुद्धकण्ठत्वात्, अनुक्त्वा = अकथयित्वा, वनम् = अरण्यं, गताः = प्रस्थिताः।

**(ख) भावार्थः** – दीर्घकालं यावत् कमपि कथनीयं विषयं चिन्तयित्वा प्रकाशितुं (कथयितुं) चपलोष्ठपुटाः जाताः (किन्तु ते) अश्रुरुद्धकण्ठत्वात् किञ्चिदपि अकथयित्वा एव अरण्यं निर्गताः।

**विशेषः** – अस्मिन् श्लोके अनुष्टुप् छन्दः अस्ति। पुनश्चात्र काव्यलिङ्गः अलङ्कारोऽस्ति।

**राजा** – कथमनुक्त्वैव वनं गताः? (इति द्विगुणं मोहमुपगतः)।

**सुमन्त्रः** – (ससम्भ्रमं) बालाके! उच्यताममात्येभ्यः अप्रतीकारायां दशायां वर्तते महाराज इति।

**काञ्चुकीयः** – तथा। (निष्क्रान्तः)।

**देव्यौ** – महाराअ! समस्ससिहि समस्ससिहि। [महाराज! समाश्वसिहि समाश्वसिहि।]

**राजा** – (किञ्चित् समाश्वस्य)

**अङ्गं मे स्पृश कौसल्ये! न त्वां पश्यामि चक्षुषा।**
**रामं प्रति गता बुद्धिरद्यापि न निवर्तते॥१८॥**

**प्रसङ्गः** – अत्र रामस्य विरहे व्याकुलो भूत्वा दशरथः कौसल्यां प्रति यद् वदति, तस्य वर्णनं कृतमस्ति।

**अन्वयः** – हे कौशल्ये! मे अङ्गं स्पृश। त्वां चक्षुषा न पश्यामि। रामं प्रति गता बुद्धिः अद्य अपि न निवर्त्तते।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**व्याख्या – ( क ) पर्यायपदानि** – कौशल्ये = हे रामजननि, मे = मम, अङ्गं = शरीरं, स्पृश = स्पर्शं कुरु, अर्थात् अङ्गग्लानिशान्त्यर्थं त्वत्सानिध्यज्ञानार्थञ्च। त्वां = भवतीं, चक्षुषा = उपहतदर्शनसामर्थ्येन नेत्रेण, न पश्यामि = नावलोकयामि। रामं प्रति गता, बुद्धिः = मतिः, अद्यापि न निवर्तते = न प्रत्यागच्छति।

**( ख ) भावार्थः** – हे रामजननि, मम शरीरस्य स्पर्शं कुरु। अङ्गग्लानिशान्त्यर्थं त्वत्सानिध्यज्ञानार्थञ्च उपहृतदर्शनसामर्थ्येन भवतीं नेत्रेण न अवलोकयामि। रामम् आश्रितवती मम मतिः अधुनाऽपि न परावर्तते।

**विशेषः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति। पुनश्चात्र काव्यलिङ्गः अलङ्कारोऽस्ति।

पुत्र ! राम ! यत् खलु मया सन्ततं चिन्तितं –

**राज्ये त्वामभिषिच्य सन्नरपतेर्लाभात् कृतार्थाः प्रजाः**
**कृत्वा त्वत्सहजान् समानविभवान् कुर्वात्मनः सन्ततम्।**
**इत्यादिश्य च ते तपोवनमितो गन्तव्यमित्येतया**
**कैकेय्या हि तदन्यथा कृतमहो निःशेषमेकक्षणे ॥१९॥**

**प्रसङ्गः** – प्रस्तुतश्लोके दशरथः कैकेयीं प्रति उपालम्भनं करोति यत् कैकेय्याः करणात् एव एतादृशः अनर्थः सञ्जातः।

**अन्वयः** – त्वां राज्ये अभिषिच्य, सन्नरपतेः लाभात् प्रजाः कृतार्थाः कृत्वा, त्वत् सहजान् सन्ततम् आत्मनः समानविभवान् कुरु इति च ते आदिश्य इतः तपोवनं गन्तव्यम् इति एतया हि कैकेय्या तत् निःशेषम्, अहो एकक्षणे अन्यथा कृतम्।

**व्याख्या – ( क ) पर्यायपदानि** – त्वां = रामं, राज्ये = राजपदे, अभिषिच्य = व्यवस्थाप्य, सन्नरपतेः = प्रशस्तस्य राज्ञस्त्वदरूपस्य, लाभात् = प्राप्तेः, प्रजाः = जनाः, कृतार्थाः = कृतकृत्याः, धन्याः वा, कृत्वा = विधाय, तवत्सहजान् = लक्ष्मणादींस्त्रीन्, सन्ततं = निरन्तरम्, आत्मनः = स्वस्य, समानविभवान् = तुल्यभोग्यसम्पत्कान्, कुरु = विधेहि, इति = एवं, च = पुनः, ते = तुभ्यम्, आदिश्य = व्याहृत्य, इतः = अयोध्यातः, तपोवनं = तपसे समुपयुज्यमानं किमपि काननं, गन्तव्यं = गमनं कर्त्तव्यम्, इति = इत्थम्, एतया कैकेय्या तत् = सर्वं, चिन्तितं वस्तु, निःशेषम् = अखिलं, अहो = कष्टं, एकक्षणे = एकमात्रेण, अन्यथा कृतं = विपरीततां गमितम्।

**( ख ) भावार्थः** – रामं राजपदे व्यवस्थाप्य प्रशस्तस्य राज्ञस्त्वदरूपस्य प्राप्तेः जनाः कृतकृत्याः धन्याः वा विधाय लक्ष्मणादींस्त्रीन् निरन्तरं स्वस्य तुल्यभोगसम्पत्कान् विधेहि एवं पुनः तुभ्यम् आदेशं प्रदाय अयोध्यातः तपसे समुषयुज्यमानं किमपि काननं गमनं कर्त्तव्यमिति (यत् खलु मया चिन्तितं तत् सर्वं) इत्थं कैकेय्या तत् अखिलं चिन्तितं वस्तु क्षणमात्रेण विपरीततां गमितम्। अहो एतत् महत्कष्टमस्ति।

**विशेषः** – श्लोकेऽस्मिन् शार्दूलविक्रीडितं छन्दः अस्ति। पुनश्चात्र काव्यलिङ्गनामकः अलंकारोऽस्ति।

**सुमन्त्रः** – उच्यतां कैकेय्याः –

**गतो रामः प्रियं तेऽस्तु त्यक्तोऽहमपि जीवितैः।**
**क्षिप्रमानीयतां पुत्रः पापं सफलमस्त्विति ॥२०॥**

**प्रसङ्गः** – प्रस्तुतश्लोके दशरथः कैकेय्यीम् अभिलक्ष्य सुमन्त्रं प्रति यत्कथयति तस्य वर्णनं कृतमस्ति।

**अन्वयः** – रामः (वनं) गतः प्रियं ते अस्तु, जीवितैः अहमपि त्यक्तः, पुत्रः क्षिप्रम् आनीयतां, पापं सफलं अस्तु।

**व्याख्या – ( क ) पर्यायपदानि** – रामः = कौशल्यानन्दनः, गतः = वनं गतः, प्रियं तेऽस्तु = त्वं



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

तद्वनगमनश्रवणेन प्रीता भव, जीवितैः = प्राणैः, अहमपि, त्यक्तः = परित्यक्तः। रामवनगमनेन मृतप्रायोऽहं, पुत्रः = भरतः, क्षिप्रं = शीघ्रम्, आनीयतां, पापं = रामनिवार्सनरूपं, सफलं = भरताभिषेकेण फलेन सहितं यथा तथा, अस्तु = जायताम्।

**( ख ) भावार्थः** – रामचन्द्रः अरण्यं गतवान् तव कैकेय्याः अभीष्टं सिद्धं भवतु। अहं दशरथः प्राणप्रियैः रामादिभिः वनगमनेन मृतप्रायो जातोऽस्ति। भरतं शीघ्रम् आनीयताम् इत्थं तव रामनिवासोनरूपं निन्द्यकर्म भरताभिषेकद्वारा परिपूर्णं भवतु।

**विशेषः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति।

**सुमन्त्रः** – यदाज्ञापयति महाराजः।

**राजा** – (ऊर्ध्वमवलोक्य) अये! रामकथाश्रवणसन्दग्धहृदयं मामाश्वासयितुमागताः पितरः। कोऽत्र?

(प्रविश्य)

**काञ्चुकीयः** – जयतु महाराजः।

**राजा** – आपस्तावत्।

**काञ्चुकीयः** – यदाज्ञापयति महाराजः। (निष्क्रम्य प्रविश्य) जयतु महाराजः। इमा आपः।

**राजा** – (आचम्यावलोक्य)।

**अयममरपतेः सखा दिलीपो रघुरयमत्रभवानजः पिता मे।**
**किमभिगमनकारणं भवद्भिः सह वसने समयो ममापि तत्र॥२१॥**

**प्रसङ्गः** – अत्र राजा दशरथः अन्तिमावस्थायां स्वकीयपूर्वजनानां स्मरणं कृत्वा वदति।

**अन्वयः** – अयम् अमरपतेः सखा दिलीपः अयं रघुः अत्र भवान् मे पिता अजः। अभिगमनकारणं किम्? तत्र भवद्भिः सह वसने ममापि समयः (प्राप्तः)।

**व्याख्या – ( क ) पर्यायपदानि** – अयं = पुरोदृश्यमानः, अमरपतेः = अमराणां देवानां पतेः, इन्द्रस्य, सखा = मित्रं, दिलीपः = तदाख्यया प्रथितः मत्प्रपितामहः, अयं = पुरादृश्यमानः, रघुः = मम पितामहः, अत्रभवान् = श्रीमान्, मे = मम, पिता = जनकः, अजः = एतदाख्यः, नृपः, अभिगमनकारणं = भवतामत्र मर्तभुवि समागमनस्य प्रयोजनं किम्। न कोऽपि हेतुरत्रभवतामागमनस्येत्यर्थः। भवद्भिः सह वसने = निवासे, तत्र = तस्मिन् लोके यत्र भवन्तो निवसन्ति, ममापि = दशरथस्यापि, समयः = अवसरः प्राप्तः।

**( ख ) भावार्थः** – पुरोदृश्यमानः स्वामिनो महेन्द्रस्य सुहृद् दिलीप एतन्नामको मत्प्रपितामहः अस्ति। अयञ्च पुरोदृश्यमानः मदीयपितामहः राजा रघुः अस्ति। एषः मम (दशरथस्य) जनकः श्रीमान् अजः अस्ति। भवतां श्रीमतामत्र मर्त्यलोके समागमनस्य प्रयोजनम् अस्माभिः न ज्ञायते। इदानीं तु श्रीमद्भिः भवद्भिः साकं तत्र (परलोके) निवासे दशरथस्यापि कालः समागतः अर्थात् ममापि मृत्युकालः समुपस्थित एव वर्तते।

**विशेषः** – श्लोकेऽस्मिन् पुष्पिताग्रा छन्दः अस्ति। अस्य लक्षणमिदम् –

"अयुजि नयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रा"॥

पुनश्चात्र पर्यायोक्तिरलंकारोऽस्ति।

राम! वैदेहि! लक्ष्मण! अहमितः पितॄणां सकाशं गच्छामि।

हे पितरः! अयमहमागच्छामि। (मूर्च्छया परामृष्टः)।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

(काञ्चुकीयो यवनिकास्तरणं करोति)

**सर्वे** – हा हा महाराओ। हा हा महाराओ। [हा हा महाराज:, हा हा महाराज: ।]

(निष्क्रान्ता: सर्वे)

**इति द्वितीयोऽङ्कः**

## अथ तृतीयोऽङ्कः

(तत: प्रविशति सुधाकार:)

**सुधाकारः** – (सम्मार्जनादीनि कृत्वा) भोदु, दाणि किदं एत्थ कय्यं अय्यसम्भवअस्स आणत्तं। जाव मुहुत्तं सुविस्सं। [भवतु, इदानीं कृतमत्र कार्यमार्यसम्भवकस्याज्ञप्तम्। यावन्मुहूर्तं स्वप्स्यामि।] (स्वपिति)

(प्रविश्य)

**भटः** – (चेटमुपगम्य ताडयित्वा) अङ्गो दासीय पुत्त! किं दाणि कम्मं ण करेसि। [अङ्गो दास्या: पुत्र! किमिदानीं कर्म न करोषि।] (ताडयति)

**सुधाकारः** – (बुद्ध्वा) तालेहि मं तालेहि मं। [ताडय मां ताडय माम्।]

**भटः** – ताडिदे तुवं किं करिस्ससि। [ताडिते त्वं किं करिष्यसि ?]

**सुधाकारः** – अहण्णस्स मम कत्तवीअस्स विअ बाहुसहस्सं णत्थि। [अधन्यस्य मम कार्तवीर्यस्येव बाहुसहस्रं नास्ति।]

**भटः** – बाहुसहस्सेण कि कय्यं। [बाहुसहस्रेण किं कार्यम् ?]

**सुधाकारः** – तुवं हणिस्सं। [त्वां हनिष्यामि।]

**भटः** – एहि दासीएपुत्त! मुदे मुञ्चिस्सं। [एहि दास्या: पुत्र! मृते मोक्ष्यामि।] (पुनरपि ताडयति)

**सुधाकारः** – (रुदित्वा) सक्कं दाणि भट्टा! मे अवराहं जाणिदुम्। [शक्यमिदानीं भर्त:! मेऽपराधं ज्ञातुम्।]

**भटः** – णत्थि किल अवराहो णत्थि। ण मए सन्दिट्ठो भट्टिदारअस्स रामस्स रज्जविब्भट्ठकिदसन्दावेण सग्गं गदस्स भट्टिणो दसरहस्स पडिमागेहं देट्ठुं अज्ज कोसल्लापुरोएहि सब्वेहि अन्तेउरेहि इह आअन्तव्वं त्ति। एत्थ दाणि तुए किं किदं। [नास्ति किलापराधो नास्ति। ननु मया सन्दिष्टो भर्तुदारकस्य रामस्य राज्यविभ्रष्टकृतसन्तापेन स्वर्गं गतस्य भर्तुर्दशरथस्य प्रतिमागेहं द्रष्टुमद्य कौसल्यापुरोगै: सवैरन्तु: पुरैरिहागन्तव्यमिति। अत्रेदानीं त्वयां किं कृतम् ?]

**सुधाकारः** – पेक्खदु भट्टा अवणीदकवोदसन्दाणअं दाव गब्भगिहं। सोहवण्णअदत्तचन्दणचञ्चाङ्गुला भित्तीओ। ओसत्तमल्लदामसोहीणि दुवाराणि। पइण्णा बालुआ। एत्थ दाणि मए किं ण किदं। [पश्यतु भर्ता अपनीतकपोतसन्दानकं तावद् गर्भगृहम्। सौधवर्णकदत्तचन्दनपञ्चाङ्गुला भित्तय:। अवसक्तमाल्यदासशोभीनि द्वाराणि। प्रकीर्णा बालुका:। अत्रेदानीं मया किं न कृतम् ?]

**भटः** – जइ एवं, विस्सत्थो गच्छ। जाव अहं वि सव्वं किदं त्ति अमच्चस णिवेदेमि। [यद्येवं



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

विश्वस्तो गच्छ। यावदहमपि सर्वं कृतमित्यमात्याय निवेदयामि।]

(निष्क्रान्तौ)

(प्रवेशक:)

(तत: प्रविशति भरतो रथेन सूतश्च)

**भरत:** – (सावेगं) सूत! चिरं मातुलपरिचयादविज्ञातवृतान्तोऽस्मि। श्रुतं मयादृढमकल्यशरीरो महाराज इति। तदुच्यतां – **पितुर्मे को व्याधि: ?**

**सूत:–** **हृदयपरिताप: खलु महान्।**

**भरत:–** **किमाहुस्तं वैद्या: ?**

**सूत: –** **न खलु भिषजस्तत्र निपुणा:।**

**भरत: –** **किमाहारं भुङ्क्ते शयनमपि ?**

**सूत: –** **भूमौ निरशन: ?**

**भरत: –** **किमाशा स्यात् ?**

**सूत: –** **दैवम्।**

**भरत: –** **स्फुरति हृदयं वाहय रथम्॥ १ ॥**

**प्रसङ्ग:** – तृतीयाङ्कस्य प्रारम्भे भरत: मातुलगृहात् अयोध्यामागमनकाले सारथिं स्वकीयतातस्य स्वास्थ्यविषयकसमाचारं पृच्छति। तस्मिन्नेव क्रमे एतस्मिन् श्लोके भरतसारथ्यो: द्वयोरपि संवाद: वर्णित: अस्ति।

**अन्वय:** – मे पितु: को व्याधि ? महान् हृदयपरिताप: खलु, वैद्या: तं किमाहु: ? तत्र भिषज: निपुणा: न सन्ति, किम् आहारं भुंक्ते ? शयनमपि भूमौ निरशन:, मे हृदयं स्फुरति त्वं रथं वाहय।

**व्याख्या – ( क ) पर्यायपदानि** – मे पितु: = मम जनकस्य, क: व्याधि: = कीदृश: रोग:, महान् = अतीव, दारुण:, हृदयपरिताप: = हृदयसन्ताप:, खलु = निश्चयेन, वर्तते, वैद्या: = चिकित्सका:, तं = राजानं, किमाहु: = किं कथितवन्त: ? तत्र = रोगनिदाने, भिषज: = वैद्या:, निपुणा: = समर्था: न सन्ति, किम्, आहारं = भोजनं, नृप:, भुंक्ते = खादति ? शयनमपि करोति = किं स: शेते ? भूमौ = पृथिव्यां, निरशन: = भोजनमकृत्वैव शेते। किमाशा = तस्य स्वास्थ्यलाभे किमाशा स्यात् ? दैवं = विधातैव जानाति। मे = मम, हृदयं = चित्तं, स्फुरति = व्याकुलं भवति, त्वं रथं = स्यन्दनं, वाहय = प्रेरय।

**( ख ) भावार्थ:** – मम (भरतस्य) जनकस्य महाराजदशरथस्य कीदृश: रोग: अस्ति ? (तदा सूत: वदति) यत् एतत् तु निश्चयेन अतिदारुण: मानसिकसन्ताप: वर्तते। (भरतेन पृष्टं) वैद्या: महाराजं किम् उक्तवन्त: ? (तदा सूतेन भरत: उक्त:) वैद्या: रोगस्य निदाने समर्था: न सन्ति। (भरत: सूतं पृच्छति) किं महाराज: भोजनं करोति ? असौ शेते न वा ? (सूत: वदति) पृथिव्यामेव असौ स्वपिति भोजनं च न करोति। (भरत: वदति) किं किञ्चिदप्याशा वर्तते। (सूत:) अदृष्टं विधाता वा एव जानाति। (भरत:) मम भरतस्य मानसं वेपते अत: झटिति एव स्यन्दनं चालय।

**विशेष:** – अस्मिन् श्लोके शिखरिणी छन्द: अस्ति।

**सूत:** – यदाज्ञापयत्यायुष्मान्। (रथं वाहयति)

**भरत:** – (रथवेगं निरुप्य) अहो नु खलु रथवेग:। एते ते –

**द्रुमा धावन्तीव द्रुतरथगतिक्षीणविषया**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**नदीवोद्वृत्ताम्बुर्निपतति मही नेमिविवरे।**
**अरव्यक्तिर्नष्टा स्थितमिव जवाच्चक्रवलयं**
**रजश्चाश्वोद्धूतं पतति पुरतो नानुपतति॥ २॥**

**प्रसङ्गः** – प्रस्तुतश्लोके मातुलस्य गृहात् अयोध्यां प्रति आगमनकाले तीव्रवेगेन गच्छतः रथस्य स्वाभाविकं वर्णनं कृतमस्ति।

**अन्वयः** – द्रुतरथगतिक्षीणविषयाः द्रुमाः धावन्ति इव, मही उद्वृत्ताम्बुः नदी इव नेमिविवरे निपतति, अरव्यक्तिः नष्टा चक्रवलयं जवात् स्थितमिव (प्रतिभाति), अश्वोद्धूतं रजः च पुरतः पतति न अनुपतति।

**व्याख्या – (क) पर्यायपदानि** – द्रुतरथगतिक्षीणविषयाः = द्रुतया शीघ्रया रथगत्या क्षीणविषयाः अल्पीभूतदृष्टिगोचरांशाः सन्तः, द्रुमाः = वृक्षाः, धावन्ति इव = धावन्त इव प्रतीयन्ते, मही = भूमिः, उद्वृत्ताम्बुः = उद्भ्रान्तजला, नदीव = सरिदिव, नेमिविवरे = प्रधिरन्ध्रे, निपतति = निपतन्तीव प्रतीयते, अरव्यक्तिः = अराणां नेमिनाभिमध्यावयानां, व्यक्तिः = स्पुटप्रतीतिः, नष्टा = विनष्टा, चक्रवलयं = चक्रमण्डलं, जवात् = वेगवशात्, स्थितमिव = गतिरहितमिव भाति। अश्वोद्धूतम् = अश्वखुराघातोत्थं, रजः = धूलिश्च, पुरतः = अग्रे, पतति = उद्गच्छति, न अनुपतति = न रथमनुगच्छति।

**(ख) भावार्थः** – शीघ्रया रथगत्या स्यन्दनजवेन क्षीणविषयाः अल्पीभूतदृष्टिगोचरांशाः (पदार्थाः) वृक्षाः शाखादयः धावन्त इव प्रतीयन्ते। भूमिः उद्भ्रान्तसलिला सरिदिव चक्राधाराभ्यन्तरे निमज्जति। अराणां चक्रशलाकानां स्फुटप्रतीतिः (पृथक्प्रतीतिः) तिरोहिता। चक्रमण्डलम् अतिवेगात् गतिरहितमिव प्रतीयते। घोटकोत्क्षिता धूलिः अग्रे उद्गच्छति न रथमनुगच्छति।

**विशेषः** – श्लोकेऽस्मिन् शिखरिणी छन्दः अस्ति। पुनश्चात्र उत्प्रेक्षा स्वभावोक्तिश्चालङ्कारौ स्तः।

**सूतः** – आयुष्मन्! सोपस्नेहतया वृक्षाणामभितः खल्वयोध्यया भवितव्यम्।

**भरतः** – अहो तु खलु स्वजनदर्शनोत्सुकस्य त्वरता मे मनसः। सम्प्रति हि –

**पतितमिव शिरः पितुः पादयो स्निह्यतेवास्मि राज्ञा समुत्थापितः**
**त्वरितमुपगता इव भ्रातरः क्लेदयन्तीव मामश्रुभिर्मातरः।**
**सदृश इति महानिति व्यायतश्चेति भृत्यैरिवाहं स्तुतः सेवया**
**परिहसितमिवात्मनस्तत्र पश्यामि वेषं च भाषां च सौमित्रिणा॥ ३॥**

**प्रसङ्गः** – अत्र सारथिना सह समीपस्थाम् अयोध्यां दृष्ट्वा भरतः स्वजनान् द्रष्टुम् उत्सुको भूत्वा चिन्तयति (कल्पनां करोति)।

**अन्वयः** – पितुः पादयोः शिरः पतितमिव, स्निह्यता राज्ञा समुत्थापितः इव अस्मि। भ्रातरः त्वरितम् उपागताः इव, मातरः अश्रुभिः मां क्लेदयन्ति इव सदृशः इति महानिति व्यायतः च इति भृत्यैः सेवया अहं स्तुतः इव तत्र आत्मनः वेषं च भाषां च सौमित्रिणा परिहसितमिव पश्यामि।

**व्याख्या – (क) पर्यायपदानि** – पितुः =दशरथस्य, पादयोः = चरणयोः, शिरः = उत्तमाङ्गः, पतितमिव = कालान्तरे पतिष्यद् इदानीमेव पतितं, स्निह्यता = स्नेहं दर्शयता, राज्ञा = दशरथेन, समुत्थापितः = पादप्रदेशादाकृष्य, स्वाङ्कमारोपितः, इव = यथा, अस्मि = भवामि। भ्रातरः = रामादयः, त्वरितं = शीघ्रम्, उपागताः = समीपं प्राप्ता इव, मातरः = कौसल्यादयः, अश्रुभिः = नयनसलिलैः, मां = भरतं, क्लेदयन्ति = आर्द्रयन्ति, इव = यथा, सदृशः = समानवयस्कः, अथवा बहोः कालात् प्रत्यागतोऽपि परिचीमान इति हेतोः आकृत्याः पूर्वसदृश इव भासमानः, महान्



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

इति = पूर्वदृष्टाकारापेक्ष्या प्रवृद्धप्रकारा इति व्यायत: = परिचितव्यायामश्चेति, भृत्यै: = सेवकै:, सेवया = प्रीत्या, अहं = भरत:, स्तुत: इव = वन्दित:। तत्र = तस्मिन् स्थाने, आत्मन: = स्वकीयं, वेषं = केकयदेशोचितपरिधानीयनिवेशं, च = पुन:, भाषां = बलान्मुखान्निर्गच्छन्तीं वाणीं, सौमित्रिणा = लक्ष्मणेन, परिहसितमिव = उपहस्यमानमिव, पश्यामि = अनुभवामि।

**( ख ) भावार्थः** – मम भरतस्य मस्तकं जनकस्य महाराजस्य चरणयो: अवनतमिव स्नेहं कुर्वता नृपेण पादयुगाकृष्य स्वाङ्कमारोपित: इव भवामि। श्रीरामादय: शीघ्रं मत्समीपम् आगता इव। कौसल्यादय: जनन्यश्च नेत्रसलिलै: भरतम् आर्द्रयन्ति इव। आकृत्या: समान: अथवा बहोकालात् प्रत्यागतोऽपि परिचीयमान: अर्थात् आकृत्या पूर्वसदृश इव भासमान:। पूर्वदृष्टाकारापेक्ष्या प्रबुद्धाकार: इत्थं परिशीलितव्यायामश्च सेवकै: परिचयर्यया (प्रीत्या) भरत: वन्दित: इव। अयोध्यायां च लक्ष्मणेन कैकेयदेशोचितपरिधानं मुखात् निर्गच्छन्तीं वाणीं च उद्वसितमिव विलोकयामि (अनुभवामि)।

**विशेषः** – अस्मिन् श्लोके उपजातिछन्द: अस्ति। पुनश्चात्र उत्प्रेक्षाऽलङ्कार: अस्ति।

**सूतः** – (आत्मगतं) भो: ! कष्टं, यदयमविज्ञाय महाराजविनाशमुदर्के निष्फलाशां परिवहन्न्योध्यां प्रवेक्ष्यति कुमार:। जानद्भिरप्यस्माभिर्न निवेद्यते। कुत: –

**पितु: प्राणपरित्यागं मातुरैश्वर्यलुब्धताम्।**
**ज्येष्ठभ्रातु: प्रवासं च त्रीन् दोषान् कोऽभिधास्यति॥४॥**

**प्रसङ्गः** – अत्र भरतम् अयोध्यां प्रति नयनकाले सूत: अयोध्याया: वास्तविकीं वर्तमानस्थितिं जनार्दन: अपि वक्तुमसमर्थ: इति निवेदयति।

**अन्वयः** – पितु: प्राणपरित्यागं, मातु: ऐश्वर्यलुब्धतां, ज्येष्ठभ्रातु: प्रवासं च त्रीन् दोषान् क: अभिधास्यति।

**व्याख्या – ( क ) पर्यायपदानि** – पितु: = दशरथस्य, प्राणपरित्यागं = भरणं, मातु: = कैकेय्या:, भरतजनन्या:, ऐश्वर्यलुब्धतां = धनलोलुपतां, ज्येष्ठभ्रातु: = रामचन्द्रस्य, प्रवासं = वनगमनलक्षणं देशान्तरगमनश्च, त्रीन् त्रिसंख्यकान्, दोषान् = दु:संवादान्, कोऽभिधास्यति = क: कतर: अभिधस्यति भरताय निवेदयिष्यति।

**( ख ) भावार्थः** – दशरथस्य असुवियोगं (मरणं) भरतजनन्या: कैकेय्या: राज्यश्रीलोलुपताम्, अग्रजश्रीरामस्य वनगमनलक्षणं देशान्तरगमनश्च एतान् त्रिसंख्यकान् अनर्थान् क: कठोरहृदय: (भरताय) निवेदयिष्यति ? अर्थात् कश्चिदपि एतान् अनर्थान् वक्तुमसमर्थ: भविष्यति।

**भटः** – (प्रविश्य) जयतु कुमार:।

**भरतः** – भद्र ! किं शत्रुघ्नो मामभिगत: ?

**भटः** – अभिगत: खलु वर्तते कुमार:। उपाध्यायास्तु भवन्तमाहु:।

**भरतः** – किमिति किमिति ?

**भटः** – एकनाडिकावशेष: कृत्तिकाविषय:। तस्मात् प्रतिपन्नायामेव रोहिण्यामयोध्यां प्रवेक्ष्यति कुमार:।

**भरतः** – बाढमेवम्। न मया गुरुवचनमतिक्रान्तपूर्वम्। गच्छ त्वम्।

**भटः** – यदाज्ञापयति कुमार:। (निष्क्रान्त:)

**भरतः** – अथ कस्मिन् प्रदेशे विश्रमिष्ये। भवतु, दृष्टम्। एतस्मिन् वृक्षान्तराविष्कृते देवकुले मुहूर्तं विश्रमिष्ये। तदुभयं भविष्यति – दैवतपूजा विश्रमश्च। अथ च उपोपविश्य प्रवेष्टव्यानि नगराणीति



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

सत्समुदाचारः। तस्मात् स्थाप्यतां रथः।

**सूतः** – यदाज्ञापयत्यायुष्मान्। (रथं स्थापयति)

**भरतः** – (रथादवतीर्य) सूत! एकान्ते विश्रामयाश्वान्।

**सूतः** – यदाज्ञापयत्यायुष्मान्। (निष्क्रान्तः)

**भरतः** – (किञ्चिद् गत्वाऽवलोक्य) साधु मुक्तपुष्पलाजाविष्कृता बलयः, दत्तचन्दनपञ्चाङ्गुला भित्तयः, अवसक्तमाल्यदामशोभीनि द्वाराणि, प्रकीर्णा बालुकाः। किन्नु खलु पार्वणोऽयं विशेषः? अथवा आह्निकमास्तिक्यम्? कस्य नु खलु दैवतस्य स्थानं भविष्यति। नेह किञ्चित् प्रहरणं ध्वजो वा बहिश्चिह्नं दृश्यते। भवतु, प्रविश्य ज्ञास्ये। (प्रविश्यावलोक्य) अहो क्रियामाधुर्यं पाषाणानाम्। अहो भावगतिराकृतीनाम्। दैवतोद्दिष्टानामपि मानुषविश्वासताऽऽसां प्रतिमानाम्। किन्नु खलु चतुर्दैवतोऽयं स्तोमः अथवा यानि तानि भवन्तु। अस्ति तावन्मे मनसि प्रहर्षः।

**कामं दैवतमित्येव युक्तं नमयितुं शिरः।**
**वार्षलस्तु प्रणामः स्यादमन्त्रार्चितदैवतः॥५॥**

**प्रसङ्गः** – अत्र अयोध्यायां समागमनात् पूर्वं भरतः अयोध्यातः बहिः प्रतिमामन्दिरं प्रवेश्य चिन्तयति इति वर्णितमस्ति।

**अन्वयः** – दैवतम् इत्येव शिरः नमयितुं कामं युक्तम्। प्रणामः अमन्त्रार्चितदैवतः वार्षलः स्यात्।

**व्याख्या – (क) पर्यायपदानि** – दैवतमित्येव = देवताबुद्ध्यैव, शिरः नमयितुं = मस्तकम् अवनमयितुं, कामं = सुखं, युक्तम् = उचितम्। प्रणामः = प्रणति, अमन्त्रार्चितदैवतः = विनामन्त्रोच्चारणं पूजितं दैवतं तथाभूतः। वार्षलः = वृषलसम्बन्धी स्यात्, वृषलेन यथा क्रियते तथा कर्त्तव्यः स्यात्।

**(ख) भावार्थः** – दैवमूर्तयः (देवताबुद्धमैव) सन्ति इति विचिन्त्य शिरसा नमस्कारः उचितमेव (शिरोवमने न कोऽपि दोषः)। किन्तु मन्त्रं विना देवतापूजनं वृषत्वेन यथा क्रियते तथा कर्त्तव्यं स्यात्।

**विशेषः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति। पुनश्चात्र काव्यलिङ्गालंकारोऽस्ति।

(प्रविश्य)

**देवकुलिकः** – भोः! नैत्यकावसाने प्राणिधर्ममनुतिष्ठति मयि को नु खल्वयमासां प्रतिमानामल्पान्तराकृतिरिव प्रतिमागृहं प्रविष्टः। भवतु, प्रविश्य ज्ञास्ये। (प्रविशति)

**भरतः** – नमोऽस्तु।

**देवकुलिकः** – न खलु न खलु प्रणामः कार्यः।

**भरतः** – मा तावद् भोः!

**वक्तव्यं किञ्चिदस्मासु विशिष्टः प्रतिपाल्यते।**
**किङ्कृतः प्रतिषेधोऽयं नियमप्रभविष्णुता॥६॥**

**प्रसङ्गः** – यदा देवकुलिकः (प्रतिमामन्दिरस्य पुजारी) भरतं कमपि ब्राह्मणं विचिन्त्य क्षत्रियजनानां प्रतिमानां प्रणामे निषेधं करोति तथा भरतः देवकुलिकं पृच्छति इत्यत्र वर्णितमस्ति।

**अन्वयः** – अस्मासु किंचित् वक्तव्यं, विशिष्टं प्रतिपाल्यते। अयं प्रतिषेधः किंकृतः, नियमप्रभविष्णुता।

**व्याख्या – (क) पर्यायपदानि** – अस्मासु = भरतादिषु, किंचित् = किमपि, वक्तव्यं = दूषणम् अस्ति



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

किम्? अथवा – विशिष्टः = मदपेक्षया श्रेष्ठः, प्रतिपाल्यते = प्रतीक्ष्यते? अत्रापि का क्काक्षेपपूर्वकं कथनम्। अयं = मद्वारणरूपं, प्रतिषेधः = निषेधः, किं कृतः = केन कारणेन कृतः। नियमप्रभविष्णुता = आत्मानो नियमप्रभाविष्णुता तपोनुष्ठानप्रौढिता किम्?

**( ख ) भावार्थः** – एषः प्रमाणस्य प्रतिमागृहप्रवेशस्य च निषधः केन हेतुना विहितः? भरतादिषु किमपि दूषणमस्ति किम्? अथवा मदपेक्षया कश्चिदतिशयेन श्रेष्ठो जनः प्रतीक्ष्यते अथवा आत्मानो तपोऽनुष्ठानप्रौढिता का? अर्थात् अयं भवतोऽधिकारमदोऽस्ति किं येन मदीयः प्रणामो भवता न स्वीकृतः।

**विशेषः**– अनुष्टुप् छन्दः

**देवकुलिकः** – न खल्वेतैः कारणैः प्रतिषेधयामि भवन्तम्। किन्तु दैवतशङ्कया ब्राह्मणजनस्य प्रणामं परिहरामि। क्षत्रिया ह्यत्रभवन्तः।

**भरतः** – एवम्। क्षत्रियाः ह्यत्र भवन्तः। अथ के नामात्र भवन्तः।

**देवकुलिकः** – इक्ष्वाकवः।

**भरतः** – (सहर्षम्) इक्ष्वाकव इति। एते तेऽयोध्या भर्तारः।

**एते ते दैवतानामसुरपुरवधे गच्छन्त्यभिसरी–**
**मेते शक्रलोके सपुरजनपदा यान्ति स्वसुकृतैः।**
**एते ते प्राप्नुवन्तः स्वभुजबलजितां कृत्स्नां वसुमती–**
**मेते ते मृत्युना ये चिरमनवसिताश्छन्दं मृगयता॥७॥**

**प्रसङ्गः** – प्रतिमामन्दिरं प्रविश्य यदा देवकुलिकः वदति यत् एताः प्रतिमा अयोध्यायाः इक्ष्वाकुवंशिक्षत्रियराज्ञां सन्ति तदा भरतः तेषां राज्ञां यशसः प्रशंसां कुर्वन् अस्ति इति अत्र वर्णितमस्ति।

**अन्वयः** – एते ते असुरपुरवधे देवतानाम् अभिसरीं गच्छन्ति। एते ते सपुरजनपदाः स्वसुतकृतैः शक्रलोके गच्छन्ति। एते ते कृत्स्नां वसुमतीं स्वभुजबलजितां प्राप्नुवन्तः, एते ते छन्दं मृगयता मृत्युना चिरम् अनवसिताः।

**व्याख्या – ( क ) पर्यायपदानि** – एते = प्रतिमारूपेण, पुरो दृश्यमानाः, ते = अतिप्रसिद्धाः, असुरपुरवधेः = राक्षसैः समं युद्धे तद्वधे, अथवा असुरपुराणां, लक्षणया पुरवासिनां, सर्वेषां पुरवासिनां, देवतानां = देवानाम्, अभिसरीं = साहाय्यार्थमभिगमनं, गच्छन्ति = व्रजन्ति, देवसाहाय्यर्थं राक्षसान् हन्तुः स्वर्गं गच्छन्तीति भावः। एते ते = इक्ष्वाकवः, सपुरजनपदाः = सनगरप्रजाः, स्वसुकृतैः = स्वाचरितैः पुण्यैः, शक्रलोके = स्वर्गं, गच्छन्ति = यान्ति। एते ते कृत्स्नां = सर्वां, वसुमतीं = पृथ्वीं, स्वभुजबलजितां = निजबाहुपराक्रमस्वायत्तीकृतां, प्राप्नुवन्तः = अभिगतवन्तः सन्ति। एते ते छन्दम् = अभिलाषम्, अभिप्रायं, मृगयता = अन्विष्यता, मृत्युना = कालेन, चिरं = चिरकालपर्यन्तं, अनवसिताः = असमापिताः। अर्थात् ते स्वच्छामरणा आसन्, अत एव मृत्युः प्रतीक्षते स्म इमे कदा मरणमभिलषन्ति।

**( ख ) भावार्थः** – प्रतिमारुपेण पुरो दृश्यमानाः सुप्रसिद्धाः राक्षसैः सह युद्धे तन्मारणे अथवा असुरपुराणां लक्षणया पुरवासिनां सुराणां साहाय्यार्थमभिगमनम् इच्छन्ति अर्थात् दैवसाहाय्यार्थं राक्षसान् हन्तुं स्वर्गं गच्छन्ति। इक्ष्वाकवः सनगरप्रजाः स्वाचरितैः पुण्यैः स्वर्गं यान्ति। सर्वां पृथ्वीं निजबाहुपराक्रमस्वायन्तीकृताम् अधिगतवन्तः सन्ति। अभिप्रायम् अन्विष्यता कालेन चिरकालपर्यन्तम् असमापिताः अर्थात् एते स्वच्छामरणा आसन् अर्थात् मृत्युः अपि प्रतीक्षते स्म यत् एते कदा मरणमभिलषन्ति?

भो यदृच्छया खलु मया महत् फलमासादितम्। अभिधीयतां कस्तावदत्रभवान्?

**देवकुलिकः** – अयं खलु तावत् सन्निहितसर्वरत्नस्य विश्वजितो यज्ञस्य प्रवर्तयिता



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

प्रज्वलितधर्मप्रदीपो दिलीपः।

**भरतः** – नमोऽस्तु धर्मपरायणाय। अभिधीयतां कस्तावदत्रभवान्?

**देवकुलिकः** – अयं खलु तावत् संवेशनोत्थापनयोरनेकब्राह्मणजनसहस्रप्रयुक्तपुण्याहशब्दरवो रघुः।

**भरतः** – अहो बलवान् मृत्युरेतामपि रक्षामतिक्रान्तः। नमोस्तु ब्राह्मणजनावेदितराज्यफलाय। अभिधीयतां कस्तावदत्रभवान्?

**देवकुलिकः** – अयं खलु तावत् प्रियावियोगनिर्वेदपरित्यक्तराज्यभारो नित्यावभृथस्नानप्रशान्तरजा अजः।

**भरतः** – नमोऽस्तु श्लाघनीयपश्चात्तापाय। (दशरथस्य प्रतिमामवलोकयन् पर्याकुलोभूत्वा) भोः! बहुमानव्याक्षिप्तेन मनसा सुव्यक्तं नावधारितम्। अभिधीयतां कस्तावदत्रभवान्?

**देवकुलिकः** – अयं दिलीपः।

**भरतः** – पितृपितामहो महाराजस्य। ततस्ततः।

**देवकुलिकः** – अत्रभवान् रघुः।

**भरतः** – पितामहो महाराजस्य। ततस्ततः।

**देवकुलिकः** – अत्रभवानजः।

**भरतः** – पिता तातस्य। किमति किमति?

**देवकुलिकः** – अयं दिलीपः, अयं रघुः, अयमजः।

**भरतः** – भवन्तं किञ्चित् पृच्छामि? धरमाणानामपि प्रतिमाः स्थाप्यन्ते?

**देवकुलिकः** – न खलु, अतिक्रान्तानामेव।

**भरतः** – तेन ह्यापृच्छे भवन्तम्।

**देवकुलिकः** – तिष्ठ।

**येन प्राणाश्च राज्यं च स्त्रीशुल्कार्थे विसर्जिता।**
**इमां दशरथस्य त्वं प्रतिमां किं न पृच्छसे॥८॥**

**प्रसङ्गः** – देवकुलिकः रघुवंशिश्रेष्ठदिलीपस्य, रघोः अजस्य च भरताय परिचयं कारयित्वा महाराजदशरथस्य विषये वदति इत्यत्र वर्णितमस्ति।

**अन्वयः** – येन स्त्रीशुल्कार्थे प्राणाः राज्यं च विसर्जिताः, (तस्य) दशरथस्य इमां प्रतिमां त्वं किं नु पृच्छसे?

**व्याख्या** – **(क) पर्यायपदानि** – येन = राज्ञा दशरथेन, स्त्रीशुल्कार्थे = विवाहावसरे स्त्रियै देयतया प्रतिज्ञातं = द्रव्यं नारीशुल्कं, तदर्थे प्राणाः = जीवितं, राज्यं = राज्यकर्म च, विसर्जिताः = परित्यक्ताः, तस्य = महाराजदशरथस्य, इमां = पुरोवर्त्तमानां, प्रतिमां = मूर्तिं, त्वं = भरतः, किन्नु पृच्छसे = किमिति न जिज्ञाससे।

**(ख) भावार्थः** – येन स्वप्राणाः स्वराज्यं द्वयमेव स्त्रीशुल्करूपेण प्रदत्तं, तस्य पुण्यात्मनः महाराजदशरथस्य प्रतिमाविषये भवान् किं न प्रक्ष्यति?

**विशेषः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति।

**भरतः** – हा तात! (मूर्च्छितः पतति। पुनः प्रत्यागत्य)



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**हृदय! भव सकामं यत्कृते शङ्कसे त्वं**
**शृणु पितृनिधनं तद् गच्छ धैर्यं च तावत्।**
**स्पृशति तु यदि नीचो मामयं शुल्कशब्द-**
**स्त्वथ च भवति सत्यं तत्र देहो विशोध्यः॥९॥**

**प्रसङ्गः** – प्रस्तुतश्लोके भरतः प्रतिमामन्दिरं प्रविश्य यदा ज्ञातवान् यत् तस्य तातस्य महाराजदशरथस्य मृत्युः सञ्जातः तदा सः पश्चातापं कुर्वन् यद् वदति तदत्र वर्णितमस्ति।

**अन्वयः** – हे हृदय! सकामं भव, त्वं यत्कृते शंकसे तत् पितृनिधनं शृणु धैर्यं च गच्छ तावत् तु नीचः अयं शुल्कशब्दः मां स्पृशति अथ च सत्यं भवति तत्र देहः विशोध्यः।

**व्याख्या – ( क ) पर्यायपदानि** – हे हृदय, सकामं भव = लब्धकामं भव। त्वं यत्कृते = यदर्थं, शंकसे = यदहं श्रोष्यामीति सदा तर्कयन् वर्त्तसे, तत् पितृनिधनं = तातमरणं, शृणु = निश्शंकमिदानीमाकर्णय। धैर्यञ्च = धीरतां च, गच्छ तावत् = पितृविरहविक्लवतां मा गच्छेत्यर्थः। तु = किन्तु, नीचः = गर्हितः, अयं शुल्कशब्दः, मां स्पृशति = मां विषयी कुर्याच्चेत्, मद्राराज्यभिषेचनं = शुल्कशब्दार्थत्वेन वक्तुरभिप्रेतं चेत् अथ च सत्यं भवति = सत्यमस्ति, तत्र = तर्हि, देहः = कायः, विशोध्यः = अग्निपुटपाकादिना शुद्धिः नेतव्या।

**( ख ) भावार्थः** – हे हृदय्! लब्धकामं भव। त्वं यदर्थं यदहं श्रोष्यामीति यदा तर्कयन् वर्तते तत् तातमरणं निःशंकमिदानीमाकर्ण्य अर्थात् पितृविरहविक्लवतां मा गच्छ किन्तु गर्हितः मां विषयीकुर्वन् मद्राज्याभिषेचनं शुल्कशब्दार्थत्वेन वक्तुम् अभिप्रेतं यदि सत्यं भवति तर्हि मया स्वकीयकायः अग्निपुटपाकादिना शुद्धिः नेतव्या।

**विशेषः** – अस्मिन् श्लोके मालिनी छन्दः अस्ति। अस्य लक्षणमिदं –

"ननमयय युतेयं मालिनी भोगिलोकैः।"

आर्य!

**देवकुलिकः** – आर्येति इक्ष्वाकुकुलालापः खल्वयम्। कच्चित् कैकेयीपुत्रो भरतो भवान् ननु?

**भरतः** – अथ किम्, अथ किम्?दशरथपुत्रो भरतोऽस्मि न कैकेय्याः।

**देवकुलिकः** – तेन ह्यापृच्छे भवन्तम्।

**भरतः** – तिष्ठ। शेषमभिधीयताम्।

**देवकुलिकः** – का गतिः? श्रूयताम्। अपरतस्तत्र भवान् दशरथः। सीतालक्ष्मणसहायस्य रामस्य वनगमनप्रयोजनं न जाने।

**भरतः** – कथं कथमार्योऽपि वनं गतः? (द्विगुणं मोहमुपगतः।)

**देवकुलिकः** – कुमार! समाश्वसिहि समाश्वसिहि।

**भरतः** – (समाश्वस्य)।

**अयोध्यामटवीभूतां पित्रा भ्रात्रा च वर्जिताम्।**
**पिपासार्तोऽनुधावामि क्षीणतोयां नदीमिव॥१०॥**

**प्रसङ्गः** – तातं तथा च भ्रात्राविहीनाम् अयोध्यानगरीं प्रति गच्छन् भरतः किं चिन्तयति इत्यत्र वर्णितमस्ति।

**अन्वयः** – पित्रा भ्रात्रा च वर्जिताम् अटवीभूताम् अयोध्यां क्षीणतोयां नदीम् इव पिपासार्तः अनुधावामि।

**व्याख्या – ( क ) पर्यायपदानि** – पित्रा = दशरथेन परलोकप्रवासेन, भ्रात्रा = रामेण वनगतेन च, वर्जितां = शून्याम्, अत एव, अटवीभूताम् = अरण्यतुल्याम्, अयोध्याम् = अयोध्यानगरीं, क्षीणतोयां = शुष्कं तोयं जलं



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

यस्यास्तथाभूतां, नदीं = सरितम्, इव = यथा, पिपासार्तः = पिपासया पानीयाभिलाषेण आर्त्तः पीडितः सन्, अनु = पश्चात्, धावामि = गच्छामि।

**( ख ) भावार्थः** – दशरथेन परलोकप्रवासेन रामेण वनगतेन च शून्याम् अरण्यतुल्याम् अयोध्यानगरीं शुल्कं तोयं ( जलं ) यस्यास्तथाभूतां सरितं यथा पिपासयाभिलाषेण पीडितः सन् पश्चात् गच्छामि।

**विशेषः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति। पुनश्चात्र उपमालंकारः अस्ति।

आर्य ! विस्तरश्रवणं मे मनसः स्थैर्यमुत्पादयति। तत् सर्वमनवशेषमभिधीयताम्।

**देवकुलिकः** – श्रूयतां, तत्रभवता राज्ञाभिषिच्यमाने तत्र भवति रामे भवतो जनन्याभिहितं किल।

**भरतः** – तिष्ठ।

**तं स्मृत्वा शुल्कदोषं भवतु मम सुतो राजेत्यभिहितं**
**तद्धैर्येणाश्वसत्या व्रज सुत वनमित्यार्योऽप्यभिहितः।**
**तं दृष्ट्वा बद्धचीरं निधनसदृशं राजा ननु गतः**
**पात्यन्ते धिक्प्रलापा ननु मयि सदृशाः शेषाः प्रकृतिभिः ॥ ११ ॥**

**प्रसङ्गः** – प्रस्तुतश्लोके देवकुलिकः रामस्याभिषेककालेयां घटितां घटनां भरतं कथयति।

**अन्वयः** – तं शुल्कदोषं स्मृत्वा मम सुतः राजा भवतु इति तया अभिहितं, तत् धैर्येण आश्वसन्त्या सुत वनं व्रज इति आर्यः अपि अभिहितः तं बद्धचीरं दृष्ट्वा राजा असदृशं निधनं गतः ननु, प्रकृतिभिः शेषाः सदृशाः धिक् प्रलापाः ननु मयि पात्यन्ते।

**व्याख्या – ( क ) पर्यायपदानि** – तं = पूर्वोक्तं, शुल्कदोषं = शुल्कमेव दोषं अनर्थावहत्वात्, स्मृत्वा = ध्यात्वा, मम सुतः = मदीयपुत्रः, राजा = नृपः, भवतु = यातु, इति = इत्थं, तया = कैकेय्या, अभिहितं = कथितम्, इति तर्कयामि। तत् = तस्मिन् राज्ञानुमते तस्य राज्ञो धैर्येण = स्वोक्तस्यार्थस्य राज्ञा स्वीकृतेन, आश्वसन्त्या = साहसं प्राप्तवत्या, सुत = पुत्र, वनम् = अरण्यं, व्रज = गच्छ, इति = इत्थम्, आर्यः = रामः, अपि, अभिहितः = आज्ञप्तः। तं = रामं, बद्धचीरं = बद्धानि परिहितानि चीराणि वल्कलानि येन वनगमनार्थं तं, दृष्ट्वा = विलोक्य, राजा = नृपदशरथः, असदृशम् = अयोग्यम्, अनवसरं, निधनं = मरणं, गतः = प्राप्तः, ननु = निश्चयेन। प्रकृतिभिः = प्रजाजनैः, शेषाः = जननीकैकेयीभर्त्सनावशिष्टाः, सदृशाः = समुचिताः, धिक्प्रलापाः = धिग्वचनानि, ननु = इति सम्भावनायां, मयि = भरते, पात्यन्ते = निक्षिप्यन्ते।

**( ख ) भावार्थः** – पूर्वोक्तं दोषपूर्णं शुल्कम् अनर्थविहीतत्वात् स्मरणं कृत्वा मदीयपुत्रः नृपः यातु इत्थं कैकेय्याः नृपाय कथितम्। तस्य पुत्रकर्तृकराज्यप्राप्तौ जातेन विश्वासेन साहसं प्राप्तवत्या पुत्र। अरण्यं गच्छ इत्थं रामः अपि आज्ञप्तः। ( वनगमनार्थं ) वल्कलवस्त्राणि धृत्वा तं रामं वनं व्रजन्तं दृष्ट्वा नृपदशरथः अनवसरम् ( असमय ) एव मरणं प्राप्तः। प्रजाजनैः जननीकैकेयी भर्त्सनावशिष्टाः समुचिताः धिग्वचनानि निश्चयनेन भरते निक्षिप्यन्ते।

( मोहमुपगतः )

( नेपथ्ये )

उस्सरह अय्या !। [ उत्सरतार्याः ! उत्सरत।]

**देवकुलिकः** – ( विलोक्य ) अये,

**काले खल्वागता देव्यः पुत्रे मोहमुपगते।**
**हस्तस्पर्शो हि मातॄणामजलस्य जलाञ्जलिः ॥ १२ ॥**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**प्रसङ्गः** – देवकुलिकमुखात् तातस्य मृत्योः समाचारं श्रुत्वा भरतः मोहमुपगच्छति। तस्मिन्नेवावसरे सर्वाः मातरः अपि प्रतिमामन्दिरम् आगच्छन्ति इत्येव वर्णनं प्रस्तुतश्लोके कृतमस्ति।

**अन्वयः** – पुत्रे मोहमुपगते देव्यः काले आगताः खलु, मातॄणां हस्तस्पर्शः हि अजलस्य जलाञ्जलिः।

**व्याख्या – (क) पर्यायपदानि** – पुत्रे = भरते, मोहं = निश्चेतनत्वम्, उपगते = प्राप्ते, देव्यः = कौसल्यादयो राजाङ्गनाः, काले = उचिते समये, आगताः = उपेताः, खलु = निश्चयेन। पुत्रसमाश्वसनावसरस्योपस्थितत्वा-दत्रासामधुनोपसत्तिः कालान्तरोपसत्यपेक्षय समधिकोपयुक्तेत्याशयः। ननु सामान्यजनेनापि मूर्च्छितस्य भरतस्य तीजनादिनोपचारेण मूर्च्छाया निरसनीयत्वे यन्मातृणामुपस्थितिर्नाधिकप्रयोजनेत्याशंकायामाह हस्तेति। मातॄणां = जननीनां, हस्तस्पर्शः = क्रियमाणः पाणिकरणकः स्पर्शः, अजलस्य = जलरहितस्य जलार्थिनः, जलाञ्जलिः = तृप्तिप्रदः भवति।

**(ख) भावार्थः** – भरते निश्चिततत्वं प्राप्ते कौसल्यादयो राजमातरः उचितसमये उपेताः (प्राप्ताः)। निश्चयेन मातृभिः क्रियमाणः पाणिस्पर्शः जलरहितस्य जलार्थिनः सलिलाञ्जलिवत् तृप्तिप्रदो भवति तथैव मातॄणां हस्तस्पर्शः भरतस्य कृते भविष्यति।

**विशेषः** – श्लोकेऽस्मिन् सुवदनावृत्तमस्ति। तल्लक्षणमिदं –

"ज्ञेया सप्ताश्वषड्भिर्मरभनययुता म्लौ गः सुवदना॥"

(ततः प्रविशन्ति देव्यः सुमन्त्रश्च)

**सुमन्त्रः** – इत इतो भवत्यः।

**इदं गृहं तत् प्रतिमानृपस्य नः समुच्छ्रयो यस्य स हर्म्यदुर्लभः।**
**अयन्त्रितैरप्रतिहारिकागतैर्विना प्रणामं पथिकैरुपास्यते॥१३॥**

**प्रसङ्गः** – यदा सर्वाः मातरः प्रतिमामन्दिरमागच्छन्ति, तदा सुमन्त्रः मातॄर्यद् वदति तदत्र वर्णितमस्ति।

**अन्वयः** – यस्य स हर्म्यदुर्लभः समुच्छ्रयः तद् इदं नः प्रतिभानृपस्य गृहम् (यद्) अयन्त्रितैः अप्रतिहारिकागतैः पथिकैः प्रणामं विना उपास्यते।

**व्याख्या – (क) पर्यायपदानि** – यस्य = गृहस्य, सः = प्रसिद्धः, हर्म्यदुर्लभः = राजसदनातिशायी, (हर्म्येषु) राजप्रसादान्तर्गतेषु भवनेषु दुर्लभः दुष्प्रापः, समुच्छ्रयः = औन्नत्यं, तत् इदं = पुरोदृश्यमानं, नः = अस्माकं, प्रतिमानृपस्य = प्रतिमारूपेणावशिष्टस्य नृपस्य, गृहं = सदनम्, अयन्त्रितैः = अप्रतिषिद्धैः, अप्रतिहारिकागतैः = द्वाराधिनिरपेक्ष्येण प्रविष्टैः, पथिकैः = अध्वगैः, प्रणामं विना = नमस्कारमन्तरेण, उपास्यते = सेव्यते।

**(ख) भावार्थः** – प्रतिमागृहस्य राजसदनातिशायी (राजप्रासादान्तर्गतेषु भवनेषु) दुर्लभः दुष्प्राप्यः औन्नत्यं पुरोदृश्यमानम् अस्माकं प्रतिमारूपेणावशिष्टस्य राज्ञः सदनम् अप्रतिषिद्धैः द्वाराधिनिरपेक्ष्येण प्रविष्टैः अधवगैः नमस्कारं विनापि सेव्यते।

(प्रविश्यावलोक्य) भवत्यः। न खलु न खलु प्रवेष्टव्यम्।

**अयं हि पतितः कोऽपि वयस्स्थ इव पार्थिवः।**

**देवकुलिकः** –

**परशङ्कामलं कर्तुं गृह्यतां भरतो ह्ययम्॥१४॥**

**प्रसङ्गः** – यदा प्रतिमामन्दिरं गत्वा भरतः मोहमुपगच्छति तदा देवकुलिकः मातॄर्वदति यत् अपरः कोऽपि न अपितु कैकेयीसुतः भरतः एव अस्ति इत्यत्र वर्णितमस्ति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**अन्वयः** – हि अयं कोऽपि वयःस्थ इव पार्थिवः पतितः। परशङ्कां कर्तुम् अलं हि अयं भरतः गृह्यताम्।

**व्याख्या – ( क ) पर्यायपदानि** – हि = निश्चयेन, अयं = पुरो दृश्यमानः, कोऽपि = अज्ञातपरिचयः, वयःस्थः = युवा, इव = यथा, पार्थिवः = नृपः, पतितः = भूमौ निपतितः। परशङ्काम् = अन्यस्य शङ्कां, कर्तुं = विधातुम्, अलं = वृथा, हि = निश्चयेन, अयं भरतः = कैकेयीसुतः, गृह्यताम् = उपादीयताम्।

**( ख ) भावार्थः** – निश्चयेन पुरोदृश्यमानः अज्ञातपरिचयः युवा राजा दशरथः इव भूमौ निपतितः अन्यस्य शङ्कां विधातुं वृथा निश्चयेन कैकेयीसुतः उपादीयताम् अर्थात् देवकुलिकस्य कथनस्य भावः अयमस्ति यत् एषः भरतः अस्ति अथवा भरतात् भिन्नः अयम् इति शङ्का न कर्त्तव्या।

**विशेषः** – अस्मिन् श्लोके अनुष्टुप् छन्दः अस्ति।

( निष्क्रान्तः )

**देव्यः** – ( सहसोपगम्य ) हा जाद ! भरत [ हा जात ! भरत !]

**भरतः** – ( किञ्चित् समाश्वस्य ) आर्य !

**सुमन्त्रः** – जयतु महा – ( इत्यर्धोक्ते सविषादम् ) अहो स्वरसादृश्यम्। मन्ये प्रतिमास्थो महाराजो व्याहरतीति।

**भरतः** – अथ मातर्गीमिदानीं काऽवस्था ?

**देव्यः** – जाद ! एसा णो अवत्था। ( अवगुण्ठनमपनयन्ति ) [ जात ! एषा नोऽवस्था।]

**सुमन्त्रः** – भवत्यः ! निगृह्यतामुत्कण्ठा।

**भरतः** – ( सुमन्त्रं विलोक्य ) सर्वसमुदाचारसन्निकर्षस्तु मां सूचयति। क्वचित् तात ! सुमन्त्रो भवान् ननु ?

**सुमन्त्रः** – कुमार ! अथ किम् ?सुमन्त्रोऽस्मि।

**अन्वास्यमानश्चिरजीवदोषैः कृतघ्नभावेन विडम्ब्यमानः।**
**अयं हि तस्मिन् नृपतौ विपन्ने जीवामि शून्यस्य रथस्य सूतः॥ १५॥**

**प्रसङ्गः** – प्रतिमामन्दिरे सुमन्त्रः भरताय स्वकीयं परिचयं ददन् वदति इत्यत्र वर्णितमस्ति।

**अन्वयः** – चिरजीवदोषैः अन्वास्यमानः कृतघ्नभावेन विडम्ब्यमानः अहं हि तस्मिन् नृपतौ विपन्ने शून्यस्य रथस्य सूतः जीवामि।

**व्याख्या – ( क ) पर्यायपदानि** – चिरजीवदोषैः = चिरजीविपुरूषसुलभैः दोषैः स्वप्रियजनविपद्दर्शनादिरूपैः, अन्वास्यमानः = अनुगम्यमानः, कृतघ्नभावेन = कृतघ्नतया, विडम्बमानः = उपहस्यमानः, अहं = सुमन्त्रः, हि = निश्चयेन, तस्मिन् नृपतौ = दशरथे, विपन्ने = मृते सति, शून्यस्य = स्वामिविहीनस्य, रथस्य = स्यन्दनस्य, सूतः = सारथिः, जीवामि = जीवितं धारयामि।

**( ख ) भावार्थः** – चिरजीवितपुरुषसुलभैः दोषैः ( स्वजनविपद्दर्शनादिरूपैः ) अनुगम्यमानः कृतघ्नतया उपहस्यमानः सुमन्त्रः निश्चयेन दशरथे मृते सति स्वामिविहीनस्य स्यन्दनस्य सारथिः प्राणान् धारयति।

**विशेषः** – श्लोकेऽस्मिन् उपजाति छन्दः अस्ति।

**भरतः** – हा तात ! ( उत्थाय ) तात ! अभिवादनक्रममुपदेष्टुमिच्छामि मातर्गीम्।

**सुमन्त्रः** – बाढम्। इयं तत्र भवतो रामस्य जननी देवी कौसल्या।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**भरतः** – अम्ब ! अनपराद्धोऽहमभिवादये।

**कौसल्या** – जाण ! णिस्सन्दावो होहि। [जात ! निःसन्तापो भव।]

**भरतः** – (आत्मगतम्) आकृष्ट इवास्म्यनेन। (प्रकाशम्) अनुगृहीतोऽस्मि। ततस्ततः।

**सुमन्त्रः** – इयं तत्रभवतो लक्ष्मणस्य जननी देवी सुमित्रा।

**भरतः** – अम्ब ! लक्ष्मणेनातिसन्धितोऽहमभिवादये।

**सुमित्रा** – जाद ! जसोभाई होहि। [जात ! यशोभागी भव।]

**भरतः** – अम्ब ! इदं प्रयतिष्ये। अनुगृहीतोऽस्मि। ततस्ततः।

**सुमन्त्रः** – इयं ते जननी।

**भरतः** – (सरोषमुत्थाय) आः पापे !

**मम मातुश्च मातुश्च मध्यस्था त्वं न शोभसे।**
**गङ्गायमुनयोर्मध्ये कुनदीव प्रवेशिता॥१६॥**

**प्रसङ्गः** – देवप्रतिमागृहे मातर्गीमभिवादनक्रमे भरतः स्वकीयमातुः क्रमे आगते सति यद् वदति तदत्र वर्णितमस्ति।

**अन्वयः** – मम मातुः मातुः च मध्यस्था त्वं गंगायमुनयोः मध्ये प्रवेशिता कुनदी इव न शोभसे।

**व्याख्या** – **(क) पर्यायपदानि** – मम मातुः = कौसल्याः, मातुः = सुमित्रायाश्च, मध्ये = मध्यभागे, त्वं = कैकेयी, गङ्गायमुनयोः = गंगा च यमुना चेति तयोरत्यन्तपवित्रयोर्मध्ये =अन्तरे, प्रवेशिता = प्रविष्टा, कुनदी = कुत्सिता नदी, इव = यथा, न शोभसे = न शाोभामावहसि।

**(ख) भावार्थः** – कौसल्यायाः मातुः सुमित्रायाः च मध्ये स्थिता भवती (कैकयी) जाह्नव्याः कालिन्द्याश्च अन्तराले प्रविष्टा क्षुद्रसरिता (कुत्सितानदी) यथा न शोभते तथैव भवती अपि एतयोः (मात्रोः) मध्ये न राजते।

**विशेषः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति। पुनश्चात्र उपमालङ्कारः अस्ति।

**कैकयी** – जाद ! किं मए किदं। [जात ! किं मया कृतम् ?]

**भरतः** – किं कृतमिति वदसि ?

**वयमयशसा चीरेणार्यो नृपो गृहमृत्युना**
**प्रततरुदितैः कृत्स्नाऽयोध्या मृगैः सह लक्ष्मणः।**
**दयिततनयाः शोकेनाम्बाः स्नुषाध्वपरिश्रमै-**
**र्धिगिति वचसा चोग्रेणात्मा त्वया ननु योजितः॥१७॥**

**प्रसङ्गः** – प्रतिमागृहे भरतः स्वकीयमातरं कैकेय्यीम् उपालम्भति इत्यत्र वर्णितमस्ति।

**अन्वयः** – ननु त्वया वयम् अयशसा (योजिताः) आर्यः चीरेण (योजितः) नृपः गृहमृत्युना कृत्स्ना अयोध्या प्रततरुदितैः लक्ष्मणः मृगैः सह (योजितः) दयिततनयाः अम्बाः शोकेन स्नुषा अध्वपरिश्रमैः आत्मा च उग्रेण धिग् इति वचसा योजितः।

**व्याख्या** – **(क) पर्यायपदानि** – नन्विति सम्बोधने, त्वया = पापिन्या, वयम् = अहम्, अयशसा = अकीर्त्या, योजितः = भरतो राज्यकामुको मात्रैव कारितः इत्येवं रूपया अकीर्त्या संयोजितः। आर्यः = रामः, चीरेण = वल्कलेन, (योजितः = वनवासिवेषं ग्राहितः)। नृपः = दशरथः, गृहमृत्युना = असमयमरणेन, कृत्स्ना =



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

सर्वावयवयुक्ता, अयोध्या, प्रततरुदितैः = अविच्छिन्नप्रवृत्ताश्रुविमोचनैः, लक्ष्मणः = सुमित्रानन्दनः, मृगैः = हिरणैः, सह = सार्धं, योजितः, अर्थात् वने मृगसहवासित्वं नीतः, दयिततनयाः = दयिताः प्रियाः, तनयाः पुत्राः यासां ताः अम्बाः, शोकेन = भर्तृपुत्रवियोगदुःखेन योजिताः, स्नुषा = सीता देवी, अध्वपरिश्रमैः = मार्गसंचारायासैः, योजिता, आत्मा च, उग्रेण = मर्मभेदिना, धिगिति वचसा = धिक् कैकेयीम्, इति निन्दावचनेन योजितः।

**(ख) भावार्थः** – पापिन्या भवत्या अहं भरतः अकीर्त्या संयोजितः। ज्येष्ठभ्राता रामः वल्कलेन वनवासिनः सञ्जातः। महाराजदशरथः असमयमरणेन योजितः। सर्वावयवयुक्ता अयोध्यानगरी अविच्छिन्नप्रवृत्ताश्रुविमोचनैः योजिता। सुमित्रानन्दनः हरिणैः सार्धं योजितः अर्थात् वने मृगसहवासित्वं नीतः। पुत्रवत्सलाः अम्बाः कौसल्या सुमित्रा च पुत्रवियोगदुःखेन योजिताः। भ्रातृजाया सीतादेवी मार्गसञ्चारायासैः योजिता। मर्मभेदिना धिगिति ''धिक् कैकेयीम्'' इति निन्दावचनेन स्वीयः आत्मा योजितः।

**विशेषः** – श्लोकेऽस्मिन् हरिणी छन्दः अस्ति। तल्लक्षणमिदं –

''नसमरणलागः षड्वेदैर्हयैर्हरिणी मता''॥

**कौसल्याः** – जाद! सव्वसमुदाआरमज्झत्थो किं ण वन्दसि मादरं। [जात! सर्वसमुदाचारमध्यस्थः किं न वन्दसे मातरम्?]

**भरतः** – मातरमिति। अम्बा त्वमेव च माता। अम्ब! अभिवादये।

**कौसल्या** – णहि णहि। इअं दे जण्णी। [नहि नहि। इयं ते जननी।]

**भरतः** – आसीत् पुरा। न त्विदानीम्। पश्यतु भवती –

**त्यक्त्वा स्नेहं शीलसङ्क्रान्तदोषैः पुत्रास्तावन्नन्वपुत्राः क्रियन्ते।**
**लोकेऽपूर्वं स्थापयाम्येष धर्मं भर्तृद्रोहादस्तु माताऽप्यमाता॥१८॥**

**प्रसङ्गः** – प्रस्तुतश्लोके भरतेन मातरं कैकेयीं प्रति उक्तं वचनं वर्णितमस्ति।

**अन्वयः** – ननु शीलसंक्रान्तदोषैः तावत्पुत्राः स्नेहं त्यक्त्वा अपुत्राः क्रियन्ते। एषः अहं लोके अपूर्वं धर्मं स्थापयामि, भर्तृद्रोहात् माता अपि अमाता अस्तु।

**व्याख्या – (क) पर्यायपदानि** – ननु = इति प्रश्ने, शीलसंक्रान्तदोषैः = सहवासिपरिजनगतदुःख-भावसंक्रमदोषैः, तावद् = आदौ, पुत्राः = सुताः अपि, स्नेहं त्यक्त्वा = ममतामुत्सृज्य, अपुत्राः क्रियन्ते = अनया अपुत्रवदाचर्यन्ते, एषः अहं = भरतः, लोके = जगति, अपूर्वम् = अन्याननुष्ठितं, धर्मं स्थापयामि = प्रवर्त्ययामि, भर्तृद्रोहात् = पुत्रद्रोहद्वारेण स्वभर्तुमरण रूपद्रोहाचरणात्, माता = जननी, अपि अमाता = मातृबहुमानाभाजनम्, अस्तु = भवतु।

**(ख) भावार्थः** – अनया दुष्टपरिजनसहवासेन सत्यप्रेमभावः त्यक्तः पुत्रेभ्यः च बन्धनं खण्डितम्। इदानीम् अहं संसारे एकमपूर्वधर्मस्य स्थापनां करिष्यामि। यस्मात् काचित् स्त्री स्वस्वामिना सह द्रोहं न कुर्यात्। सा स्त्री पुत्रवती भूत्वा अपि 'माता' इति कथनाधिकारिणी न भवेत्।

**विशेषः**– अप्रस्तुतप्रशंसा, शालिनी छन्दः

**कैकेयी** – जाद! महाराअस्स सच्चवअणं रक्खन्तीय मए तह उत्तं। [जात! महाराजस्य सत्यवचनं रक्षन्त्या मया तथोक्तम्।]

**भरतः** – किमिति किमिति?

**कैकेयी** – पुत्तओ मे राआ होदु त्ति। [पुत्रको मे राजा भवत्विति।]



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**भरतः** – अथ स इदानीमार्योऽपि भवत्याः कः ?

**पितुर्मे नौरसः पुत्रो न क्रमेणाभिषिच्यते।**
**दयिता भ्रातरो न स्युः प्रकृतीनां न रोचते॥ १९॥**

**प्रसङ्गः** – यदा कैकेयी वदति यत् महाराजस्य सत्यवचनं रक्षितुम् अहं रामं वनं प्रेषितवती तदा भरतः प्रत्युत्तररूपेण यद् वदति तदत्र वर्णितमस्ति।

**अन्वयः** – मे पितुः औरसः पुत्रः न ?क्रमेण न अभिषिच्यते ?भ्रातरः दयिता न स्युः ?प्रकृतीनां न रोचते ?

**व्याख्या – (क) पर्यायपदानि** – मे = मम, पितुः = नृपदशरथस्य, औरसः = स्वबीजोत्पन्नः, पुत्रः = सुतः, न = नहि, इति काकुः ?क्रमेण नाभिषिच्यते = पुत्रस्य ज्येष्ठक्रमेण राज्याभिषेचनसमुदाचारः, नास्ति किम् ? भ्रातरः = अस्मदादयः, दयिताः = प्रियाः, न स्युः = किं न भवेयुः ?प्रकृतीनाम् = अमात्यादीनां, न रोचते = आर्याभिषेचनं किं न प्रियं प्रतीयते।

**(ख) भावार्थः** – (किं रामः) मम (भरतस्य) तातस्य (दशरथस्य) स्वबीजोत्पन्नः सुतः नास्ति ? (किं) सुतस्य ज्येष्ठताक्रमेण राज्याभिषेककार्यं (तस्यैव) नहि विधीयसे स्म ? (किम्) अस्मदादयः सर्वे भ्रातरः रामाय प्रियाः नहि आसन् ? (किम्) अमात्यादीनां सकलप्रजानां रामस्य राज्याभिषेचनम् अभीष्टं नहि आसीत् ? अर्थात् यद्यपि सर्वमप्यनुकूलमवर्तत परं त्वयि विपरीते सर्वमपि कार्यं विपरीतं जातम्, अतः भवती एव अपाराधिनी अस्ति।

**विशेषः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति।

**कैकेयी** – जाद ! सुक्कलुद्धा णणु पृच्छिदव्वा। [जात ! शुक्ललुब्धा ननु प्रष्टव्या।]

**भरतः** –

**वल्कलैर्हृतराजश्रीः पदातिः सह भार्यया।**
**वनवासं त्वयाज्ञप्तः शुल्केऽप्येतदुदाहृतम्॥ २०॥**

**प्रसङ्गः** – यदा कैकेयी आत्मानं निर्दोषं वदति तदा भरतः कैकेयीं प्रति यद् वदति तदत्र वर्णितमस्ति।

**अन्वयः** – हृतराजश्रीः पदातिः वल्कलैः भार्यया सह त्वया वनवासम् आज्ञप्तः एतदपि शुल्के उदाहृतम्।

**व्याख्या – (क) पर्यायपदानि** – हृतराजश्रीः = अपनीतराजलक्ष्मीकः, पदातिः = पादचारी, भार्यया सह = पत्न्या सह, त्वया वनवासम्, आज्ञप्तः = वने वसेत्यनुशिष्टः, एतदपि = सभार्यार्यस्य वनगमनमपि, शुल्के = स्त्रीशुल्के, उदाहृतं = संभाषितं किम् ?

**(ख) भावार्थः** – वल्कलवस्त्रैः अपनीतनृपलक्ष्मीकः चरणचारी पत्न्या सीतया समं भवत्या (कैकेय्या) अरण्ये निवसितुम् आदेशः प्रदत्तः अर्थात् सभार्यस्य श्रीरामस्य वनगमनमपि विवाहपणे निर्दिष्टमासीत् किम् ?

**विशेषः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दोऽस्ति। पुनश्चात्र काव्यलिङ्गः अलङ्कारोऽस्ति।

**कैकेयी** – जाद ! देसकाले णिवेदेमि। [जात ! देशकाले निवेदयामि।]

**भरतः** –

**अयशसि यदि लोभः कीर्तयित्वा किमस्मान्**
**किमु नृपफलतर्षः किं नरेन्द्रो न दद्यात्।**
**अथ तु नृपतिमातेत्येष शब्दस्तवेष्टो**
**वदतु भवति सत्यं किं तवार्यो न पुत्रः॥ २१॥**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**प्रसङ्गः** – प्रस्तुतश्लोके भरतः स्वकीयमातरम् उपालम्भं ददाति इति वर्णितमस्ति।

**अन्वयः** – यदि अयशसि लोभः अस्मान् कीर्तयित्वा किम्? नृपफलतर्षः नरेन्द्रः न दद्यात् किम्? अथ नृपतिमाता एष शब्दः तव इष्टः (चेत्) भवति! सत्यं वदतु, किम् आर्यः तव पुत्रः न?

**व्याख्या – (क) पर्यायपदानि** – यदि अयशसि = कीर्त्तिविपर्यये, लोभः = आकर्षणं चेत्तदा, अस्मान् कीर्तयित्वा किम् = अस्मन्नामकीर्तनेन किं प्रयोजनम्? नृपफलतर्षः राजभावलभ्ययोग्यवस्तुतृष्णा, नरेन्द्रः = नृपतिः, किं न दद्यात् = सर्वमीप्सितं ते न दद्यात्? अथ तव नृपतिमाता = राजजननी, इत्येष शब्दः इष्टः = अभिलषितश्चेत् भवति = कैकयि, सत्यं वदतु, आर्यः = रामः, तवः = पुत्रः न भवति किम्?

**(ख) भावार्थः** – (हे मातः) यदि कीर्तिविपर्यये (तव) आकर्षणमासीत् तर्हि अस्मन्नामकीर्तनेन किं प्रयोजनम्? यदि (भवत्याः) नृपस्य राज्ञः राजभावलम्भयोग्यवस्तुतृष्णा आसीत् तर्हि राज्ञा दशरथः भवत्यै किं न दद्यात्? अथवा यदि राजजननी (राजमाता) एवं प्रकारमभिधानं भवत्याः अभीष्टः तर्हि हे कल्याणि! रामः भवत्याः सुतः नासीत् किम्?

**विशेषः** – श्लोकेऽस्मिन् मालिनी छन्दः अस्ति। तल्लक्षणमिदं –

"ननमयययुतेयं मालिनी भोगिलोकैः"॥

कष्टं कृतं भवत्या –

**त्वया राज्यैषिण्या नृपतिरसुभिर्नैव गणितः**
**सुतं ज्येष्ठं च त्वं व्रज वनमिति प्रेषितवती।**
**न शीर्णं यद् दृष्ट्वा जनकतनयां वल्कलवती**
**महो धात्रा सृष्टं भवति हृदयं वज्रकठिनम्॥ २२॥**

**प्रसङ्गः** – मात्रे उपालम्भकाले एव भरतः अग्रे वदति इत्यत्र वर्णितमस्ति।

**अन्वयः** – भवति! राज्यैषिण्या त्वया नृपतिः असुभिः नैव गणितः, त्वं ज्येष्ठं सुतं वनं व्रज इति प्रेषितवती, जनकतनयां वल्कलवतीं दृष्ट्वा तव हृदयं न शीर्णम्, अहो तत् धात्रा वज्रकठिनं सृष्टम्।

**व्याख्या – (क) पर्यायपदानि** – भवति! राज्यैषिण्या = राज्यकामुकया, त्वया = कैकेय्या, नृपतिः = राजा, असुभिर्नैव गणितः = प्राणैः परित्यज्यमानो नापेक्षितः, त्वं = कैकयी, ज्येष्ठं सुतं = रामं, च, वनं व्रज = अरण्यं गच्छ इति, प्रेषितवती = अयोध्यानगरान्निर्वासितवती, जनकतनयां = जानकीं, वल्कलवतीं = वल्कलवसनावृत्तदेहां, दृष्ट्वा = अवलोक्य, यत् तव हृदयं = चित्तं, न शीर्णं = द्विधा न विदलितं, तत् = तव हृदयं, धात्रा = ब्रह्मणा, वज्रकठिनं = वज्रवत् कठिनं, सृष्टं = निर्मितम्।

**(ख) भावार्थः** – राज्यम् अभिषन्त्या भवत्या कैकेय्या राजा प्राणैः परित्यज्यमानो नापेक्षितः। कैकेयी रामं च अरण्यं गच्छ इति अयोध्यानगरात् निर्वासितवती जनकपुत्रीं जानकीं वल्कलवसनावृत्तदेहां विलोक्य यत् तव चित्तं द्विधा न विदलितं, तव हृदयं ब्रह्मणा वज्रवत् कठिनां निर्मितम् इति मन्ये।

**विशेषः** – श्लोकेऽस्मिन् शिखरिणी छन्दः अस्ति। अत्र उपमालंकारोऽपि विद्यते।

**सुमन्त्रः** – कुमार! एतौ वसिष्ठवामदेवौ सह प्रकृतिभिरभिषेकं पुरस्कृत्य भवन्तं प्रत्युद्गतौ विज्ञापयतः:–

**गोपहीना यथा गावो विलयं यान्त्यपालिताः।**
**एवं नृपतिहीना हि विलयं यान्ति वै प्रजाः॥ २३॥**

**प्रसङ्गः** – भरतस्य अयोध्यामागमनात् परं प्रतिमागृहे वशिष्ठवामदेवौ भरतस्य समीप राज्याभिषेकं कर्तुम्



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

आगच्छन्ति तदा सुमन्त्रः यत् कथयति तदत्र वर्णितमस्ति।

**अन्वयः** – यथा गोपहीनाः गावः अपालिताः विलयं यान्ति, एवं हि प्रजाः वै नृपति-हीनाः विलयं यान्ति।

**व्याख्या – ( क ) पर्यायपदानि** – यथा = येन प्रकारेण, गोपहीनाः = रक्षकरहिताः, गावः = धेनवः, अपालिताः = अरक्षिताः, रक्षकाभावात्, विलयं = विनाशं, यान्ति = प्राप्नुवन्ति, एवं हि = तथैव, प्रजाः = प्रकृतयः, वै = इति पादपूर्त्यर्थं, नृपतिहीनाः = राज्ञा विरहिताः, शासकाभावेन, विलयं = विनाशं, यान्ति = प्राप्नुवन्ति।

**( ख ) भावार्थः** – येन प्रकारेण गोपालकशून्याः धेनवः अरक्षिताः विनाशं गच्छन्ति तथैव भूपतिरहिताः प्रकृतयः निश्चयेन इत्थमेव विनष्टाः भवन्ति।

**भरतः** – अनुगच्छन्तु मां प्रकृतयः।

**सुमन्त्रः** – अभिषेकं विसृज्य क्व भवान् यास्यति?

**भरतः** – अभिषेकमिति। इहात्र भवत्यै प्रदीयताम्।

**सुमन्त्रः** – क्व भवान् यास्यति?

**भरतः** – **तत्र यास्यामि यत्रासौ वर्तते लक्ष्मणप्रियः।**
**नायोध्या तं विनायोध्या सायोध्या यत्र राघवः॥ २४॥**

**प्रसङ्गः** – यदा ऋषिवामदेववशिष्ठौ भरतस्य राज्याभिषेचनं कर्तुमागच्छतः तदा भरतः यद् वदति तदत्र वर्णितमस्ति।

**अन्वयः** – यत्र असौ लक्ष्मणप्रियः वर्तते, तत्र यास्यामि तं विना अयोध्या न अयोध्या, सा अयोध्या यत्र राघवः वर्तते।

**व्याख्या – ( क ) पर्यायपदानि** – यत्र = यस्मिन् स्थाने, असौ = एषः, लक्ष्मणप्रियः = लक्ष्मणः प्रियो यस्य सः, रामः, तत्र = तस्मिन्स्थाने, यास्यामि = गमिष्यामि। तं = राघवं, विना अयोध्या, नायोध्या = अयोध्या नास्ति, साऽयोध्या = तदेव अयोध्यापुरी यत्र राघवः वर्तते। तत्रैव यास्यामीति भावः।

**( ख ) भावार्थः** – अहं (भरतः) तस्मिन् स्थाने गमिष्यामि यस्मिन् स्थाने सः प्रसिद्धः लक्ष्मणः रामः च निवसतः। रामम् अन्तरेण अयोध्यानाम्नी नगरी अयोध्या एव न प्रतिभाति। वस्तुतः यस्मिन् स्थाने श्रीरामः अस्ति सा एव अयोध्यानगरी अस्माकं कृते अस्ति।

**विशेषः**– अपह्नुतिः अलङ्कारः, अनुष्टुप् छन्दः

(निष्क्रान्ताः सर्वे)

**इति तृतीयोऽङ्कः**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# अथ चतुर्थोऽङ्कः

(ततः प्रविशतश्चेट्यौ)

**विजया** – हला णन्दिणिए! भणेहि भणेहि। अज्ज कोसल्लापुरोगेहि सव्वेहि अन्तेवुरेहि पडिमागेहं दट्ठुं गदेहि तहिं किल भट्टिदारओ भरदो दिठ्टो। अहं च मन्दभाआ दुवारे ट्ठिदा। [हला नन्दिनिके! भण भण। अद्य कौसल्यापुरोगैः सर्वैरन्तः पुरैः प्रतिमागेहं द्रष्टुं गतैस्तत्र किल भर्तृदारको भरतो दृष्टः ?अहं च मन्दभागा द्वारे स्थिता।]

**नन्दिनिका** – हला! दिठ्टो अह्मेहि कोदुहलेण भट्टिदारओ भरदो। [हला! दृष्टोऽस्माभिः कौतूहलेन भर्तृदारको भरतः।]

**विजया** – भट्टिणी कुमारेण किं भणिदा। [भट्टिनी कुमारेण किं भणितम्?]

**नन्दिनिका** – किं भणिदं ओलोइदुं वि णेच्छदि कुमारो। [किं भणितम्? अवलोकितुमपि नेच्छति कुमारः।]

**विजया** – अहो अच्चाहिदम्। रज्जलुद्धाए भट्टिदारअस्स रामस्स रज्जविब्भट्ठं करन्तीए अत्तणो वेहव्वं आदिट्ठं। लोओ वि विणासं गमिओ। णिग्घिणा हु भट्टिणी। पापअं किदं। [अहो अत्याहितम्। राज्यलुब्धया भर्तृदारकस्य रामस्य राज्यविभ्रष्टं कुर्वत्यात्मनो वैधव्यमादिष्टम्। लोकोऽपि विनाशं गमितः। निर्घृणा खलु भट्टिनी। पापकं कृतम्।]

**नन्दिनिका** – हला! सुणाहि। पइदीहि आणीदं अभिसेअं विसज्जिअ रामतवोवणं गदो कुमारो। [हला! शृण। प्रकृतिभिरानीतमभिषेकं विसृज्य रामतपोवनं गतः कुमारः।]

**विजया** – (सविषादं) हम्। एवं गदो कुमारो। णन्दिणिए! एहि अहो भट्टिणिं पेक्खामो। [हम्। एवं गतः कुमारः। नन्दिनिके! एह्यावां भट्टिनीं पश्यावः।]

(निष्क्रान्ते)

प्रवेशकः।

(ततः प्रविशति भरतो रथेन सुमन्त्रः सूतश्च)

**भरतः** –

**स्वर्गं गते नरपतौ सुकृतानुयात्रे**
**पौराश्रुपातसलिलैरनुगम्यमानः ।**
**द्रष्टुं प्रयाम्यकृपणेषु तपोवनेषु**
**रामाभिधानमपरं जगतः शशाङ्कम्॥ १ ॥**

**प्रसङ्गः** – चतुर्थाङ्कस्य प्रारम्भे सारथिना सुमन्त्रेण सह स्वकीयराज्याभिषेचनं विसृज्य रामस्य समीपं तपोवन–गमनकाले भरतः यत् चिन्तयति तदत्र वर्णनं कृतमस्ति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**अन्वयः** – सुकृतानुयात्रे नरपतौ स्वर्गं गते पौराश्रुपातसलिलैः अनुगम्यमानः अकृपणेषु तपोवनेषु रामाभिधानम् अपरं जगतः शशांकं द्रष्टुं प्रयामि।

**व्याख्या – (क) पर्यायपदानि** – सुकृतानुयात्रे = पुण्यानुगे, नरपतौ = दशरथे, स्वर्गं = दिवं, गते = प्राप्ते, पौराश्रुपातसलिलैः = पुरवासिनां वाष्पातजलैः, अनुगम्यमानः = अनस्रियमाणः, अकृपणेषु = उदारेषु, तपोवनेषु = तपश्चर्याकाननेषु, रामाभिधानं = रामनामानम्, अपरं = प्रसिद्धचन्द्रादन्यं, जगतः = संसारस्य, शशांकम् = आह्लादकत्वाच्चन्द्रं, द्रष्टुम् = अवलोकयितुं, प्रयामि = गच्छामि।

**(ख) भावार्थः** – पुण्यानुगे राज्ञि दशरथे दिवं प्रयाते, अयोध्यानगरवासिनां वाष्पपातजलैः अनुस्रियमाणः (अहम्) उदारेषु तपश्चर्याकाननेषु रामनामकं (रामः अभिधानं संज्ञा यस्य तादृशं) संसारस्य द्वितीयम् आह्लादकत्वाच्चन्द्रम् अवलोकयितुं गच्छामि।

**विशेषः** – श्लोकेऽस्मिन् वसन्ततिलकाछन्दः अस्ति। पुनश्चात्र रूपकांलकारो विद्यते।

**सुमन्त्रः** – एष एव आयुष्मान् भरतः।

**दैत्येन्द्रमानमथनस्य नृपस्य पुत्रो**
**यज्ञोपयुक्तविभवस्य नृपस्य पौत्रः।**
**भ्राता पितुः प्रियकरस्य जगत्प्रियस्य**
**रामस्य रामसदृशेन पथा प्रयाति॥२॥**

**प्रसङ्गः** – भरतः यदा स्वराज्याभिषेकं विसृज्य रामस्य समीपं तपोवनं गच्छति तदा सुमन्त्रः भरतं दृष्ट्वा चिन्तयति यत् भरतः स्वपूर्वजान् एव अनुसरति इत्यत्र वर्णितमस्ति।

**अन्वयः** – दैत्येन्द्रमानमथनस्य नृपस्य पुत्रः, यज्ञोपयुक्तविभवस्य नृपस्य पौत्रः, पितुः प्रियकरस्य जगत्प्रियस्य रामस्य भ्राता (एषः भरतः) रामसदृशेन पथा प्रयाति।

**व्याख्या – (क) पर्यायपदानि** – दैत्येन्द्रमानमथनस्य = असुरश्रेष्ठाहंकारमर्दिनः (शम्बरस्य), नृपस्य = दशरथस्य, पुत्रः = सुतः, पुनः यज्ञोपयुक्तविभवस्य = यज्ञविनियुक्तधनसम्पदः, नृपस्य = राज्ञः, अस्य पौत्रः, पितुः = जनकस्य, प्रियकरस्य = तातेप्सितकारिणः, जगत्प्रियस्य = संसारहितकारिणः, रामस्य = कौसल्यानन्दनस्य, भ्राता = अनुजः, एषः भरतः = रामानुजः, रामसदृशेन = रामस्यानुगुणेन, पथा = सदाचारमार्गेण, प्रयाति = गच्छति।

**(ख) भावार्थः** – असुरश्रेष्ठ (शम्बरस्य) अहंकारमर्दिनः दशरथस्य सुतः, यज्ञार्थविनियुक्तधनसम्पदः राज्ञः अजस्य पौत्रः, जनकस्य ईप्सिताचारिणः संसाररहितकारिणः कौसल्यानन्दनस्य (रामस्य) अनुजः एषः रामानुजः (भरतः) रामस्य अनुरूपेण सदाचारमार्गेण गच्छति।

**विशेषः** – श्लोकेऽस्मिन् वसन्ततिलकाछन्दः अस्ति। पुनश्चात्र परिकरालङ्कारो विद्यते।

**भरतः** – भोस्तात!

**सुमन्त्रः** – कुमार! अयमस्मि।

**भरतः** – क्व तत्रभवान् ममार्यो रामः ? क्वासौ महाराजस्य प्रतिनिधिः ? क्व सन्निदर्शनं सारवताम् ? क्वासौ प्रत्यादेशो राज्यलुब्धायाः कैकेय्याः ? क्व तत् पात्र यशसः ? क्वासौ नरपतेः पुत्रः ? क्वासौ सत्यमनुव्रतः ?

**मम मातुः प्रियं कर्तुं येन लक्ष्मीर्विसर्जिता।**
**तमहं द्रष्टुमिच्छामि दैवतं परमं मम॥३॥**

**प्रसङ्गः** – भरतः तपोवने रामस्यान्वेषणं कुर्वन् यद् वदति, तस्य वर्णनमत्र कृतमस्ति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**अन्वयः** – मम मातुः प्रियं कर्तुं येन लक्ष्मीः विसर्जिता, मम परमं दैवतं तम् अहं द्रष्टुम् इच्छामि।

**व्याख्या – ( क ) पर्यायपदानि** – मम = भरतस्य, मातुः = कैकेय्याः, प्रियं = मनोनुकूलं, कर्तुं = सम्पादयितुं, येन = रामेण, लक्ष्मीः = राज्यलक्ष्मीः, विसर्जिता = परित्यक्ता, अत एव मम = भरतस्य, परमं = श्रेष्ठं, दैवतं = देववत्पूज्यत्वात् दैवतं, रामम् = अग्रजं, तं द्रष्टुं = विलोकयितुम्, अहं = भरतः, इच्छामि = शीघ्रं दिदृक्षामि।

**( ख ) भावार्थः** – (येन) रामचन्द्रेण मे (भरतस्य) जनन्याः (कैकेय्याः) मनोनुकूलम् (अभीष्टं) सम्पादयितुं राज्यलक्ष्मीः परित्यक्ता, प्रसिद्धं मे (भरतस्य) श्रेष्ठं देववत्पूज्यत्वात् दैवतम् अग्रजम् रामं अहं (भरतः) विलोकयितुं वाञ्छामि।

**विशेषः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति। पुनश्चात्र रूपकालङ्कारः काव्यलिङ्गालंकारश्च स्तः।

**सुमन्त्रः** – कुमार! एतस्मिन्नाश्रमपदे –

**अत्र रामश्च सीता च लक्ष्मणश्च महायशाः।**
**सत्यं शीलं च भक्तिश्च येषु विग्रहवत् स्थिता॥४॥**

**प्रसङ्गः** – यदा भरतः रामेण सह मेलितुं तपोवनं गच्छति तदा रामं दृष्ट्वा सुमन्त्रः यद् वदति, तदत्र वर्णितमस्ति।

**अन्वयः** – अत्र महायशाः रामश्च सीता च लक्ष्मणः च येषु सत्यं शीलं च भक्तिः च विग्रहवत् स्थिता।

**व्याख्या – ( क ) पर्यायपदानि** – अत्र = अस्मिन्नाश्रमप्रदेशे, महायशाः = प्रचुरविमलकीर्त्तिः, रामश्च, सीता च लक्ष्मणश्च तिष्ठन्ति, येषु = रामसीतालक्ष्मणेषु, सत्यम् = ऋतं, शीलं = शीलते शोभते इति शीलं सद्वृत्तं, भक्तिश्च = गुरुजनविषयको भावश्च, विग्रहवत् = मूर्तिमत्, स्थिता = विद्यते।

**( ख ) भावार्थः** – अस्मिन् आश्रमस्थले प्रचुरकीर्तियुक्ताः रामः, जनकनन्दिनी सीता लक्ष्मणश्च तिष्ठन्ति। रामसीतालक्ष्मणेषु (रामचन्द्रे) सत्यनिष्ठा (सीतायां) चरित्रं लक्ष्मणे (भ्रातृसेवा च) इति त्रयं मूर्तिमत् इव अवस्थितं विद्यते।

**विशेषः** – श्लोकेऽस्मिन् अनुष्टुपछन्दः अस्ति। पुनश्चात्र यथासंख्यः अलंकारो विद्यते।

**भरतः** – तेन हि स्थाप्यतां रथः।

**सूतः** – यदाज्ञापयत्यायुष्मान्। (तथा करोति)

**भरतः** – (रथादवतीर्य) सूत! एकान्ते विश्रामयाश्वान्।

**सूतः** – यदाज्ञापत्यायुष्मान्। (निष्क्रान्तः)

**भरतः** – भोस्तात! निवेद्यतां निवेद्यताम्।

**सुमन्त्रः** – कुमार! किमिति निवेद्यते?

**भरतः** – राज्यलुब्धायाः कैकेय्याः पुत्रोः भरतः प्राप्त इति।

**सुमन्त्रः** – कुमार! अलं गुरुजनापदवादमभिधातुम्।

**भरतः** – सुष्ठु न न्याय्यं परदोषमभिधातुम्। तेन हि उच्यतामिक्ष्वाकुकुलन्यङ्गभूतो भरतो दर्शनमभिलषतीति।

**सुमन्त्रः** – कुमार! नाहमेवं वक्तुं समर्थः। अथ पुनर्भरतः प्राप्त इति ब्रूयाम्।

**भरतः** – न न। नाम केवलमभिधीयमानमकृतप्रायश्चित्तमिव मे प्रतिभाति। किं ब्रह्मघ्नानामपि परेण



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

निवेदनं क्रियते? तस्मात् तिष्ठतु तातः। अहमेव निवेदयिष्ये। भोः! निवेद्यतां निवेद्यतां तत्र भवते पितृवचनकराय राघवाय –

**निर्घृणश्च कृतघ्नश्च प्राकृतः प्रियसाहसः।**
**भक्तिमानागतः कश्चित् कथं तिष्ठतु यात्विति॥५॥**

**प्रसङ्गः** – रामेण सह मेलितुं यदा भरतः तपोवनं गच्छति तदा प्रायश्चितरूपेण स्वकीयं परिचयं दातुं यद् वदति तदत्र वर्णितमस्ति।

**अन्वयः** – निर्घृणः च कृतघ्नः च प्राकृतः प्रियसाहसः भक्तिमान् कश्चित् आगतः कथं (सः) तिष्ठतु? यातु इति।

**व्याख्या – (क) पर्यायपदानि** – निर्घृणः = दयारहितः च, कृतघ्नः = कीर्त्तिविघाती, च = पुनः, प्राकृतः = नीचः, प्रियसाहसः = प्रियं साहसं दुष्करं कर्म यस्य, अन्यायं कृत्वा दर्शनाभिलाषप्रकटनं साहसमेव, भक्तिमान् = त्वद्विषयकेणैकेन भक्तिगुणेन युक्तः, कश्चित् = कोऽपि, आगतः = समागतः, कथं = किं, सः, तिष्ठतु = दर्शनाय तिष्ठतु, अथवा यातु = गच्छतु इति।

**(ख) भावार्थः** – दयारहितः कृतघ्नी (कृतविघातः, कीर्तिविघाती) पामरः (नीचः) औद्धत्यप्रियः अन्यायं कृत्वा दर्शनाभिलाषप्रकटनं साहसमेव, त्वद्विषयकेणैकेन भक्तिगुणेनयुक्तः, समागतः किं (सः जनः) दर्शनाय तिष्ठतु अथवा गच्छतु?

**विशेषः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति। पुनश्चात्र परिकरः अलंकारोऽपि अस्ति।

(ततः प्रविशति रामः सीतालक्ष्मणाभ्यां)

**रामः** – (आकर्ण्य सहर्षं) सौमित्रे! किं शृणोषि? अयि विदेहराजपुत्रि! त्वमपि शृणोषि –

**कस्यासौ सदृशतरः स्वरः पितुर्मे**
**गाम्भीर्यात् परिभवतीव मेघनादम्।**
**यः कुर्वन् मम हृदयस्य बन्धुशङ्कां**
**सस्नेहः श्रुतिपथमिष्टतः प्रविष्टः॥६॥**

**प्रसङ्गः** – रामः तपोवने भरतस्य ध्वनिं श्रुत्वा यद् वदति तदत्र वर्णितमस्ति।

**अन्वयः** – मे पितुः सदृशतरः कस्य असौ स्वरः? गाम्भीर्यात् मेघनादं परिभवति इव, यः मम हृदयस्य बन्धुशङ्कां सस्नेहम् इष्टतः श्रुतिपथं प्रविष्टः।

**व्याख्या – (क) पर्यायपदानि** – मे = मम, पितुः = जनकस्य, सदृशतरः = अत्यन्तसदृशः, कस्य = पुरुषविशेषस्य, स्वरः = वर्णनपद्धतिः, गाम्भीर्यात् हेतोः, मेघनादं = मेघस्य, नादं = गर्जनं, परिभवतीव = तिरस्करोतीव, यः = स्वरः, मम = भरतस्य, हृदयस्य = चित्तस्य, बन्धुशंकां = भ्रातृसन्देहं, सस्नेहः = स्नेहमयः, इष्टतः = इष्टत्वेन हेतुना, श्रुत्योः = कर्णयोः, पन्थानं = मार्गं, श्रुतिपथं, प्रविष्टः = प्राप्तः।

**(ख) भावार्थः** – मम जनकस्य दशरथस्य अत्यन्तसदृशः पुरुषविशेषस्य कण्ठध्वनिः गम्भीरतायाः हेतोः मेघस्य गर्जनं तिरस्करोतीव स्वरः भरतस्य चित्तस्य भ्रातृसन्देहं जनयन् स्नेहमयः इष्टत्वेन हेतुना कर्णयोः मार्गं श्रुतिपथं प्राप्तः। अर्थात् रामस्य कथनस्य अभिप्रायः यत् मम तातस्य सदृशो घनगर्जितानुकारी च शब्दो कस्य मम श्रोत्रमाप्यावर्तते? यमुपश्रुत्य मम बन्धुना कृतोऽयम् इति मम मनः सन्दिग्धं भवति।

**विशेषः** – अस्मिन् श्लोके प्रहर्षिणी छन्दः अस्ति। तल्लक्षणमिदं –



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

"त्र्याशाभिर्मनजरगा: प्रहर्षिणीयम्"॥
पुनश्चात्र उपमा उत्प्रेक्षा चालंकारौ स्त:।

**लक्ष्मण:** – आर्य! ममापि खल्वेष स्वरसंयोगो बन्धुजनबहुमानमावहति। एष हि –

**घन: स्पष्टो धीर: समदवृषभस्निग्धमधुर:**
**कल: कण्ठे वक्षस्यनुपहतसञ्चाररभस:।**
**यथास्थानं प्राप्य स्फुटकरणनानाक्षरतया**
**चतुर्णां वर्णानामभयमिव दातुं व्यवसित:॥७॥**

**प्रसङ्ग:** – राम: यदा तपोवने बन्धुजनमिव स्वरं श्रुत्वा लक्ष्मणं वदति तदा लक्ष्मण: अपि वदति यत् एष: स्वर: मया अपि बन्धुजनस्य स्वर इव प्रतीयते इत्यत्र वर्णितमस्ति।

**अन्वय:** – घन: स्पष्ट: धीर: समदवृषभस्निग्धमधुर: कल: यथास्थानं प्राप्य स्फुटककरणनानाक्षरतया कण्ठे वक्षसि अनुपहतसञ्चाररभस: चतुर्णां वर्णानाम् अभयं दातुम् इव व्यवसित:।

**व्याख्या – (क) पर्यायपदानि** – घन: = मांसल:, स्पष्ट: = अक्षरव्यक्तिमान्, धीर: = गम्भीर:, समदवृषभस्निग्धमधुर: = मत्तवृषभस्वर इव स्निग्धमधुर:, सरसरमय:, कल: = अखर:, यथास्थानं प्राप्य यस्याक्षरस्य यत् स्थानं ताल्वादि तत्तत् स्थानमनतिक्रमेण संस्पृष्येत्यर्थ:। स्पुष्टकरणनानाक्षरतया = स्फुटं सौष्ठवयुक्तं करणं बाह्याभ्यन्तरलक्षणप्रयत्ने येषां तानि स्फुरणकरणानि नानाक्षराणि यस्मिन् स तथा भूत: तस्य भावस्तत्ता तया, कण्ठे = गले, वक्षसि = हृदये, उरसि च, अनुपहतसंचाररभस: = अप्रतिरुद्धप्रचारवेग: एष हि स्वर:, चतुर्णां = ब्राह्मणादीनां वर्णानाम्, अभयं दातुम् इव = व्यवसित: = चातुर्वर्ण्यरक्षार्थमुद्यत:।

**(ख) भावार्थ:** – निविड: गम्भीर: मतवृषभस्वर इव सरस: रम्य: कोमलध्वनि: वर्णानां कण्ठतालुप्रभृतीनि यानि यानि उच्चारणस्थानानि वर्तन्ते तानि यथावत्‌रूपेण संस्पृश्य स्पष्टम् इन्द्रियलक्षणवृत्या इन्द्रियप्रयत्न: येषां तादृशानां विविधवर्णानां गले हृदये अप्रतिबद्धप्रचारवेग: ब्राह्मणादीनां चातुर्वर्णानां विपत्ते: परित्रातुं रक्षार्थमुद्यत:।

**विशेष:**– उत्प्रेक्षालङ्कार:, शिखरिणीछन्द:

**राम:** – सर्वथा नायमबान्धवस्य स्वरसंयोग:। क्लेदयतीव मे हृदयम्। वत्स! लक्ष्मण:! दृश्यतां तावत्।

**लक्ष्मण:** – यदाज्ञापयत्यार्य:। (परिक्रामति)

**भरत:** – अये! कथं न कश्चित् प्रतिवचनं प्रयच्छति? किन्नु खलु विज्ञातोऽस्मि कैकेय्या: पुत्रो भरत: प्राप्त इति।

**लक्ष्मण:** – (विलोक्य) अये! अयमार्यो राम:। न न। रूपसादृश्यं –

**मुखमनुपमं त्वार्यास्याभं शशाङ्कमनोहरं**
**मम पितृसमं पीनं वक्ष: सुरारिशरक्षतम्।**
**द्युतिपरिवृतस्तेजोराशिर्जगत्प्रियदर्शनो**
**नरपतिरयं देवेन्द्रो वा स्वयं मधुसूदन:॥८॥**

**प्रसङ्ग:** – तपोवने अकस्मादेव भरतं दृष्ट्वा लक्ष्मण: भरतरामयो: द्वयो: रूपसादृश्यं दृष्ट्वा यद् वदति तदत्र वर्णितमस्ति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**अन्वयः** – (अस्य) मुखं तु आर्यास्माभं शशाङ्कमनोहर अनुपमम्। (अस्य) वक्षः मम पितृसमं पीनं सुरारिशरक्षतम्। द्युतिपरिवृत्तः तेजोराशिः जगत्प्रियदर्शनं अयं नरपतिः देवेन्द्रः वा स्वयं मधुसूदनः।

**व्याख्या – ( क ) पर्यायपदानि** – (अस्य) मुखं = आननं, तु, आर्यस्य = श्रेष्ठजनस्य रामस्य, आभं = मुखं, तस्य आभेवाभा यस्य तत् तथाभूतं, शशांकश्चन्द्रस्तद्वन्मनोहरम्, अनुपमम् = अप्रतिमम्, (अस्य = पुरुषस्य), वक्षः = हृदयं, मम = लक्ष्मणस्य, पितृसमं = दशरथतुल्यं, पीनं = विशालं, यत्सुरारीणां = दैत्यानां, शरैः = बाणैः, क्षतं = ब्रणकिणितं, द्युतिपरिवृत्तः = दीप्तिसम्पन्नः, तेजसः = प्रभावस्य, राशिः = पुञ्जः, जगत्प्रियदर्शनः = धरणीलोचनरोचनः, अयं = पुरो दृश्यमानः, नरपतिः = राजविशेषः, देवेन्द्रः = सुरपतिः, वा = अथवा, स्वयं मधुसूदनः = विष्णुः प्रतीयते।

**( ख ) भावार्थः** – अस्य (भरतस्य) आननं श्रेष्ठरामचन्द्रस्य मुखस्य शोभा चन्द्रवत् रमणीयम् अप्रतिमम् (उपमारहितम्) अस्ति। (भरतस्य) स्थूलं हृदयं दैत्यानां बाणैः आहतं (व्रणकिणितं) ताततुल्यं (दशरथतुल्यं) अस्ति। दीप्तियुक्तः, तेजसां समूहः (प्रभावस्य पुञ्जः) जगद्वासिनां प्रियमूर्तिः अयं (पुरोदृश्यमानः) राजविशेषः अथवा सुरपतिः अथवा स्वयं साक्षात् विष्णुः प्रतीयते।

**विशेषः** – श्लोकेऽस्मिन् हरिणी छन्दः अस्ति। पुनश्चात्र सन्देहालङ्कारोऽपि विद्यते।

(सुमन्त्रं दृष्ट्वा) अये तातः ?

**सुमन्त्रः** – अये कुमारो लक्ष्मणः ?

**भरतः** – एवं गुरुरयम्। आर्य ! अभिवादये।

**लक्ष्मणः** – एह्येहि। आयुष्मान् भव। (सुमन्त्रं वीक्ष्य) तात् ! कोऽत्रभवान् ?

**सुमन्त्रः** – कुमार !

**रघोश्चतुर्थोऽयमजात् तृतीयः पितुः प्रकाशस्य तव द्वितीयः।**
**यस्यानुजस्त्वं स्वकुलस्य केतोस्तस्यानुजोऽयं भरतः कुमारः॥ ९॥**

**प्रसङ्गः** – प्रस्तुतश्लोके तपोवने सुमन्त्रः लक्ष्मणाय भरतस्य परिचयं पृच्छन् अस्ति।

**अन्वयः** – अयं रघोः चतुर्थः अजात् तृतीयः प्रकाशस्य तव पितुः द्वितीयः। स्वकुलस्य केतोः यस्य त्वम् अनुजः, तस्य अनुजः अयं कुमारः भरतः (अस्ति)।

**व्याख्या – ( क ) पर्यायपदानि** – अयं = पुरो दृश्यमानः, रघोश्चतुर्थः = वंशक्रमगणनायां चतुर्थत्वेन परिगणनीयः, अजात् तृतीयः = वंशक्रमेण अजस्य पौत्रः, प्रकाशस्य = लोकविख्यातस्य, तव = भवतः, पितुः = दशरथस्य, द्वितीयः = वंशक्रमेण पुत्रः, स्वकुलस्य = आत्मवंशस्य, केतोः = जयपताकारूपस्य, यस्य = रामचन्द्रस्य, त्वं = भवान्, अनुजः = कनिष्ठो भ्राता, तस्य = रामस्य, एव, अनुजोऽयं = कुमारो भरतोऽस्ति।

**( ख ) भावार्थः** – पुरो दृश्यमानः वंशपुरुषपरम्परया रघोः प्रपौत्रः (अर्थात् वंशक्रमगणनायां चतुर्थत्वेन परिगणनीयः), वंशक्रमेण अजस्य पौत्रः (अर्थात् अजात् तृतीयः) ते लोकविख्यातस्य जनकस्य दक्षरथस्य वंशक्रमेण पुत्रः इक्ष्वाकुवंशस्य (रघुवंशस्य) विजयपताकारूपस्य यस्य रामचन्द्रस्य भवान् कनिष्ठः भ्राता (अस्ति) तस्यैव अवरजः (कनिष्ठः भ्राता) राजकुमारः भरतः अस्ति।

**विशेषः** – श्लोकेऽस्मिन् इन्द्रवज्रा उपेन्द्रवज्रा चेत्युभयोरपि मिश्रणात् उपजातिछन्दः अस्ति।

**लक्ष्मणः** – एह्येहीक्ष्वाकुकुमार ! वत्स ! स्वस्ति, आयुष्मान् भव।

**असुरसमरदक्षैर्वज्रसंघृष्टचापै–**
**रनुपमबलवीर्यैः स्वैः कुलैस्तुल्यवीर्यः।**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**रघुरिव स नरेन्द्रो यज्ञविश्रान्तकोशो**
**भव जगति गुणानां भाजनं भ्राजितानाम्॥१०॥**

**प्रसङ्गः** – प्रस्तुतश्लोके लक्ष्मणेन तपोवने भरताय प्रदत्ताशीर्वादस्य वर्णनं कृतमस्ति।

**अन्वयः** – असुरसमरदक्षैः वज्रसंघृष्टचापैः अनुपमबलवीर्यैः स्वैः कुलैः तुल्यवीर्यः यज्ञविश्रान्तकोशः सः नरेन्द्रः रघुः इव जगति भ्राजितानां गुणानां भाजनं भव।

**व्याख्या – ( क ) पर्यायपदानि** – असुरैः = दैत्यैः, सह = सार्द्धं, समरे = युद्धे, दक्षैः = समर्थैः, वज्रेण = इन्द्रायुधेन सह संघृष्टं = जातस्पर्धं, चापं = धनुर्येषां तैः, अनुपमम् = अप्रतिमं, बलं = शारीरिकं, वीर्यं = पराक्रमः येषां तैः, स्वैः = स्वकीयैः, कुलैः = वंश्यैः, तुल्यवीर्यः = तुल्यं वीर्यं यस्य, सः = प्रसिद्धिः, यज्ञविश्रान्तकोषः, यज्ञे = विश्वजिद्यागे विश्रान्तो निरवशेषविनियुक्तः कोशो धनसंचयो येन स तथाभूतः, नरेन्द्रः रघुरिव, जगति = लोके, भ्राजितानां = बहुमतानां, गुणानां = शौर्यौदार्यादीनां, भ्राजितानां = शोभनानां, भाजनम् = आश्रयः, भव = एधि।

**( ख ) भावार्थः** – (वत्सभरत) दैत्यैः सह युद्धे समर्थैः इन्द्रायुधेन सह जातस्पर्धं धनुः येषां तैः अप्रतिमं शारीरिकं पराक्रमः येषां तैः (अतुलनीयसामर्थ्यैः) स्वकीयैः वंशैः (कुलोत्पनैः) सदृशः पराक्रमः विश्वजित् यागे दानेन समाप्तिं नीतः कोशः धनसंचयो येन सः तथाभूतः विख्यातः नरपतिः प्रपितामहः (रघुः) यथा संसारे बहुमतानां शौर्यौदार्यादीनाम् आश्रमः आसीत्।

**विशेषः** – श्लोकेऽस्मिन् मालिनी छन्दः अस्ति। पुनश्चात्र परिकरोऽलंकारो विद्यते।

**भरतः** – अनुगृहीतोऽस्मि।

**लक्ष्मणः** – कुमार! इह तिष्ठ। त्वदागमनमार्याय निवेदयामि।

**भरतः** – आर्य! अचिरमिदानीमभिवादयितुमिच्छामि। शीघ्रं निवेद्यताम्।

**लक्ष्मणः** – बाढम्। (अपेत्य) जयत्वार्यः। आर्य!

**अयं ते दयितो भ्राता भरतो भ्रातृवत्सलः।**
**संक्रान्तं यत्र ते रूपमादर्शे इव तिष्ठति॥११॥**

**प्रसङ्गः** – प्रस्तुतश्लोके लक्ष्मणः भरतस्य आगमनस्य सूचनां रामाय ददाति।

**अन्वयः** – अयं ते दयितः भ्रातृवत्सलः भ्राता भरतः, यत्र ते रूपं आदर्शे इव संक्रान्तं तिष्ठति।

**व्याख्या – ( क ) पर्यायपदानि** – अयं = पुरोदृश्यमानः, ते = तव, दयितः = प्रियः, भ्राता = अनुजः, भरतः = कैकेयीनन्दनः, भ्रातृवत्सलः = त्वयि स्नेहवान्, यत्र = यस्मिन्, भरते, ते = तव रूपम्, आदर्शे = दर्पणे, इव = यथा, संक्रान्तं = प्रतिफलितं, तिष्ठति = विद्यते।

**( ख ) भावार्थः** – पुरोदृश्यमानः तव प्रियः अनुजः भ्रातृष्वनुरक्तः कैकेयीसुतः (भरतः अस्ति)। यस्मिन् (भरते) तव (रामस्य) वर्णः (रूपं) दर्पण इव (यथा) प्रतिफलितं विद्यते (राजते)।

**विशेषः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति। अत्र उपमालंकारः अपि अस्ति।

**रामः** – वत्स! लक्ष्मण! किमेवं भरतः प्राप्तः?

**लक्ष्मणः** – आर्य! अथ किम्?

**रामः** – मैथिलि! भरतावलोकनार्थं विशालीक्रियतां ते चक्षुः।

**सीता** – अय्यउत्त! किं भरदो आअदो। [आर्यपुत्र! किं भरत आगतः?]

**रामः** – मैथिलि! अथ किम्?



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**अद्य खल्वगच्छामि पिता मे दुष्करं कृतम्।**
**कीदृशस्तनयस्नेहो भ्रातृस्नेहोऽयमीदृशः॥१२॥**

**प्रसङ्गः** – यदा भरतः रामेण सह मेलितुं तपोवनम् आगच्छति तदा रामः स्वस्य तातस्य स्मरणं कृत्वा चिन्तयति इत्यत्र वर्णितमस्ति।

**अन्वयः** – अद्य खलु अवगच्छामि, मे पित्रा दुष्करं कृतम्। अयं भ्रातृस्नेहः ईदृशः, तत् तनयस्नेहः कीदृशः ?

**व्याख्या – (क) पर्यायपदानि** – अद्य = अस्मिन्नवसरे, खलु = निश्चयेन, अवगच्छामि = निश्चिनोमि, यत् मे = मम, पित्रा = दशरथेन, दुष्करं = प्राणत्यागादिकर्म, कृतम् = अनुष्ठितं, यतः अयं = साक्षात्, क्रियमाणः, भ्रातृस्नेहः = भरतस्य मद्विषयः, स्नेहः, ईदृशः = स्वहस्तगतराज्यपरित्यागपूर्वकवनगतभ्रात्रनुगमनरूपकार्यप्रयोजकः प्रत्यक्षतो दृष्टः, तत् = तस्मात्, तनयस्नेहः = तनयविषयकः, स्नेहः, कीदृशः = कथम्भूतो भवेत् ?

**(ख) भावार्थः** – अस्मिन् दिवसे निश्चयेन जानामि यत् मम तातेन राज्ञा दशरथेन प्राणत्यागादिकर्म कर्तुमशक्यं कार्यं विहितम्। भ्रातृप्रेम भरतस्य स्वहस्तगतराज्यपरित्यागपूर्वक वनगतभ्रात्रनुगमनरूपककार्यप्रयोजकः प्रत्यक्षतो दृष्टः तस्मात् तनयविषयकस्नेहः कथम्भूतो भवेत् ?

**विशेषः**– अनुमानालङ्कारः, अनुष्टुप् छन्दः

**लक्ष्मणः** – आर्य ! किं प्रविशतु कुमारः ?

**राम** – वत्स ! लक्ष्मण ! इदमपि तावदात्माभिप्रायमनुवर्तयितुमिच्छसि। गच्छ सत्कृत्य शीघ्रं प्रवेश्यतां कुमारः।

**लक्ष्मणः** – यदाज्ञापयत्यार्यः।

**रामः** – अथवा तिष्ठ त्वम्।

**इयं स्वयं गच्छतु मानहेतोर्मातेव भावं तनये निवेश्य।**
**तुषारपूर्णोत्पलपत्रनेत्रा हर्षास्त्रमासारमिवोत्सृजन्ती॥१३॥**

**प्रसङ्गः** – अस्मिन् श्लोके भरतं प्रति सीतायाः वात्सल्यभावः वर्णितः अस्ति।

**अन्वयः** – इयं तुषारपूर्णोत्पलनेत्रा हर्षास्त्रमासारम् इव उत्सृजन्ती, तनये माता इव भावं निवेश्य स्वयं मानहेतोः गच्छतु।

**व्याख्या – (क) पर्यायपदानि** – इयं तुषारपूर्णोत्पलपत्रनेत्रा = हिमपूर्णे नीलकमलदले इव नेत्रे यस्याः सा, हर्षास्त्रम् = आनन्दाश्रु, आसारमिव = धारासम्पातमिव, उत्सृजन्ती = विसृजन्ती, तनये = पुत्रे, माता = जननी इव, भावं = स्नेहं, वत्सलतां निवेश्य = पुरस्कृत्य, एषा सीता = जानकी, स्वयं, मानहेतोः = सत्कारार्थे, गच्छतु = यातु। यथा माता पुत्रागमनं निशम्य हर्षाश्रुपरिप्लुताक्षी स्वयमागत्य स्नेहेन तं संभावयति तथा भरतस्यागतस्य सत्कारार्थं सीता स्वयं यातु।

**(ख) भावार्थः** – हिमपूर्णे नीलकमलदले इव नेत्रे यस्याः सा (सीता) धारासम्पातमिव आनन्दाश्रु विसृजन्ती पुत्रे जननी इव वत्सलतां पुरस्कृत्य सीता स्वयं सत्कारार्थं गच्छतु।

**विशेषः** – अस्मिन् श्लोके उपेन्द्रवज्रा छन्दः अस्ति।

**सीता** – जं अय्यउत्तो आणवेदि। (उत्थाय परिक्रम्य भरतमवलोक्य) हं तदो तं वेलं दाणि णिक्कन्तो अय्यउत्तो णहि णहि रूवसादिस्सं। [यदार्यपुत्र आज्ञापयति। हं ! ततस्तां वेलामिदानीं निष्क्रान्त आर्यपुत्रः। नहि नहि रूपसादृश्यम्।]



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**सुमन्त्रः** – अये वधूः ?

**भरतः** – अये इयमत्रभवती जनकराजपुत्री ?

**इदं तत् स्त्रीमयं तेजो जातं क्षेत्रोदराद्धलात्।**
**जनकस्य नृपेन्द्रस्य तपसः सन्निदर्शनम्॥१४॥**

**प्रसङ्गः** – यदा सीता भरतस्य सत्कारार्थं बहिः आगच्छति तदा भरतः सीतां दृष्ट्वा यद् वदति तदत्र वर्णितमस्ति।

**अन्वयः** – हलात् क्षेत्रोदरात् जातम् इदं तत् स्त्रीमयं तेजः, नृपेन्द्रस्य जनकस्य तपसः सन्निदर्शनं (वर्तते)।

**व्याख्या – (क) पर्यायपदानि** – हलात् = सीरात्, हेतोः, क्षेत्रोदरात् = क्षेत्रं कर्षणीयाभूमिस्तदुदरात्, जातम् = उत्पन्नम्, इदं= तत्, प्रसिद्धं, स्त्रीमयं = स्त्रीरूपं, तेजः = ओज, यत् नृपेन्द्रस्य = राजेन्द्रस्य, जनकस्य = मिथिलेश्वरस्य, तपसः = तपश्चर्यायाः, सन्निदर्शनं = नितरां दर्शयति अनुमापयति फलमिति प्रत्यक्षमुदाहरणं वर्तते।

**(ख) भावार्थः** – लाङ्गलात् (सीरात्) क्षेत्रकर्षणीया भूमिः तन्मध्यदेशात् (तदुदरात्) उत्पन्नं मम (भरतस्य) पुरतः स्थितं जगत्प्रसिद्धं स्त्रीरूपं कान्तिः (यत्) राजेन्द्रस्य नृपस्य विदेहस्य तपश्चर्याः उत्तमोदाहरणं वर्तते।

**विशेषः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति।

आर्ये! अभिवादये, भरतोऽहमस्मि।

**सीता** – (आत्मगतं) णहि रूवं एव्व। सरजोओ वि सो एव्व। (प्रकाशं) वच्छ! चिरंजीव। (नहि रूपमेव। स्वरयोगोऽपि स एव। वत्स! चिरंजीव।)

**भरतः** – अनुगृहीतोऽस्मि।

**सीता** – एहि वच्छ! भादुमणोरहं पूरेहि। (एहि वत्स! भ्रातृमनोरथं पूरय।)

**सुमन्त्रः**– प्रविशतु कुमारः।

**भरतः**– तात! इदानीं किं करिष्यसि?

**सुमन्त्रः** –

**अहं पश्चात् प्रवेक्ष्यामि स्वर्गं याते नराधिपे।**
**विदितार्थस्य रामस्य ममैतत् पूर्वदर्शनम्॥१५॥**

**प्रसङ्गः** – सुमन्त्रः भरताय वदति यत् पूर्वं रामेण सह मेलितुं भवान् प्रविशतु इत्यत्र वर्णितमस्ति।

**अन्वयः** – अहं पश्चात् प्रवेक्ष्यामि, यतः नराधिपे स्वर्गं याते विदितार्थस्य रामस्य मम एतत् पूर्वदर्शनम् (अस्ति)।

**व्याख्या – (क) पर्यायपदानि** – अहं = सुमन्त्रः, पश्चात् = त्वद्दर्शनोत्तरकाले, प्रवेक्ष्यामि = प्रवेशं करिष्यामि, यतः, नराधिपे = नराणां मनुष्याणाम्, अधिपे = स्वामिनि, स्वर्गं याते (सति) = मृत्युं प्राप्ते (सति), विदितार्थस्य = विदितः ज्ञातः, अर्थः = वृत्तान्तः येन तस्य, अर्थात् विज्ञाततात् स्वर्गंगमनवृत्तान्तस्य, रामस्य = रामचन्द्रस्य, मम = सुमन्त्रसम्बन्धिनः, एतत् पूर्वदर्शनं = प्रथमं दर्शनम् (अस्ति)।

**(ख) भावार्थः** – अहं (सुमन्त्रः) त्वत्दर्शनोत्तरकाले प्रवेशं करिष्यामि। स्वामिनि दशरथे मृत्युं प्राप्ते सति विज्ञातस्वर्गगमनवृत्तान्तस्य रामचन्द्रस्य सुमन्त्रस्य इदं प्रथमदर्शनमस्ति।

**विशेषः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**भरतः** – एवमस्तु। (राममुपगम्य) आर्य! अभिवादये भरतोऽहमस्मि।

**रामः** – (सहर्षम्) एह्येहि इक्ष्वाकुकुमार! स्वस्ति, आयुष्मान् भव।

**वक्षः प्रसारय कपाटपुटप्रमाणमालिङ्ग मां सुविपुलेन भुजद्वयेन।**
**उन्नामयाननमिदं शरदिन्दुकल्पं प्रह्लादय व्यसनदग्धमिदं शरीरम्॥ १६॥**

**प्रसङ्गः** – रामः तपोवने भरतं दृष्ट्वा हर्षपूर्वकं यद् वदति तदत्र वर्णितमस्ति।

**अन्वयः** – कपाटपुटप्रमाणं वक्षः प्रसारय, सुविपुलेन भुजद्वयेन माम् आलिङ्गं, शरदिन्दुकल्पम् इदमाननम् उन्नमय, व्यसनदग्धम् इदं शरीरं प्रह्लादय।

**व्याख्या – (क) पर्यायपदानि** – कपाटपुटं = कपाटसम्पुटं, प्रमाणं = विस्तीर्णं, यस्य तत् विशालकपाटवदायतं, वक्षः = उरोदेशं, प्रसारय =विस्तृतं कुरु, ततः सविपुलेन = अतिलम्बेन, भुजद्वयेन = बाहुयुगलेन, मां = रामम्, आलिंग = परिष्वजस्व, शरद्इन्दुकल्पं = शरच्चन्द्रवद्, आननं = मुखम्, उन्नामय = उन्नतं कुरु, व्यसनदग्धं = पितृमरणनिमित्तकेन दुःखेनोपहतम् इदं शरीरं = मम कायः, प्रह्लादय = सन्तापात् निवृत्तिं यापय। अर्थात् तवाननदर्शनेन मे संतापः व्यपगमिष्यति।

**(ख) भावार्थः** – विशालकपाटवदायतम् उरः प्रदेशं विस्तारय (विस्तृतं कुरु) अतिविशालेन बाहुयुगलेन मां (रामं) परिष्वजस्व (आलिङ्गनं कुरु)। शरच्चन्द्रसदृशम् एतत् (नमत्) मुखम् उन्नतं कुरु। आपत्तिपीडितम् एतत् मम वपुः सन्तापात् निवृत्तिं यापय।

**विशेषः** – श्लोकेऽस्मिन् वसन्ततिलका छन्दः अस्ति।

**भरतः** – अनुगृहीतोऽस्मि।

**सुमन्त्रः** – (उपेत्य) जयत्वायुष्मान्।

**रामः** – हा तात!

**गत्वा पूर्वं स्वसैन्यैरभिसरिसमये खं समानैर्विमानै-**
**र्विख्याते यो विमर्दे स स इति बहुशः सासुराणां सुराणाम्।**
**स श्रीमांस्त्यक्तदेहो दयितमपि विना स्नेहवन्तं भवन्तं**
**स्वर्गस्थः साम्प्रतं किं रमयति पितृभिः स्वैर्नरेन्द्रैर्नरेन्द्रः॥ १७॥**

**प्रसङ्गः** – सुमन्त्रस्य कथनेन यदा रामः स्वकीय तातस्य मृत्योः समाचारं शृणोति तदा तातस्य स्मरणं करोति इत्यत्र वर्णितमस्ति।

**अन्वयः** – यः पूर्वं सासुराणां सुराणां विमर्दे अभिसरिसमये स्वसैन्यैः समानैः विमानैः खं गत्वा स स इति बहुशः विख्यातः। सः श्रीमान् त्यक्तदेहः नरेन्द्रः दयितम् अपि स्नेहवन्तं भवन्तं विना स्वर्गस्थः साम्प्रतं पितृभिः स्वैः नरेन्द्रैः रमयति किम्?

**व्याख्या – (क) पर्यायपदानि** – यः = व्यक्तिविशेषः, पूर्वं = पुरा, सासुराणाम् = असुरसहितानां, सुराणां = देवानां, विमर्दे = युद्धे, अर्थात् देवासुरसंग्रामे, अभिसरिसमये = देवसाहाय्यार्थगमनकाले, स्वसैन्यैः = आत्मसैनिकैः, समानैः = तुल्यैः, विमानैः = व्योमयानैः, खम् = आकाशं, गत्वा = उत्प्लुत्य, सः सः इति = सोऽयं दशरथ इति, बहुशः = अनेकशः, विख्यातः = प्रख्यातः, सः = असौ, श्रीमान् = भवान्, त्यक्तदेहः = विमुक्तकायः, नरेन्द्रः = नृपेन्द्रः, दयितं = प्रीतिविषयं, स्नेहवन्तम् = अनुरागशालिनं, भवन्तं = श्रीमन्तं, विना = अन्तरा, स्वर्गस्थः सन्, साम्प्रतम् = अधुना, पितृभिः = पितृभूतैः, स्वैः = आत्मपूर्वपुरुषैः, नरेन्द्रैः = नृपेन्द्रैः, रमयति किम् = आत्मानम्



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

आनन्दयति किम् ?

**( ख ) भावार्थः** – महाराजदशरथः पुराकाले देवासुरसंग्रामे देवसाहाय्यार्थगमनसमये आत्मसैनिकैः (सह) देवविमानतुल्यैः व्योमयानैः आकाशं (स्वर्गं) गत्वा सोऽयं दशरथः सोऽयं दशरथः इति बारम्बारं प्रसिद्धिं गतः। असौ ऐश्वर्यवान् विमुक्तशरीरः नृपेन्द्रः प्रियम् अनुरागशालिनं त्वां (श्रीमन्तं सुमन्त्रम्) अनुपस्थिते सति दिवंगतः सन् अधुना आत्मीयैः राजभिः पितृभूतैः (पूर्वजैः सह आत्मानं) विनोदयति किम् ?

**विशेषः** – श्लोकेऽस्मिन् स्रग्धरा छन्दः अस्ति। तल्लक्षणमिदं –

"म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम्॥"

पुनश्चात्र उदात्तालङ्कारो विद्यते।

**सुमन्त्रः** – (सशोकम्)

**नरपतिनिधनं भवत्प्रवासं भरतविषादमनाथतां कुलस्य।**
**बहुविधमनुभूय दुष्प्रसह्यं गुण इव बह्वपराद्धमायुषा मे॥ १८॥**

**प्रसङ्गः** – सुमन्त्रः रामं वदति यत् एतावत् कष्टे सति अहम् इदानीं पर्यन्तं जीवामि इत्यत्र वर्णितमस्ति।

**अन्वयः** – नरपतिनिधनं, भवत्प्रवासं, भरतविषादं, कुलस्य अनाथतां, बहुविधं दुष्प्रसह्यम् अनुभूय मे आयुषा गुण इव बहु अपराद्धम्।

**व्याख्या – ( क ) पर्यायपदानि** – नरपतिनिधनं = राज्ञो देहावसानं, भवत्प्रवासं = भवतां त्रयाणां वनयात्रां, भरतविषादं = भरतस्य भवत्प्रवासादिनिमित्तं खेदं, कुलस्य = रघुवंशस्य, अनाथताम् = अशरणतां, बहुविधं = नानारूपं, दुष्प्रसह्यं = कृच्छ्रसोढव्यं कष्टम्, अनुभूय = अनुभवं कृत्वा, मे = मम, आयुषा = जीवितेन, गुण इव = चिरानुभूतनानाप्रकारप्रमोदरूपेण, बहु अपराद्धमिव = अनल्प उपघातः कृत एव।

**( ख ) भावार्थः** – राज्ञः दशरथस्य मृत्युं, भवतां त्रयाणां निर्वासनं (वनगमनं), भरतस्य भवत्प्रवासादि निमित्तं विषणातां (खेदं) रघुवंशस्य अशरणतां च बहुप्रकारकं कृच्छ्रेण सोढव्यं दुःखम् अनुभवं कृत्वा मम (सुमन्त्रस्य) जीवितेन चिरंजीवित्वलक्षणे नितरां कृतापराधम् इव अहं मन्ये।

**विशेषः** – श्लोकेऽस्मिन् पुष्पिताग्रा छन्दः अस्ति।

पुनश्चात्र लेशालङ्कारः अस्ति।

**सीता** – रोदन्तं अय्यउत्तं पुणो वि रोदावीअदि तादो। [रुदन्तमार्यपुत्रं पुनरपि रोदयति तातः।]

**राम** – मैथिलि! एष व्यवस्थापयाम्यात्मानं। वत्स! लक्ष्मण! आपस्तावत्।

**लक्ष्मणः** – यदाज्ञापयत्यार्यः।

**भरतः** – आर्य! न खलु न्यायं। क्रमेण शुश्रूषयिष्ये। अहमेव यास्यामि। (कलशं गृहीत्वा निष्क्रम्य प्रविश्य) इमा आपः।

**रामः** – (आचम्य) मैथिलि! विशीर्यते खलु लक्ष्मणस्य व्यापारः।

**सीता** – अभ्यउत्त! णे एदिणा पि सुस्सूसइव्वो? [आर्यपुत्र! नन्वेतेनापि शुश्रूषयितव्यः।]

**रामः** – सुष्ठु खल्विह लक्ष्मणः शुश्रूषयतु। तत्रस्थो मां भरतः शुश्रूषयतु।

**भरतः** – प्रसीदत्वार्यः।

**इह स्थास्यामि देहेन तत्र स्थास्यामि कर्मणा।**
**नाम्नैव भवतो राज्यं कृतरक्षं भविष्यति॥ १९॥**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**प्रसङ्गः** – भरतः रामस्य शुश्रूषां कर्त्तुं वने स्थातुमिच्छति इत्यत्र वर्णितमस्ति।

**अन्वयः** – इह देहेन स्थास्यामि, तत्र कर्मणा स्थास्यामि, भवतः नाम्नैव राज्यं कृतरक्षं भविष्यति।

**व्याख्या – ( क ) पर्यायपदानि** – इह = अत्र, देहेन = शरीरेण, स्थास्यामि = भवन्तं सेवमानं वत्स्यामि। तत्र = अयोध्यायां, कर्मणा = राज्यपालनात्मकेन कर्त्तव्येन, स्थास्यामि = वत्स्यामि। भवतो नाम्नैव = रामस्य राज्यमिति भवन्नामधेयान्वयमात्रेणास्मदायासलेशं विनैवेत्यर्थः, राज्यं कृतरक्षं = सुरक्षितं भविष्यति।

**( ख ) भावार्थः** – अत्र (अहं भरतः) शरीरेण भवतः सेवायां संलग्नो भविष्यामि अयोध्यायां च राज्यपालनकार्येण निवसिष्यामि। तव (रामस्य) नामधेयान्वयमात्रेण कृतपरिपालनं विहितशासनमिति यावत् भविष्यति अर्थात् अस्मदायासलेशं विनैव राज्यं सुरक्षितं भविष्यति।

**विशेषः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति।

**रामः** – वत्स ! कैकेयीमातः ! मां मैवम्।

**पितुर्नियोगदहमागतो वनं**
**न वत्स दर्पान्न भयान्न विभ्रमात्।**
**कुलं च नः सत्यधनं ब्रवीमि ते**
**कथं भवान् नीचपथे प्रवर्तते ॥ २० ॥**

**प्रसङ्गः** – प्रस्तुतश्लोके स्वर्गस्थ तातस्य विषये रामस्य चिन्ता वर्णिताऽस्ति।

**अन्वयः** – वत्स अहं पितुः नियोगात् वनम् आगतः। दर्पात् न भयात् न विभ्रमात् न। ते ब्रवीमि नः कुलं च सत्यधनं, भवान् नीचपथे कथं प्रवर्तते ?

**व्याख्या – ( क ) पर्यायपदानि** – वत्स = तात, अहं = रामः, पितुः = दशरथस्य, नियोगात् = शासनात्, वनम् = अरण्यं, न = नहि, विभ्रमात् = बुद्धिनाशात्, न = नहि, नः = अस्माकं, कुलं = वंशः, च = पुनः, सत्यधनं = सत्यमेव धनं यस्य तत् तथाभूतं, ते = तुभ्यं, ब्रवीमि = तदिदं वस्तुतत्वं त्वां वदामि, एवं स्थिते, भवान् = त्वं, नीचपथे = राज्यस्वीकरणलक्षणपितृनियोगपरित्यागरूपे, कथं = केन कारणेन, प्रवर्त्तते = गन्तुमिच्छसि।

**( ख ) भावार्थः** – स्वर्गगतं राजानं शोचामि। राज्ञा दशरथेन एषः विश्वविलक्षणः आत्मराजस्य भरतस्य अलौकिकगुणः नावलोकितः संसारे एतादृशं गुणसागरं (सुतं) लब्ध्वा पुरुषश्रेष्ठेषु पितृषु यदि देवस्य प्रभुत्वं (अनर्थपर्यवसायिनी देवशक्तिः) तर्हि तदिदं अतिकष्टप्रदायकमेव अस्ति।

**विशेषः** – श्लोकेऽस्मिन् वंशस्थ छन्दः अस्ति। तल्लक्षणमिदं –

"जतौ तु वंशस्थमुदीरितं जरौ॥"

**सुमन्त्रः** – अथेदानीमभिषेकोदकं क्व तिष्ठतु ?

**रामः** – यत्र मे मात्राभिहितं, तत्रैव तावत् तिष्ठतु।

**भरतः** – प्रसीदत्वार्यः। आर्यः ! अलमिदानीं व्रणे प्रहर्तुम्।

**अपि सुगुण ! ममापि त्वत्प्रसूतिः प्रसूतिः**
**स खलु निभृतधीमांस्ते पिता मे पिता च।**
**सुपुरुष ! पुरुषाणां मातृदोषो न दोषो**
**वरद ! भरतमार्तं पश्य तावद् यथावत् ॥ २१ ॥**

**प्रसङ्गः** – रामः भरतस्य अभिषेचनं कर्त्तुं सुमन्त्रं वदति तदा भरतः क्षमायाचनां करोति इत्यत्र वर्णितमस्ति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**अन्वयः** – सुगुण ! त्वत्प्रसूतिः ममापि प्रसूतिः, स खलु निभृतधीमान् ते पिता मे पिता च, सुपुरुष ! पुरुषाणां मातृदोषः न दोषः, वरद ! आर्तं भरतं तावत् यथावत् पश्य।

**व्याख्या – ( क ) पर्यायपदानि** – हे सुगुण = शोभनगुणनिलय, त्वत् प्रसूतिः = त्वदुत्पत्तिवंशी ममापि, प्रसूतिः = ममापि प्रभवः अर्थात् यस्मिन् वंशे भवानुत्पन्नस्तस्मिन्नेवाहमपि, सः = असौ, खलु = निश्चयेन, निभृतधीमान् = अचंचलप्रशस्तबुद्धिः, ते = तव रामस्य, पिता = जनकः, मे = भरतस्यापि, सुपुरुष = शोभनः पुरुषः सुपुरुषस्तत्सम्बुद्धौ हे सुपुरुष, पुरुषाणां = नराणां, मातृदोषः = जननीकृतोऽपराधः, न दोषः = नापराधः, हे वरद = ईप्सितार्थदायिन्। आर्त्तं = पीडायोगिनं, भरतं = कैकेयीसुतं, यथावत् = यर्थार्थं, पश्य = अवलोक्य।

**( ख ) भावार्थः** – हे शोभनगुणनिलय। त्वदुत्पत्तिवंशः भरतस्यापि प्रभवः अर्थात् यस्मिन् वंशे भवान् उत्पन्नः तस्मिन्नेव वंशे अहं भरतोऽपि उत्पन्नः। अचंचलप्रशस्तबुद्धिः तव (रामस्य) जनकः निश्चयेन मम (भरतस्य) अपि जनकः (आसीत्)। भोः श्रेष्ठजन ! नराणां जननीकृतोऽपराधः नापराधः। हे ईप्सितार्थदायिन् ! पीडायोगिनं भरतं यथार्थम् अर्थात् पूर्ववत् विलोकय।

**विशेषः** – श्लोकेऽस्मिन् मालिनी छन्दः अस्ति। अत्र परिकरः अलंकारः अस्ति।

**सीता** – अय्यउत्त ! अदिकरुणं मन्तेअइ भरदो। किं दाणि अय्यउत्तेण चिन्तीअदि। [आर्यपुत्र ! अतिकरुणं मन्त्रयते भरतः। किमिदानीमार्यपुत्रेण चिन्त्यते।]

**रामः** – मैथिलि !

**तं चिन्तयामि नृपतिं सुरलोकयातं**
**येनायमात्मजविशिष्टगुणो न दृष्टः।**
**ईदृग्विधं गुणनिधिं समवाप्य लोके**
**धिग् भो विधेर्यदि बलं पुरुषोत्तमेषु॥२२॥**

**प्रसङ्गः** – प्रस्तुतश्लोके स्वर्गस्थ तातस्य विषये रामस्य चिन्तनं वर्णितमस्ति।

**अन्वयः** – सुरलोकयातं तं नृपतिं चिन्तयामि, येन अयम् आत्मजविशिष्टगुणः न दृष्टः। लोके ईदृग्विधं गुणनिधिं समवाप्य, पुरुषोत्तमेषु यदि विधेः बलं (तर्हि) भो धिक्।

**व्याख्या – ( क ) पर्यायपदानि** – सुरलोकयातं = स्वर्गगतं, तं नृपतिं = तातमहाराजं, चिन्तयामि = शोचामि, येन = नृपतिना, अयम् = एषः, आत्मजविशिष्टगुणः = स्वपुत्रेषु चतुर्षु मध्ये विशिष्टगुणः, न दृष्टः = विशिष्टगुणवत्वेन रूपेण न प्रत्यक्षितः। लोके = संसारे, ईदृग्विधम् = एवं प्रकारं, गुणनिधिं = गुणाकरं, पुत्रं, समवाप्य = लब्ध्वा, पुरुषोत्तमेषु = पुरुषश्रेष्ठेषु पितृषु, (यदि = चेत्), विधेः = बलं दैवशक्तिः, अनर्थपर्यवसायिनी, तर्हि धिग्, भोः = तदिदम्, अतिनिन्दित मेवास्ति।

**( ख ) भावार्थः** – स्वर्गगतं राजानं शोचामि। राज्ञा दशरथेन एषः विश्वविलक्षणः आत्मजस्य भरतस्य अलौकिकगुणः नावलोकितः। संसारे एतादृशं गुणसागरं (सुतं) लब्ध्वा पुरुषश्रेष्ठेषु पितृषु यदि देवस्य प्रभुत्वं (अनथपर्यवसायिनी देवशक्तिः) तर्हि तदिदम् अतिकष्टप्रदायकमेव अस्ति।

**विशेषः** – श्लोकेऽस्मिन् वसन्ततिलका छन्दः अस्ति। तल्लक्षणमिदं –

"उक्ता वसन्ततिलका तभजा जगौ गः॥"

वत्स ! कैकेयीमातः !

**यत्सत्यं परितोषितोऽस्मि भवता निष्कल्मषात्मा भवां–**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**स्त्वद्वाक्यस्य वशानुगतोऽस्मि भवतः ख्यातैर्गुणैर्निर्जितः।**
**किन्त्वेतन्नृपतेर्वचस्तदनृतं कर्तुं न युक्तं त्वया**
**किञ्चोत्पाद्य भवद्विधं भवतु ते मिथ्याभिधायी पिता॥२३॥**

**प्रसङ्गः** – प्रस्तुतश्लोके रामः भरतं वदति यत् तातस्य वचनं सत्यं कर्तुं यत् "भरतः नृपः भवेत्" राज्यं भवता स्वीकर्त्तव्यम् इत्यत्र वर्णितमस्ति।

**अन्वयः** – भवता यत्सत्यं परितोषितः अस्मि, भवान् निष्कल्मषात्मा, ख्यातैः भवतः गुणैः निर्जितः त्वद्वाक्यस्य वंशानुगतः अस्मि। किन्तु एतत् नृपतेः वचः तत् त्वया अनृतं कर्तुं न युक्तं, किंच भवद्विधम् उत्पाद्य ते पिता मिथ्याभिधायी भवतु।

**व्याख्या – (क) पर्यायपदानि** – भवता = त्वया, यत्सत्यं = वस्तुतः, परितोषितः = परितोषं प्रापितः, अस्मि = भवामि, भवान् = त्वं, निष्कल्मषात्मा = निष्पापबुद्धिः, ख्यातैः = लोकेऽसाधारणतया, प्रसिद्धिवाग्भिः, भवतः = त्वत्तः, गुणैः = सौजन्यसारल्यादिभिः, निर्जितः = अधः कृतः, त्वद्वाक्यस्य = त्वदीयवचनस्य, वंशानुरागः = वश्यः, सन्ननुगामी अस्मि = भवामि। किन्तु = किंच, एतत् = राज्ये त्वमभिषेक्तव्यः, इतीदं नृपतेः = राज्ञः, वचः = वचनं, तत् = पूर्वोक्तं वचनं, त्वया = भवता, अनृतम् = असत्यं, कर्तुं = विधातुं, न = नहि, युक्तम् = उचितं, किंच भवद्विधं = त्वत्सदृशं, पुत्रम्, उत्पाद्य = जनयित्वा, ते = तव, पिता = जनकः, मिथ्याभिधायी = अनृतवादी भवतु किम्? मिथ्याभिधायी मा भवतु।

**(ख) भावार्थः** – (हे भरत! अहं) त्वया परितोषं प्रापितः भवामि। (एतत्) यत् त्वं निष्पापबुद्धिः। तव प्रसिद्धैः सारल्यसौजन्यादिभिः गुणैः पराजितः। अतः त्वदीयवचनस्य वश्यः सन् अनुगामी भवामि। परन्तु राज्ञः दशरथस्य राज्ये भरतोऽभिषेक्तव्यः इति पूर्वोक्तं वचनं भवत्या असत्यं विधातुं नोचितम्। अपरं च तव जनकः त्वत् सदृशं पुत्रं जनयित्वा अनृतवादी (कथं) जायताम्?

**विशेषः** – श्लोकेऽस्मिन् शार्दूलविक्रीडितं छन्दः अस्ति।

**भरतः** –

**यावद् भविष्यति भवन्नियमावसानं**
**तावद् भवेयमिह ते नृप! पादमूले।**

**रामः** –

**मैवं नृपः स्वसुकृतैरनुयातु सिद्धिं**
**मे शापितो न परिरक्षसि चेत् स्वराज्यम्॥२४॥**

**प्रसङ्गः** – भरतः तपोवने एव स्थातुमिच्छति किन्तु रामः स्वकीयं शापितः ददाति यत् सः अयोध्यां गत्वा राज्यं स्वीकुर्यात् इत्यत्र वर्णितमस्ति।

**अन्वयः** – नृप! यावत् भवन्नियमावसानं भविष्यति तावत् अहं ते पादमूले भवेयम्। मैवं नृपः स्वसुकृतैः सिद्धिं यातु चेत् स्वराज्यं न परिरक्षसि मे शापितः असि।

**व्याख्या – (क) पर्यायपदानि** – नृप = हे राजन्, यावत्कालं, भवन्नियमावसानं = भवद्व्रतसमाप्तिः, भविष्यति, तावत्कालपर्यन्तं चतुर्दशवर्षं यावत्, इह = अत्रैव वने, ते = तव, पादमूले = चरणसमीपे, भवेयं = तिष्ठयेम्। मैवं = मा एवं वादी, नृपः = तातपादः, स्वसुकृतैः = स्वसत्यवादित्वादिजनितपुण्यैः, सिद्धिं, यातु = लभतां, चेत्स्वस्य = पितृप्रदत्तत्वात्तवैव राज्यं, न परिरक्षसि = पालयसि, तर्हि मे = मत्सम्बन्धेन, शापितोऽसि = अभिशप्तो भविष्यसि।

**(ख) भावार्थः** – (भरतः वदति) राजन्! यावत् कालेन तव नियमस्य वनवासव्रतस्य समाप्तिः भविष्यति



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

तावत्कालपर्यन्तं चतुर्दशवर्षाणि यावत् अत्रैव वने तव चरणसमीपे तिष्ठेयम्। (तदा रामः वदति) मा एवं वद। जनकः दशरथः स्वसत्यवादित्वादिजनितपुण्यैः स्वर्गसुखं लभताम्। यदि पितृप्रदत्तत्वात्तवैव निजराजकर्त्तव्यं न पालयसि तर्हि मत्सम्बन्धेन अभिशप्तोऽसि।

**विशेषः** – श्लोकेऽस्मिन् वसन्ततिलका छन्दः अस्ति।

**भरतः** – हन्त! अनुत्तरमभिहितम्। भवतु, समयस्ते राज्यं परिपालयामि।

**रामः** – वत्स! कः समयः?

**भरतः** – मम हस्ते निक्षिप्तं तव राज्यं चतुर्दशवर्षान्ते प्रतिग्रहीतुमिच्छामि।

**रामः** – एवमस्तु।

**भरतः** – आर्य! श्रुतम्? आर्ये! श्रुतम्? तात्! श्रुतम्?

**सर्वे** – वयमपि श्रोतारः।

**भरतः** – आर्य! अन्यमपि वरं हर्तुमिच्छामि।

**रामः** – वत्स! किमिच्छसि? किमहं ददामि? किमहमनुष्ठास्यामि?

**भरतः** –

**पादोपभुक्ते तव पादुके मे एते प्रयच्छ प्रणताय मूर्ध्ना।**
**यावद् भवानेष्यति कार्यसिद्धिं तावद् भविष्याम्यनयोर्विधेयः॥२५॥**

**प्रसङ्गः** – भरतः रामस्य चरणपादुकां स्वीकृत्य अयोध्यां गन्तुमिच्छति इत्यत्र वर्णितमस्ति।

**अन्वयः** – तव पादोपभुक्ते एते पादुके मूर्ध्ना प्रणताय मे प्रयच्छ, यावद् भवान् कार्यसिद्धिम् एष्यति तावद् अनयोः विधेयः भविष्यामि।

**व्याख्या – (क) पर्यायपदानि** – तव = ते, पादोपभुक्ते = चरणाभ्यां व्यवहृते, एते = पुरोदृश्यमाने, पादुके = काष्ठनिर्मिते पादत्राणे, मूर्ध्ना = शिरसा, प्रणताय = प्रणमते, मे = मह्यं, प्रयच्छ = देहि। यावद् = यावताकालेन, भवान् = त्वं, कार्यसिद्धिं = वनवासव्रतरूपस्य कार्यसमाप्तिम्, एष्यति = करिष्यति, तावत् = तावत्कालपर्यन्तम्, अनयोः पादुकयोः, विधेयः = आज्ञाकारी, भविष्यामि = स्थास्यामि।

**(ख) भावार्थः** – ते चरणाभ्यां व्यवहृते दृश्यमाने काष्ठनिर्मिते पादत्राणे शिरसा अवनताय मह्यं देहि। यावता कालेन त्वं वनवासव्रतरूपस्य कार्यस्य सिद्धिं पूर्णं कृत्वा (निष्पन्नताम्) आगमिष्यति तावत् कालपर्यन्तं पादुकयोः आज्ञाकरितां विधास्यामि।

**विशेषः** – श्लोकेऽस्मिन् इन्द्रवज्रा छन्दः अस्ति।

**रामः** – (स्वगतं) हन्तः भो!

**सुचिरेणापि कालेन यशः किञ्चिन्मयार्जितम्।**
**अचिरेणैव कालेन भरतेनाद्य सञ्चितम्॥२६॥**

**प्रसङ्गः** – रामः मनसि चिन्तयति यत् अहं तु चतुर्दशवर्षादनन्तरं यशसः पात्रं भविष्यामि किन्तु भरतः तु अद्यैव यशस्वी संजातः इत्यत्र वर्णितमस्ति।

**अन्वयः** – मया सुचिरेण अपि कालेन किंचित् यशः अर्जितम् अद्य भरतेन अचिरेण एव कालेन (तत्) सञ्चितम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**व्याख्या - ( क ) पर्यायपदानि** - मया = रामेण, सुचिरेणाऽपि, कालेन = समयेन, किंचिदेव = स्वल्पमेव, यश: = कीर्ति:, अर्जितं = सम्पादितं। भरतेन अद्य = सम्प्रति, अचिरेण कालेन = अतिशीघ्रतया, तद्यश: = संचितम् = अर्जितम्।

**( ख ) भावार्थ:** - रामेण अतिदीर्घेण अपि समयेन स्वल्पं कीर्ति: सङ्गृहीता। सम्प्रति कैकेयीतनयेन भरतेन अत्यल्पेन एव समयेन महत् यश: सम्प्राप्तम्।

**विशेष:** - श्लोकेऽस्मिन् अनुष्टुप् छन्द: अस्ति।

**सीता** - अय्यउत्त! णं दीपदि खु पुडमजाअणं भरदस्स। [आर्यपुत्र! ननु दीयते खलु प्रथमयाचनं भरताय।]

**राम:** - तथास्तु। वत्स! गृह्यताम्। (पादुके अर्पयति)

**भरत:** - अनुगृहीतोऽस्मि। (गृहीत्वा) आर्य! अन्नाभिषेकोदकमावर्जयितुमिच्छामि।

**राम:** - तात! यदिष्टं भरतस्य तत् सर्वं क्रियताम्।

**सुमन्त्र:** - यदाज्ञापयात्यायुष्मान्।

**भरत:** - (आत्मगतं) हन्त: भो:!

> **श्रद्धेय: स्वजनस्य पौररुचितो लोकस्य दृष्टिक्षम:**
> **स्वर्गस्थस्य नराधिपस्य दयित: शीलान्वितोऽहं सुत:।**
> **भ्रातॄणां गुणशालिनां बहुमत: कीर्त्तेर्महद् भाजनं**
> **संवादेषु कथाश्रयो गुणवतां लब्धप्रियाणां प्रिय: ॥ २७ ॥**

**प्रसङ्ग:** - भरत: रामस्य चरणपादुकां प्राप्य आत्मानं कृतार्थं चिन्तयति इत्यत्र वर्णितमस्ति।

**अन्वय:** - अहं स्वजनस्य श्रद्धेय: पौररुचित: लोकस्य दृष्टिक्षम: स्वर्गस्थस्य नराधिपस्य दयित: शीलान्वित: सुत:, गुणशालिनां भ्रातॄणां बहुमत: महत्कीर्त्ते: भाजनं, गुणवतां संवादेषु कथाश्रय: लब्धप्रियाणां प्रिय: (जात:)।

**व्याख्या - ( क ) पर्यायपदानि** - अहं = भरत:, स्वजनस्य = निजबन्धुजनस्य, श्रद्धेय: = विश्वासभाजनं, जात: = पौररुचित:, पौराणां = नागराणां रुचित: इष्ट: जात:, लोकस्य दृष्टिक्षम: = दर्शनयोग्य: निष्पापत्वात्, स्वर्गस्थस्य नराधिपस्य = राज्ञ:, दयित: = प्रिय:, सुतश्च = पुत्रश्च संजात:, शीलान्वित: = शीलेन सद्वृत्तेन = अन्वित: युक्त:, गुणशालिनां = गुणवतां, भ्रातॄणां, बहुमत: = बहुमानविषय:, कीर्त्ते:, महत् = प्रकृष्टं, भाजनं = पात्रं जातोऽस्मि, गुणवतां संवादेषु = गुणशालिनां परस्परालापेषु, कथाश्रय: = प्रस्तावविषय:, लब्धप्रियाणाम् = अधिगतकामानां, प्रिय: = पूर्णकामतया प्रीतिपात्रं जात:।

**( ख ) भावार्थ:** - भरत: निजबन्धुजनस्य विश्वासभाजनं, नागरिकाणां रुचित: इष्ट: जात:, जनानां दर्शनयोग्य:, दिवंगतस्य राज्ञ: दशरथस्य प्रिय: सुशील: च पुत्र: सद्गुणसहितानां भ्रातॄणां बहुमानविषय:, यशस: प्रकृष्टं पात्रं जातोऽस्मि। गुणशालिनां परस्परालापेषु प्रस्तावविषय:, अधिगतकामनां प्रीतिपात्रं जात:।

**विशेष:** - श्लोकेऽस्मिन् शार्दूलविक्रीडितं छन्द: अस्ति।

**राम:** - वत्स! कैकेयीमात:! राज्यं नाम मुहूर्तमपि नोपेक्षणीयम्। तस्मादद्यैव विजयाय प्रतिनिवर्ततां कुमार:।

**सीता** - हं, अज्ज एव गमिस्सदि कुमारो भरदो। [हम्, अद्यैव गमिष्यति कुमारो भरत:।]

**राम:** - अलमतिस्नेहेन। अद्यैव विजयाय प्रतिनिवर्ततां कुमार:।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**भरतः** – आर्य अद्यैवाहं गमिष्यामि।

**आशावन्तः पुरे पौराः स्थास्यन्ति त्वद्दिदृक्षया।**
**तेषां प्रीतिं करिष्यामि त्वत्प्रसादस्य दर्शनात्॥ २८॥**

**प्रसङ्गः** – भरतः अयोध्यां गत्वा रामस्य चरणपादुकां नगरवासिनां कृते दर्शयितुमिच्छति इत्यत्र वर्णितमस्ति।

**अन्वयः** – पुरे पौराः आशावन्तः त्वद्दिदृक्षया स्थास्यन्ति, त्वत्प्रसादस्य दर्शनात् तेषां प्रीतिं करिष्यामि।

**व्याख्या – (क) पर्यायपदानि** – पुरे = नगरे, पौराः = नागरिकाः, आशावन्तः = त्वद्दर्शनविषयकाशाशालिनः, त्वद्दिदृक्षया = त्वद्दर्शनेच्छया, वनात् त्वां प्रसाद्यायोध्यामानेष्यामि इति मत्प्रतिज्ञात्पादितकामनया, स्थास्यन्ति = स्थिताः भवेयुः, त्वत्प्रसादस्य = त्वत्प्रसादभूतयोः पादुकयोः, दर्शनात्, तेषां = पौराणां, प्रीतिं करिष्यामि।

**(ख) भावार्थः** – अयोध्यानिवासिनः भवद्दर्शनेच्छया वनात् भवन्तं प्रसाद्य अयोध्यामानेष्यामीति मत्प्रतिज्ञोत्पादित कामनया स्थिताः भविष्यन्ति। भवत्प्रसादस्वरूपश्चरणपादुकयोः विलोकनात् पौराणां जनानां सन्तुष्टिम् उत्पादयिष्यामि।

**विशेषः**– अनुष्टुप्छन्दः

**सुमन्त्रः** – आयुष्मन्! मयेदानीं किं कर्त्तव्यम्?

**रामः** – तात! महाराजवत् परिपाल्यतां कुमारः।

**सुमन्त्रः** – यदि जीवामि तावत् प्रयतिष्ये।

**रामः** – वत्स! कैकेयीमातः! आरुह्यतां ममाग्रतो रथः।

**भरतः** – यदाज्ञापयत्यार्यः।

(रथमारोहतः)

**रामः** – मैथिलि! इतस्तावत्। वत्स! लक्ष्मण! इतस्तावत्। आश्रमपदद्वारमात्रमपि भरतस्यानुयात्रं भविष्यामः।

(इति निष्क्रान्ताः सर्वे)

**चतुर्थोऽङ्कः**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# अथ पञ्चमोऽङ्कः

(ततः प्रविशति सीता तापसी च)

**सीता** – अय्ये! उवहारसुमणाइण्णो सम्मज्जिदो अस्समो। अस्समपदविभवो अणुट्ठिओ देवसमुदाआरो। ता जाव अय्यउत्तो ण आअच्छेदि, दाव इमाण बालरुक्खाणं उदअपदाणेण अणुक्कोसइस्स। [आर्ये! उपहारसुमनाकीर्णः समार्जित आश्रमः। आश्रमपदविभवेनानुष्ठितो देवसमुदाचारः। तद् यावदार्यपुत्रो नागच्छति, तावदिमान् बालवृक्षानुदकप्रदानेनानुक्रोधयिष्यामि।]

**तापसी** – अविग्घं से होदु! [अविघ्नमस्य भवतु।]

(ततः प्रविशति रामः)

**रामः** – (सशोकं) –

**त्यक्त्वा तां गुरुणा मया च रहितां रम्यामयोध्यां पुरी-**
**मुद्यम्यापि ममाभिषेकमखिलं मत्सन्निधावागतः।**
**रक्षार्थं भरतः पुनर्गुणनिधिस्तत्रैव सम्प्रेषितः**
**कष्टं भो! नृपतेर्धुरं सुमहतीमेकः समुत्कर्षति॥१॥**

**प्रसङ्गः** – प्रस्तुते श्लोके रामः राज्यभारं निर्वोढुं गतस्य भरतस्य विषये चिन्तयति।

**अन्वयः** – गुरुणा मया च रहितां तां रम्याम् अयोध्यां पुरीं त्यक्त्वा अखिलं मम अभिषेकम् उद्यम्य अपि मत्सन्निधौ आगतः गुणनिधिः भरतः पुनः रक्षार्थं तत्रैव सम्प्रेषितः एकः सुमहतीं नृपतेः धुरं समुत्कर्षति इति कष्टं भो!

**व्याख्या** – **(क) पर्यायपदानि** – गुरुणा = तातचरणेन, मया = रामेण, च = पुनः, रहितां = शून्यां, तां, रम्यां = मनोहराम्, अयोध्यापुरीं = त्यक्त्वा = परित्यज्य, अखिलं = सम्पूर्णमपि, मम = रामस्य, अभिषेकं = राज्यसंस्कारविधिम्, उद्यम्य = सप्रयत्नं सम्पाद्य, मत्सन्निधौ = मम समीपे, (इह = वने), आगतः = सम्प्राप्तः, असौ, भरतः = कैकेयीसुतः, गुणानां = भ्रातृप्रेमत्यागादीनां, निधिः = आकरः, तत्रैव = शून्यायामयोध्यायामेव, रक्षार्थं = राज्यपरिपालनाय, सम्प्रेषितः = परावर्त्तितः। स एकः = केवलः, सुमहतीम् = अतिशयगुर्वीं, नृपतेधुरं = राज्यभारं, समुत्कर्षति = समुद्वहति इति कष्टं भोः।

**(ख) भावार्थः** – पूज्य पित्रा दशरथेन रामेण च शून्यां सुप्रसिद्धां रमणीयाम् अयोध्यानाम्नीं नगरीं विहाय रामस्य सकलं राज्याभिषेकसामग्रीं सयत्नं सम्पाद्य मम समीपे अरण्यम् आगतः असौ कैकेयीपुत्रः भ्रातृप्रेमत्यागादीनाम् आकरः अयोध्यायामेव साम्राज्यपालनाय प्रत्यावर्तितः। एतत् अस्माकं कृते अतीव कष्टप्रदमस्ति यत् सः भरतः एकाकी एव नृपस्य राज्यभारं समुद्वहति।

**विशेषः** – श्लोकेऽस्मिन् शार्दूलविक्रीडितं छन्दः अस्ति।

(विमृश्य) ईदृशमेतत्। यावदिदानीमीदृशशोकविनोदनार्थमवस्थाकुटुम्बिनीं मैथिलीं पश्यामि। तत् क्व नु खलु गता वैदेही। (परिक्रम्यावलोक्य) अये इमानि खलु प्रत्यग्राभिषिक्तानि वृक्षमूलानि अदूरगतां मैथिलीं सूचयन्ति। तथाहि –

**भ्रमति सलिलं वृक्षावर्ते सफेनमवस्थितं**
**तृषितपतिता नैते क्लिष्टं पिबन्ति जलं खगाः।**
**स्थलमभिपतन्त्यार्द्राः कीटा बिले जलपूरिते**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**नववलयिनो वृक्षा मूले जलक्षयरेखया॥२॥**

**प्रसङ्गः** – प्रस्तुतश्लोके वर्ण्यते यत् सीता सद्य एव पादपेषु जलसिञ्चनं कृत्वा गता एवं रामः चिन्यति।

**अन्वयः** – सलिलं वृक्षावर्ते अवस्थितं सफेनं भ्रमति, तृषितपतिताः एते खगाः क्लिष्टं जलं न पिबन्ति, बिले जलपूरिते आर्द्राः कीटाः स्थलम् अभिपतन्ति, वृक्षा मूले जलक्षयरेखया नववलयिनः (सन्ति)।

**व्याख्या – (क) पर्यायपदानि** – सलिलं = जलं, वृक्षावर्ते = पादपालवाले, अवस्थितं = भूम्यन्तरप्रविष्टं, सफेनं = फेनसहितं, भ्रमति = चलति, तृषिताः = पिपासिताः, पतिताः = जलमवलोक्य पादपतलसमागताः, एते खगाः = विहंगमाः, क्लिष्टं = कलुषं, जलं = सलिलं, न = नहि, पिबन्ति, बिले = गर्त्रे, जलपूरिते = सलिलपूर्णे, आर्द्राः = जलक्लिन्नाः, कीटाः, स्थलं = शुष्कप्रदेशम्, अभिपतन्ति = जलप्लावनमसहमानाः धरांशमन्यमुपसर्पन्ति, वृक्षाः = द्रुमाः, मूले = मूलभागे, जलक्षयरेखया = सलिलक्षयनिमित्तया रेखया, नववलयिनः = वलयाकारनूतनरेखावन्तः दृश्यन्ते।

**(ख) भावार्थः** – जलं वृक्षाणाम् आवर्ते भुमियुक्ते आलबाले भूम्यन्तरप्रविष्टं फेनयुक्तं चलति। जलमवलोक्य पादपतलमागताः पिपासिताः विहङ्गमाः मालिनं जलं नहि पिबति। सलिलपूर्णे गर्ते जलक्लिन्नाः कीटाः शुष्कप्रदेशमभिगच्छति। सलिललेशोषादुत्पन्नलेखया पादपाः मूलदेशे वलयाकार नूतनरेखा दृश्यते।

**विशेषः** – श्लोकेऽस्मिन् हरिणी छन्दः अस्ति।

पुनश्चात्र स्वभावोक्तिरलंकारः अस्ति।

(विलोक्य) अये! इयं वैदेही। भोः! कष्टम्।

**योऽस्याः करः श्राम्यति दर्पणेऽपि स नैति खेदं कलशं वहन्त्याः।**
**कष्टं वनं स्त्रीजनसौकुमार्यं समं लताभिः कठिनीकरोति॥३॥**

**प्रसङ्गः** – तपोवने कोमलाङ्गिसीतायाः कठोरपरिश्रमं दृष्ट्वा रामः यत् चिन्तयति तत् अस्मिन् श्लोके वर्णितमस्ति।

**अन्वयः** – यः अस्याः करः दर्पणेऽपि श्राम्यति, सः कलशं वहन्त्याः खेदं न एति, कष्टं वनं लताभिः समं स्त्रीजनसौकुमार्यं कठिनीकरोति।

**व्याख्या – (क) पर्यायपदानि** – यः अस्याः = सीतायाः, करः = बाहुः, दर्पणेऽपि = स्वमुखालंकरणार्थे, लघुमधुकुरधारणेऽपि, श्राम्यति = आयासमनुभवति, सः = असौ करः, कलशं = जलपूर्णं घटं, बहन्त्या = वृक्षसिंचनाय धारयन्तया, खेदं = श्रमं, न = नहि, एति = प्राप्नोति, कष्टं = खेदावहं, यत्, वनम् = अरण्यं, लताभिः = वने जाताभिः वल्लीभिः, समं = सहैव, यदा समं = समानं, स्त्रीजनसौकुमार्यं = ललनास्वभावसुलभमार्दवं, कठिनीकरोति = फर्फशतां कष्टसहनशील्यां विदधाति।

**(ख) भावार्थः** – अस्याः सीतायाः यः हस्तः पूर्वं स्वमुखालङ्कारणार्थे लघुदर्पणधारणेऽपि श्रान्तः भवति स्म सः एव हस्त जलपूर्णं घटं वृक्षसेचनाय धायन्त्या श्रमं नहि प्राप्नोति। खेदावहं यत् अरण्यवल्लीभिः सहैव समानं ललनाजनस्य मार्दवं सर्वविधायाससहनशीलं विद्धाति।

**विशेषः** – श्लोकेऽस्मिन् उपाजतिछन्दः अस्ति।

(उपेत्य) मैथिलि! अपि तपो वर्धते?

**सीता** – हं अय्यउत्तो। जेदु अय्यउत्तो [हम्, आर्यपुत्रः! जयत्वार्यपुत्रः।]

**रामः** – मैथिलि! यदि ते नास्ति धर्मविघ्नः, आस्यताम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**सीता** – जं अय्यउत्तो आणवेदि। (उपविशति) [यदार्यपुत्र आज्ञापयति।]

**रामः** – मैथिलि ! प्रतिवचनार्थिनीमिव त्वां पश्यामि। किमिदम् ?

**सीता** – सोअसुण्णहिअअस्स विअ अय्यउत्तस्स मुहाओ। किं एदं। [शोकशून्यहृदयस्येवार्यपुत्रस्य मुखरागः। किमेतत् ?]

**रामः** – मैथिलि ! स्थाने खलु कृता चिन्ता –

**कृतान्तशल्याभिहते शरीरे तथैव तावद्धृदयव्रणो मे।**
**नानाफलाः शोकशराभिघातास्तत्रैव तथैव पुनः पतन्ति ॥ ४ ॥**

**प्रसङ्गः** – सीता यदा रामं वदति यत् अद्य भवान् बहु खिन्नः दृश्यते तदा रामः सीतां प्रति कारणं वदति इत्यत्र वर्णितमस्ति।

**अन्वयः** – कृतान्तशल्याभिहिते मे शरीरे हृदयव्रणः तावत् तथैव (वर्तते), नानाफलाः शोकशराभिघाताः तत्रैव तथैव पतन्ति।

**व्याख्या – ( क ) पर्यायपदानि** – कृतान्तस्य =यमस्य, शल्यैः = अल्पवद्व्यथाहेतुना, कालेनाभिहते, मे = मम, शरीरे = देहे, हृदयव्रणः = पितृवियोगशोकलक्षणो मानसिकः खेदः, तथैव = तावद्, यथापूर्वस्थ एव वर्तते, तथा हि नानाफलानि = राज्यभ्रंशवनवासपितृमरणादीनि येषां ते अनेकविधदुःखकारिणः, नानाफलाः = अनेकबाणाग्रसमुत्था, शराणां = बाणानाम्, अभिघाताः = प्रहाराः, तत्रैव = तस्मिन्नेव स्थाने, तथैव = तद्वदेव, पुनः पतन्ति = पुनरायान्ति।

**( ख ) भावार्थः** – दैवस्य तीक्ष्णबाणेन आहते मम देहे पितृवियोगशोकलक्षणो मानसिकः खेदः पूर्ववत् एव तथापि राज्यभ्रंशवनवासिपितृमणादीनि अनेकविधदुःखकारिणः अनेके बाणाग्रसमुत्थाः बाणानां प्रहाराः तस्मिन्नेव स्थाने तदेव भूयः आयान्ति।

**विशेषः**– रूपकालङ्कारः, उपजातिछन्दः

**सीता** – अय्यउत्तस्स को विअ हन्दावो। [आर्यपुत्रस्य क इव सन्तापः ?]

**रामः** – श्वस्तत्रभवतस्तातस्यानुसंवत्सरश्राद्धविधिः। कल्पविशेषेण निर्वपनक्रियामिच्छन्ति पितरः। तत् कथं निर्वर्तयिष्यामीत्येतच्चिन्त्ये। अथवा –

**गच्छन्ति तुष्टिं खलु येन केन त एव जानन्ति हि तां दशां मे।**
**इच्छामि पूजां च तथापि कर्तुं तातस्य रामस्य च सानुरूपम् ॥ ५ ॥**

**प्रसङ्गः** – अनेन श्लोकमाध्यमेन रामः सीतां वदति यत् श्वः महाराजदशरथस्य संवत्सरश्राद्धविधिः कर्त्तव्या इति वर्णितमस्ति।

**अन्वयः** – येन केन खलु (पितरः) तुष्टिं गच्छन्ति, हि ते एव मे तां दशां जानन्ति, तथापि तातस्य रामस्य च सानुरूपं पूजां कर्त्तुम् इच्छामि।

**व्याख्या – ( क ) पर्यायपदानि** – येन केन = स्वदशानुरूपेण, खलु = निश्चयेन, पितरः, तुष्टिं = तृप्तिं, गच्छन्ति = यान्ति, हि = यतः, ते = पितरः, मे = मम, तां = ममेयं दशां, जानन्त्येव = अवबोधयन्त्येव, तथापि = पुनरपि, तातस्य = पितुः, रामस्य = मम च, सानुरूपाम् = अनुगतां रूपमित्यनुरूपां योग्यां, पूजां = श्राद्धक्रियां, कर्त्तुं = विधातुम्, इच्छामि = वाञ्छामि।

**( ख ) भावार्थः** – येन केन प्रकारेण यथोपलब्धसामग्रीभिः पितरः तुष्टिं यास्यन्ति यतः ते पितरः मम रामस्य इमाम् अरण्यवासकालिकीम् अवस्थां विदन्ति एव। पुनरपि पूज्यपितुः आत्मनः च यथोचितं श्राद्धक्रियां विधातुम् अभिलषामि।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**विशेषः** – अस्मिन् श्लोके उपजातिछन्दः अस्ति।

**सीता** – अय्यउत्त! णिव्वत्तइस्सिदि संद्धं भरदो रिद्धीए, अवत्थाणुरूवं फलोदएण वि अय्यउत्तो। एदं तादस्य बहुमदअरं भविस्सदि। [आर्यपुत्र! निर्वर्तयिष्यति श्राद्धं भरत श्रद्धया, अवस्थानुरूपं फलोदकेनाप्यार्यपुत्रः। एतद् तातस्य बहुमततरं भविष्यति।]

**रामः** – मैथिलि!

**फलानि दृष्ट्वा दर्भेषु स्वहस्तरचितानि नः।**
**स्मारितो वनवासं च तातस्तत्रापि रोदिति॥ ६॥**

**प्रसङ्गः** – रामः सीतां वदति यद्यपि अहं तातस्य श्राद्धक्रियां वने स्वकीयं सामर्थ्यानुसारम् एव करिष्यामि तथापि तातः अस्माकम् अरण्यवासं दृष्ट्वा रोदनं करिष्यति इत्यत्र वर्णितमस्ति।

**अन्वयः** – दर्भेषु नः स्वहस्तरचितानि फलानि दृष्ट्वा तातः वनवासं स्मारितः तत्रापि च रोदिति।

**व्याख्या – ( क ) पर्यायपदानि** – दर्भेषु = कुशेषु, न तु सौवर्णादिपात्रेषु, नः = अस्माकं, स्वहस्तरचितानि = निजकरन्यस्तानि फलानि, दृष्ट्वा = विलोक्य, तातो वनवासम् = अस्माकमरण्यवासं, स्मारितः = स्मृतिमुपगतः, तथापि = स्वर्गेऽपि, रोदिति = रोदिष्यति।

**( ख ) भावार्थः** – कुशेषु न तु सौवर्णादिपात्रेषु अस्माकं निजकरन्यस्तानि फलानि अवलोक्य पिता दशरथः अस्माकमरण्यवासं स्मृतिपथमानीय स्वर्गेऽपि रोदिष्यति।

**विशेषः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति।

(ततः प्रविशति परिव्राजकवेषो रावणः)

**रावणः** – एष भोः!

**नियतमनियतात्मा रूपमेतद् गृहीत्वा,**
**खरवधकृतवैरं राघवं वञ्चयित्वा।**
**स्वरपदपरिहीणां हव्यधारामिवाहं,**
**जनकनृपसुतां तां हर्तुकामः प्रयामि॥ ७॥**

**प्रसङ्गः** – रावणः तपोवने सीतायाः अपहरणं कर्तुम् आगच्छति – इत्यत्र वर्णितमस्ति महाकविना भासमहोदयेन।

**अन्वयः** – अनियतात्मा अहम् एतद्रूपं गृहीत्वा नियतं खरवधकृतवैरं राघवं वंचयित्वा तां जनकनृपसुतां स्वरपदपरिहीणां हव्यधाराम् इव हर्तुकामः प्रयामि।

**व्याख्या – ( क ) पर्यायपदानि** – अनियमात्मा = अजितेन्द्रियः, अहम्, एतद् रूपं = परिव्राजकवेषं, गृहीत्वा, नियतं = जितेन्द्रियं, राघवं = रामं, वञ्चयित्वा = कांचनमृगमायया अन्यत्र गमयित्वा, तां = राघवविरहितां, जनकनृपसुतां = सीतां, स्वरपदपरिहीणां = स्वरपदविभागरहितां, स्वरपददुष्टमन्त्रोच्चारणपूर्वं देवेभ्यो दीयमानामित्यर्थः, हव्यधारामिव = हविराज्यं तस्य धारामिव, हर्तुकामः = हरणेच्छुः, सन् = प्रयामि = गच्छामि।

**( ख ) भावार्थः** – अजितेन्द्रियः अहं रावणः परिव्राजकवेषं धृत्वा जितेन्द्रियं रामं काञ्चनमृगमायया अन्यत्र गमयित्वा स्वरपददृष्टमन्त्रोच्चारणपूर्वं हविराज्यं धारमिव राघवविरहितां मिथिलानरेशस्य पुत्रीं सीतां हरणेच्छुः गच्छामि।

**विशेषः** – श्लोकेऽस्मिन् मालिनीछन्दः अस्ति। पुनश्चात्र उपमालंकारः अस्ति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

(परिक्रम्याधो विलोक्य) इदं रामस्याश्रमपदद्वारम्। यावदवतरामि। (अवतरति) यावदहमप्यतिथिसमुदाचारमनुष्ठास्यामि। अहमतिथि:। कोऽत्र भो: ?

**राम:** – (श्रुत्वा) स्वागतमतिथये।

**रावण:** – साधु विशेषितं खलु रूपं स्वरेण।

**राम:** – (विलोक्ये) अये भगवान् भगवन् अभिवादये।

**रावण:** – स्वस्ति।

**राम:** – भगवन् एतदासनमास्यतां।

**रावण:** – (आत्मगतं) कथमाज्ञप्त इवास्म्यनेन। (प्रकाशं) बाढम्। (उपविशति)।

**राम:** – मैथिलि ! पाद्यमानय भगवते।

**सीता** – जं अय्यउत्तो आणवेदि। (निष्क्रम्य प्रविश्य) इमा आवो। [यदार्यपुत्र आज्ञापयति। इमा आप:।]

**राम:** – शुश्रूषय भगवन्तम्।

**सीता** – जं अय्यउत्तो आणवेदि। [यदार्यपुत्र आज्ञापयति।]

**रावण:** – (मायाप्रकाशनपर्याकुलो भूत्वा।) भवतु भवतु।

**इयमेका पृथिव्यां हि मानुषीणामरुन्धती।**
**यस्या भर्तेति नारीभि: सत्कृत: कथ्यते भवान्॥८॥**

**प्रसङ्ग:** – प्रस्तुतश्लोके रावण: स्वकीयमायाया: प्रकाशनं न भवेत् तन्निमित्तं स्वसेवाकार्यं वारयति इति वर्णितमस्ति।

**अन्वय:** – इयं हि पृथिव्यां मानुषीणाम् एका अरुन्धती, यस्या: भर्ता इति भवान् नारीभि: सत्कृत: कथ्यते।

**व्याख्या – (क) पर्यायपदानि** – इयम् = एषा, हि = निश्चयेन, पृथिव्यां = भूपृष्ठे, मानुषीणां = मानवीनां, एका = अद्वितीया, अरुन्धती = अरुन्धती तुल्या, अरुन्धती नाम वशिष्ठधर्मपत्नी स्वपातिव्रत्यप्रभावेण सप्तर्षिमध्ये वसति, इह तत्प्रयोग: पतिव्रतासामान्यपरा। यस्या: = सीताया:, भर्त्ता = स्वामी, इति = हेतो:, भवान् = त्वं, नारीभि: = स्त्रीभि: सत्कृत: = पूजित:, सन् कथ्यते = वर्ण्यते।

**(ख) भावार्थ:** – भुवि मानवीनां मध्ये निश्चयेन एषा अद्वितीया अरुन्धती तुल्या पतिव्रता अस्ति। अस्या: सीताया: स्वामिहेतो: भवान् वनिताभि: पूजित: एवं वर्ण्यते।

**विशेष:** – श्लोकेऽस्मिन् अनुष्टुप् छन्द: अस्ति।

**राम:** – तेन हि आनय, अहमेव शुश्रूषयिष्ये।

**रावण:** – अयि छायां परिहृत्य शरीरं न लङ्घयामि। वाचानुवृत्ति: खल्वतिथिसत्कार:। पूजितोऽस्मि। आस्यताम्।

**राम:** – बाढम्। (उपविशति)

**रावण:** – (आत्मगतं) यावदहमपि ब्राह्मणसमुदाचारमनुष्ठामि।

(प्रकाशं) भो:! काश्यपगोत्रोऽस्मि। साङ्गोपाङ्गं वेदमधीये, मानवीयं धर्मशास्त्रं, माहेश्वरं, योगशास्त्रं, बार्हस्पत्यमर्थशास्त्रं, मेधातिथेर्न्यायशास्त्रं, प्राचेतसं श्राद्धकल्पं च।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**रामः** – कथं कथं श्राद्धकल्पमिति ?

**रावणः** – सर्वाः श्रुतीरतिक्रम्य श्राद्धकल्पे स्पृहा दर्शिता। किमेतत् ?

**रामः** – भगवन्! भ्रष्टायां पितृमत्तायामागम इदानीमेषः।

**रावणः** – अलं परिहृत्य। पृच्छतु भवान्।

**रामः** – भगवन् ! निर्वपनक्रियाकाले केन पितॄंस्तर्पयामि ?

**रावणः** – सर्वं श्रद्धया दत्तं श्राद्धम्।

**रामः** – भगवन्! अनादरतः परित्यक्तं भवति विशेषार्थं पृच्छामि।

**रावणः** – श्रूयताम्। विरूढेषु दर्भाः औषधीषु तिलाः, कलायं शाकेषु, मत्स्येषु महाशफाराः, पक्षिषु वाध्रीणसः, पशुषु गौः खड्गो वा इत्येते मानुषाणां विहिताः।

**रामः** – भगवन्! वा शब्देनावगतमन्यदप्यस्तीति।

**रावण** – अस्ति प्रभावसम्पाद्यम्।

**रामः** – भगवन्! एषः एव मे निश्चयः।

**उभयस्यास्ति सान्निध्यं यद्येतत् साधयिष्यति।**
**धनुर्वा तपसि श्रान्ते श्रान्ते धनुषि वा तपः॥ ९॥**

**प्रसङ्गः** – रामः स्वकीयतातस्य सम्यक्रीत्मा श्राद्धं कर्तुमिच्छति। सः विप्ररूपधारिणं रावणं वदति यत् तपसा बलेन वा अहं तातस्य विधिपूर्वकं श्राद्धं सम्पादितुमिच्छामि इत्यत्र वर्णितमस्ति।

**अन्वयः** – उभयस्य सान्निध्यम् अस्ति यदि एतत् साधयिष्यति, तपसि श्रान्ते वा धनुः धनुषि वा तपः (साधयिष्यति)।

**व्याख्या – ( क ) पर्यायपदानि** – उभयस्य = साधकद्वयस्य, सान्निध्यं = मयि सन्निधित्वम्, अस्ति, एतत् = उभयं, यदि, साधयिष्यति = प्रभावसम्पाद्यं सम्पादयिष्यति चेत्, सम्पादयित्वित्यर्थः। तपसि श्रान्ते = अतिमात्रविनियुक्ते सति, धनुर्वा = अर्थात् प्रभावसंपाद्यं, सम्पादयिष्यति, धनुषि श्रान्ते = अतिमात्रविनियुक्ते सति, तपः = तपश्चरणं वा प्रभावसंपाद्यं साधयिष्यति।

**( ख ) भावार्थः** – उभयं प्रभावसम्पाद्यं साधकद्वयस्य मयि सन्निधित्वम् अस्ति। तपश्चर्याम् असफलताया चापः, चापबले प्रभावहीने सति तपोबलं कार्यमिदं पूरयिष्यति इति तात्पर्यः।

**विशेषः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति।

**रावणः** – सन्ति। हिमवति प्रतिवसन्ति।

**रामः** – हिमवतीति। ततस्ततः।

**रावणः** – हिमवतः सप्तमे शृङ्गे प्रत्यक्षस्थाणुशिरः पतितगङ्गाम्बुपायिनो वैदूर्यश्यामपृष्ठाः पवनसमजवाः काञ्चनपार्श्वा नाम मृगाः, यैर्वैखानसबालखिल्यनैमिशीयादयो महर्षयश्चिन्तितमात्रोपस्थितविपन्नैः श्राद्धान्य-भिवर्धयन्ति।

**तैस्तर्पिताः सुतफलं पितरो लभन्ते**
**हित्वा जरां खमुपयान्ति हि दीप्यमानाः।**
**तुल्यं सुरैः समुपयान्ति विमानवास-**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**मावर्तिभिश्च विषयैर्न बलाद् ध्रियन्ते ॥१०॥**

**प्रसङ्गः** – अत्र रावणः रामं वदति यत् यदि पुत्रः विधिपूर्वकं पितॄणां श्राद्धकार्यं सम्पादयति तर्हि पितरः स्वर्गलोकं गत्वा देवताभिः सह निवसन्ति।

**अन्वयः** – तैः तर्पिताः पितरः सुतफलं लभन्ते, हि जरां हित्वा दीप्यमानाः खम् उपयान्ति, सुरैः तुल्यं विमानवासं समुपयान्ति आवर्त्तिभिश्च विषयैः च बलात् न ध्रियन्ते।

**व्याख्या – ( क ) पर्यायपदानि** – तैः = कांचनपार्श्वमृगैः, तर्पिताः = सन्तुष्टाः, पितरः पितृगणाः, सुतफलं = पुत्रजन्मप्रयोजनं, लभन्ते = प्राप्नुवन्ति, हि = निश्चयेन, दीप्यमानाः = तेजसा भ्राजमानाः, जरां = वृद्धत्वं, हित्वा = परित्यज्य, खं = स्वर्गम्, उपयान्ति = गच्छन्ति, सुरैः = देवैः, तुल्यं = सदृशं, विमानवासं = व्योमयानवासं, समुपयान्ति = लभन्ते। च = पुनः, आवर्तिभिः = जन्ममरणभ्रमकारिभिः, विषयैः = पदार्थैः, बलात् = बलपूर्वकं, न ध्रियन्ते = न आकृष्यन्ते।

**( ख ) भावार्थः** – तैः सुवर्णमृगैः सन्तुष्टाः पितृगणाः पुत्रोत्पत्तिप्रयोजनं प्राप्नुवन्ति। ते पितरः निश्चयेन तेजसा राजमानाः वार्धक्यं विहाय स्वर्गलोकं गच्छन्ति। तत्र गत्वा देवैः समानं व्योमयाननिवासं प्राप्नुवन्ति। पुनः जन्ममरणभ्रमकारिभिः आवर्तिभिः पदार्थैः हठात् नहि आकृष्यन्ते अर्थात् ते पितृगणाः सांसारिकबन्धनमुक्ताः भवन्ति।

**विशेषः** – श्लोकेऽस्मिन् वसन्ततिलकाछन्दः अस्ति।

**रामः** – मैथिलि !

**आपृच्छ पुत्रकृतकान् हरिणान् द्रुमांश्च**
**विन्ध्यं वनं तव सखीर्दयिता लताश्च।**
**वत्स्यामि तेषु हिमवद्गिरिकाननेषु,**
**दीप्तैरिवोषधिवनैरुपरञ्जितेषु ॥११॥**

**प्रसङ्गः** – रामः सुवर्णमृगस्यान्वेषणं कर्तुं सीतया सह हिमालयं गन्तुमिच्छति इति अस्मिन् श्लोके कविना वर्णितम्।

**अन्वयः** – पुत्रकृतकान् हरिणान् द्रुमान् च विन्ध्यं वनं तव दयिताः सखीः लताश्च आपृच्छ, दीप्तैः इव औषधिवनैः उपरञ्जितेषु तेषु हिमवद्गिरिकाननेषु वत्स्यामि।

**व्याख्या – ( क ) पर्यायपदानि** – पुत्रकृतकान् = कृत्रिमपुत्रान्, हरिणान् = मृगान्, द्रुमान् = वृक्षान्, च = पुनः, विन्ध्यं = विन्ध्याख्यपर्वतं, वनं = काननं, तव = भवतः, दयिताः = प्रियाः, सखीः = प्रियवयस्याः, लताः = वल्लरीश्च, आपृच्छ = गमनकालिकामन्त्रणया सम्भावय, दीप्तैरिव = ज्वलदिभरिरव, औषधिवनैहपरञ्जितेषु = ज्योतिष्मल्लताप्रकाशितेषु कांचनमृगशालिषु, तेषु हिमवद्गिरिकाननेषु = हिमालयस्य वनेषु, वत्स्यामि = निवासं करिष्यामि।

**( ख ) भावार्थः** – हे सीते त्वं पुत्रवत्पालितान् मृगान्, तरुन् विन्ध्याख्य पर्वतं, काननं, भवत्याः प्रियाः प्रियवस्याः वल्लरीश्च आमन्त्रयस्व। अहम् इदीनां ज्वल्द्भिरिव ज्योतिषामल्लताप्रकाशितेषु काञ्चलमृगशालिषु हिमालयपर्वतेषु निवासं करिष्यामि।

**विशेषः** – श्लोकेऽस्मिन् वसन्ततिलकाछन्दः अस्ति।

**सीता** – जं अय्यउत्तो आणवेदि। [ यदार्यपुत्र आज्ञापयति।]

**रावणः** – कौसल्यमातः ! अलमतिमनोरथेन। न ते मानुषैर्दृश्यन्ते।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**रामः** – भगवन्! किं हिमवति प्रतिवसन्ति?

**रावणः** – अथ किम्?

**रामः** – तेन हि पश्यतु भवान्।

**सौवर्णान् वा मृगांस्तान् मे हिमवान् दर्शयिष्यति।**
**भिन्नो मद्बाणवेगेन क्रौञ्चत्वं वा गमिष्यति॥१२॥**

**प्रसङ्गः** – रामः हिमालयात् स्वर्णमृगं स्वीकर्तुं गमनात्पूर्वं रावणं प्रति यद् वदति तदत्र वर्णयति महाकविभासः।

**अन्वयः** – हिमवान् वा तान् सौवर्णान् मृगान् मे दर्शयिष्यति, वा मद्बाणवेगेन भिन्नः क्रौञ्चत्वं गमिष्यति।

**व्याख्या – ( क ) पर्यायपदानि** – हिमवान् = हिमालयः, वा, तान् = मृगान्, सौवर्णान् = कांचनपार्श्वान्, मृगान् = हरिणान्, मे = मह्यं, दर्शयिष्यति = मद्दृष्टिगोचरं करिष्यति, वा = अथवा, मम = रामस्य, बाणानां = शराणां, वेगेन = जवेन, भिन्नः = विदीर्णः, क्रौचत्वं = क्रौंचपर्वततुल्यदशां, गमिष्यति = प्राप्स्यति।

**( ख ) भावार्थः** – हिमालयः सुवर्णमयान् हरिणान् मह्यं प्रत्यक्षीकरिष्यति अथवा मदीयबाणजवेन विदीर्णो भूत्वा क्रौञ्चपर्वतस्य दशां प्राप्स्यति।

**विशेषः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति।

**रावणः** – (स्वगतम्) अहो असह्यः खल्वस्यावलेपः। (प्रकाशम्) अये विद्युत्सम्पात इव दृश्यते। कौसल्यामातः! इहस्थमेव भवन्तं पूजयति हिमवान्। एव काञ्चनपार्श्वः।

**रामः** – भगवतो वृद्धिरेषा।

**सीता** – दिट्ठिआ अय्यउत्तो बड्ढइ। [दिष्ट्यार्यपुत्रो वर्धते।]

**रामः** – न, न –

**तातस्यैतानि भाग्यानि यदि स्वयमिहागतः।**
**अर्हत्येष हि पूजायां लक्ष्मणं ब्रूहि मैथिलि!॥१३॥**

**प्रसङ्गः** – सुवर्णमृगः स्वयं तपोवनम् आगच्छति, तं दृष्ट्वा रामः सीतां वदति इत्यत्र वर्णितमस्ति।

**अन्वयः** – यदि इह स्वयं काञ्चनमृगः आगतः (तर्हि) तातस्य एतानि भाग्यानि, एष हि पूजायाम् अर्हति, मैथिलि! लक्ष्मणं ब्रूहि।

**व्याख्या – ( क ) पर्यायपदानि** – यदि = चेत्, इह = अस्मिन् वने, स्वयं = स्वेच्छया कांचनमृगः, आगतः = समागतः, तर्हि, तातस्य = पितुः दशरथस्य, एतानि भाग्यानि = भागधेयानि। एषः = मृगः, हि = यतः, पूजायाम् = अर्चायाम् अर्हति। मैथिलि = सीते, लक्ष्मणं = ममानुजं, ब्रूहि = अर्ध्यादिना सम्पूज्यानेतुं कथय।

**( ख ) भावार्थः** – यदा काञ्चनपार्श्वमृगः स्वयमेव साक्षात् अस्मिन् दण्डकारण्ये समागतः तदा पितुः दशरथस्य भागधेयानि। यतः काञ्चनमृगः वार्षिकविधौ अर्चनायाम् उपयुज्यते। अतः हे सीते! सौमित्रम् अर्घ्यादिना सम्पूज्यानेतुं वद।

**विशेषः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति।

**सीता** – अय्यउत्त! णं तित्थआत्तादो उदावत्तमाणं कुलवदिं पच्चुग्गच्छेहित्तिं सन्दिट्ठ सोमत्ती। [आर्यपुत्र! ननु तीर्थयात्रात् उपावर्तमानं कुलपतिं प्रत्युद्गच्छेति सन्दिष्टः सौमित्रिः।]



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**रामः** – तेन हि अहमेव यास्यामि।

**सीता**– अय्यउत्त ! अहं किं करिस्सं। [आर्यपुत्र अहं किं करिष्यामि ?]

**रामः** – शुश्रूषस्व भगवन्तम्।

**सीता** – जं अय्यउत्तो आणवेदि। [यदार्यपुत्र आज्ञापयति।]

(निष्क्रान्तो रामः)

**रावणः** – अये अयमर्ध्यमादायोपसर्पति राघवः। एष इदानीं पूजामनवेक्ष्य धावन्तं मृगं दृष्ट्वा धनुरारोपयति राघवः।

**अहो बलमहो वीर्यमहो सत्त्वमहो जवः।**
**राम इत्यक्षरैरल्पैः स्थाने व्याप्तमिदं जगत्॥ १४॥**

**प्रसङ्गः** – रामः धावन्तं सुवर्णमृगं दृष्ट्वा यदा धनुरारोपयति तदा रावणः रामं दृष्ट्वा यद् वदति तदत्र महाकविना भासेन वर्णितमस्ति।

**अन्वयः** – अहो बलम्, अहो वीर्यम्, अहो सत्त्वम्, अहो जवः, राम इति अल्पैः अक्षरैः इदं जगत् व्याप्तं स्थाने।

**व्याख्या – (क) पर्यायपदानि** – अहो = इत्याश्चर्ये, बलं= शारीरिकी शक्तिः, वीर्यम् = आन्तरिकः उत्साहः, सत्वं = धैर्यं, जवः = वेगः, धनुषि बाणसंधाने, राम इत्यल्पैरक्षरैः = द्वाभ्यामेव वर्णाभ्याम्, इदं = जगत्, व्याप्तं = पूर्णं, स्थाने = युक्तम्।

**(ख) भावार्थः** – अहो ! कीदृशी शारीरिकशक्तिः ?, कीदृशः आन्तरिक-उत्साहः ? कीदृशो धीरभावः ?, कीदृशो वेगः ?राम इति द्वाभ्यामेव लघुवर्णाभ्यां दृश्यमानं जगत् ओतप्रोतम् अस्ति इति युक्तमेव।

**विशेषः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति।

एष मृगः एकप्लुतातिक्रान्तशरविषयो वनगहनं प्रविष्टः।

**सीता** – (आत्मगतम्) अय्यउत्तविरहिदाए भअं मे एत्थ उप्पज्जइ। [आर्यपुत्रविरहिताया भयं मेऽत्रोत्पद्यते।]

**रावणः** – (आत्मगतं)

**माययापहृते रामे सीतामेकां तपोवनात्।**
**हरामि रुदतीं बालाममन्त्रोक्तामिवाहुतिम्॥ १५॥**

**प्रसङ्गः** – रामं स्वकीयमायया सुवर्णमृगस्य पृष्ठतः संप्रेष्य रावणः सीतायाः हरणं कर्तुं चिन्तयति इत्यत्र कविना भासेन वर्णितमस्ति।

**अन्वयः** – मायया रामे अपहृते एकां सीतां तपोवनात् रुदतीं बालाम् अमन्त्रोक्ताम् आहुतिम् इव हरामि।

**व्याख्या – (क) पर्यायपदानि** – मायया = मायारचितमृगेण, अपहृते = दूरं नीते, रामे = रामचन्द्रे, एकाम् = अद्वितीयां, सीतां = जानकीं, तपोवनात् = आश्रमात्, रुदतीम् = आक्रोशन्तीं, बालां = युवतीम्, अमन्त्रोक्तां = मन्त्रोच्चारणं विना दत्ताम्, आहुतिमिव = हव्यमिव, हरामि = अपनयामि।

**(ख) भावार्थः** – कपटमृगेण आश्रमात् राघवे दूरं नीते सति अद्वितीयां क्रन्दतीं युवतीं जानकीं मन्त्रोच्चारणं विनैव दत्तं हव्यम् इव अपनयामि।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**विशेषः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति।
पुनश्चात्र उपमालंकारः अस्ति।

**सीता** – जाव उडजं पविसामि। (गन्तुमीहते) [यावदुटजं प्रविशामि।]

**रावणः** – (स्वरूपं गृहीत्वा) सीते! तिष्ठ तिष्ठ।

**सीता** – (सभयं) हं को दाणि अअं। [हं क इदानीमयम्?]

**रावणः** – किं न जानीषे?

**युद्धे येन सुराः सदानवगणाः शक्रादयो निर्जिताः**
**दृष्ट्वा शूर्पणखाविरूपकरणं श्रुत्वा हतौ भ्रातरौ।**
**दर्पाद् दुर्मतिप्रमेयबलिनं रामं विलोभ्य च्छलैः**
**स त्वां हर्तुमना विशाालनयने! प्राप्तोऽस्म्यहं रावणः॥१६॥**

**प्रसङ्गः** – रावणः स्वकीयं रूपं परिवृत्य सीतां वदति यत् अहं भवत्याः हरणं कर्त्तुमागतः अस्मि इत्यत्र वर्णितमस्ति।

**अन्वयः** – विशालनयने येन सदानवगणाः शक्रादयः सुराः युद्धे निर्जिताः सः अहम् रावणः शूर्पणखाविरूपकरणं दृष्ट्वा भ्रातरौ हतौ श्रुत्वा दर्पात् दुर्मतिम् अप्रमेयबलिनं रामं छलैः विलोभ्य त्वाम् हर्त्तुमनाः प्राप्तः अस्मि।

**व्याख्या** – **(क) पर्यायपदानि** – विशालनयने = आयतलोचने, येन = रावणेन, सदानवगणाः = दैत्यसङ्गसहिताः, शक्रादयः = इन्द्रादयः, सुराः = देवाः, युद्धे = समरे, निर्जिताः = पराजिताः, सः = असौ, अहं रावणः = रावणाख्यः दैत्याधिपतिः, शूर्पणखाविरूपकरणं = शूर्पणखाख्याया रावणस्वसुः कर्णनासाकर्त्तनं लक्ष्मणकृतं, दृष्ट्वा = विलोक्य, भ्रातरौ = खरदूषणौ, हतौ = रामेण मारितौ इति, श्रुत्वा = आकर्ण्य, दर्पात् = गर्वात्, दुर्मतिं = दुष्टबुद्धिम्, अप्रमेयबलिनम् = अपरिच्छेद्यप्रशस्तबलयोगिनं, रामं = राघवं, छलैः = कपटैः, विलोभ्य = प्रतार्य, त्वां = सीतां, हर्त्तुमनाः = तव हरणं कर्त्तुमिव, प्राप्तोऽस्मि = इहागतोऽस्मि।

**(ख) भावार्थः** – हे आयतनेत्रे सीते! रावणेन समरे दैत्यसमूहसहिताः इन्द्रप्रभृतयः देवाः पराजिताः। असौ अहं रावणनामा दैत्याधिपतिः शूर्पणखानासिकाकर्तनं विलोक्य खरदूषणौ रामेण मारितौ इति आकर्ण्य गर्वात् दुष्टबुद्धिम् अपरिध्च्छेद्य पराक्रमयुतं राघवं कपटैः प्रतार्य सीताम् अपहर्त्तुम् अत्रागतः अस्मि।

**विशेषः** – श्लोकेऽस्मिन् शार्दूलविक्रीडितं छन्दः अस्ति।
पुनश्चात्र श्लेषालंकारोऽपि विद्यते।

**सीता** – हं लावणो णाम। [हं रावणो नाम] (प्रतिष्ठते)।

**रावणः** – आः! रावणस्य चक्षुर्विषयमागता क्व यास्यसि?

**सीता** – अय्यउत्त! परित्ताआहि। परित्ताआहि। सोमित्ती! परित्ताआहि परित्ताआहि। [आर्यपुत्र! परित्रायस्व परित्रायस्व। सौमित्रे! परित्रायस्व परित्रायस्वमाम्।]

**रावणः** – सीते! श्रूयतां मत्पराक्रमः।

**भग्नः शक्रः कम्पितो वित्तनाथः कृष्टः सोमो मर्दितः सूर्यपुत्रः।**
**धिग् भोः स्वर्गं भीतदेवैर्निविष्टं धन्या भूमिर्वर्तते यत्र सीता॥१७॥**

**प्रसङ्गः** – रावणः सीतायाः अपहरणं कृत्वा नयति तदा रावणः सीतायै स्वपराक्रमस्य परिचयं ददाति इत्यत्र वर्णयति महाकविभासः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**अन्वयः** – शक्रः भग्नः, वित्तनाथः कम्पितः, सोमः कृष्टः, सूर्यपुत्रः मर्दितः, भोः भीतदेवैः निविष्टं स्वर्गं धिक्, भूमिः धन्याः, यत्र सीता वर्तते।

**व्याख्या – ( क ) पर्यायपदानि** – शक्रः = इन्द्रः, भग्नः = समरे पराजितः, वित्तनाथः = धनपतिकुबेरः, कम्पितः = भयेन चालितः, सोमः = चन्द्रः, कृष्टः = कर्षितः, सूर्यपुत्रः = यमः, मर्दितः = मानमर्दनेन चूर्णितः, भोः = रे, भीतदेवैः = भीरुस्वभावसुरैः, निविष्टम् = अधिष्ठितं, स्वर्गं = नाकं, धिक्। भूमिः = पृथिवी, धन्या = श्लाघ्या, यत्र = यस्मिन् स्थाने, सीता = जानकी, वर्त्तते = उपस्थिता अस्ति।

**( ख ) भावार्थः** – मया इन्द्रः युद्धे पराजितः, धनपतिकुबेरः भयेन चालितः, चन्द्रः स्ववासदेशादाकृष्य स्वप्रसादशिखरे स्थापितः, यमः विदलितः। अहो भीतस्वभावसुरैः अधिष्ठिते नाकं धिगस्ति। सा पृथिवी प्रशंसनीया यत्र च जानकी उपस्थिता अस्ति।

**सीता** – अय्यउत्त! परित्ताआहि परित्ताआहि। सोमित्ती! परित्ताआहि परित्ताआहि मं। [आर्यपुत्र! परित्रायस्व परित्रायस्व। सौमित्रे! परित्रायस्व परित्रायस्व माम्।]

**रावणः** –

**रामं वा शरणमुपेहि लक्ष्मणं वा**
**स्वर्गस्थं दशरथमेव वा नरेन्द्रम्।**
**किं वा स्यात् कुपुरुषसंश्रितैर्वचोभि-**
**र्न व्याघ्रं मृगशिशवः प्रधर्षयन्ति॥१८॥**

**प्रसङ्गः** – रावणेन अपहरणकाले सीता रामं लक्ष्मणं च स्वकीयरक्षार्थम् आह्वयति तदा रावणः यद् वदति तदत्र वर्णितं महाकविनाभासेन।

**अन्वयः** – रामं वा लक्ष्मणं वा स्वर्गस्थं नरेन्द्रं दशरथम् एव वा शरणम् उपेहि, किं वा स्यात्, कुपुरुषसंश्रितैः वचोभिः मृगशिशव व्याघ्रं न प्रधर्षयन्ति।

**व्याख्या – ( क ) पर्यायपदानि** – रामं = राघवं, वा = इति विकल्पे, वा = अथवा लक्ष्मणं = सुमित्रासुतं, अथवा स्वर्गस्थं = स्वर्गयातं, नरेन्द्रं = नृपतिं, दशरथं = रामजनकम्, एव शरणं = शरणागतम्, उपेहि = याहि, किं वा स्यात् = किं भवेत्, न किमपीत्यर्थः। कुपुरुषसंश्रितैः = कापुरुषानुद्दिश्य कथितैः वचोभिः = वचनैः, किं वा = अथवा किम्भवति, मृगशिशवः = हरिणपोताः, व्याघ्रं = शार्दूलं, न = नहि, प्रधर्षयन्ति = उत्पीडयन्ति।

**( ख ) भावार्थः** – राघवं वा सौमित्रं वा स्वर्गे अवस्थितं नृपतिं रामजनकमेव शरणं प्राप्नुहि। तेन किं भविष्यति? कापुरुषानुद्दिश्य कथितैः वचनैः मम किं वा भवेत्? अर्थात् किमपि न भविष्यति? हरिणशावकाः शार्दूलं नहि उत्पीडयन्ति।

**विशेषः** – श्लोकेऽस्मिन् प्रहर्षिणी छन्दः अस्ति।

**सीता** – अय्यउत्त! परित्ताआहि परित्ताआहि। सोमित्ती! परित्ताआहि परित्ताआहि मं। [आर्यपुत्र! परित्रायस्व परित्रायस्व। सौमित्रे! परित्रायस्व परित्रायस्व माम्।]

**रावणः** –

**विलपसि किमिदं विशालनेत्रे विगणय मां च यथा तवार्यपुत्रम्।**
**विपुलबलयुतो ममैष योद्धुं ससुरगणोऽप्यसमर्थ एव रामः॥१९॥**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**प्रसङ्गः** – सीता स्वरक्षार्थं रामस्य लक्ष्मणस्य च आवाहनं करोति तदा रावणः यद् वदति तदत्र वर्णितं महाकविना भासेन।

**अन्वयः** – विशालनेत्रे किमिदं विलपसि, मां तव आर्यपुत्रं यथा विगणय, एषः रामः विपुलबलयुतः ससुरगणः अपि मम योद्धुम् असमर्थः एव।

**व्याख्या – (क) पर्यायपदानि** – विशालनेत्रे = हे विशालाक्षि, किमिदं, विलपसि = कथं रोदिसि, मां = रावणं, तव = सीतायाः, आर्यपुत्रं = पतिं, विगणय = विशेषेण मन्यस्व, यथा = इव, एषः रामः = राघवः, त्वया त्राणार्थं प्रार्थ्यमानः, विपुलबलयुतः = महता सैन्यसहितः, ससुरगणोऽपि = देवसमूहसहितोऽपि, मम = रावणस्य, योद्धुं = युद्धं कर्त्तुम्, असमर्थः = अशक्तः, एव = यथा भविष्यति।

**(ख) भावार्थः** – हे आयतलोचने! किमर्थम् उच्चैः क्रन्दसि? रावणं मां स्वीयः पतिरेव जानीहि। राघवः महता सैन्येन सहापि देवसमूहसहितेऽपि रावणेन सह युद्धं कर्त्तुम् अशक्तः भविष्यति।

**विशेषः** – श्लोकेऽस्मिन् पुष्पिताग्राछन्दः अस्ति।

**सीता** – (सरोषं) सत्तो सि। [शप्तोऽसि]

**रावणः** – अहह! अहो पतिव्रतायास्तेजः।

**योऽहमुत्पतितो वेगान्न दग्धः सूर्यरश्मिभिः।**
**अस्याः परिमितैर्दग्धः शप्तोऽसीत्येभिरक्षरैः॥२०॥**

**प्रसङ्गः** – अपहरणकाले सीता क्रोधपूर्वकं यदा रावणं शप्तोऽसि इति वदति तदा रावणः सीतायाः उपहासं कुर्वन् यद् वदति तदत्र वर्णितमस्ति।

**अन्वयः** – योऽहं वेगात् उत्पतितः सूर्यरश्मिभिः न दग्धः, (सोऽहम्) अस्याः 'शप्तोऽसि' इति परिमितैः एभिः अक्षरैः दग्धः।

**व्याख्या – (क) पर्यायपदानि** – योऽहं = रावणः, वेगात् = जवात्, उत्पतितः = उत्थितः आकाशं गतः, सूर्यस्य = रवेः, रश्मिभिः = किरणैः, न = नहि, दग्धः = ज्वलितः, (सोऽहम्) अस्याः = सीतायाः, शप्तोऽसि, इति परिमितैः = स्वल्पैः, एभिः = कथितैः, अक्षरैः = वर्णैः, दग्धः = ज्वलितः स्याम्।

**(ख) भावार्थः** – यः रावणः जवात् उत्थितः आकाशं गतः सूर्यकिरणैः न ज्वलितः, सः अहं सीतायाः "शप्तोऽसि" स्वल्पैः वर्णैः ज्वलितः स्याम्? अर्थात् भवत्याः शापस्य मम उपरि कोऽपि प्रभावः न भविष्यति।

**विशेषः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति।

**सीता** – अय्यउत्त! परित्ताआहि परित्ताआहि। [आर्यपुत्र! परित्रायस्व परित्रायस्व।]

**रावणः** – (सीतां गृहीत्वा) भोः भोः! जनस्थानवासिनस्तपस्विनः! शृण्वन्तु भवन्तः –

**बलादेष दशग्रीवः सीतामादाय गच्छति।**
**क्षात्रधर्मे यदि स्निग्धं कुर्याद् रामः पराक्रमम्॥२१॥**

**प्रसङ्गः** – सीतायाः अपहरणकाले रावणः स्वशौर्यप्रदर्शनं कुर्वन् दण्डकारण्यस्य तपस्विजनान् यद् वदति तदत्र वर्णितमस्ति।

**अन्वयः** – एषः दशग्रीवः बलात् सीताम् आदाय गच्छति। यदि क्षात्रधर्मे रामः स्निग्धः तर्हि पराक्रमं कुर्यात्।

**व्याख्या – (क) पर्यायपदानि** – एषः = अहमेव, दशग्रीवः = दशाननः, रावणः, बलात् = बलपूर्वकात्,



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

सीतां = जानकीम्, आदाय = गृहीत्वा, गच्छति = याति। यदि = चेत्, रामः = राघवः, क्षात्रधर्मे = क्षत्रियकर्त्तव्ये, स्निग्धः = अनुरागी, तदा पराक्रमं = शौर्यं, कुर्यात् = प्रकटयेत्।

**( ख ) भावार्थः** – अयं दशकण्ठः हठात् जानकीं गृहीत्वा याति। यदि रामचन्द्रः क्षत्रियधर्मे संग्रामे अनुरक्तः तर्हि शौर्यप्रदर्शनं विदध्यात्।

**विशेषः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति।

**सीता** – अय्यउत्त ! परित्ताआहि परित्ताआहि। [ आर्यपुत्र ! परित्रायस्व परित्रायस्व।]

**रावणः** – (परिक्रामन् विलोक्य) अये स्वपक्षपवनोत्क्षेपक्षुभितवनषण्डश्चण्डचञ्चुरभिधावत्येष जटायुः। आः ! तिष्ठेदानीम्।

**मद्भुजाकृष्टनिस्त्रिंशकृत्तपक्षक्षतच्युतैः।**
**रुधिरैरार्द्रगात्रं त्वां नयामि यमसादनम्॥ २२॥**

**प्रसङ्गः** – सीतायाः रक्षार्थं जटायुं दृष्ट्वा रावणेन यदुक्तं, तदत्र वर्णितमस्ति।

**अन्वयः** – मद्भुजाकृष्टनिस्त्रिंशकृत्तपक्षक्षतच्युतैः रुधिरैः आर्द्रगात्रं त्वां यमसादनं नयामि।

**व्याख्या – ( क ) पर्यायपदानि** – मद्भुजाकृष्टनिस्त्रिंशकृत्तपक्षक्षतच्युतैः = मत्कराकृष्टखड्गच्छिन्न-पक्षव्रणगलितैः, रुधिरैः = रक्तैः, आर्द्रगात्रं = क्लिन्नं व्याप्तं शरीरं, त्वां = जटायुनामानं, गृध्रराजं, यमसादनं = यमगृहं, नयामि = प्रेषयामि, अर्थात् मृत्युं प्रापयामि।

**( ख ) भावार्थः** – मत्कराकृष्टखड्गाच्छिन्नपक्षव्रणगलितैः शोणितैः क्लिन्नदेहं जटायुनामकं गृध्रराजं यमालयं प्रापयामि।

**विशेषः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति। अत्र पर्यायोक्तिरलंकारः अस्ति।

(निष्क्रान्तौ)

**इति पञ्चमोऽङ्कः**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# अथ षष्ठोऽङ्कः

(ततः प्रविशतो वृद्धतापसौ)

**उभौ** – परित्रायन्तां परित्रायन्तां भवन्तः !

**प्रथमः** –

**इयं हि नीलोत्पलदामवर्चसा मृणालशुक्लोज्वलदंष्ट्रहासिना।**
**निशाचरेन्द्रेण निशार्धचारिणा मृगीव सीता परिभूय नीयते॥ १ ॥**

**प्रसङ्गः** – रावणः सीतायाः हरणं कृत्वा नयति, तदा अरण्ये द्वौ तपस्विजनौ एतद् दृश्यं दृष्ट्वा परस्परं यद् वदतः तदत्र वर्णितमस्ति।

**अन्वयः** – नीतोत्पलदामवर्चसा मृणालशुक्लोज्वलदंष्ट्रहासिना निशार्धचारिणा निशाचरेन्द्रेण मृगी इव हि इयं सीता परिभूय नीयते।

**व्याख्या** – **( क ) पर्यायपदानि** – नीलोत्पलदामवर्चसा = नीलकमलमालातुल्यतेजसा, मृणालशुक्ला = विसतन्तुधवला, उज्वला = वर्णान्तरसङ्गकीर्णश्वेता, दंष्ट्रा यस्मिन् कर्मणि तथा हासिना = स्मयमानेन, निशार्द्धचारिणा = रात्रिमध्यपर्यटकेन चौरेणेत्यर्थः, निशाचरेन्द्रेण = रावणेन, मृगी इव = हरिणी इव हि= नूनमेव, इयम् = एषा, जनकनन्दिनी = सीता, परिभूय = क्लेशयित्वा नीयते = अपह्रियते।

**( ख ) भावार्थः** – नीलकमलमाल्यतुल्यकान्तिशालिना विसतन्तु धवलदशनरश्मिस्मितेन रात्रिमध्यपर्यटकेन राक्षसनृपेण रावणेन पुरोदृश्यमाना जनकनन्दिनी नूनं हरिणी इव क्लेशयित्वा बलात् अपह्रियते।

**विशेषः** – श्लोकेऽस्मिन् वंशस्थछन्दः अस्ति। उपमालंकारोऽपि अत्रास्ति।

**द्वितीयः** – एषा खलु तत्रभवती वैदेही –

**विचेष्टमानेव भुजङ्गमाङ्गना विधूयमानेव च पुष्पिता लता।**
**प्रसह्य पापेन दशाननेन सा तपोवनात् सिद्धिरिवापनीयते॥ २ ॥**

**प्रसङ्गः** – द्वौ तपस्विजनौ वदतः यत् एषा निश्चयेन विदेहराजपुत्री सीता एव अस्ति या बलात् रावणेन अपह्रियते इत्यत्र वर्णितमस्ति।

**अन्वयः** – विचेष्टमाना भुजङ्गमाङ्गना इव च विधूयमाना पुष्पिता लता इव सा सिद्धि इव पापेन दशाननेन तपोवनात् प्रसह्य अपनीयते।

**व्याख्या** – **( क ) पर्यायपदानि** – विचेष्टमाना = व्याप्रियमाणा, भुजङ्गमाङ्गना = सर्पिणी, इव = यथा, च = पुनः, विधूयमाना = कम्पमाना, पुष्पिता = पल्लविता, लता = वल्लरी, इव = यथा, सा = वैदेही, सिद्धिः = तपः फलसम्पद्, इव = यथा, पापेन = पापकारिणा, दशाननेन = रावणेन, तपोवनात् = दण्डकारण्यात्, प्रसह्य = बलात्, अपनीयते = अपह्रियते।

**( ख ) भावार्थः** – समुपस्थितविपत्प्रतीकाराय विविधं प्रयतमाना सर्पिणीवत् कम्पमाना प्रस्फुटितपुष्प वल्लरी इव सीता तपः फलसम्पदिव पापकारिणा रावणेन दण्डकारण्यात् बलात् अपह्रियते।

**विशेषः** – श्लोकेऽस्मिन् वंशस्थछन्दः अस्ति। अत्र मालोपमा नामकोऽलंकारः विद्यते।

**उभौ** – परित्रायतां परित्रायतां भवन्तः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**प्रथमः** – (ऊर्ध्वमवलोक्य) अये वचनसमकाल एव दशरथस्यानृण्यं कर्तुं 'मयि स्थिते क्व यास्यसी'ति रावणमाहूयान्तरिक्षमुत्पतितो जटायुः।

**द्वितीयः** – एष रोषादुद्वृत्तनयनः प्रतिनिवृत्तो रावणः।

**प्रथमः** – एष रावणः।

**द्वितीयः** – एष जटायुः।

**उभौ** – हन्तैतदन्तरिक्षे प्रवृत्तं युद्धम्।

**प्रथमः** – काश्यप ! काश्यप ! पश्य क्रव्यादीश्वरस्य सामर्थ्यम्।

**पक्षाभ्यां परिभूय वीर्यविषयं द्वन्द्वं प्रतिव्यूहते**
**तुण्डाभ्यां सुनिघृष्टतीक्ष्णमचलः संवेष्टनं चेष्टते।**
**तीक्ष्णैरायसकण्टकैरिव नखैर्भीमान्तरं वक्षसो**
**वज्राग्रैरिव दार्यमाणविषमाच्छैलाच्छिला पात्यते॥ ३॥**

**प्रसङ्गः** – यदा आकाशमार्गेण रावणेन अपहरणं कृत्वा नयन्त्याः सीतायाः जटायुः रक्षणं करोति तदा द्वयोर्मध्ये आकाशे युद्धं भवति। एतत् दृष्ट्वा जटायोः पराक्रमस्य प्रशंसां कुर्वन् एकः तपस्वी यद् वदति तदत्र वर्णितमस्ति।

**अन्वयः** – (अयं) पक्षाभ्यां परिभूय वीर्यविषयं द्वन्द्वं प्रतिव्यूहते। अचलः तुण्डाभ्यां सुनिघृष्टतीक्ष्णं संवेष्टनं चेष्टते। आयसकण्टकैः इव तीक्ष्णैः नखैः वक्षसः भीमान्तरं, वज्राग्रैः दार्यमाणविषमात् शैलात् शिला इव पात्यते।

**व्याख्या – (क) पर्यायपदानि** – (अयं = जटायुः), पक्षाभ्यां = पक्षद्वयेन, परिभूय = अभिहत्य, वीर्यविषयं = स्वपराक्रमलक्ष्यभूतं, द्वन्द्वं = युद्धं, प्रतिव्यूहते = प्रतियुज्यते। अचलः = धीरोः जटायोः, तुण्डाभ्यां = चञ्चुपुटाभ्यां, सुनिघृष्टतीक्ष्णं = सुष्ठुनिघर्षणयुक्तं दुःसहं च यथा भवति तथा, संवेष्टनं = सम्यक् वेष्टनयुक्तं, यथा स्यात्तथा, चेष्टते = प्रयतते। आयसकण्टकैः = लौहमयैः कण्टकैः, इव = यथा, तीक्ष्णैः = निशिताग्रभागैः, नखैः = नखरैः, वक्षसः = उरसः, भीमान्तरं = भयंकरं, वज्राग्रैः = कुलिशकोटिभिः, दार्यमाणविषमात् = पातितत्वेनान्तरपदार्थप्रत्यक्षीभावभीषणात्, शैलात् = पर्वतात्, शिला = प्रस्तरखण्डमिव, पात्यते = उत्पाट्यते।

**(ख) भावार्थः** – जटायुः पक्षद्वयेन अभिहत्य रावणं पराक्रमसापेक्षं युद्धम् आरब्धुं प्रवर्तते। धीरः स्थिरः जटायुः चञ्चुपुटाभ्यां सुष्ठुनियुक्तं दुस्सहं च सम्यग्वेष्टनयुक्तं प्रयतते अर्थात् स्वचञ्चुपुटेन रावणं निपुणतरं तथा कठोरं घर्षयित्वा तं परिवेष्टयितुं यतते। लौहनिर्मितकण्टकैः यथा निशिताग्रभागैः नखैः रावणस्य उरसः भयङ्करम् अन्तः स्थितं मांसादिकं कुलिशकोटिभिः विदार्यमाणः भयावहः उन्नतावनतो पर्वतात् प्रस्तरखण्डमिव उत्पाट्यते।

**विशेषः** – श्लोकेऽस्मिन् शार्दूलविक्रीडितं छन्दः अस्ति।

**द्वितीयः** – हन्त ! संक्रुद्धेन रावणेनासिना क्रव्यादीश्वरः स दक्षिणांसदेशे हतः।

**उभौ** – हा धिक् ! पतितोऽत्रभवान् जटायुः।

**प्रथमः** – भोः कष्टम्। एष खलु तत्र भवान् जटायुः।

**कृत्वा स्ववीर्यसदृशं परमं प्रयत्नं क्रीडामयूरमिव शत्रुमचिन्तयित्वा।**
**दीप्तं निशाचरपतेरवधूय तेजो नागेन्द्रभग्नवनवृक्ष इवावसन्नः॥४॥**

**प्रसङ्गः** – सीतायाः रक्षणकाले रावणः जटायोः दक्षिणस्कन्धे प्रहारं करोति, येन जटायुः तत्रैव पतित्वा प्राणान् त्यजति इत्यत्र महाकविना भासेन वर्णितम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**अन्वयः** – (एष जटायुः) शत्रुं क्रीडामयूरमिव अचिन्तयित्वा स्ववीर्यसदृशं परमं प्रयत्नं कृत्वा निशाचरपतेः दीप्तं तेजः अवधूय नागेन्द्रभग्नवनवृक्षः इव अवसन्नः।

**व्याख्या – (क) पर्यायपदानि** – (एष जटायुः), शत्रुं = रावणतुल्यं विपक्षं, क्रीडामयूरमिव = क्रीडनमिव, अचिन्तयित्वा = अविगणय्य, स्ववीर्यसदृशं = स्वबलोचितं, परमाम् = उत्तमं, प्रयत्नं = प्रयासं, कृत्वा = विधाय, निशाचरपतेः = रावणस्य, दीप्तं = सुसमिद्धं, तेजः = पराक्रमम्, अवधूय = तिरस्कृत्य, नागेन्द्रभग्नवनवृक्षः = करिणा भग्नः अरण्यद्रुमः, इव = यथा, अवसन्नः = नाशमुपगतः।

**(ख) भावार्थः** – एषः जटायुः स्वपराक्रमोचितम् उत्तमं प्रयासं विधाय क्रीडनकभूतं मयूरमिव रिपुं रावणम् अविगणय्य रावणस्य सुसमिदधं पराक्रमं तिरस्कृत्य च गजेन्द्रभग्नः अरण्यद्रुमः इव नाशमुपगतः।

**विशेषः** – श्लोकेऽस्मिन् वसन्ततिलका छन्दः अस्ति। अत्र उपमालङ्कारो विद्यते।

**उभौ** – स्वर्ग्योऽयमस्तु।

**प्रथमः** – काश्यप ! आगम्यताम्। इमं वृत्तान्तं तत्रभवते राघवाय निवेदयिष्यावः।

**द्वितीयः** – बाढम्। प्रथमः कल्पः। (निष्क्रान्तौ)

(इति विष्कम्भकः)

(ततः प्रविशति काञ्चुकीयः)

**काञ्चुकीयः** – क इह भोः ! काञ्चनतोरणद्वारमशून्यं कुरुते।

(प्रविश्य)

**प्रतिहारी** – अय्य ! अहं विजया किं करीअदु। [आर्य ! अहं विजया। किं क्रियताम् ?]

**काञ्चुकीयः** – विजये ! निवेद्यतां निवेद्यतां भरतकुमाराय – एष खलु रामदर्शनार्थं जनस्थानं प्रस्थितः प्रतिनिवृत्तस्तत्र भवान् सुमन्त्रः इति।

**प्रतिहारी** – अय्य ! अवि किदत्थो तादसुमन्तो आअदो। [आर्य अपि कृतार्थस्तात सुमन्त्रः आगतः।]

**काञ्चुकीयः** – भवति ! न जाने।

**हृदयस्थितशोकाग्निशोषिताननमागतम्।**
**दृष्ट्वैवाकुलमासीन्मे सुमन्त्रमधुना मनः ॥५॥**

**प्रसङ्गः** – सुमन्त्रः रामेण सह मेलनं कृत्वा भरतस्य समीपम् अयोध्यानरीम् आगच्छति। सुमन्त्रं दृष्ट्वा कञ्चुकीयः यद् वदति तदत्र वर्णितमस्ति।

**अन्वयः** – अधुना हृदयस्थितशोकाग्निशोषिताननम् आगतम् सुमन्त्रम् दृष्ट्वा एव मे मनः आकुलम् आसीत्।

**व्याख्या – (क) पर्यायपदानि** – अधुना = इदानीं, हृदये = चित्ते, स्थितेन = वर्तमानेन शोकरूपेण, अग्निना = वह्निना, शोषितम् आननं मुखं यस्य तथाभूतम्, आगतं = समागतं, सुमन्त्रं = दशरथसचिवं, दृष्ट्वा = अवलोक्य एव अर्थात् दर्शनकालमेव, मे = मम, मनः = चित्तं, पुनः, आकुलं = व्यग्रम्, आसीत् = अभवत्।

**(ख) भावार्थः** – मनसि अवस्थितेन रामनिर्वासनजन्मशोकरुपवह्निना शुष्कंवदनम् अयोध्यां समागतां तातं सुमन्त्रम् अवलोक्य इदानीं मम चित्तं व्याकुलं जातम्।

**विशेषः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति।

**प्रतिहारी** – अय्य ! एदं सूणिअ पय्याउलं विअ मे हिअअं। [आर्य ! एतच्छ्रुत्वा पर्याकुलमिव मे हृदयम्।]



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**काञ्चुकीयः** – भवति ! किमिदानीं स्थिता। शीघ्रं निवेद्यताम्।

**प्रतिहारी** – अय्य ! इअं णिवेदेमि। [ आर्य ! इयं निवेदयामि।] (निष्क्रान्ता)

**काञ्चुकीयः** – (विलोक्य) अये अयमत्रभवान्। भरतकुमारः सुमन्त्रागमनजनितकुतूहलहृदयश्चीर-वल्कलवसनश्छिन्नजटापुञ्जपिञ्जरितोत्तमाङ्ग इत एवाभिवर्तते। य एषः –

**प्रख्यातसद्गुणगणः प्रतिपक्षकाल-**
**स्तिग्मांशुवंशतिलकस्त्रिदशेन्द्रकल्पः।**
**आज्ञावशादखिलभूपरिरक्षणस्थः**
**श्रीमानुदारकलभेभसमानयानः ॥६॥**

**प्रसङ्गः** – यदा प्रतिहारी सुमन्त्रस्य आगमनस्य सूचनां दातुं भरतस्य समीपं गन्तुमिच्छति तदा आगन्तारं भरतं दृष्ट्वा यत् चिन्तयति तदत्र वर्णितमस्ति।

**अन्वयः** – प्रख्यातसद्गुणगणः प्रतिपक्षकालः तिग्माशुवंशतिलकः त्रिदशेन्द्रकल्पः आज्ञावशात् अखिलभूपरिरक्षणस्थः श्रीमान् उदारकलभेभसमानयानः (भरतः इत एवागच्छति)।

**व्याख्या** – **( क ) पर्यायपदानि** – प्रख्यातः = जगद्विदितः, सद्गुणानां = सुष्ठुगुणानां गणः समूहो यस्य तथाभूतः, प्रतिपक्षकालः = साक्षान्मृत्युस्वरूपः, तिग्मांशुवंशतिलकः = सूर्यवंशभूषणभूतः, त्रिदशेन्द्रकल्पं = सुराधिपादीषदूनः, आज्ञावशात् = रामस्यादेशानुरोधात्, अखिलभूपरिरक्षणस्थः = सर्वभूमिपालनाधिकारस्थितः, श्रीमान् = प्रशस्तश्रीकः, उदारकलभेभसमानयानः = प्रशस्तत्रिंशद्वर्षकुंजरतुल्यगमनः, (भरतः इत एवागच्छति)।

**( ख ) भावार्थः** – सुप्रसिद्धो शौर्यौदार्यादिसद्गुणसमवायः, शत्रूणां साक्षात् मृत्युस्वरुपः, सूर्यवंशललाटभूषणः, देवराजइन्द्रसदृशः भ्रातुर्निर्देशेन समस्तपृथिवीपालनवहितः, प्रशस्तिश्रीकः विशालः करिशावकवत् गतिमानः एषः भरतः अत्रैव आगच्छति।

**विशेषः** – श्लोकेऽस्मिन् वसन्ततिलका छन्दः अस्ति। अत्र उपमालंकारः अस्ति।

(ततः प्रविशति भरतः प्रतिहारी च)

**भरतः** – विजये ! एवमुपगतस्तत्रभवान् सुमन्त्रः।

**गत्वा तु पूर्वमयमार्यनिरीक्षणार्थं**
**लब्धप्रसादशपथे मयि सन्निवृत्ते।**
**दृष्ट्वा किमागत इहात्रभवान् सुमन्त्रो**
**रामं प्रजानयनबुद्धिमनोभिरामम् ॥७॥**

**प्रसङ्गः** – रामस्य समीपात् सुमन्त्रस्य आगमनस्य समाचारं श्रुत्वा भरतः प्रतिहारिणं यद् वदति तदत्र वर्णितमस्ति।

**अन्वयः** – लब्धप्रसादशपथे मयि सन्निवृत्ते अयम् अत्र भवान् सुमन्त्रः पूर्वम् आर्यनिरीक्षणार्थं गत्वा प्रजानयनबुद्धिमनोभिरामं रामं दृष्ट्वा इह आगतः किम् ?

**व्याख्या** – **( क ) पर्यायपदानि** – लब्धप्रसादशपथे = लब्धः प्रसादो रामपादुकालक्षणः शपथः, चतुर्दशवर्षान्ते राज्यं प्रतिग्रहीष्यामि इत्येवं लक्षणो येन तस्मिन् तथाभूते, मयि = भरते, सन्निवृत्ते = रामसकाशादागते, अयमत्रभवान् = पूज्यः, सुमन्त्रः, पूर्वं = प्रथमवारम्, आर्यस्य = रामस्य, निरीक्षणार्थं = दर्शनार्थं, गत्वा,



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

प्रजानयनबुद्धिमनोभिरामं = प्रजानां नयनयोः बुद्धेर्मनसश्च रमणीयं, रामं = ज्येष्ठभ्रातरं कौशल्यासुतं, दृष्ट्वा = अवलोक्य, इह = अत्र, आगतः = समागतः किमिति प्रश्ने।

**( ख ) भावार्थः** – रामस्य चरणपादुकां तथा च चतुर्दशवर्षान्ते राज्यं प्रतिग्रहीष्यामि इत्येवं शपथं स्वीकृत्य भरते रामसकाशात् प्रत्यागते एषः पूज्यः सुमन्त्रः प्रथमवारं रामस्य दर्शनार्थं दण्डकाख्यभूमिं प्रपद्य जनानां नेत्राणां मनसां च रमणीयम् आनन्ददातारं ज्येष्ठभ्रातरं राघवं विलोक्य अत्र राजधानीं समागतः किम्?

**विशेषः** – श्लोकेऽस्मिन् वसन्ततिलकाछन्दः अस्ति।

**काञ्चुकीयः** – (उपगम्य) जयतु कुमारः।

**भरतः** – अथ कस्मिन् प्रदेशे वर्तते तत्रभवान् सुमन्त्रः?

**काञ्चुकीयः** – असौ काञ्चनतोरणद्वारे।

**भरतः** – तेन हि शीघ्रं प्रवेश्यताम्।

**काञ्चुकीयः** – यदाज्ञापयति कुमारः। (निष्क्रान्तौ)

(ततः प्रविशति सुमन्त्रः प्रतिहारी च)

**सुमन्त्रः** – (सशोकं) कष्टं भोः! कष्टम्।

**नरपतिनिधनं मयानुभूतं नृपतिसुतव्यसनं मयैव दृष्टम्।**
**श्रुत इह स च मैथिलीप्रणाशो गुण इव बह्वपराद्धमायुषा मे॥८॥**

**प्रसङ्गः** – सुमन्त्रः रामस्य सकाशात् अयोध्यामागतः। पुनः भरतस्य समीपं गमनात् पूर्वं चिन्तयति यत् दीर्घजीवित्वरूपेण मया बहु अपराधः कृतः इति अत्र महाकविना भासेन वर्णितम्।

**अन्वयः** – मया नरपतिनिधनम् अनुभूतं नृपतिसुतव्यसनं मया एव दृष्टम्, इह च मैथिलीप्रणाशः श्रुतः, मे आयुषा गुणे इव बह्वपराद्धम्।

**व्याख्या – ( क ) पर्यायपदानि** – मया = सुमन्त्रेण, नरपतिनिधनं = दशरथमरणम्, अनुभूतं = प्रत्यक्षीकृतं, नृपतिसुतव्यसनं = रामवनवासजन्यदुःखं, दृष्टम् = अवलोकितम्, इह च = अस्मिन् आयुषि च, मैथिलीप्रणाशः = सीताहरणं, श्रुतः = ज्ञातः, मे = मम, आयुषा गुण इव = दीर्घजीवित्वरूपेण इव, बह्वपराद्धम् = आयुषो दीर्घत्वं गुण एव चात्र दोषो जातः।

**( ख ) भावार्थः** – सुमन्त्रेण दशरथस्य मरणं प्रत्यक्षीकृतं, रामवनवासजन्मदुःखं विलोकितम्। अस्मिन् आयुषि च प्रसिद्धायाः मैथिल्याः सीतायाः रावणकृतमपहरणम् आकर्णितम्। परमायुषा दीर्घजीवित्वरूपेण भृशमपराधः कृतः।

**विशेषः** – श्लोकेऽस्मिन् पुष्पिताग्राछन्दः अस्ति। अत्र समुच्चयोऽलंकारः अस्ति।

**प्रतिहारी** – (सुमन्त्रमुद्दिश्य) एदु एदु अय्यो। एसो भट्टा। उपसप्पदु अय्यो। [एत्वेत्वार्यः। एष भर्ता उपसर्पत्वार्यः।]

**सुमन्त्रः** – (उपसृत्य) जयतु कुमारः।

**भरतः** – तात! अपि दृष्टस्त्वया लोकाविष्कृतपितृस्नेहः। अपि दृष्टं द्विधाभूतमरुन्धतीचारित्रम्। अपि दृष्टं त्वया निष्कारणावहितवनवासं सौभ्रात्रम्?

(सुमन्त्रः सचिन्तस्तिष्ठति)



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**प्रतिहारी** – भट्टिददारओ खु अय्यं पुच्छदि। [ भर्तृदारकः खल्वार्यं पृच्छति।]

**सुमन्त्रः** – भवति ! किं माम् ?

**भरतः** – (स्वगतम्) अतिमहान् खल्वायासः। सन्तापाद् भ्रष्टहृदयः। (प्रकाशम्) अपि मार्गात् प्रतिनिवृत्तस्तत्रभवान्।

**सुमन्त्रः** – कुमार ! त्वन्नियोगाद् रामदर्शनार्थं जनस्थानं प्रस्थितः कथमहमन्तरा प्रतिनिवर्तिष्ये।

**भरतः** – किन्नु खलु क्रोधेन वा लज्जया वात्मानं न दर्शयन्ति।

**सुमन्त्रः** – कुमार !

**कुतः क्रोधो विनीतानां लज्जा वा कृतचेतसाम्।**
**मया दृष्टं तु तच्छून्यं तैर्विहीनं तपोवनम्॥९॥**

**प्रसङ्गः** – सुमन्त्रस्य औदासीन्यं दृष्ट्वा यदा भरतः पृच्छति यत् क्रोधेन लज्जया वा भ्रात्रा दर्शनं न दत्तं तदा सुमन्त्रः भरताय प्रत्युत्तरं ददाति इत्यत्र वर्णितमस्ति।

**अन्वयः** – विनीतानां क्रोधः कुतः ?वा कृतचेतसां लज्जा कुतः ?मया तु तैः विहीनं तच्छून्यं तपोवनं दृष्टम्।

**व्याख्या** – **( क ) पर्यायपदानि** – विनीतानां = विनयावनतानां, क्रोधः = कोपः, कुतः = कस्मात् कारणात्, वा = अथवा, कृतचेतसां = कृतं सुसंस्कृतं चेतो येषां, लज्जा = ह्रीं, कुतः, तद्दर्शनं न क्रोधेन न लज्जया वा जनितं, मया = सुमन्त्रेण, तैर्विहीनं = विरहितम्, अत एव शून्यं = रिक्तम् इव, तपोवनं = दण्डकारण्यं, दृष्टम् = अवलोकितम्।

**( ख ) भावार्थः** – विनयावनतानां कोपः कस्मात् ? सुसंस्कृतचेतसां लज्जा वा कुतः ? सुमन्त्रेण रामादिभिः रहितं रिक्तं जनस्थानं दण्डकारण्यं विलोकितम् इति भावः।

**विशेषः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति।

**भरतः** – अथ क्व गता इति श्रुताः ?

**सुमन्त्रः** – अस्ति किल किष्किन्धा नाम वनौकसां निवासः। तत्र गता इति श्रुताः।

**भरतः** – हन्त अविज्ञातपुरुषविशेषाः खलु वानराः। दुखिताः प्रतिवसन्ति।

**सुमन्त्रः** – कुमार ! तिर्यग्योनयोऽप्युपकृतमवगच्छन्ति।

**भरतः** – तात ! कथमिव ?

**सुमन्त्रः** –

**सुग्रीवो भ्रंशितो राज्याद् भ्राता ज्येष्ठेन बालिना।**
**हृतदारो वसञ्छैले तुल्यदुःखेन मोक्षितः॥१०॥**

**प्रसङ्गः** – दण्डकारण्यात् आगत्य सुमन्त्रः ज्येष्ठभ्राता बालिना तिरस्कृतस्य सुग्रीवस्य विषये भरतं वदति।

**अन्वयः** – ज्येष्ठेन बालिना भ्राता सुग्रीवः राज्यात् भ्रंशितः, हृतदारः शैले वसन् तुल्यदुःखेन मोक्षितः।

**व्याख्या** – **( क ) पर्यायपदानि** – ज्येष्ठेन = अग्रजन्मना बालिना, भ्राता = अनुजः, सुग्रीवः = तन्नामकः, वानरराजः राज्यात्, भ्रंशितः = अपहृतराज्यलक्ष्मीकः, हृतदारः = स्वायनीकृतपत्नीकः, शैले = पर्वते, वसन् = निवासं कुर्वन्, तुल्यदुःखेन = समानकष्टेन रामेण, मोक्षितः = मोक्षं प्रापितम्।

**( ख ) भावार्थः** – अग्रजन्मना सहोदरेण बालिना अपहृतराज्यलक्ष्मीकः स्वायत्तीकृतपत्नीकः ऋष्यमूकपर्वते निवसन् सुग्रीवः तुल्यं समानं दुःखं हृतदारत्वलक्षणं यस्य तथाभूतेन रामेण तत् दुःखात् मोक्षं प्रापितम्।

**विशेषः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**भरतः** – तात ! कथं तुल्यदु:खेन नाम ?

**सुमन्त्रः** – (आत्मगतं) हन्त सर्वमुक्तमेव मया। (प्रकाशं) कुमार! नं खलु किञ्चित्। ऐश्वर्यभ्रंशतुल्यता ममाभिप्रेता।

**भरतः** – तात ! किं गूहसे ?स्वर्गं गतेन महाराजपादमूलेन शापितः स्याः, यदि सत्यं न ब्रूयाः।

**सुमन्त्रः** – का गतिः ? श्रूयतां –

**वैरं मुनिजनस्यार्थे रक्षसा महता कृतम्।**
**सीता मायामुपाश्रित्य रावणेन ततो हृता॥ ११॥**

**प्रसङ्गः** – दण्डकारण्यात् आगत्य सुमन्त्रः सीताहरणविषयं समाचारं भरतं प्रति कथयति इति वर्णयति महाकविः भासः।

**अन्वयः** – (रामेण) मुनिजनस्य अर्थे महत्ता रक्षसा (सह) वैरं कृतं, ततः रावणेन मायाम् उपाश्रित्य सीता हृता।

**व्याख्या – (क) पर्यायपदानि** – मुनिजनस्य = ऋषिजनस्य, अर्थे = कृते, महता = बलवता, रक्षसा = रावणेन, वैरं = विरोधं, कृतं = विहितः, ततः = तस्मात्, रावणेन = दशकन्धरेण, मायां = कपटम्, उपाश्रित्य = ग्रहणं कृत्वा, सीता = जानकी, हृता = चोरिता।

**(ख) भावार्थः** – रामेण ऋषिजनस्य कृते बलवता रावणेन विरोधः विहितः तस्मात् कारणात् दशाननेन कपटं समाश्रित्य जानकी चोरिता अपहृता इति भावः।

**विशेषः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति।

**भरतः** – कथं हृतेति ?(मोहमुपगतः)

**सुमन्त्रः** – समाश्वसिहि समाश्वसिहि।

**भरतः** – (पुनः समाश्वस्य) भोः ! कष्टम्।

**पित्रा च बान्धवजनेन च विप्रयुक्तो**
**दुःखं महत् समनुभूय वनप्रदेशे।**
**भार्यावियोगमुपलभ्य पुनर्ममार्यो**
**जीमूतचन्द्र इव खे प्रभया वियुक्तः॥ १२॥**

**प्रसङ्गः** – सीतायाः अपहरणविषयकसमाचारं श्रुत्वा भरतः रामस्य विषये चिन्तयति इत्यत्र वर्णितमस्ति महाकविभासेन।

**अन्वयः** – मम आर्यः पित्रा बान्धवजनेन च विप्रयुक्तः वनप्रदेशे महत् दुःखं समनुभूय, भार्यावियोगम् उपलभ्य, पुनः खे जीमूतचन्द्र इव प्रभया वियुक्तः।

**व्याख्या – (क) पर्यायपदानि** – मम = भरतस्य, आर्यः = मान्यः रामः, पित्रा = दशरथेन, बान्धवजनेन = पारिवारिकसदस्येन, विप्रयुक्तः = दूरीकृतः, वनप्रदेशे = अरण्यदेशे, महत् = दुस्सहं, दुःखं = क्लेशम्, अनुभूय = प्राप्य, भार्यावियोगं = पत्नीविरहम्, उपलभ्य = आसाद्य, पुनः, खे = आकाशे, जीमूतचन्द्र इव = मेघाच्छन्ननिशाकर इव, प्रभया = ज्योत्स्नया, वियुक्तः = विरहितो जातः।

**(ख) भावार्थः** – भरतस्य अग्रजः रामः जनकेन दशरथेन बन्धुवर्गेण च दूरीकृतः अरण्यप्रदेशे दुःसहं क्लेशं लब्ध्वा भूयः सीताविप्रवासजन्यपत्नीविरहं प्राप्य आकाशे मेघावृत्तनिशाकरवत् कान्त्या विरहितः जातः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**विशेषः** – श्लोकेऽस्मिन् वसन्ततिलकाछन्दः अस्ति। अत्र उपमालंकारः अस्ति।

भोः ! किमिदानीं करिष्ये। भवतु दृष्टम्। अनुगच्छतु मां तातः।

**सुमन्त्रः** – यदाज्ञापयति कुमारः।

(उभौ परिक्रामतः)

**सुमन्त्र** – कुमार ! न खलु न खलु गन्तव्यम्। देवीनां चतुश्शालमिदम्।

**भरतः** – अत्रैव मे कार्यम्। भोः ! क इह प्रतिहारे ?

(प्रविश्य)

**प्रतिहारी** – जेदु भट्टिदारओ। विजआ खु अहं [जयतु भर्तृदारकः। विजया खल्वहम्।]

**भरतः** – विजये ! ममागमनं निवेदयात्रभवत्यै।

**प्रतिहारी** – कदमाए भट्टिणीए णिवेदेमि। [कतमस्यै भट्टिन्यै निवेदयामि।]

**भरतः** – या मां राजानमिच्छति।

**प्रतिहारी** – (आत्मगतं) हं किंणु खु भवे। (प्रकाशं) भट्टा ?तह। [हं किन्तु खलु भवेत् ? भर्तः तथा।]

(निष्क्रान्ताः)

(ततः प्रविशति कैकेयी प्रतिहारी च)

**कैकेयी** – विजए ! मं पेक्खिदुं भरदो आअदो। [विजये ! मां प्रेक्षितुं भरत आगतः ?]

**प्रतिहारी** – भट्टिणी ! तह भट्टिदारअस्स रामस्स सआसादो तादसुमन्तो आअदो। तेण सह भट्टिदारओ भरदो भट्टिणीं पेक्खिदुं इच्छदि किल। [भट्टिनि ! तथा। भर्तृदारकस्य रामस्य सकाशात् तातसुमन्त्र आगतः, तेन सह भर्तृदारको भरतो भट्टिनीं प्रेक्षितुमिच्छति किल।]

**कैकेयी** – (स्वगतं) केण खु उग्दाधेण मं उव्वालम्भिस्सदि भरदो। [केन खलूद्घातेन मामुपालप्स्यते भरतः।]

**प्रतिहारी** – भट्टिणि ! किं पविसदु भट्टिदारओ। [भट्टिनि ! किं प्रविशतु भर्तृदारकः ?]

**कैकेयी** – गच्छ। पवेसेहि णं। [गच्छ। प्रवेशयैनम्।]

**प्रतिहारी** – भट्टिणि ! तह। (परिक्रम्योपसृत्य) जेदु भट्टिदारओ। पविसदु किल। [भट्टिनि ! तथा। जयतु भर्तृदारकः। प्रविशतु किल।]

**भरतः** – विजये ! किं निवेदितम् ?

**प्रतिहारी** – आम्।

**भरतः** – तेन हि प्रविशावः।

(प्रविशतः)

**कैकेयी** – जाद ? विअआ मन्तेदि रामस्स सआसादो सुमन्तो आअदत्ति। [जात ! विजया मन्त्रयते – रामस्य सकाशात् सुमन्त्र आगत इति।]

**भरतः** – अतः परं प्रियं निवेदयाम्यत्रभवत्यै।

**कैकेयी** – जाद ! अवि कौसल्ला सुमित्ता अ सद्दावइदव्वा। [जात ! अपि कौसल्या सुमित्रा च शब्दापयितव्या।]



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**भरतः** – न खलु ताभ्यां श्रोतव्यम्।

**कैकेयी** – (आत्मगतं) हं किंणु हु भवे। (प्रकाशं) भणाहि जाद! [हं किन्नु खलु भवेत्? भण जात!]

**भरतः** – श्रूयतां –

**स्वराज्यं परित्यज्य त्वन्नियोगाद् वनं गतः।**
**तस्य भार्या हृता सीता पर्याप्तस्ते मनोरथः॥१३॥**

**प्रसङ्गः** – भरतः सुमन्त्रेण सह कैकय्याः समीपमागत्य सीताहरणवृत्तान्तं व्यङ्ग्यपूर्वकं श्रावयन् वदति यत् इदानीं भवत्याः सम्पूर्णमनोरथः पूर्णः जातः इत्यत्र वर्णितमस्ति।

**अन्वयः** – यः त्वन्नियोगात् स्वराज्यं परित्यज्य वनं गतः, तस्य भार्या सीता हृता, (अतः) ते मनोरथः पर्याप्तः।

**संस्कृत-व्याख्या – (क) पर्यायशब्दाः** – यः = रामः, त्वन्नियोगात् = तव वचनात्, स्वराज्यं = निजसाम्राज्यं, परित्यज्य = त्यक्त्वा, वनम् = अरण्यं, गतः, तस्य = रामस्य, भार्या = पत्नी, हृता = अपहृता, ते = तव, मनोरथः = अभिलाषः, पर्याप्तः = पूरितः।

**(ख) भावार्थः** – रामः तव आदेशात् आत्मनः राज्यं त्यक्त्वा अरण्यं यातः रामस्य पत्नी जानकी च अपहृता। अतः इदानीं तव अभिलाषः पूरितः।

**विशेषः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति।

**कैकेयी** – हम्!

**भरतः** –

**हन्त भोः सत्त्वयुक्तानामिक्ष्वाकूणां मनस्विनाम्।**
**वधूप्रधर्षणं प्राप्तं प्राप्यात्रभवतीं वधूम्॥१४॥**

**प्रसङ्गः** – भरतः पुनः सीताहरणस्य परोक्षरूपेण कारणं कैकेयीमेव मन्यते इत्यत्र वर्णितमस्ति महाकविना भासेन।

**अन्वयः** – हन्त भोः! अत्रभवतीं वधूं प्राप्य सत्त्वयुक्तानां मनस्विनाम् इक्ष्वाकूणां वधूप्रधर्षणं प्राप्तम्।

**संस्कृत-व्याख्या – (क) पर्यायशब्दाः** – हन्त = इति खेदे, अत्र भवतीं = पूजनीयां, वधूं = पुत्रवधूं, प्राप्य = लब्धा, सत्त्वयुक्तानां = पराक्रमशालिनां, मनस्विनां = मानवताम्, इक्ष्वाकूणां = तदाख्यवंशोद्भवानां, वधूप्रधर्षणं = नारीहरणं, प्राप्तम् = उपनतम्॥

**(ख) भावार्थः** – एतत् कष्टं पूजनीयां वधूत्वेन लब्ध्वा पराक्रमशालिनां महापुरुषाणां तदाख्यवंशाद्भवानां नृपाणां स्त्रीहरणं (सीतायाः हरणम्) अभवत्।

**विशेषः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति।

**कैकेयी** – (आत्मगतं) भोदु दाणि कालो कहेदुं। (प्रकाशं) जाद! तुवं ण आणासि महाराअस्स सावं। [भवतु इदानीं कालः कथयितुम्। जात! त्वं न जानासि महाराजस्य शापम्।]

**भरतः** – किं शप्तो महाराजः?

**कैकेयी** – सुमन्त! आअक्ख वित्थरेण। [सुमन्त्र! आचक्ष्व विस्तरेण।]

**सुमन्त्रः** – यदाज्ञापयति भवती। कुमार! श्रूयतां – पुरा मृगयां गतेन महाराजेन कस्मिंश्चित् सरसि कलशं पूरयमाणो वनगजबृंहितानुकारिशब्दसमुत्पन्नवनगजशङ्कया शब्दवेधिना शरेण विपन्नचक्षुषो



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

महर्षेश्चक्षुर्भूतो मुनितनयो हिंसितः।

**भरतः** – हिंसित इति। शान्तं पापं शान्तं पापम्। ततस्ततः ?

**सुमन्त्रः** – ततस्तमेव गतं दृष्ट्वा –

**तेनोक्तं रुदितस्यान्ते मुनिना सत्यभाषिणा।**
**यथाहं भोस्त्वमप्येवं पुत्रशोकाद् विपत्स्यसे॥१५॥**

**प्रसङ्गः** – कैकय्याः आदेशानुसारं सुमन्त्रः महर्षेः शापविषयकवार्त्तां भरतं कथयति यस्मात् शापात् कारणात् कैकय्या रामः वनं प्रेषितः इत्यत्र वर्णितमस्ति।

**अन्वयः** – सत्यभाषिणा तेन मुनिना रुदितस्य अन्ते भोः! यथाहं पुत्रशोकात् (विपद्ये), त्वमपि एवं विपत्स्यसे (इति) उक्तम्।

**संस्कृत-व्याख्या – (क) पर्यायशब्दाः** – सत्यभाषिणा = अवितथवचनेन, तेन = मुनिना, रुदितस्य = रोदनस्य, अन्ते = अन्तिमकाले, यथाऽहं = येन प्रकारेणाहं, पुत्रशोकात् = तनयवियोगात्, विपद्ये, एवम् = अनेन प्रकारेण, त्वमपि = भवानपि, एवम् = अननैव प्रकारेण, विपत्स्यसे = मरिष्यसि, इत्यमेवमुक्तम् = अभिशप्तम्।

**(ख) भावार्थः** – अवितथवचनेन महर्षिणा अन्धेन रोदनस्य समाप्तिपरम् अभिशप्तं भोः। अन्धः अहं यथा सुतस्य विरहजन्यपरितापात् प्राणान् त्यजामि तथैव भवानपि पुत्रवियोगात् मरिष्यति।

**विशेषः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति।

**भरतः** – नन्विदं कष्टं नाम।

**कैकेयी** – जाद! एदण्णिमित्तं अवराहे मं णिक्खिविअ पुत्तओ रामो वणं पेसिदो, णाहु रज्जलोहेण। अपरिहरणीओ महरिसिसावो पुत्तविप्पवास विणा ण होइ। [जात! एतन्निमित्तमपराधे मां निक्षिप्य पुत्रको रामो वनं प्रेषितः, न खलु राज्यलोभेन। अपरिहरणीयो महर्षिशापः पुत्रविप्रवासं विना न भवति।]

**भरतः** – अथ तुल्ये पुत्रविप्रवासे कथमहमरण्यं न प्रेषितः ?

**कैकेयी** – जाद! मादुलकुले वत्तमाणस्स पइदीहूदो दे विप्पवासो। [जात! मातुलकुले वर्तमानस्य प्रकृतीभूतस्ते विप्रवासः।]

**भरतः** – अथ चतुर्दश वर्षाणि किं कारणमवेक्षितानि ?

**कैकेयी** – जाद! चउद्दसदिअस त्ति वत्तकामाए पय्याउलहिअआए जउद्दश वरिसाणि त्ति उत्तं। [जात! चतुर्दश दिवसा इति वक्तुकामया पर्याकुलहृदयया चतुर्दश वर्षाणीत्युक्तम्।]

**भरतः** – अस्ति पाण्डित्यं सम्यग् विचारयितुम्। अथ विदितमेतद् गुरुजनस्य ?

**सुमन्त्रः** – कुमार! वसिष्ठवामदेवप्रभृतीनामनुमतं विदितं च।

**भरतः** – हन्त! त्रैलोक्यसाक्षिणः खल्वेते। दिष्ट्यानपराद्धात्रभवती। अम्ब! यद्भ्रातृस्नेहात् समुत्पन्नमन्युना मया दूषितात्रभवती, तत् सर्वं मर्षयितव्यम्। अम्ब! अभिवादये।

**कैकेयी** – जाद! का णाम माता पुत्तअस्स अवराहं ण मरिसेदि। उट्ठेहि उट्ठेहि। को एत्थ दोसो। [जात! का नाम माता पुत्रकस्यापराधं न मर्षयति। उत्तिष्ठोत्तिष्ठ। कोऽत्र दोषः ?]

**भरतः** – अनुगृहीतोऽस्मि। आपृच्छाम्यत्रभवतीम्। अद्यैवाहमार्यस्य साहाय्यार्थं कृत्स्नं राजमण्डलमुद्योजयामि। अयमिदानीं –



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**वेलामिमां मत्तगजान्धकारां करोमि सैन्यौघनिवेशनद्धाम्।**
**बलैस्तरद्भिश्च नयामि तुल्यं ग्लानिं समुद्रं सह रावणेन॥१६॥**

**प्रसङ्गः** – यदा भरतः ज्ञातवान् यत् मम माता निर्दोषा अस्ति तदा रामस्य साहाय्यार्थं भरतः सकलसैन्यसमूहेन सह गत्वा रावणं मारितुमिच्छति इत्यत्र वर्णितमस्ति महाकविना भासेन।

**अन्वयः** – इमां वेलां मत्तगजान्धकारां सैन्यौघनिवेशनद्धां करोमि, तरद्भिः बलैश्च रावणेन सह समुद्रं तुल्यं ग्लानिं नयामि।

**संस्कृत-व्याख्या** – **(क) पर्यायशब्दाः** – इमाम् = अमुं, वेलां = समुद्रकूलं, मत्तगजान्धकारां = प्रमत्तगजरूपान्धकारवतीं, सैन्यौघनिवेशनद्धां = सेनाशिविरव्याप्तां, करोमि = विदधामि। तरद्भिः = लङ्घयद्भिः, बलैः = सैन्यैश्च, रावणेन सह = राक्षसेन्द्रेण सह, समुद्रं = सागरं, तुल्यं = समकालं, ग्लानिं = हर्षक्षयभाजं, नयामि = करोमि॥

**(ख) भावार्थः** – अमुं सागरतटभूमिं मदोन्मत्तकरितमोव्याप्तां सेनासमूहशिविरावृत्तां विदधामि। सागरं प्लवमानैः सैनिकैः दशाननेन साकम् अब्धिं समानं प्रापयामि।

**विशेषः** – श्लोकेऽस्मिन् उपजातिछन्दः अस्ति। अत्र च सहोक्तिरलंकारः अस्ति।

अये शब्द इव। तूर्णं ज्ञायतां शब्दः।

(प्रविश्य)

**प्रतिहारी** – जेदु कुमारी। इमं वुत्तन्तं सुणिय जेट्ठभट्टिणी मोहं गआ। [जयतु कुमारः। इमं वृत्तान्तं श्रुत्वा ज्येष्ठभट्टिनी मोहं गता।]

**कैकेयी** – हम्।

**भरतः** – कथं मोहमुपगताम्बा?

**कैकेयी** – एहि! जाद! अय्यं अस्सासइस्सामो [एहि! जात! आर्यामाश्वासयिष्याव:।]

**भरतः** – यदाज्ञापयत्यम्बा।

(निष्क्रान्ताः सर्वे)

**इति षष्ठोऽङ्कः**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# अथ सप्तमोऽङ्कः

(ततः प्रविशति तापसः)

**तापसः** – नन्दिलक ! नन्दिलक !

(प्रविश्य)

**नन्दिलकः** – अय्य ! अअं ह्मि। [आर्य ! अयमस्मि।]

**तापसः** – नन्दिलक! कुलपतिर्विज्ञापयति – एष खलु स्वदारापहारिणं त्रैलोक्यविद्रावणं रावणं नाशयित्वा राक्षसगणविरुद्धवृत्तं गुणगणविभूषणं विभीषणमभिषिच्य देवदेवर्षिसिद्धविमलचारित्रां तत्रभवतीं सीतामादाय ऋक्षराक्षसवानरमुख्यैः परिवृत्तः सम्प्राप्तस्तत्रभवान् शरद्विमलगगनचन्द्राभिरामो रामः। तदद्यास्मिन्नाश्रमपदेऽस्मद्विभवेन यत् सङ्कल्पयितव्यं तत् सर्वं सज्जीक्रियतामिति।

**नन्दिलकः** – अय्य ! सव्वं सज्जीकिदं। किन्तु, [आर्य ! सर्वं सज्जीकृतम्। किन्तु]

**तापसः** – किमेतत् ?

**नन्दिलकः** – एत्थ विभीषणकेरआ रक्खसा। तेसं भक्खणणिमित्तं कुलवदी पमाणं। [अत्र विभीषणसम्बन्धिनो राक्षसाः। तेषां भक्षणनिमित्तं कुलपतिः प्रमाणम्।]

**तापसः** – किमर्थम् ?

**नन्दिलकः** – ते खु खज्जन्ति। [ते खलु खादन्ति।]

**तापसः** – अलमलं सम्भ्रमेण। विभीषणविधेयाः खलु राक्षसाः।

**नन्दिलकः** – णमो रक्खससज्जणाअ। (निष्क्रान्तः) [नमो राक्षससज्जनाय।]

**तापसः** – (विलोक्य) अये अयमत्रभवान् राघवः। य एषः –

> **जय नरवर! जेयः स्याद् द्वितीयस्तवारि-**
> **स्तव भवतु विधेया भूमिरेकातपत्रा।**
> **इति मुनिभिरनेकैः स्तूयमानः प्रसन्नैः**
> **क्षितितलमवतीर्णो मानवेन्द्रो विमानात्॥ १ ॥**

**प्रसङ्गः** – रावणवधानन्तरं रामः सीतया लक्ष्मणेन च साकं पुष्पकविमानेन लंकानगरीतः अयोध्यां प्रति आगमनकाले मार्गे मुनीनाम् आश्रमं गच्छति तदा एव तपस्विजनाः पुष्पकविमानात् पृथिवीतलमवतरणकाले रामाय आशीर्वचनं यच्छति इत्यत्र वर्णितमस्ति महाकविना भासेन।

**अन्वयः** – जय नरवर ! तव द्वितीयः, अरिः जेयः स्यात्, भूमिः एकातपत्रा तव विधेया भवतु इति प्रसन्नैः अनेकैः मुनिभिः स्तूयमानः मानवेन्द्रः विमानात् क्षितितलम् अवतीर्णः।

**संस्कृत-व्याख्या – ( क ) पर्यायशब्दाः** – जय = सर्वोत्कर्षेण वर्तस्व, नरवर = पुरुषश्रेष्ठ, तव = भवतः, द्वितीयः = अपरः, अरिः = शत्रुः, जेयः = जेतुमर्हः, स्यात् = भवेत्, भूमिः = पृथ्वी, एकातपत्रा = एकच्छत्रं, तव = भवतः, विधेया = प्रशंसनीया, भवतु = स्यात्, इति = इत्थं, प्रसन्नैः = रावणवधसन्तुष्टैः, अनेकैः = भूरिभिः, मुनिभिः = ऋषिभिः, स्तूयमानः = प्रशस्यमानः, मानवेन्द्रः = नरेन्द्रः, विमानात् = व्योमयानात्, क्षितितलं = पृथ्वीतलम्, अवतीर्णः = अवरूढः।

**( ख ) भावार्थः** – हे पुरुषश्रेष्ठ ! सवोत्कर्षेण वर्तस्व। ते रावणापेक्षया परः शत्रोः शक्त्या पराभवितुं योग्यः



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

भवेत्। पृथ्वी अप्रतिद्वन्द्वशासनात् तव वशवर्तिनी जायताम्। इत्थं बहुभिः दशाननवधसन्तुष्टैः ऋषिभिः वन्द्यमानः नरेश्वरः श्रीरामचन्द्रः पुष्पकविमानात् पृथिवीतलम् अवतरितवान्।

**विशेषः** – श्लोकेऽस्मिन् मालिनीछन्दः विद्यते।

जयतु भवान् जयतु। (निष्क्रान्तः)

(मिश्रविष्कम्भकः)

(ततः प्रविशति रामः)

**रामः** – भोः !

**समुदितबलवीर्यं रावणं नाशयित्वा**
**जगति गुणसमग्रां प्राप्य सीतां विशुद्धाम्।**
**वचनमपि गुरूणामन्तशः पूरयित्वा**
**मुनिजनवनवासं प्राप्तवानस्मि भूयः॥२॥**

**प्रसङ्गः** – लङ्कातः रावणं नाशयित्वा सीतया सह रामः मुनिजनानां तपोवनम् आगतः इत्यत्र वर्णितमस्ति महाकविना भासेन।

**अन्वयः** – समुदितबलवीर्यं रावणं नाशयित्वा जगति गुणसमग्रां विशुद्धां सीतां प्राप्य गुरूणां वचनम् अन्तशः पूरयित्वा भूयः मुनिजनवनवासं प्राप्तवानस्मि।

**संस्कृत-व्याख्या – (क) पर्यायशब्दाः** – समुदितबलवीर्यं = सम्यक् वृद्धं बलवीर्यं यस्य तं, रावणं = निशाचरनाथं, नाशयित्वा = विनाश्य, जगति = संसारे, गुणसमग्रां = सकलगुणयुतां, विशुद्धां = पवित्रां, सीतां = स्वपत्नीं जानकीं, प्राप्य = पुनरासाद्य, गुरूणां = पित्रादीनां, वचनम् = आदेशम्, अन्तशः = अक्षरशः, पूरयित्वा = परिपाल्य, भूयः = पुनः, मुनिजनवनवासं = मुनिजनाध्युषितवनवर्तिप्राचीनस्वनिवास देशं प्राप्तवानस्मि।

**(ख) भावार्थः** – उत्कृष्टसैन्यशक्तियुक्तं निशाचरनाथं विनाश्य संसारे स्त्रीजनोचितगुणपरिपूर्णाम् अग्निपरीक्षाप्रमाणितनिष्कलंकचरित्रां जानकीं पुनरासाद्य तातपादानाम् आदेशमपि अक्षरशः परिपाल्य पुनः मुनिजनाध्युषितारण्यम् आगतोऽसि।

**विशेषः** – श्लोकेऽस्मिन् मालिनीछन्दः अस्ति।

तापसीनामभिवन्दनार्थमभ्यन्तरं प्रविष्टा चिरायते खलु मैथिली। (विलोक्य) अये इयं वैदेही।

**सखीति सीतेति च जानकीति यथावयः स्निग्धतरं स्नुषेति।**
**तपस्विदारैर्जनकेन्द्रपुत्री सम्भाष्यमाणा समुपैति मन्दम्॥३॥**

**प्रसङ्गः** – तापसीनाम् अभिवादनं कृत्वा कुटीरतः बहिः आगच्छन्तीं सीतां दृष्ट्वा रामः वदति इत्यत्र वर्णितमस्ति महाकविना भासेन।

**अन्वयः** – जनकेन्द्रपुत्री यथावयः सखीति, सीतेति च जानकीति, स्नुषा इति, स्निग्धतरं तपस्विदारैः सम्भाष्यमाणा मन्दं समुपैति।

**संस्कृत-व्याख्या – (क) पर्यायशब्दाः** – जनकेन्द्रपुत्री = जानकी, यथावयः = स्वस्थ्य-अवस्थानुरूपं, सखीति = तुल्यवयोभिः, सीतेति = जानकीति च, वयसाधिकाभिः = वृद्धाभिस्य, स्नुषेति, तपस्विदारैः = मुनिपत्नीभिः, स्निग्धतरम् = अतिप्रेम्णा यथा स्यात्तथा सम्भाष्यमाणा = आलप्यमाणा, मन्दं = शनैः शनैः, समुपैति = मामुपसर्पति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**( ख ) भावार्थः** – मुनिपत्नीभिः समानधिकादिवयः क्रमानुसारेण तुल्यवयोभिः सीतेति जानकीति च वयसाधिकाभिः पुत्रवधूरिति च वृद्धाभिः अतिमधुरं व्यवह्रियमाणमिथिलानरेशपुत्री सीता शनैः शनैः मम समीपम् आगच्छति।

**विशेषः** – श्लोकेऽस्मिन् उपजातिछन्दः अस्ति।

(ततः प्रविशति सीता तापसी च)

**तापसी** – हला एसो दे कुडुम्बिओ। उव्वसप्प णं। ण सक्कं तुम एआइणिं पेक्खिदुं। [हला! एष ते कुटुम्बिकः। उपसर्पैनम्। न शक्यं त्वामेकाकिनीं प्रेक्षितुम्।]

**सीता** – हं अज्ज वि अविस्ससणीअं विअ मे पडिभादि। (उपसृत्य) जेदु अय्यउत्तो। [हम्, अद्याप्यविश्वसनीयमिव मे प्रतिभाति। जयत्वार्यपुत्रः]

**रामः** – मैथिलि! अपि जानासि पूर्वाधिष्ठानमस्माकं जनस्थानमासीत्। अप्यत्र ज्ञायन्ते पुत्रकृतका वृक्षाः ?

**सीता** – जाणामि जाणामि। आलोइअपत्तआ उल्लोअदव्वा दाणिं संवुत्ता। [जानामि जानामि। अवलोकितपत्रका उल्लोकयितव्या इदानीं सवृंत्ताः।]

**रामः** – एवमेवम्। निम्नस्थलोत्पादको हि कालः। मैथिलि! अप्युपलभ्यतेऽस्य सप्तपर्णस्याधस्ताच्छुल्कवाससं भरतं दृष्ट्वा परित्रस्तं मृगयूथमासीत्।]

**सीता** – अय्यउत्त। दिढं खु सुमरामि। [आर्यपुत्र! दृढं खलु स्मरामि।]

**रामः** – अयं तु नस्तपसः साक्षिभूतो महाकच्छः। अत्रास्माभिरासीनैस्तातस्य निवपनक्रियां चिन्तयद्भिः काञ्चनपार्श्वो नाम मृगो दृष्टः।

**सीता** – हं अय्यउत्त! मा खु मा खु एवं भणिदुं। (भीता वेपते) [हम् आर्यपुत्र! मा खलु मा खल्वेवं भणितुम्।]

**रामः** – अलमलं सम्भ्रमेण। अतिक्रान्तः खल्वेष कालः। (दिशो विलोक्य) अये कुतो नु –

**रेणुः समुत्पतति लोध्रसमानगौरः**
**सम्प्रावृणोति च दिशः पवनावधूतः।**
**शङ्खध्वनिश्च पटहस्वनधीरनादैः**
**सम्मूर्च्छितो वनमिदं नगरीकरोति॥४॥**

**प्रसङ्गः** – लङ्कातः प्रत्यावर्तनकाले नगरस्य समीपम् आगत्य प्रकृत्याः चित्रणं रामेण कृतमस्ति इत्यत्र वर्णितमस्ति।

**अन्वयः** – लोध्रसमानगौरः रेणुः समुत्पतति पवनावधूतः दिशः सम्प्रावृणोति च, पटहस्वनधीरनादैः सम्मूर्च्छितः शंखध्वनिः वनम् नगरीकरोति।

**संस्कृत-व्याख्या – ( क ) पर्यायशब्दाः** – लोध्रसमानगौरः = लोध्रतुल्यगौरवर्णयुक्तः, रेणुः = धूलिः, समुत्पतति = ऊर्ध्वं गच्छति, किंच, पवनावधूतः = वायुना चालितः, च = पुनः, दिशः सम्प्रावृणोति = सम्यगाच्छादयति, पटहस्वनधीरनादैः = पटहस्वनैः, धीराणां, वीराणां नादैः, सिंहनादैः, संमूर्च्छितः = सम्यक् वर्धितः, शंखध्वनिः = शंखनादः, इदं वनम् = इदमरण्यं, नगरीकरोति = नगरभावं जनयति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**( ख ) भावार्थः** – लोध्रपुष्पतुल्यगौरवर्णयुक्तः धूलिः ऊर्ध्वं गच्छति वायुना प्रसारितः ककुभः सम्यगाच्छादयति आनकशब्दैः वीरगर्जितैश्च सम्यक् वर्धितः शङ्खनादश्च एतत् दृश्यमानम् अरण्यं नगरतुल्यं करोति।

**विशेषः** – श्लोकेऽस्मिन् वसन्ततिलकाछन्दः अस्ति। तल्लक्षणमिदम् –

"उक्तावसन्ततिलका तभजा जगौ गः ॥"

(प्रविश्य)

**लक्ष्मणः** – जयत्वार्यः। आर्य!

**अयं सैन्येन महता त्वद्दर्शनसमुत्सुकः।**
**मातृभिः सह सम्प्राप्तो भरतो भ्रातृवत्सलः ॥५॥**

**प्रसङ्गः** – लङ्कातः आगमनकाले यदा पुष्पकविमानम् अयोध्यायाः समीपम् आगच्छति तदा एव लक्ष्मणः रामं वदति यत् रामस्य आगमनस्य समाचारं श्रुत्वा भरतः सेनासहितं मातृभिः सह अत्रैव आगच्छन् अस्ति इत्यत्र महाकविना भासेन वर्णितमस्ति।

**अन्वयः** – अयं भ्रातृवत्सलः त्वद्दर्शनसमुत्सुकः भरतः महता सैन्येन मातृभिः सह (च) सम्प्रातः।

**संस्कृत-व्याख्या – ( क ) पर्यायशब्दाः** – अयं = पुरो दृश्यमानः, भ्रातृवत्सलः = भ्रातृप्रेमी, त्वद्दर्शनसमुत्सुकः = तव = भवतः दर्शनम् = अवलोकनं, तस्मिन् समुत्सुकः = उत्कण्ठितः, भरतः = कैकेयीसुतः, महता = विशालेन, सैन्येन = सैन्यदलेन, मातृभिः = जननीभिः च, सह = साकं, सम्प्राप्तः = समागतः।

**( ख ) भावार्थः** – पुरोदृश्यमानः भ्रातृस्नेही भवदवलोकनार्थमुत्कण्ठितः कैकेयीपुत्रः विशालेन वहिन्या जननीभिश्च साकं समागतः।

**विशेषः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति। अत्र काव्यलिङ्गालंकारो विद्यते।

**रामः** – वत्स लक्ष्मण! किमेवं भरतः प्राप्तः।

**लक्ष्मणः** – आर्य! अथ किम्?

**रामः** – मैथिलि! स्वश्रूजनपुरोगं भरतमवलोकयितुं विशालीक्रियतां ते चक्षुः।

**सीता** – अय्यउत्त! इच्छिदव्वे काले भरदो आअदो। [आर्यपुत्र! एष्टव्ये काले भरत आगतः।]

(ततः प्रविशति भरतः समातृकः)

**भरतः** –

**तैस्तैः प्रवृद्धविषयैर्विषमैर्विमुक्तं**
**मेघैर्विमुक्तममलं शरदीव सोमम्।**
**आर्यासहायमहमद्य गुरुं दिदृक्षुः**
**प्राप्तोऽस्मि तुष्टहृदयः स्वजनानुबद्धः ॥६॥**

**प्रसङ्गः** – भरतः रामस्य आगमनस्य सूचनां प्राप्य अयोध्यातः पूर्वमेव रामेण सह मेलितुमागतः इत्यत्र महाकविना भासेन वर्णितमस्ति।

**अन्वयः** – अद्य तुष्टहृदयः स्वजनानुबद्धः अहं शरदि मेघैः वियुक्तम् अमलं सोमम् इव तैः तैः प्रवृद्धविषयैः विषमैः विमुक्तम् आर्यासहायं गुरुं दिदृक्षुः प्राप्तः अस्मि।

**संस्कृत-व्याख्या – ( क ) पर्यायशब्दाः** – अद्य तुष्टहृदयः = प्रसन्नमनाः, स्वजनानुबद्धः =



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

स्वजनानुयातः, अहं = भरतः, शरदि = शरत्काले, मेघैः = अभ्रैः, वियुक्तम् = अपगतावरणम्, अमलं = निर्मलं, सोमं = चन्द्रम्, इव = यथा, तैः तैः = प्रख्यातैः, प्रवृद्धविषयैः = नानाप्रकारैः, विषमैः = संकटैः, विमुक्तं = विरहितम्, आर्यासहायम् = आर्या सीता सहाया यस्य तं, गुरुं = पूज्यं, दिदृक्षुः = द्रष्टुमिच्छुः, प्राप्तोऽस्मि = समागतोऽस्मि।

**(ख) भावार्थः** – अस्मिन् दिवसे प्रसन्नमनाः स्वजनानुयातः भरतः शरत्काले अभ्रैः अपगतावरणं निर्मलं चन्द्रवत् नानाप्रकारैः वाण्यापि प्रकटयितुमशक्यैरयोग्यैश्च संकटैः रहितं भ्रातृजाया सीतया सह पूजनीयं रामं द्रष्टुमिच्छुकः आगतः अस्मि।

**विशेषः** – श्लोकेऽस्मिन् वसन्ततिलकाछन्दः अस्ति।

**रामः** – अम्बाः ! अभिवादये।

**सर्वाः** – जाद ! चिरं जीव ! दिट्ठिआ बड्ढामो अवसिदपडिण्णं तुमं कुसलिणं सह बहुए पेक्खिअ। [जात ! चिरंजीव। दिष्ट्या वर्धामहे अवसितप्रतिज्ञं त्वां कुशलिनं सह वध्वा प्रेक्ष्य।]

**रामः** – अनुगृहीतोऽस्मि।

**लक्ष्मणः** – अम्बाः ! अभिवादये।

**सर्वाः** – जाद ! चिरं जीव। [जात ! चिरं जीव।]

**लक्ष्मणः** – अनुगृहीतोऽस्मि।

**सीता** – अय्या ! वन्दामि। [आर्याः ! वन्दे।]

**सर्वाः** – वच्छ ! चिरमंगला होहि। [वत्से ! चिरमङ्गला भव।]

**सीता** – अणुग्गहिदह्मि। [अनुगृहीताऽस्मि।]

**भरतः** – आर्य ! अभिवादये, भरतोऽहमस्मि।

**रामः** – एह्येहि वत्स ! इक्ष्वाकुकुमार ! स्वस्ति, आयुष्मान् भव।

**वक्षः प्रसारय कवाटपुटप्रमाणमालिङ्ग मां सुविपुलेन भुजद्वयेन।**
**उन्नामयाननमिदं शरदिन्दुकल्पं प्रह्लादय व्यसनदग्धमिदं शरीरम्॥७॥**

**प्रसङ्गः** – परस्पराभिवादनकाले रामः भरतं वदति इत्यत्र महाकविना भासेन वर्णितमस्ति।

**अन्वयः** – कवाटपुटप्रमाणं वक्षः प्रसारय। सुविपुलेन भुजद्वयेन माम् आलिङ्ग, शरदिन्दुकल्पम् इदमाननम् उन्नमय, व्यसनदग्धम् इदं शरीरं प्रह्लादय च।

**व्याख्या – (क) पर्यायपदानि** – कवाटपुटं = कपाटसम्पुटं, प्रमाणं = विस्तीर्णं, यस्य तत् विशालकपाटवदायतं, वक्षः = उरोदेशं, प्रसारय =विस्तृतं कुरु, ततः सविपुलेन = अतिलम्बेन, भुजद्वयेन = बाहुयुगलेन, मां = रामम्, आलिंग = परिष्वजस्व, शरद् इन्दुकल्पं = शरच्चन्द्रवद्, आननं = मुखम्, उन्नमय = उन्नतं कुरु, व्यसनदग्धं = पितृमरणनिमित्तकेन दुःखेनोपहतम्, इदं शरीरं = मम कायः, प्रह्लादय = सन्तापात् निवृत्तिं यापय। अर्थात् तवाननदर्शनेन मे संतापी व्यपगमिष्यति।

**(ख) भावार्थः** – सम्पुटितकपाटतुल्यपरिमाण उरः प्रदेशं विस्तारय (विस्तृतं कुरु) अतिविशालेन बाहुयुगलेन मां (रामं) परिष्वजस्व (आलिङ्गनं कुरु)। शरच्चन्द्रसदृशम् एतत् नमत् मुखम् उत्तोलय। पितृमरणनिमित्तकेन दुःखेनोपहतं पुरोदृश्यमानं वपुः आनन्दय।

**विशेषः** – श्लोकेऽस्मिन् वसन्ततिलकाछन्दः अस्ति।

**भरतः** – अनुगृहीतोऽस्मि। आर्ये ! अभिवादये भरतोऽहमस्मि।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**सीता** – अय्यउत्तेण चिरसञ्चारी होहि। [आर्यपुत्रेण चिरसञ्चारी भव।]

**भरतः** – अनुगृहीतोऽस्मि। आर्ये! अभिवादये।

**लक्ष्मणः** – (आलिङ्गति) एह्येति वत्स! दीर्घायुर्भव। परिष्वजस्व गाढम्।

**भरतः** – अनुगृहीतोऽस्मि। आर्य! प्रतिगृह्यतां राज्यभारः।

**रामः** – वत्स! कथमिव?

**कैकेयी** – जाद! चिराहिलसिदो खु एसो मणोरहो। [जात! चिराभिलषितः खल्वेष मनोरथः।]

(ततः प्रविशति शत्रुघ्नः)

**शत्रुघ्नः** –

**विविधैर्व्यसनैः क्लिष्टमक्लिष्टगुणतेजसम्।**
**द्रष्टुं मे त्वरते बुद्धि रावणान्तकरं गुरुम्॥८॥**

**प्रसङ्गः** – रामेण सह मेलितुं शत्रुघ्नः आगच्छति इत्यत्र वर्णितमस्ति महाकविना भासेन।

**अन्वयः** – विविधैः व्यसनैः क्लिष्टम् अक्लिष्टगुणतेजसं रावणान्तकरं गुरुं द्रष्टुं मे बुद्धिः त्वरते।

**व्याख्या** – **(क) पर्यायपदानि** – विविधैः = नाना प्रकारकैः, व्यसनैः = संकटैः, क्लिष्टं = सम्पीडितं, अक्लिष्टगुणतेजसम् = अनुपहतगुणप्रभावं, रावणान्तकं = रावणहन्तारं, तं, गुरुं = श्रीरामं, द्रष्टुं = दर्शनार्थं, मे = मम, शत्रुघ्नस्य, बुद्धिः = मनः, त्वरते = शीघ्रतां करोति।

**(ख) भावार्थः** – नानाप्रकारकैः संकटैः सम्पीडितम् अनुपहतगुणप्रभावं रावणविनाशकं पूज्यमार्यरामं विलोकयितुं मम मनः शीघ्रतां करोति।

**विशेषः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति।

(उपगम्य) आर्य! शत्रुघ्नोऽहमभिवादये।

**रामः** – एह्येहि वत्स! स्वस्ति, आयुष्मान् भव।

**शत्रुघ्नः** – अनुगृहीतोऽस्मि। आर्ये! अभिवादये।

**सीता** – वच्छ! चिरं जीव। [वत्स चिरं जीव।]

**शत्रुघ्नः** – अनुगृहीतोऽस्मि। आर्य! अभिवादये।

**लक्ष्मणः** – स्वस्ति, आयुष्मान् भव।

**शत्रुघ्नः** – अनुगृहीतोऽस्मि। आर्य! एतौ वसिष्ठवामदेवौ सह प्रकृतिभिरभिषेकं पुरस्कृत्य त्वद्दर्शनमभिलषतः।

**तीर्थोदकेन मुनिभिः स्वयमाहृतेन**
**नानानदीनदगतेन तव प्रसादात्।**
**इच्छन्ति ते मुनिगणाः प्रथमाभिषिक्तं**
**द्रष्टुं मुखं सलिलसिक्तमिवारविन्दम्॥९॥**

**प्रसङ्गः** – प्रस्तुतश्लोकमाध्यमेन शत्रुघ्नः रामं वदति यत् वशिष्ठवामदेवौ सह अयोध्यायाः जनाः तीर्थोदकेन भवतः अभिषेकं कर्तुमिच्छन्ति इत्यत्र वर्णितमस्ति।

**अन्वयः** – मुनिगणाः तव प्रसादात् नानानदीनदगतेन मुनिभिः स्वयमाहृतेन तीर्थोदकेन प्रथमाभिषिक्तं



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

सलिलसिक्तम् अरविन्दम् इव ते मुखं द्रष्टुम् इच्छन्ति।

**व्याख्या – ( क ) पर्यायपदानि** – मुनिगणाः = ऋषयः, तव प्रसादात् = कृपया, नानानदीनदगतेन = भिन्नभिन्नपुण्यसलिलधारासम्बन्धिना, मुनिभिः = ऋषिभिः, स्वयम् आहृतेन = साक्षात् आनीतेन, तीर्थोदकेन = तीर्थजलेन, प्रथमाभिषिक्तं = प्राक्कृताभिषेकं, सलिलसिक्तं = जलाभ्युक्षितम्, अरविन्दं = कमलम्, इव = यथा, ते = तव, मुखम् = आननं, द्रष्टुमिच्छन्ति = अवलोकयितुं वाञ्छति।

**( ख ) भावार्थः** – ऋषिजनाः ते अनुग्रहात् ऋषिभिः साक्षात् आनीतेन भिन्नभिन्नपुण्यसलिलधारासम्बन्धिना तीर्थजलेन प्राक्कृताभिषेकं तव आननं जलाभ्युक्षितं कमलवत् अवलोकयितुं वाञ्छन्ति।

**विशेषः** – श्लोकेऽस्मिन् वसन्ततिलकाछन्दः अस्ति। अत्र उपमालङ्कारः अस्ति।

**कैकेयी** – गच्छ जाद ! अभिलसेहि अभिसेअं। [गच्छ जात ! अभिलषाभिषेकम्।]

**रामः** – यदाज्ञापयत्यम्बा। (निष्क्रान्तः)

(नेपथ्ये)

जयतु भवान्। जयतु स्वामी। जयतु महाराजः। जयतु देवः। जयतु भद्रमुखः। जयत्वार्यः। जयतु रावणान्तकः।

**कैकेयी** – एदे पुरोहिदा कञ्चुइणो पुत्तअस्स मे विजअघोसं वट्टअन्तो असीहि पूअन्ति [एते पुरोहिताः कञ्चुकिनः पुत्रकस्य मे विजयघोषं वर्धयन्त आशीर्भिः पूजयन्ति।]

**सुमित्रा** – पइदीओ परिचारआ सज्जणा अ पुत्तअस्स मे विजअं बड्ढअन्ति। [प्रकृतयः परिचारकाः सज्जनाश्च पुत्रकस्य मे विजयं वर्धयन्ति।]

(नेपथ्ये)

भो भो जनस्थानवासिनस्तपस्विनः ! शृण्वन्तु शृण्वन्तु भवन्तः

**हत्वा रिपुप्रभवमप्रतिमं तमौघं**
**सूर्योऽन्धकारमिव शौर्यमयैर्मयूखैः।**
**सीतामवाप्य सकलाशुभवर्जनीयां**
**रामो महीं जयति सर्वजनाभिरामः॥१०॥**

**प्रसङ्गः** – रामस्य अभिषेककाले नेपथ्यात् विजयघोषणा भवति इत्यत्र वर्णितमस्ति महाकविना भासेन।

**अन्वयः** – अप्रतिमं रिपुप्रभवं तमौघं शौर्यमयैः मयूखैः सूर्यः अन्धकारम् इव हत्वा सकलाशुभवर्जनीयां सीताम् अवाप्य सर्वजनाभिरामः रामः महीं जयति।

**व्याख्या – ( क ) पर्यायपदानि** – अप्रतिमम् = अनुपमं, रिपुप्रभवं = शत्रुसम्भव, तमौघं = तमसां दुःखानाम्, ओघं = वृन्दं, सूर्यः = रविः, अन्धकारमिव, शौर्यमयैः = पराक्रमरूपैः, मयूखैः = किरणैः, हत्वा = विनाश्य, सकलैः = सम्पूर्णैः, अशुभैः = अमंगलैः, वर्जनीयां = रहितां, सीतां = जानकीम्, अवाप्य = लब्ध्वा, सर्वजनाभिरामः = सकललोकप्रियः रामः, महीं = पृथ्वीं, जयति = स्वायत्तीकरोति, तस्य जयघोषणा क्रियते।

**( ख ) भावार्थः** – यथा भास्करः स्वकिरणैः तमं हन्ति तथैव पराक्रमरूपैः किरणैः शत्रुसंभवम् अतुलनीयं संकटस्य समूहं विनाश्य सम्पूर्णैः अमङ्गलैः रहितां जानकीं लब्ध्वा सकललोकप्रियः राघवः पृथ्वीं सर्वोत्कर्षेण शास्ति।

**विशेषः** – श्लोकेऽस्मिन् वसन्ततिलका छन्दः अस्ति। अत्र उपमालङ्कारः विद्यते।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**कैकेयी** – अम्महे ! पुत्तस्य मे विजअघोषणा बढ्ढइ । [ अम्महे ! पुत्रस्य मे विजय घोषणा वर्धते ।]

( ततः प्रविशति कृताभिषेको रामः सपरिवारः )

**रामः** – ( विलोक्याकाशे ) भोस्तात !

**स्वर्गेऽपि तुष्टिमुपगच्छ विमुञ्च दैन्यं**
**कर्म त्वयाभिलषितं मयि यत् तदेतत् ।**
**राजा किलास्मि भुवि सत्कृतभारवाही**
**धर्मेण लोकपरिरक्षणमभ्युपेतम् ॥ ११ ॥**

**प्रसङ्गः** – ऋषिभिः राज्याभिषेकपश्चात् रामः स्वतातस्य दशरथस्य स्मरणं कृत्वा यद् वदति तदत्र वर्णितमस्ति ।

**अन्वयः** – स्वर्गेऽपि तुष्टिम् उपगच्छ, दैन्यं विमुञ्च, त्वया मयि यत् कर्म अभिलषितं तत् एतत् सम्पन्नम् भुवि सत्कृतभारवाही राजा अस्मि, धर्मेण लोकपरिरक्षणम् अभ्युपेतम् ।

**व्याख्या – ( क ) पर्यायपदानि** – स्वर्गेऽपि = देवलोकेऽपि, तुष्टिम् = सन्तोषम्, उपगच्छ = लभस्व, दैन्यं = चिन्तां, विमुंच = त्यज । त्वया = पित्रा, मयि = रामे, यत्कर्म = राज्यारोहणरूपम्, अभिलषितम् = इच्छितं, तदेतत् = राज्याभिषेकलक्षणं, सम्पन्नं = निर्वृत्तं, भुवि = संसारे, सत्कृतभारवाही = पूजितस्य भारस्य बोढा, राजा = नृपः, अस्मि = भवामि, धर्मेण = धर्मपूर्वकेण, लोकपरिरक्षणं = प्रजाजनस्य संरक्षणं, मया अभ्युपेतं = स्वीकृतम् ।

**( ख ) भावार्थः** – भो तातः ! भवान् देवलोकेऽपि मद्राज्याभिषेकजन्मानन्दं लभस्व । मत्तः यत् राज्यारोहणरूपं कार्यं भवता इच्छितं तत् राज्याभिषेकलक्षणं निवृत्तम् । पृथिव्यां समाहृतराज्यरूपभारं वहनकर्त्ता भारवाही नृपः भवामि । निश्चयेन मया धर्मपूर्वकं जनानां परिपालनम् अङ्गीकृतम् ।

**विशेषः** – श्लोकेऽस्मिन् वसन्ततिलकाछन्दः अस्ति ।

**भरतः** –

**अधिगतनृपशब्दं धार्यमाणातपत्रं**
**विकसितकृतमौलिं तीर्थतोयाभिषिक्तम् ।**
**गुरुमधिगतलीलं वन्द्यमानं जनौधै-**
**र्नवशशिनमिवार्यं पश्यतो मे न तृप्तिः ॥ १२ ॥**

**प्रसङ्गः** – राज्याभिषेकपश्चात् राजपदे सुशोभितं रामं दृष्ट्वा भरतः तृप्तिं न प्राप्नोति पुनः पुनः रामं द्रष्टुमिच्छति इत्यत्र महाकविना भासेन वर्णितम् ।

**अन्वयः** – अधिगतनृपशब्दः धार्यमाणातपत्रं विकसितकृतमौलितीर्थतोयाभिषिक्तं गुरुम् अधिगतलीलं जनौघैः वन्द्यमानं नवशशिनम् इव आर्यं पश्यतः मे न तृप्तिः ।

**व्याख्या – ( क ) पर्यायपदानि** – अधिगतनृपशब्दः = अधिगतः स्वायत्तीकृतः, नृपः = राजशब्दवाच्यता, येन तं, धार्यमाणातपत्रं = धार्यमाणमातपत्रं, छत्रं यस्मिन् तं, समालम्बितराजधार्यश्वेतातपत्रं, विकसितकृतमौलिम् = उन्नमितमूर्द्धानं, तीर्थतोयाभिषिक्तं = तीर्थाहृतजलेनाभिषिक्तं, गुरुं = पूज्यम्, अधिगतलीलम् = आसादितश्रीकं, जनौघैः = लोकसमूहैः, वन्द्यमानं = प्रणम्यमानं, नवशशिनं = नवचन्द्रं, इव = यथा, आर्यं = रामं, पश्यतः, मे = मम भरतस्य, न तृप्तिः = नहि सन्तुष्टिः भवति ।

**( ख ) भावार्थः** – महाराजः इति उपाधिना विभूषितं राजछत्रं धार्यमाणं, तेजोमय मुकुटधारितं तीर्थजलैः



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

कृताभिषेकं पूज्यम् आसादितश्रीकं लोकसमूहैः प्रणम्यमानं नवचन्द्रवत् रामम् अवलोकयतः मम भरतस्य सन्तुष्टिः न भवति।

**विशेषः** – श्लोकेऽस्मिन् मालिनी छन्दः अस्ति। अत्र उपमाऽलंकारः अस्ति।

**शत्रुघ्नः** –

> **एतदार्याभिषेकेण कुलं मे नष्टकल्मषम्।**
> **पुनः प्रकाशतां याति सोमस्येवोदये जगत्॥ १३॥**

**प्रसङ्गः** – अभिषिक्तं रामं दृष्ट्वा शत्रुघ्नः प्रसन्नो भूत्वा यद् वदति तदत्र वर्णितमस्ति।

**अन्वयः** – आर्यस्य अभिषेकेण नष्टकल्मषं मे कुलं सोमस्य उदये जगत् इव पुनः प्रकाशतां याति।

**व्याख्या – ( क ) पर्यायपदानि** – आर्यस्य, अभिषेकेण = राज्यारोहणेन, नष्टं = विनष्टं, कल्मषं = कलंको यस्य तदेवं, मे = मम, कुलं = वंशः, सोमस्य = चन्द्रस्य, उदये = उदयकाले, जगत् = संसार, इव = यथा, पुनः = भूयः, प्रकाशतां = दीप्तिशालितां, याति = प्राप्नोति।

**( ख ) भावार्थः** – ज्येष्ठभ्रातुः रामस्य राज्यारोहणेन अपगतः कलङ्कः, तादृशः मम वंशः तथैव दीप्तिशालितां प्राप्नोति यथा चन्द्रस्य उदयकाले संसारः पुनः प्रकाशितः भवति।

**विशेषः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति। अत्र उपमाऽलङ्कारः अस्ति।

**लक्ष्मणः** – दिष्ट्या भवान् वर्धते।

(प्रविश्य)

**काञ्चुकीयः** – जयतु महाराजः। एषः खलु तत्रभवान् विभीषणो विज्ञापयति, सुग्रीवनीलमैन्दजाम्बवद्धनूमत्प्रमुखाश्चानुगच्छन्तो विज्ञापयन्ति – दिष्ट्या भगवान् वर्धते इति।

**रामः** – सहायानां प्रसादाद् वर्धत इति कथ्यताम्।

**काञ्चुकीयः** – यदाज्ञापयति महाराजः।

**कैकेयी** – धण्णा खु ह्मि। इदं अब्भुदअं अओज्झाअं पेक्खिदुं इच्छामि। [धन्या खल्वस्मि। इममभ्युदयमयोध्यायां प्रेक्षितुमिच्छामि।]

**रामः** – द्रक्ष्यति भवती। (विलोक्य) अये प्रभाभिर्वनमिदमखिलं सूर्यवत् प्रतिभाति। (विभाव्य), आः ज्ञातम्। सम्प्राप्तं पुष्पकं दिवि रावणस्य विमानम्। कृतसमयमिदं स्मृतमात्रमुपगच्छतीति। तत् सर्वैरारुह्यताम्।

(सर्वे आरोहन्ति)

**रामः** –

> **अद्यैव यास्यामि पुरीमयोध्यां**
> **सम्बन्धिमित्रैरनुगम्यमानः।**

**लक्ष्मणः** –

> **अद्यैव पश्यन्तु च नागरास्त्वां**
> **चन्द्रं सनक्षत्रमिवोदयस्थम्॥ १४॥**

**प्रसङ्गः** – यदा कैकेयी वदति यत् तत् राज्याभिषेकम् अहम् अयोध्यायामपि द्रष्टुमिच्छति तदा रामलक्ष्मणौ



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

द्वौ अपि कैकेयीं प्रति यद् वदत: तदत्र वर्णितं महाकविना भासेन।

**अन्वय:** – अद्यैव सम्बन्धिमित्रै: अनुगम्यमान: अयोध्यां पुरीं यास्यामि। अद्यैव च नागरा: उदयस्थं सनक्षत्रं चन्द्रम् इव त्वां पश्यन्तु।

**व्याख्या – ( क ) पर्यायपदानि** – अद्यैव = इदानीमेव, सम्बन्धिमित्रै: = सम्बन्धिभि:, बान्धवै:, मित्रै:, सुहृद्भि:, अनुगम्यमान: = अनुस्रियमाण:, अहम् = अयोध्यापुरीं यास्यामि = गमिष्यामि। अद्यैव = इदानीमेव च, नागरा: = अयोध्यावासिनो जना:, उदयस्थम् = उदयाचले स्थितं, सनक्षत्रं = नक्षत्रमण्डलसहितं, चन्द्रमिव = शशिनमिव, त्वां = श्रीरामचन्द्रं, पश्यन्तु = अवलोकयन्तु।

**( ख ) भावार्थ:** – अस्मिन्नेव दिने अहं राम: सम्बन्धिभि: भरतप्रभृतिभि: मित्रै: सुग्रीवविभीषणादिभिश्च अनुस्रियमाण: अयोध्यानगरीं गमिष्यामि। अग्रे लक्ष्मण: वदति यत् इदानीमेव च अयोध्यानिवासिन: जना: उदयाचलशिखरारूढं पक्षे अभ्युदयप्रवणं नक्षत्रगणपरिवृत्तं पक्षे सुहृद्बन्धुवृत्तं शशिनमिव श्रीरामचन्द्रम् अवलोकयन्तु।

**विशेष:** – श्लोकेऽस्मिन् इन्द्रवज्रा छन्द: अस्ति। अत्र उपमालङ्कार: विद्यते।

( भरतवाक्यम् )

**यथा रामश्च जानक्या बन्धुभिश्च समागत:।**
**तथा लक्ष्म्या समायुक्तो राजा भूमिं प्रशास्तु न: ॥ १५ ॥**

**प्रसङ्ग:** – नाटकस्य अन्ते भरतवाक्ये राजा चिरकालपर्यन्तं पृथिवीं पालयेत् इति अस्मिन् श्लोके वर्णितं महाकविना भासेन।

**अन्वय:** – यथा राम: जानक्या च बन्धुभि: च समागत: तथा लक्ष्म्या समायुक्त: न: राजा भूमिं प्रशास्तु।

**व्याख्या – ( क ) पर्यायपदानि** – यथा = येन प्रकारेण, राम: = राघव:, जानक्या = सीतया, च, बन्धुभि: = भरतादिभिश्च, समागत: = सम्मिलित:, तथा = तेन प्रकारेणैव, लक्ष्म्या = राज्यलक्ष्म्या, समायुक्त: = सम्पन्न:, न: = अस्माकं राजा, भूमिं = राज्यं पृथिवीं वा, प्रशास्तु = परिपालयतु।

**( ख ) भावार्थ:** – येन प्रकारेण राघव: सीतया बान्धवै: च सह सम्मिलितोऽभूत्। तेनैव प्रकारेण राजलक्ष्म्या सम्पन्न: अस्माकं नृप: पृथ्वीं परिपालयतु।

**विशेष:** – श्लोकेऽस्मिन् अनुष्टुप् छन्द: अस्ति।

( निष्क्रान्ता: सर्वे )

**इति सप्तमोऽङ्क:**

॥ प्रतिमानाटकं समाप्तम् ॥



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## अभ्यास-प्रश्नाः

### बहुविकल्पात्मकाप्रश्नाः –

**अधोलिखितां प्रश्नानां शुद्धोत्तरक्रमः कोष्ठकेषु लेखनीयः –**

१. प्रतिमानाटकस्य रचयिता कः ?
(क) कालिदासः (ख) श्रीहर्षः
(ग) भवभूतिः (घ) भासः ( )

२. कैकेयी पुत्रभरतस्य कृते किम् इच्छति ?
(क) चतुदर्शवर्षाणां वनगमनम् (ख) राजभवनम्
(ग) राज्याभिषेकम् (घ) मातुलगृहगमनम् ( )

३. सुमन्त्रः कः आसीत् ?
(क) सेवकः (ख) सचिवः
(ग) ब्रह्मचारी (घ) राजा ( )

४. भरतः रामेण सह मेलितुं कुत्र गतवान् ?
(क) दण्डकारण्यम् (ख) नैमिषारण्यम्
(ग) त्रिकूटपर्वतम् (घ) सुमेरुपर्वतम् ( )

५. कैकेयी रामस्य कृते कति वर्षाणां वनवासम् इष्टवती ?
(क) चतुर्दशवर्षाणाम् (ख) चतुर्विंशतिः वर्षाणाम्
(ग) षोडशवर्षाणाम् (घ) चतुर्दशदिनानाम् ( )

### अतिलघूत्तरात्मकप्रश्नाः –

१. महाराजदशरथस्य कति राज्ञ्यः आसन् ?
२. प्रतिमागृहे केषां प्रतिमाः स्थापिताः आसन् ?
३. रावणस्य कथनानुसारं काञ्चनमृगः कुत्र निवसति स्म ?
४. रामः अरण्ये कस्य श्राद्धकर्म कर्तुमिच्छति स्म ?
५. सीतायाः रक्षणकाले रावणेन सह युद्धं कुर्वन् कः वीरगतिं प्राप्तवान् ?

### लघूत्तरात्मकाः प्रश्नाः –

१. महाकविभासस्य नाटकानां नामानि लेखनीयानि।
२. ''प्रतिमानाटकस्य'' नामकरणस्य किं प्रयोजनम् ?
३. दशरथस्य चरित्रचित्रणं करणीयम्।
४. पंचमाङ्कस्य कथासारः संस्कृतेन स्वशब्दैः लेखनीयः।
५. कैकेय्याः चरित्रचित्रणं करणीयम्।

### निबन्धात्मकाः प्रश्नाः –

**१. अधोलिखितानां सूक्तीनां सप्रसङ्गं भावार्थाः संस्कृतेन लेखनीयाः –**
(क) न व्याघ्रं मृगशिशवः प्रधर्षयन्ति।
(ख) अनुचरति शशाङ्कं राहुदोषेऽपि ताराः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

(ग) स्व पुत्र: कुरुते पितुर्यदि क्व कस्तत्र भो विस्मय: ।
(घ) हस्तस्पर्शे हि मातर्गींमजलस्य जलाञ्जलि: ।
(ङ) विधिरनतिक्रमणीय: ।

२. **अधोलिखितानां पद्यानां संप्रसङ्गं संस्कृतव्याख्या: कार्या: –**
(क) शुल्के विपणितं ........................................... राज्यापहारिणाम् ॥
(ख) नागेन्द्रा: .................................................. पश्यन्त्यमी ॥
(ग) वल्कलैर्हृतराज्यश्री: ...................................... उदाहृतम् ॥
(घ) तीर्थोदकेन मुनिभि: ...................................... मिवारविन्दम् ॥
(ङ) कृत्वा स्ववीर्यसदृशं ..................................... इवावसन्न: ।

३. **अधोलिखितानां श्लोकानां सप्रसङ्गं भावार्था: संस्कृतभाषया लेखनीया: –**
(क) वेलामिमां ................................................ समुद्रं सह रावणेन ॥
(ख) आपृच्छ पुत्रकृतकान् .................................... वनैरुपरञ्जितेषु ॥
(ग) अपि सगुण ............................................. तावद् यथावत् ॥
(घ) पितुर्मे नौरस: ............................................ प्रकृतीनां न रोचते ॥
(ङ) यदि न सहसे .......................................... यतश्छलिता वयम् ॥

४. महाकविभासस्य व्यक्तित्वं कृतित्वञ्च वर्णयत ।
५. प्रतिमानाटकस्य सार्थकता संस्कृतेन लेखनीया ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# परिशिष्टम्

## कठिनशब्दानां सरलार्थः

### प्रथमोऽङ्कः

| | | |
|---|---|---|
| आकर्ण्य | = | श्रुत्वा। |
| विज्ञातम् | = | अवगतम्। |
| सन्निहितः | = | एकत्रितं सञ्जातम्। |
| अभिषेकसम्भारा | = | अभिषेक सामग्री। |
| त्वरताम् | = | शीघ्रता कर्त्तव्या। |
| वल्कलम् | = | वृक्षत्वक्। |
| अत्याहितम् | = | अनर्थम्। |
| निर्यातय | = | प्रत्यार्पणं कुरु। |
| प्रहृषितानि | = | आनन्दितानि। |
| तनूरुहाणि | = | शरीररोमावल्यः। |
| आदर्शः | = | दर्पणः। |
| प्रतीष्य | = | ज्ञात्वा। |
| भर्तृदारकः | = | राजपुत्रः। |
| उत्सङ्गे | = | क्रोडे / प्राञ्चले। |
| अवमुच्य | = | अवतार्य। |
| पटहः | = | 'नगाड़ा' इति वाद्ययन्त्रम्। |
| अवघटितः | = | ध्वनिं कृत्वा। |
| उद्घातः | = | विघ्नम्। |
| उदकम् | = | जलम्। |
| अलीकम् | = | असत्यम्। |
| भणति | = | वदति। |
| तर्कयसि | = | चिन्तयसि। |
| पारयति | = | शक्नोति। |
| निर्वण्य | = | सम्यक् अवलोक्य। |
| वारयसि | = | अवरुद्धं करोषि। |
| तूर्णम् | = | शीघ्रम्। |
| परित्रायताम् | = | रक्षतु। |
| उदर्केण मुणेन | = | सुपरिणामेण। |
| उपहतासु | = | कुत्सितेषु। |
| आर्जवम् | = | सरलस्वभावः। |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| | | |
|---|---|---|
| निक्षेप्तुम् | = | आरोपयितुम्। |
| निवृत्त: | = | स्थगित:। |
| परिवाद: | = | निन्दा। |
| अभिधीयताम् | = | कथ्यताम्। |
| मोहमुपगत: | = | मूर्च्छित: जात:। |
| पुरत: | = | समक्षम्। |
| विलोक्य | = | दृष्ट्वा। |
| आयास: | = | क्षुब्ध:। |
| जनयति | = | उत्पादयति। |
| अपण्डित: | = | मूर्ख:। |
| रोष: | = | क्रोध:। |
| प्रस्थित: | = | प्रस्थानं कृतम्। |
| सवाष्पम् | = | अश्रुसहितम्। |
| अविज्ञाय | = | न ज्ञात्वा। |
| अप्रभुत्वम् | = | अधीरता। |
| गृह्णातु | = | स्वीकरोतु। |
| व्यवसितम् | = | निश्चितम्। |
| वस्तव्यम् | = | निवास: कर्त्तव्य:। |
| प्रासाद: | = | राजभवनम्। |
| वार्यताम् | = | दूरं क्रियताम्। |
| विज्ञापयति | = | निवेदयति। |
| आछिद्य | = | चोरयित्वा। |
| परिधत्ते | = | धारयति। |
| प्रसीदतु | = | प्रसन्न: भवतु। |
| दयताम् | = | दयां कुरु। |
| संतप्यते | = | दु:खितो भवति। |
| गृहीत्वा | = | स्वीकृत्य। |
| पौरै: | = | नागरिकै:। |
| उत्सार्यताम् | = | अपसारयतु। |
| अपनयति | = | दूरं करोति। |
| यास्यामि | = | गच्छामि। |
| अवगुण्ठनम् | = | मुखाच्छादकवस्त्रम्। |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## द्वितीयोऽङ्कः

| | | |
|---|---|---|
| प्रविश्य | = | प्रवेशं कृत्वा |
| उपावर्तयितुम् | = | प्रत्यागन्तुम्। |
| उन्मत्तः | = | विक्षिप्तः। |
| प्रलपन् | = | विलापं कुर्वन्। |
| शयानः | = | शयनं कुर्वन्। |
| सर्वतः | = | सर्वस्मात् स्थानात्। |
| आरभ्य | = | आरम्भं कृत्वा। |
| संलक्ष्यते | = | दृश्यते। |
| कुतः | = | कस्मात्? |
| परिक्रम्य | = | परिभ्रम्य। |
| अवलोक्य | = | दृष्ट्वा। |
| समुद्भवम् | = | उत्पन्नम्। |
| निगृह्य | = | गृहीत्वा। |
| निष्क्रान्तः | = | निर्गतः। |
| पितरि | = | जनके। |
| विमुक्तस्नेहमपि | = | त्यक्तस्नेहमपि। |
| प्रयच्छत | = | दीयताम्। |
| प्रतिवचनम् | = | प्रत्युत्तरम्। |
| क्वासि | = | कुत्रासि? |
| ऊर्ध्वम् | = | उपरि। |
| कृतान्तहतकः | = | दुष्टयमराजः। |
| सन्तप्य | = | दुःखितं कृत्वा। |
| सरुदितम् | = | रोदनेन सहितम्। |
| प्रेक्षितव्याः | = | द्रष्टव्याः। |
| सहसा | = | अकस्मात्। |
| अवलम्बेते | = | अवलम्बनं कुरुतः। |
| गात्राणि | = | शरीराङ्गानि। |
| परामृशतः | = | मर्षणं कुरुतः। |
| समाश्वसिहि | = | धैर्यं धीयतां / धार्यताम्। |
| अभिहितम् | = | कथितम्। |
| भाषिष्ठाः | = | वदन्तु। |
| परिखिद्यते | = | कष्टते। |
| आलपति | = | वार्तालापं करोति। |
| स्पृष्टः | = | स्पर्शः। |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| | | |
|---|---|---|
| प्रतिभाति | = | प्रतीयते। |
| परिष्वजध्वम् | = | आलिङ्गनं कुरुत:। |
| आचम्य | = | आचमनं कृत्वा / प्रक्षाल्य। |
| परामृष्ट: | = | पतित:। |

## तृतीयोऽङ्कः

| | | |
|---|---|---|
| सम्मार्जनम् | = | स्वच्छता। |
| स्वपिति | = | शयनं करोति। |
| इदानीम् | = | अधुना। |
| उपगम्य | = | समीपमागत्य। |
| ताडयित्वा | = | ताडनं कृत्वा। |
| बुद्ध्वा | = | आगृय। |
| हनिष्यामि | = | मारयिष्यामि। |
| एहि | = | आगच्छ। |
| मोक्ष्यामि | = | त्यक्षामि। |
| ज्ञातुम् | = | अवगन्तुम्। |
| प्रतिमागेहम् | = | प्रतिमागृहम्। |
| द्रष्टुम् | = | अवलोकयितुम्। |
| भर्त्ता | = | स्वामी। |
| प्रकीर्णा: | = | विस्तृता:। |
| बालूका: | = | सिकता:। |
| विश्वस्त: | = | विश्वासयोग्य:। |
| आमात्य: | = | मन्त्री। |
| सूत: | = | सारथि:। |
| व्याधि: | = | रोग:। |
| परिताप: | = | सन्ताप:। |
| भिषज: | = | वैद्या:। |
| भुङ्क्ते | = | खादति। |
| निरशन: | = | विना भोजनम्। |
| स्फुरति | = | स्फुरणं / कम्पनं करोति। |
| वाहय | = | चालय। |
| निरूप्य | = | निरुद्ध्य। |
| सम्प्रति | = | इदानीम्। |
| विनाशमुदर्के | = | मृत्युसमाचार:। |
| प्रवेक्ष्यति | = | प्रवेशं करिष्यति। |
| निवेद्यते | = | निवेदनं क्रियते। |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| | | |
|---|---|---|
| आहुः | = | उक्तवन्तः। |
| प्रतिपन्नायाम् | = | आगतायाम्। |
| बाढम् | = | पर्याप्तम्। |
| स्थाप्यताम् | = | स्थापयतु। |
| प्रतिषेधयामि | = | निषेधं करोमि। |
| अभिधीयताम् | = | कथ्यताम्। |
| प्रवर्तयित्वा | = | कर्त्ता / प्रवर्त्तकः। |
| पर्याकुलः | = | व्याकुलः। |
| स्थाप्यन्ते | = | स्थापिताः क्रियन्ते। |
| आपृच्छे | = | पृच्छामि। |
| उपरतः | = | मृतः। |
| इतः | = | अत्र। |
| व्याहरति | = | व्यवहारं करोति। |
| अनपराद्धः | = | निरपराधः। |
| प्रयतिष्यते | = | प्रयत्नं करिष्यामि। |
| वन्दसे | = | वन्दनां करोषि। |
| शुल्कलुब्धा | = | शुल्ककारणम्। |
| विसृज्य | = | त्यक्त्वा। |

## चतुर्थोऽङ्कः

| | | |
|---|---|---|
| कौतुहलेन | = | जिज्ञासाकारणात्। |
| राज्यलुब्धया | = | राज्यलोभेन। |
| भट्टिनी | = | स्वामिनी। |
| अवतीर्य | = | अवतरणं कृत्वा। |
| ब्रूयाम् | = | कथयामि। |
| परेण | = | अन्येन। |
| क्लेदयति | = | आर्द्रयति। |
| दृश्यताम् | = | अवलोकयतु। |
| कश्चित् | = | कोऽपि। |
| स्वस्ति | = | कल्याणम्। |
| अनुगृहीतः | = | कृतार्थः। |
| अपेत्य | = | समीपं गत्वा। |
| अनुवर्तयितुम् | = | प्रत्युत्तरयितुम्। |
| चक्षुः | = | नेत्रद्वयम्। |
| सत्कृत्य | = | सत्कारं कृत्वा। |
| बेलाम् | = | समयम्। |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| | | |
|---|---|---|
| प्रकाशम् | = | प्रकटम्। |
| जयतु | = | जय: भवतु। |
| रुदन्तम् | = | रोदनं कुर्वन्तम्। |
| रोदयति | = | रोदनं करोति। |
| आप: | = | जलम्। |
| गृहीत्वा | = | स्वीकृत्य। |
| विशीर्यते | = | कुरुते। |
| शुश्रूषयितव्य: | = | सेवा कर्त्तव्या। |
| सुष्ठु | = | सम्यक्। |
| खलु | = | निश्चयेन। |
| इह | = | अत्र |
| प्रसीदतु | = | प्रसन्न: भवतु। |
| अभिहितम् | = | उक्तम्। |
| व्रणे | = | क्षतस्थाने। |
| प्रहर्त्तुम् | = | प्रहारं कर्त्तुम्। |
| मन्त्रयते | = | चिन्त्यते। |
| प्रतिग्रहीतुम् | = | पुन: स्वीकर्तुम्। |
| अनुष्ठास्यामि | = | अनुष्ठानं करिष्यामि। |
| आरुह्यताम् | = | आरोहणं करोतु। |

## पञ्चमोऽङ्क:

| | | |
|---|---|---|
| समुदाचार: | = | पूजनम्। |
| अनुक्रोशयिष्यामि | = | सिञ्चनं करिष्यामि। |
| अविघ्नम् | = | बाधारहितम्। |
| अदूरगता | = | समीपस्था। |
| मुखराग: | = | मुखालेपनम्। |
| निवपनक्रिया | = | पिण्डदानम्। |
| श्रद्धया | = | विधिपूर्वकम्। |
| परिव्राजक: | = | संन्यासी। |
| आत्मगतम् | = | मनसि। |
| पाद्यम् | = | चरणप्रच्छालनजलम्। |
| परिहृत्य | = | परित्यज्य। |
| लङ्घयामि | = | उल्लङ्घनं करोमि। |
| वाचानुवृत्ति: | = | प्रेमयुक्तसम्भाषणम्। |
| साङ्गोपाङ्गम् | = | अङ्गसहितम्। |
| अधीये | = | अध्ययनं कृतम्। |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| | | |
|---|---|---|
| अतिक्रम्य | = | अतिक्रमणं कृत्वा। |
| स्पृहा | = | उत्कण्ठा। |
| विरुढेषु | = | तृणेषु। |
| दर्भाः | = | कुशाः। |
| हिमवति | = | हिमालये। |
| अम्बुपायिनः | = | जलपायिनः। |
| अवलेपः | = | अहंकारः। |
| विद्युत्सम्पातः | = | तडित्कान्तिः। |
| काञ्चनपार्श्वः | = | काञ्चनपार्श्वनामकमृगः। |
| वृद्धिः | = | प्रभावः। |
| दिष्ट्या | = | सौभाग्येन। |
| उपावर्तमानम् | = | प्रत्यागतम्। |
| प्रत्युद्गच्छेति | = | आगमनस्वागताय। |
| सन्दिष्टः | = | प्रेषितः। |
| उपसर्पति | = | समीपे गच्छति। |
| अनवेक्ष्य | = | उपेक्षां कृत्वा। |
| आरोपयति | = | स्थापयति (धनुषि बाणम्)। |
| उत्पद्यते | = | उत्पन्नः भवति। |
| प्रतिष्ठते | = | प्रस्थानं करोति। |
| परित्रायस्व | = | रक्षतु। |
| शप्तः | = | शापग्रस्तः। |

## षष्ठोऽङ्कः

| | | |
|---|---|---|
| परित्रायन्ताम् | = | रक्ष्यताम्। |
| क्रव्यादीश्वरस्य | = | पक्षिराजस्य। |
| असिना | = | खड्गेन। |
| दक्षिणांसदेशे | = | दक्षिणस्कन्धे। |
| आगम्यताम् | = | आगच्छतु। |
| प्रथमः कल्पः | = | प्रथमं कार्यम्। |
| भर्ता | = | स्वामी। |
| आयासः | = | दुःखम्। |
| नियोगात् | = | आज्ञया। |
| अन्तरा | = | मध्ये। |
| वनौकसाम् | = | वनवासिजनानाम्। |
| तिर्यग्योनयः | = | पशुपक्षिणः। |
| ऐश्वर्यभ्रंशतुल्यता | = | राज्यभ्रष्टाः। |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| | | |
|---|---|---|
| चतुश्शालम् | = | अन्तःपुरम्। |
| प्रतिहारे | = | द्वारे। |
| प्रेक्षितुम् | = | द्रष्टुम्। |
| शब्दापयितव्या | = | आहूतव्या। |
| आचक्ष्व | = | कथय। |
| सरसि | = | सरोवरे। |
| हिंसितः | = | मारितः। |
| मन्युना | = | क्रोधेन। |
| मर्षयितव्यम् | = | क्षमा कर्त्तव्या। |
| कृत्स्नम् | = | सम्पूर्णम्। |
| उद्योजयामि | = | सिद्धं करोमि। |

**सप्तमोऽङ्कः**

| | | |
|---|---|---|
| चिरायते | = | विलम्बं करोति। |
| पुत्रकृतकाः | = | पुत्रसदृशाः। |
| वेपते | = | कम्पते। |
| अतिक्रान्तः | = | व्यतीतः। |
| एष्टव्ये काले | = | योग्यसमये। |
| अवसितप्रतिज्ञम् | = | प्रतिज्ञां पूर्णां कृत्वा। |
| आलिङ्गति | = | आलिङ्गनं करोति। |
| परिष्वजस्व | = | आलिङ्गनं कुरु। |
| गाढम् | = | प्रगाढम्। |
| प्रतिगृह्यताम् | = | स्वीक्रियताम्। |
| पुरस्कृत्य | = | उद्दिश्य। |
| आशीर्भिः | = | आशीर्वचनैः। |
| विभाष्य | = | चिन्तयित्वा। |



Downloaded from https:// www.studiestoday.com